No. 13.]

THE

VIZIANAGRAM SANSKRIT SERIES

UNDER THE SUPERINTENDENCE OF

ARTHUR VENIS M. A. OXON.

PRINCIPAL, SANSKRIT COLLEGE, BENARES.

THE

VEDÂNTAKALPATARU

OF

AMALÂNANDA

EDITED BY

RÂMAŚÂSTRÎ TAILAṄGA

PROFESSOR, SANSKRIT COLLEGE, BENARES.

VOL. XI.

Part I.

PRINTED, PUBLISHED AND SOLD BY

E. J. LAZARUS & Co., BENARES.

MAY BE HAD FROM GANESH DAS AND CO., CHOWK, BENARES:
JAYESTHARAM MUKUNDJI AND CO., BOMBAY:
OTTO HARRASSOWITZ AND M. SPIRGATIS LEIPZIG:
LUZAC AND CO., LONDON.

1895.

वेदान्तकल्पतरुः ।

निखिलदर्शनपारदृश्ववाचस्पतिमिश्रकृतभामतीव्याख्यारूपः
परमहंसपरिव्राजकाचार्यवर्यश्रीमदमलानन्दभगवदुपनिबद्धः ।

तत्र प्रथमो भागः प्रथमाध्यायान्तः ।

काशीस्थराजकीयप्रधानसंस्कृतपाठशालायां साहित्यशास्त्राध्यापकेन
मानवल्ल्युपाह्वतैलङ्गरामशास्त्रिणा सपरिष्कारं संशोधितः ।

काश्याम् ।

मेडिकल् हाल् नाम्नि यन्त्रालये
ई· जे· लाजरस् कम्पन्याख्येन मुद्रयित्वा प्रकाशितः ।

वैक्रमसंवत् १९५२ ।

श्रीः ।

वेदान्तकल्पतरुभूमिका ।

इह खलु धर्मार्थकाममोक्षाख्येषु चतुर्षु पुरुषार्थेषु चरम एव मौलिभूतः परीक्षकैः साधनीयश्चेति न परोक्षं परीक्षकवराणाम् । स चोपनिषद्भिर्निरूपितोऽपि केषांचिदेव महर्षीणां महर्षिकल्पानामेव वा तदर्थयाथार्थ्यावगमाद्गम्यो न पुनर्मानुषबुद्धीनामिति परमकारुणिकेन भगवता बादरायणेनोपनिषदुक्त एवार्थस्तात्कालिकानां कुशाग्रधिषणानां बोधाय चतुष्के*वेदान्तसूत्रैर्बीजरूपेण वेदान्तोपवने विप्रकीर्णः । अनन्तरं च विपरीतार्थग्राहिभिर्बहुविधैर्वादमात्रधुरन्धरैर्मत्सरिभि†र्भृज्ज्यमानानीव तानि सूत्रबीजानि परिगृह्य प्रयत्नेन भाष्यवारिणा समासिच्याऽद्वैतवेदान्तशास्त्रमङ्कुरतामापादयामासुरलौकिकधिषणा आचार्यवर्यशङ्करभगवत्पादाः । समनन्तरं च निखिलतन्त्रस्वतन्त्रो वाचस्पतिमिश्रो भाष्यकारतात्पर्यनिर्णयाय विरचय्य भामतीनामकं निबन्धरत्नं वर्द्धयामास किल महता प्रमेयेणामुं वेदान्ताङ्कुरम् ।

अस्य च भामतीग्रन्थस्यातिप्रौढतया मीमांसाबहुलतया च व्याख्यानसापेक्षतां पर्यालोच्य विपश्चिदपाश्चात्याः श्रीमत्परमहंसपरिव्राजकाचार्या अमलानन्दभगवन्तः प्रणीय कल्पतरुनामानं भामतीव्याख्यानरूपं प्रबन्धं मण्डयामासुर्वेदान्तोपवनम् । भाष्यभामत्योर्मुद्रणेन जाते जगति भूयस्यद्वैतवेदान्तसिद्धान्तप्रचारे न तावत् परमोपकारकस्यास्य ग्रन्थस्याऽप्रकाशतया स्थितिरुचितेति विचार्य प्रस्तूयते किलास्य मुद्रणेन प्रकाशनम् ।

एतद्ग्रन्थकृदमलानन्दयतिवर्यः कस्मिन्काले कतमं देशमलंचकारेत्यादि किं चित्तावद्विचार्यते इतिहासरसिकानां प्रमोदाय ।

---

* चत्वारोऽध्यायाः परिमाणमेषामिति संख्यायाः संज्ञासंघसूत्राध्ययनेष्विति कन् ।

† भास्करप्रभृतिभिः । दूष्यते चाद्यवद् यत्तु भास्कर इत्यादिना कल्पतरौ, यत्तु भास्करः प्रलापेत्यादिना विवरणप्रमेयसंग्रहे च तन्नामोल्लेखपूर्वकं तन्मतापकरणम् ।

लिखति किलायमस्मिन्नेव कल्पतरुग्रन्थे—

कीर्त्या यादववंशमुन्नमयति श्रीजैत्रदेवात्मजे
कृष्णे क्ष्माभृति भूतलं सह महादेवेन संबिभ्रति ।
भोगीन्द्रे परिमुञ्चति क्षितिभरप्रोद्भूतदीर्घश्रमं
वेदान्तोपवनस्य मण्डनकरं प्रस्तौमि कल्पद्रुमम् ॥ इति ।

सिद्धमस्मादयं ग्रन्थो यादववंशजजैत्रदेवसुतकृष्णराजराज्यसमये समुपनिबद्ध इति ।

लब्धप्रसरा वयमधुना ऽग्रे ऽपि किं चिद् गवेषयामः । तत्र को वा ऽयं यादववंशः कियत्कालपर्यन्तं वा अनुववृते एते चोपरितनश्लोकनिर्दिष्टनामानो महीपालाश्च के इति जिज्ञासायां प्रादुर्भवन्त्या

चतुर्वर्गचिन्तामणिग्रन्थे परिशेषखण्डे कालनिर्णयप्रकरणारम्भे—

राजा राजीवचक्षुर्विजयति* जगति स्फीतशीतांशुवंश-
प्रादुर्भूतः क्षितीशः क्षितिपतितिलकः सिङ्घणः सिंहशक्तिः ।
तत्पुत्रो जैत्रपालः समभवदवनीमण्डलाखण्डलश्री-
रस्माद्विस्मापकानां समजनि यशसां भाजनं कृष्णभूपः ॥
अस्ति प्रह्वक्ष्माभृद्भटमुकुटतटप्रांशुरत्नांशुदण्ड-
श्रेणीवेणीविराजत्पदयुगलगलद्गर्वनिर्वैरवीरः ।
तादृङ्निस्सीमसीमाद्भुतचरितशतारम्भदम्भाद्दृशाशा-
भित्तिन्यस्तप्रशस्तिस्तदनु तदनुजः† श्रीमहादेवभूपः ॥

इति महादेवभूपमन्त्रिणा हेमाद्रिसूरिणा विलिखिताभ्यां श्लोकाभ्याम् आदौ सिङ्घणः तत्पुत्रो जैत्रपालः तत्पुत्रौ कृष्णमहादेवौ तयोश्च कृष्णो ज्येष्ठो महादेवश्च कनीयान् भ्रातेति सिद्ध्यति । कल्पतरुकारेणापि महादेवः श्रीकृष्णदेवस्य भ्रातेति लिखितम् । तथा च समाप्तिश्लोकौ—

---

* अत्र परस्मैपदसाधुत्वं मृग्यम् । 'जगति विजयते' इति साधु ।

† तदनुजतनुजः—इति एशियाटिक्सोसाइटी (Bibliotheca Indica) मुद्रितपुस्तके ऽपपाठः "तदनु तदनुजन्मा श्रीमहादेव आसीत्" इति शासनपत्रे कल्पतरुसमाप्तिश्लोके च एवं दृष्टत्वात् । अन्यत्रापि जैत्रपालसुतत्वेन तस्य वर्णनात् । स्फुटीभविष्यत्येतदग्रे । एवं च मु० द्वि० पुस्तके ऽपि 'तदनु तदनुजः श्रीमहादेव आसी' दिति युक्तः पाठः ।

शास्त्राम्बुधेः पारगता द्विजेन्द्रा यद्वृत्तचामीकरवारिराशेः ।
ज्ञातुं न पारं प्रभवन्ति तस्मिन् कृष्णक्षितीशे भुवनैकवीरे ॥
आज्ञा महादेवनृपेण सार्कं पाति क्षितिं प्रागिव धर्मसूनौ ।
कृतो मया ऽयं प्रवरः प्रबन्धः प्रगल्भवाचस्पतिभावभेदी ॥ इति ।

अथ आदिमपुरुषत्वेन निर्दिष्टस्य सिङ्घणस्य पिता जैत्रपालः तस्यापि पिता भिल्लम इति एकस्माच्छिलालेखा*दवगम्यते । यथा तत्र श्लोकाः—

श्रीमद्यदुवंशाय स्वस्त्यस्तु समस्तवस्तुसहिताय ।
विश्वं यत्र त्रातुं जातो विष्णुः स्वतन्त्रस्तु ॥ १ ॥
गर्जद्गुर्जरकुञ्जरोत्कटघटासङ्घट्टकण्ठीरवो
लाटोरस्कविपाटपाटनपटुः कर्णाटहृत्कण्टकः ।
श्रीमान् भिल्लमभूपतिः समभवद्भूपालचूडामणि-
स्तस्माता ऽऽन्ध्रपुरन्ध्रिकान्तसुखहृच्छ्रीजैत्रपालो ऽभवत् ॥ २ ॥
लक्ष्मीकान्तलवः(यः) प्रतारितभवः श्रीजैत्रपालोद्भवः
सङ्ग्रामाङ्गणसञ्चितातिविभवः शास्ता भुवः सिङ्घणः ।
पृथ्वीशो मथुराधिपो रणमुखे काशीपतिः पातितो
येनासावपि यस्य भृत्यवटुना हम्मीरवीरो जितः ॥

अवततार पुरा पुरुषोत्तमो
यदुकुले जगतीहितहेतवे ।
जयति सोयमिमां सकलामिला-
मवति मामपि सिङ्घमहीपतिः ॥ इति ।

अमुमर्थं प्रमाणयति १२१२ शकलिखितं शासनपत्रम्† । तत्र श्लोकाः—
आस्ते पयोधिप्रतिमो यदूनां वंशः प्रतीतो भुवनत्रये ऽपि ।
यदुद्भवैर्भूपतिरत्नजातैरमण्डि पृथ्वी मृगलोचनेव ॥ ३ ॥
वंशे तस्मिन्नवनिवनितामौलिनेपथ्यरत्नं
जातः शीतद्युतिसितयशा भिल्लमः क्षोणिपालः ।

* अयं लेखः एकस्मिन् मठे उत्कीर्णः (See Epigraphia Indica, 1891, June, p. 340)
† See Jour. R. A. S. (Old Series) Vol. V.

अर्थिश्रेणीसुरविटपिनो यस्य विद्वेषिभूपा (पाः)
शोणश्रीकं पदकिसलयं नित्यमुत्तंसयन्ति ॥ ४ ॥

दिवं गते तत्र चरित्रधाम्नि महीमहेन्द्रे गुणरत्नसिन्धौ ।
अनन्तरं भूवज्र(ल)येकजैत्रः श्रीजैत्रपालो नृपतिर्बभूव ॥ ५ ॥

नम्रक्ष्मापालचूडाऽनणुमणिकिरणोदारकासारवीची-
क्रोडक्रीडत्पदाब्जः प्रथितयदुकुलाम्भोधिनीहारभानुः ।
तत्पुत्रो ऽथ प्रतापद्युमणिरुचिचयाचान्तविद्वेषियोषि-
च्चक्षुश्चञ्चद्विलासाञ्जनतिमिरभरः सिङ्घणो ऽभून्नरेन्द्रः ॥ ६ ॥

गते त्रिदशसुन्दरीपरिचलत्कटाक्षच्छ(च्छ)टा-
विलासरसपात्रतां महति तत्र पृथ्वीपतौ ।
अनङ्गरिपुशेखरस्फुरदमन्दमन्दाकिनी-
पवित्रचरितः क्षितेरजनि जैत्रपालः पतिः ॥ ८ ॥

अजनि विजयलक्ष्मीविद्युदुल्लासलीला-
विलसदसिपयोदः क्षोणिपालो ऽथ कृष्णः ।
मुकुलयति विचित्रं यस्य दृप्यत्प्रताप-
द्युमणिररिनृपाणां पाणिपङ्केरुहाणि ॥ १० ॥

शरदमलमरीचिश्रीसपत्नैर्यशोभि-
र्धवलितनिखिलाशाचक्रवालो नृपालः ।
नृपकुलकमलौघध्वंसनीहारपात-
स्तदनु तदनुजन्मा श्रीमहादेव आसीत्* ॥ १२ ॥ इति ।

एते एव श्लोकाः एकस्मिन् ११६४ शालिवाहनशकलिखिते शासनपत्रे† ऽप्युपलभ्यन्ते इति तदप्युपोद्बलकमत्र । अस्य च कृष्णदेवस्य रामचन्द्रदेव(रामदेव)नामा पुत्रः प्रतापशाली बभूवेत्यपि पूर्वनिर्दिष्टाभ्यां शासनपत्राभ्यामवगम्यते । तथा हि तत्र श्लोकः—

उन्मीलद्यदुवंशमौक्तिकमणिः क्षोणीन्द्रनारायणः
पृथ्वीपाल्नपितामहो निजभुजप्राकारभीमोदयः‡ ।

* See Jour. R. A. S. Vol. V.

† अस्यापि श्रीमननामा पुत्र आसीदित्यप्यग्रे स्फुटीभविष्यति ।

‡ एतैर्विशेषणै राज्ञो यथाक्रमं विष्णुब्रह्मशिवरूपत्ववर्णनेन प्रतापातिशयशालित्वं सूच्यते ।

खेलन्मालवमेदिनीपरिवृढप्रौढेभपञ्चाननः

सूनुः कृष्णमहीपतेर्विजयते श्रीरामचन्द्रो नृपः ॥ १३ ॥

अस्य च शङ्करदेव*भीमदेवनामानौ द्वौ पुत्रौ पुत्री चैका ऽऽसीदिति स्फुटीभविष्यति । एवमयमर्वाचीनो यादववंशक्रमः ।

अग्रे ऽप्यन्वेषणे क्रियमाणे पूर्वलिखितमहादेवनृपतिमन्त्रिणा हेमाद्रिणा ग्रथितस्य चतुर्वर्गचिन्तामणिनामकस्य ग्रन्थस्य द्वे पुस्तके लिखिते प्राचीने अशुद्धतरे समुपलब्धे, तत्र प्रथमे पुस्तके† व्रतखण्डारम्भे (ग्रन्थारम्भे) मङ्गलाचरणश्लोकास्तयो ऽग्रे च भिल्लमनृपप्रभृतिमहादेवनृपतिपर्यन्तानां राज्ञां यथाक्रमं नामनिर्देशपुरस्सरं वर्णनमस्ति । द्वितीये‡ तु चन्द्रप्रभृति महादेवनृपपर्यन्तानां विस्तरेण वर्णनं दृश्यते§ । तदनुसारेणायं यादववंशस्त्रिविधः सिध्यति अर्वाचीनो, मध्यमः, प्राचीनश्चेति । तत्रार्वाचीनस्तु उक्तप्रकार एव ।

तत्रैतेषां राज्यकालादिविचारे क्रियमाणे मुम्बापुरीप्रकाशितप्राचीनवृत्तान्तविचारपुस्तके, (Indian Antiquary) लन्दननगरमुद्रितप्राचीनवृत्तान्तपुस्तके च (Journ. Royal Asiatic Society, Old Series, Vol. IV. and V.) अपेक्षितं वृत्तान्तमुपलभ्य यावत्तत्प्रकाशनाय सज्जीभूतो ऽस्मि

---

* शङ्कलदेव इत्यप्यस्य नाम दृश्यते See Jour. R. A. S. Vol. V.

† इदं पुस्तकं काशीस्थयजुर्वेदियाश्रिम्करोपाह्वबालमुकुन्दशर्मणः ।

‡ इदं च पुस्तकं काशीस्थसहस्रबुद्ध्युपाह्वदामोदरशास्त्रिणः अतीवाशुद्धम् । अत एव अस्माद् वृत्तान्ते निखिले विशदे ऽपि तत्रत्यान् श्लोकान् साकल्येन प्रदर्शयितुं पुस्तकान्तरापेक्षा आसीत् परं डा· भाण्डारकरेतिहासपुस्तके अन्ते पाठभेदैः संयोज्य मुद्रितानां तेषां शुद्धानामुपलम्भात् तत्र तत्राग्रे तदनुसारेणैव पाठाः श्लोकाङ्काश्च प्रदर्शिताः ।

§ डा· भाण्डारकरमहाशयेनापि एव मेव पुस्तकेषु द्वैविध्यमुपलब्धम् । तत्र के चन श्लोकाः परस्परं मिश्रिताः समानानुपूर्वीका दृश्यन्ते । अत्र एकस्यैव ग्रन्थकारस्य तस्मिन्नेव ग्रन्थे कथं द्वैविध्यमिति शङ्का तु समुदेति परं हेमाद्रिः प्रथमं संक्षेपतो राजवंशवर्णनं कृत्वा आत्मनश्च वंशं निर्वर्ण्य ग्रन्थारम्भं चकार, समाप्ते च ग्रन्थे पुनरालोचनावसरे राजवंशवर्णनमादिमं न्यूनमाकलय्य तत्पूरयितुं विस्तरेण तद्वर्णनं कृत्वा तं ग्रन्थं तत्र समपूरयत् । यैस्तावत्पूर्वलिखितमेव पुस्तकं प्राप्य पुस्तकान्तरं लिखितं तत्क्रमे अयमधिको ग्रन्थो नास्ति यैस्तु तत्पूर्त्यनन्तरं लिखितं तत्क्रमे स ग्रन्थ उपलभ्यते इति कल्पने न किं चिद्बाधकं प्रतिभाति । किं बहुना केषु चित् पुस्तकेषु कविवंशवर्णनप्रभृत्येव ग्रन्थ उपलभ्यते यथा पुस्तकचतुष्टयाधारेण कलिकातानगरे एशियाटिक सोसाइटी द्वारा मुद्रिते (Bibliotheca Indica) पुस्तके, यत्र मङ्गलाचरणश्लोका अपि नोपलभ्यन्ते । कथमिदं सम्भवेद् यद् ग्रन्थकारः दानखण्डपरिशेषखण्डादिषु ग्रन्थावान्तरखण्डेषु मङ्गलाचरणं राजप्रशस्तिं च बाहुल्येन कृतवान् सकलग्रन्थारम्भे च न किं चिदपीति । तस्मादुपरितनकल्पनैव ज्यायसी प्रतिभाति ।

तावच्छ्रीमता डाक्टर् भाण्डारकरमहाशयेन लिखितमर्वाचीनदक्षिणेतिहास-पुस्तकं ग्रन्थकर्त्रा काशीस्थराजकीयसंस्कृतपाठशालाप्रधानाध्यक्षश्रीमदार्थर् वेनिससाहिबमहाशयेभ्य उपहाररूपेण प्रेषितं तैश्च प्रकृतोपकारकं तन्मत्वा मन्निकटे ऽनुग्रहात् प्रेषितम् । तच्च चोपलभ्य प्रकृतं विषयं विशदीकर्तुं निमित्तपूर्वं स्वलेखे क्व चित्तद्योजने भवेदयं विषयो विशदतर इति विचार्य ग्रन्थकृते साधुवादान् ददच्चानाङ्गलभाषाणां संस्कृतज्ञानां रसिकवराणां प्रमोदाय पूर्वोक्तसकलपुस्तकेभ्यः सारमाहृत्य प्रयते तदारम्भाय ।

तत्राऽर्वाचीनेषु सकलेषु शासनपत्रादिषु भिल्लमनृपप्रभृत्येव वंशादिवर्णनात् तावद्वृत्तान्तज्ञानेन प्रकृतसिद्धेस्तत एवारभ्य यादववंश्यानां राज्ञां वृत्तान्तो ऽनुक्रम्यते । तत्र—

भिल्लमः ।

पुरा किल यादववंशो होय्सल*नाम्ना प्रसिद्धो ऽतीव प्रबलतर आसीद्दक्षिणदेशे । तदा च राज्यसिंहासनारूढो **विष्णुवर्धन**नामा नृपो चालुक्यराजदेशमाक्रम्य कृष्णातीरे स्वशिबिरं निवेशयामास । परं स कालस्तस्य स्वमनोरथपूरणायानुकूलो नासीत् । योग्यतमो ऽयं चालुक्यनृपतिः स्वप्रभावं स्थिरीचकार सकले देशे । अग्रे च वस्तुवृत्तं संवृत्तं विपरीतम् । चालुक्यानां सामन्तैः **कलचुरिवंश्यैः** तद्बलं ह्रासितं, बभूव चास्मिन् समये **लिङ्गधारि** (लिङ्गायित)मतं प्रबलीभूतम् । अस्मिंश्च काले होय्सलराज्ये **वीरवल्लालमहीपतिः** पूर्वलिखितविष्णुवर्धनपौत्र आसीत् । स च चालुक्यवंश्यान्तिमभूपतेः **सोमेश्वरस्य**४ सेनानायकेन **ब्रह्म**(बोम्म)नाम्ना सहाभ्यमित्रीणो भूत्वा स्वसादिसैन्येन तं विजित्य **विज्जणाद्** विजित्योपार्जितान् देशान् स्ववशे चकार† ।

उदीच्याश्च यादवाः (प्रकृताः) स्वबलवृद्धये ऽभ्युत्थानाय न शैथिल्यं चक्रुः । **मल्लुगि**र्नाम राजा (भिल्लमपिता) **विज्जणेन** सह युद्धव्यापृतो ऽभूत् । **दादा** नामा ऽस्य गजसेनानायको निजप्रतापं निवेशयामास **कलचुरि**नृपाणामुपरि । तस्य चत्वारः पुत्रा **महीधर,जल्ह,साम्ब,गङ्गाधर**नामान

* होयसल-पोयसल-इत्यपि नामोपलभ्यते ।

† Ind. Ant. Vol. II. p. 300.

आसन् । येषु प्रथमो यादवानां सैनापत्ये स्वपितृक्रमप्राप्ते नियोजित: पराजिग्ये जिल्हणसैन्यम्* । चालुक्यराज्यं च समूलमुदमूलयदयं भिल्लम एव । यस्यावदानमेवं समुपलभ्यते—

य: श्रीवर्धनमाससाद नगरं चोणीपतेरन्तलात्
य: प्रत्यण्डकभूभृतं च समरे दुष्टं व्यजेष्ट चणात् ।
यो वा मङ्गलवेष्टक†चितिपतिं श्रीविल्लणं जघ्निवान्
कल्याणश्रियमप्यवाप्य विदधे यो होसलेशं व्यसुम्‡ ॥ ३८ ॥

अस्य जह्लो नाम महीधरानुज: सेनापतिरासीद्यत्सहायादस्य प्रभावो वर्णनीय: समपद्यत । यथा—

विजित्य विज्जणं याते सुरलोकं महीधरे ।
निनाय भिल्लमं जह्लो राजतां चयवर्जिताम् ॥ ११ ॥
गूर्जरभूभृत्कटके कण्टकविषमे ऽतिदुर्गमे येन ।
भगदत्तकीर्तिभाजा दुष्टगज: स्वेच्छया नीत: ॥ १२ ॥
मल्ल: पल्लवितोरुभीतिरभितस्त्वस्यद्बलो मैलुगि-
मुञ्ज: पिण्डितविक्रमस्त्रिभुवनब्रह्मा किल ब्राह्मण: ।
अन्नो नुन्नपराक्रमो विधुतभूर्भग्न: रणप्राङ्गणे
येनाकारि मुरारिविक्रमभृता किं किं न तस्योर्जितम्§ ॥ १३ ॥

एकस्मिन् शिलालेखे|| चास्य प्रताप एवं वर्णित:—

'गर्जद्दुर्जरकुञ्जरोत्कटघटासंघट्टकण्ठीरवो
लाटोरस्ककपाटपाटनपटु: कर्णाटकूटकण्टक: ।
श्रीमान् भिल्लमभूपति: समभवद्भूपालचूडामणि:' इति ।

---

* जह्लणसूक्तिमुक्तावलिभूमिका द्रष्टव्या । (Dr. Bhandarkar's Early History of the Deccan, p. 105). एतद्ग्रन्थस्य द्वे पुस्तके तद्व्याख्यायाश्चैकं पुस्तकं मद्रास् नगरे राजकीयपुस्तकालये वर्तन्ते see Madras Govt. Mss. List. under सूक्तिमुक्तावली p. 109.

† मङ्गलवेढम्-इति प्रसिद्धं नगरं पण्ढरपुरनिकटे वर्तते ।

‡ श्लो· हेमाद्रिव्रतखण्डराजप्रशस्तौ ।

§ एते श्लोका: जह्लणसू· मु· भू· द्रष्टव्या: । (See Dr. Bhand. Ear. Hist., Dec., p. 106.

|| Epigraphia Indica, June, 1891, p. 340.

एवं स्वप्रभावं कृष्णाया उत्तरकूले समवस्थाप्य देवगिरिनगरीं (दौलताबाद) स्वराजधानीं चकार, यतः प्रभृत्येते राजानो देवगिरीययादवा उच्यन्ते । यथा श्लो*.

स दण्डिकामण्डलमण्डयिचीमकम्प्यसम्पत्प्रभवैर्विलासैः ।
चक्रे पुरं देवगिरिं गिरीशप्रसादसंपादितदिव्यशक्तिः ॥ ३६ ॥

अयं च वृत्तान्तः ११०६ शकासन्नकाले संवृत्तः । अनन्तरमेतो ऽप्यधिकविजिगीषया पुरोदक्षिणं प्रचलितो निवारितश्च वीरबल्लालेन युयुधे धावोडप्रान्तगत लोक्किकुण्डिस्थाने, यत्र युद्धे जैत्रसिंहनामा (जितुगि) ऽस्य प्रायशो द्वितीयः पुत्रो दक्षिणबाहुत्वेनोपमितः (सेनापतिर्वा) वीरबल्लालेन हतो, ऽभूच्च वीरबल्लालः कुन्तलदेशाधिपतिः । एतद्वृत्तान्तज्ञापके लेखे १११४ शके (1192 A. D.) लिखितो ऽस्ति ।

१११२ शके अयं कर्णाटकदेशमुपार्जितवान् चकार चैकं दानपत्रम्† ।

एवं च ११०६ शकात् (1187 A. D.) १११३ शक(1191 A. D.) पर्यन्तमस्य राज्यसमयः सिध्यति‡ ।

जैत्रपालः १ ।

अयं तावद् भिल्लमपुत्रो महाप्रतापः १११३ शके राज्यासनमारुह्य पित्रा ऽऽरब्धेषु युद्धेषु व्यापृतस्तैलङ्गदेशनृपतिमतिप्रचण्डं निहत्य विजयी तद्देशराज्यमवाप । श्लो.

दीक्षित्वा रणरङ्गदेवयजने प्रोदस्तशस्त्रस्रुव-
श्रेणीभिर्जगतीपतीन् हुतवता येन प्रतापानले ।
तिल्लङ्गाधिपतेः पशोर्विशसनं रौद्रस्य रुद्राकृतेः
कृत्वा पुरुषमेधयज्ञविधिना लब्धस्त्रिलोकीजयः ॥ ४१ ॥ इति ।

---

* हे. व. राजप्रशस्तौ ।

† Ins. at Maltugi No. I. of I., p. 156. Jour. R. A. S. Vol. IV.

‡ केचित्तु ११११ शकात् १११५ पर्यन्तमेतद्राज्यं व्यवस्थापयन्ति (Jour. R. A. S. p. 5.) मतद्वये ऽपि पञ्चवर्षमित एवास्य राज्यसमयः सिध्यति । एतावति स्वल्पीयसि काले पूर्वलिखितसकलदेशविजयो नवीनराजधानीव्यवस्थापनमित्यादिश्चिरकालबहुलोद्योगसाध्यो वृत्तान्तः कथंकारं संवृत्त इत्यत्र तु संशयो भवति । नवीनत्वाद् डा. भाण्डारकरमहाशयविचारमनुसृत्योपरिनिर्दिष्टः कालो व्यवस्थापितः । अग्रे ऽप्युपरि तदनुसारेणैव व्यवस्थापयिष्यते ।

अयं भास्कराचार्यस्य ज्योतिषाचार्यस्य पुत्रं लक्ष्मीधरं स्वसभास्ताप्रधानपण्डितं चकारेति शिलालेखादवगम्यते* ।

लक्ष्मीधराख्यो ऽखिलसूरिमुख्यो वेदार्थवित्तार्किकचक्रवर्ती ।
क्रतुक्रियाकाण्डविचारसारो विशारदो भास्करनन्दनो ऽभूत् ॥ २० ॥

सर्वशास्त्रार्थदक्षोयमिति मत्वा पुरादतः ।
जैत्रपालेन यो नीतः कृतश्च विबुधाग्रणीः ॥ २१ ॥

एतस्य च राज्यसमयं १११३ शकात् ११३२ शकपर्यन्तं वदन्ति† ।

सिङ्घणः ।

११३२ शके जैत्रपाल१ पुत्रो ऽयं राज्यासनमध्यरुक्षत्, यस्य राज्ये यादववंशस्य महती समुन्नतिरासीत् । यथा श्लो ‡

प्रत्यर्थिपार्थिववधूनयनाम्बुपूरैः संसिच्यमान इव यादवराजवंशः ।
अत्युन्नतिं कलयति स्म जगत्प्रवीरे यस्मिन् भुजोष्मभरशालिनि शासति क्ष्माम् ॥

सिंह इत्यप्यस्य नामेति "सिंह इत्युदितविक्रम" इति पूर्वश्लोकानन्तरश्लोकाद् ज्ञायते ।

अस्य चैतत्कर्म वृत्तम् । यथा श्लो·

येनानीयत मत्तवारणघटा जज्जल्लभूमीभृतः
कक्कूला(द)वनीपतेरपहृता येनाधिराज्यश्रियः ।
येन क्षोणिभृदर्जुनो§ ऽपि बलिना नीतः कथाशेषतां
येनोद्दामभुजेन भोजनृपतिः काराकुटुम्बीकृतः ॥ ४३ ॥
यद्गुम्भागिरिकेसरी विनिहतो लक्ष्मीधरक्ष्मापति-
र्यद्ग्राहावलिभिः प्रसह्य रुरुधे धाराधराधीश्वरः ।

---

* अयं शिलालेखः एतस्य जैत्रपालस्य पुत्रे सिंहणे राज्यं कुर्वति निर्मितः । See Epigraphia Indica, 1891, June, p. 340.

† उपरिनिर्दिष्टो हि लेख एतत्पुत्रराज्यकालिकः तत्र ११२८ शको लिखितः, एवं च ११२८ शके सिङ्घणराज्ये सति तत्पितुरस्य जैत्रपालस्य ११३२ शकपर्यन्तं कथंकारं राज्ये स्थितिः स्थिरीभवेदतो ऽस्य राज्यसमयः १११३ शकात् ११२७ शकपर्यन्तमन्ततः स्थिरीकर्तव्य इति भाति ।

‡ रामचन्द्रकृतशासनपत्रे । Jour R. A. S. Vol. IV.

§ अयं मालवदेशराज इति संभावयन्ति Dr. Bhand. Hist. p. 106.

बल्लालक्षितिपालपालितभुवां सर्वापहारश्च यः

श्रीसिंहस्य महीपतेर्विजयते तद्बाललीलायितम् ॥ ४४ ॥

भास्कराचार्यपुत्रो लक्ष्मीधरः सिङ्घपितुर्जैत्रपालस्य सभास्तारो ऽभूदित्युक्तम्। तस्य पुत्रश्चङ्गदेव एतस्य राज्ञ आस्थानदैवज्ञो ऽभूदिति तस्मादेव लेखादवगम्यते। ११६६ शके अनेन कारित एकः शिलालेखो लभ्यते। तदस्य राज्यं ११३२ शकात् ११७० पर्यन्तमिति सिध्यति। एतद्विषये ऽन्योऽपि बहुलो वृत्तान्त उपलभ्यते परं वृथाविस्तरो नोपयुज्यते इति न लिखितः।

जैत्रपालः २।

अयं राज्यं कृतवान्न वेत्यत्र न को ऽपि प्रस्तरलेखः समुपलभ्यते परं स्वल्पकालं राज्यमकरोदिति तु अनुमीयते। यथा १११२ शकशासनपत्रे श्लो.

गते त्रिदशसुन्दरीपरिचलत्कटाक्षच्छटा-
विलासरसपात्रतां महति तत्र पृथ्वीपतौ।
अनङ्गरिपुशेखरस्फुरदमन्दमन्दाकिनी-
पवित्रचरितः क्षितेरजनि **जैत्रपालः पतिः** ॥

इति, चतुर्वर्गचिन्तामणौ (हेमाद्रौ) परिशेषखण्डारम्भे ऽपि "तत्पुत्रो जैत्रपालः समभवदवनीमण्डलाखण्डलश्रीः" इति लेख उपलभ्यते।

अतिस्वल्पकालं राज्यमनेन कृतमिति न तस्य कुत्राप्युल्लेखो दृश्यते। चतुर्वर्गचिन्तामणिव्रतखण्डराजप्रशस्तावपि सिंहणराज्यानन्तरं—

कृष्णो महादेव इति प्रतीतौ जातौ ततः **सिंहनृपस्य** पौत्रौ।
तयोस्तु पूर्वप्रभवः पुरस्तात्कृष्णो ऽतिविख्यातमतिर्नृपो ऽभूत् ॥ ४५ ॥

इति श्लोके पौत्रावेव निर्दिष्टौ न पुत्र इति तद्राज्यकालस्यातिस्वल्पत्वाज्जैत्रपालनाम नोल्लिखितमिति भाति।

लिखित१हेमाद्रिपुस्तके ऽपि सिङ्घणदेवराजानन्तरं—

अथ सकलकलानामालयः पालनाय क्षितितलमवतीर्णः पौर्णमासीशशीव।
अभवदवनिपालो **जैतुगि**र्नाम तस्मादसमसमरधाराद्वैषिभूपालकालः ॥ ० ॥

इति लेखदर्शनान्महावीरो ऽयं राज्यञ्चकारेत्यनुमीयते। तथा चास्य-राज्यसमयः ११६६ शकसमाप्तिसमयात् पूर्वमेव ऊनवर्षमात्रं व्यव-

स्थापनीयः, सर्वथा विश्वासस्तु न भवति । ११६४ शकशासनपत्रे च राजावली-निरूपणे नोट्टङ्कितमस्य नाम, सिङ्घणोत्तरङ्कृष्णदेवस्यैव वर्णनं लभ्यते, पूर्वप्रदर्शित ११९२ शकशासनपत्रे च पूर्वनिर्दिष्टः श्लोक उपलभ्यते, नोपलभ्यते च बलवत्तरं तद्राज्याऽलाभसाधकम्प्रमाणं यावत्तावत् सन्देह एवात्र श्रेयान् स्वल्पराज्यसमयकल्पनेन निश्चयो वा वरमैतिहासिकानाम्* ।

कृष्णदेवः ।

जैचपालपुत्रः सिङ्घणदेवपुत्रः कृष्णदेवः ११६६ शके राज्यसिंहासनमारुरोह । अनेन **वीसलमूलराजा**दीनाञ्जयः कृतः अभूच्चायं धर्मसंस्थापको ऽनेकक्रतुकारक इति १ हेमाद्रि॰ व्र॰ पुस्तकाल्लभ्यते । यथा ऽस्य वर्णने श्लो॰

येनाकारि विशाल**वीसल**चमूसंहारकालानले
हेलोन्मूलित**मूलराज**समरे निर्वैरमुर्वीतलम् ।
येनानेकमहाफल**क्रतु**कृता संवर्ध्यमानो ऽनिशं
क्षीणः कालवशात्पुनस्त्रयुगतां धर्मो ऽपि सम्प्रापितः ॥ ११४८ ॥

११६४ शकशासनपत्रे ऽप्ययं बहुक्रतुकारीति दृश्यते । श्लो॰

मखसम्प्रीणितैरिन्द्रपदाय महताङ्गणैः ।
समाहूत इव क्ष्मापः स प्राप सुरमन्दिरम् ॥ १० ॥

अस्य च लक्ष्मीदेवनामा जनार्दनसूनुः सहायको मन्त्री आसीदिति ज्ञायते । श्लो॰ †

विश्वत्राणपरायणः स्फुरदुरुस्वर्णार्चितार्थिव्रज-
स्तस्मादद्भुतविक्रमः समभवच्छ्रीलक्ष्मिदेवः सुधीः ।
मन्त्रैर्निर्जितदेवमन्त्रिधिषणेजायन्नयप्रक्रमे
राज्यं कृष्णमहीपतेरविकलं दत्वा स्थिरं यो व्यधात् ॥ २१ ॥

---

* एतदुत्तराधिकारिकृष्णदेवकारिते ताम्रपत्रे ११७५ शकः प्रमाथिसंवत्सरश्च लिखितः । सप्तमो ऽयमब्दस्तद्राज्यस्येत्यपि तत्र लिखितमस्ति · See Bhand. Hist. p. 112. एवं च ११६६ शके कृष्णदेवस्य राज्यारम्भो वक्तव्यः, सिंहणस्यापि राज्यसमाप्तिकालः स एवेति मध्ये एतद्राज्यकालः सिध्येत् चेत् स मासगणित एव कल्पनीयः ।

† जल्हणसूक्तिमुक्तावली । Dr Bhand. Hist. p. 113.

अगस्त्य इव यस्यासिर्न्यञ्चितक्षितिभृद्भुमौ ।
क्षिप्रं सो ऽप्यकरोन्नृत्यत्कबन्धं समरार्णवम् ॥ २२ ॥

अस्यैव राज्ये वेदान्तकल्पद्रुमनामकोऽयं निबन्ध उपनिबद्ध इति प्राक् प्रतिपादितम् ।

एवं च ११६६ शके राज्यमासाद्य ११८१ शकपर्यन्तमयं भूमण्डलमनुशशासेति सिद्धम् ।

महादेवदेवः ।

अयं कृष्णराजानुजो जैत्रपालपुत्रः कृष्णदेवे मृते तत्पुत्रस्य रामचन्द्रदेवस्याऽप्राप्ताधिकारस्य बालस्य राज्यसंरक्षणाय* स्वयं ११८२ शके राज्यासनमारूढवान्, कुर्वंश्च देवगिरौ राज्यं समुपार्जयद्दक्षिणदेशसाम्राज्यपदम् । अस्यैव राज्ञः सर्वश्रीकरणाधिपत्यपदे नियुक्तः प्रसिद्धतमो हेमाद्रिसूरि†श्चतुर्वर्गचिन्तामणिनामकं ग्रन्थरत्नं निर्मितवान् इति तस्मादेव ग्रन्थादवसीयते । यथा—

अस्ति शस्तगुणस्तोमः सोमवंशविभूषणम् ।
महादेव इति ख्यातो राजराजेव भूतले ॥ ६ ॥
तस्यास्ति नाम हेमाद्रिः सर्वश्रीकरणप्रभुः ।
निजोदारतया यश्च सर्वश्रीकरणप्रभुः ॥ १३ ॥

अनेन च तैलङ्गगुर्जरकोङ्कणकर्णाटलाटदेशेषु तत्तद्भूपतीन् प्रसभं विजित्य राज्यमक्रियतेत्यपि हे. व्र. राजप्रशस्तौ स्फुटम् । श्लो॰—

---

* युक्तं चैवं कल्पनम्, अन्यथा पितृक्रमप्राप्तं राज्यं तत्पुत्रं विहाय कनिष्ठभ्रातरं कथमिवाश्रयेत । युक्तं चास्य कृष्णराजमरणकाले बाल्यकल्पनम् । यतो ह्यस्य १२३१ शके (1309 A. D.) परलोकगतिर्निरूपयिष्यते । कृष्णदेवमरणसमयश्च ११८२ शके निरूपितः (1260 A. D.) तत्समये ऽस्य वयः ७ वर्षमितं चेत्कल्प्यते तथाप्यस्य ५० वर्षमितमायुः सिध्यति । तदुच्यते ऽस्य पितृमरणकाले बाल्य, मत एव चैतत्पितृव्यस्य महादेवदेवस्य राज्यपदारोहणम् ।

† हेमाद्रिरयं वत्सगोत्रः कामदेवपुत्रो वासुदेवपौत्रो महामात्यो ऽर्वाचीनानां सर्वेषामेव धर्मशास्त्रनिबन्धकाराणाम् । ततः किं चिदेवार्वाचीना माधवाचार्य(विद्यारण्य) प्रमुखा विपश्चिन्मौलिमणयो ऽपि सबहुमानं गृह्णन्ति किलास्य नाम । कालमाधवे कालनिर्णयप्रकरणे "यद्यप्यसौ हेमाद्रिप्रभृतिषु ग्रन्थेषु निर्णीतस्तथाप्यनेकत्र विप्रकीर्णस्यैकत्र सङ्ग्रहाय यत्नः क्रियते" इति लेखो दृश्यते, ऽतो माधवाचार्यो (विद्यारण्यः) ऽस्मादर्वाचीनः । माधवाचार्यसमयश्च १३१३ शके (1392 A. D.) निर्णीतो ऽस्माभिः । विजयनगरसंस्कृतपुस्तकावल्यां (Vizianagram Sanskrit Series) मुद्रितविवरणप्रमेयसंग्रहभूमिका दृष्टव्या ।

तैलङ्गक्षितिपालतूलनिचयप्रोत्क्षेपचण्डानलो
गर्जद्गूर्जरगर्वपर्वतभिदादम्भोलिदोर्विक्रमः ।
हेलोन्मूलितकोङ्कणक्षितिपतिः कर्णाटलाटोद्भव-
क्षोणीपालविडम्बनः स हि महादेवः कथं वर्ण्यते ॥४८॥

११६४ शकशासनपक्षे ऽपि दिग्विजयो ऽनेन कृत इति वर्णितम् ।

श्लो.—

विजित्य पाथोनिधिमेखलायास्तलं धरित्र्या निखिलं स भूपः ।
क्रमेण सुत्रामजिगीषयेव स्वर्गप्रयाणाभिमुखो बभूव ॥

अनेन १६ क्रतवः कृता इति हे. दा. खं. ज्ञायते । यथा

षोडश क्रतवो येन चक्रिरे चक्रवर्तिना ।
अपूर्णपञ्चयज्ञानां नृपाणां तेन का तुला ॥ ११ ॥

हे. व्र. श्लो.—

यो भोजदेवान्नृपतेः प्रतापी जग्राह वाहं मदमन्दसत्त्वः ।
सार्धं जनन्या सह जीवितेन सोमेश्वरस्यापि जहार राज्यम् ॥ ४६ ॥
यदीयगन्धद्विपगण्डपालीनिष्ठ्यूतदानाम्बुतरङ्गिणीषु ।
सोमः समुद्रप्लवपेशलो ऽपि ममज्ज सैन्यैः सह कोङ्कणेशः ॥ ५० ॥

वाहानामपि यस्य वैरिविषयेष्वातन्वतां धन्विना-
मा तिल्लिङ्गनृपाङ्गणादनुदिनं वाह्यादिलीला ऽभवत् ।

हेमाद्रिणा कृता (अन्यैः पण्डितैरेतन्नाम्ना कृता वा) ग्रन्थाः चतुर्वर्गचिन्तामणिर्धर्मशास्त्रे, वाग्भटकृतवैद्यकटीका आयुर्वेदरसायननाम्नी, वैष्णवसिद्धान्तप्रकाशस्य वोपदेवकृतस्य व्याख्या चेति । वोपदेवो ऽस्य सभापण्डित आसीत् । अनेनैव वोपदेवेन हरिलीलानामको भागवतनिरूपितार्थानां संक्षेपेण बोधको ग्रन्थः कृतः । तथा हि श्लो.—

विद्वद्धनेशशिष्येण भिषक्केशवसूनुना ।
हेमाद्रिर्वोपदेवेन मुक्ताफलमचीकरत् ॥
श्रीमद्भागवतस्कन्धाध्यायार्थादि निरूप्यते ।
विदुषा वोपदेवेन मन्त्रिहेमाद्रितुष्टये ॥

(Dr. Rajendralál's notices of Sanst. Mss., Vol. II, pp. 48 and 200)

अयं हेमाद्रिर्मन्त्रिपदमवापेत्यस्माल्लेखात् पूर्वोक्तरीत्या च सिद्धम् । अस्य सर्वराजकीयलेखाध्यक्षताख्या मन्त्रिता आसीदित्यैतिहासिकाः कल्पयन्ति । अत एव एतद्ग्रन्थे (चतुर्वर्गचिन्तामणौ व. खं) राजप्रशस्तिर्या लिखितपुस्तके दृश्यते सा सर्वथा प्रामाणिकी सिद्धा न तत्राऽप्रामाण्यकलङ्कशङ्कावकाशः ।

यस्तस्यैव रणे जहार करिणस्तत्पञ्चशब्दादिकान्
यस्तत्याज वधूवधादुपरतस्तद्भूभुजं रुद्रमाम्* ॥ ५१ ॥

पयठरपुरनगरे एकः शिलालेखः ११६२ शके प्रमोदसंवत्सरे लिखित उपलभ्यते, यत्र एतद्राज्ये काश्यपगोत्रोद्भवेन केशवशर्मणा ब्राह्मणेन **अप्तोर्यामयागः** कृत इति वर्णितमस्ति† ।

अस्य च **आमन**नामकः पुत्र आसीद् य एतदुत्तरं राज्यासनमाचक्राम, परं कृष्णदेवसुतेन **रामदेवेन** तत्स्ववशेऽचिरादेव कृतम्‡ । तत्र तस्य राज्यकालो नाम कश्चित् सिध्यतीति तदुल्लेखादुपरतम् । एवं च अस्य महादेवनृपतेः ११८३ शकात् ११६२ शकपर्यन्तं राज्यकालः स्फुटः ।

रामचन्द्रदेवः ।

पूर्वोक्तरीत्या कृष्णदेवपुत्रोऽयं महादेवदेवराज्यानन्तरं ११६३ शके राज्यासने समुपाविशत् । समाप्तिश्चात्रैव दक्षिणदेशीयस्वाधीनराज्यस्य । १२१६ शके प्रथमतो यवना दक्षिणदेशजये मतिमकुर्वन् । यथा तावदेतत्फलं समजनि तथा निरूपितं **फेरिश्ता**नामकेतिहासपुस्तके ।

६९३ यवनशके १२१६ शालिवाहनशके **अल्लाऊद्दीनः** जलालुद्दीनस्य दिल्लीपतेः आज्ञां गृहीत्वा करादेशम्प्रति प्रचलितस्तत्र च बल्बन्वंश्यानां प्रधानपुरुषाणां नामावलिसूचीं निर्मितवान् । अनन्तरं च ८००० सादिवरैः सह समीपतरेण पथा दक्षिणदेशराजस्य रामदेवस्य वंशपरम्परागतविभवसमृद्धस्याभ्यमित्रीणत्वे कृतमतिः दक्षिणसीमानम्प्राप्य राजधान्यभिमुखम्प्रतस्थे । इलीचपुरं प्राप्य तत्र किंचिद्विश्रम्य देवगिरिम्प्रति प्रचचाल । अस्मिंश्च काले **रामदेवः** अल्लाउद्दीनवृद्धिक्रमं श्रुत्वा स्वपुत्रेण सह राजधानीतो दूरङ्गतोऽपि शीघ्रमागत्य राजधानीद्वारे अल्लाऊ-

---

* वैद्यनाथकृते प्रतापरुद्रीये काकतीयवंशोद्भवो गणपतिमहाराजः स्वसुतायै रुद्रमायै स्वराज्यमर्पितवान् यां स रुद्र इति पुत्रत्वेन व्यवहृतवानिति "एवमेतत् अन्यथा कथमीश्वरप्रसादादृते निरङ्कुशं स्त्रीव्यक्तिविशेषस्य लोकाधिपत्यम् । एवं मानुषशम्भुना गणपतिमहाराजेनाभ्यन्तरस्यानुभावस्य सदृशमत्र पुत्र इति व्यवहारः कृतस्तदनुगुणा च पुत्र इत्याख्या" इति ग्रन्थाद् ज्ञायते । इयं प्रतापरुद्रं पुत्रत्वेनाददे । एवं च प्रतापरुद्रस्य तन्नामग्रन्थकर्तुर्वैद्यनाथस्यापि एतदुत्तरं रामचन्द्रराज्यसमकालिकत्वं निर्विवादम् । Dr. Bhand. Early Hist., p. 114.

† See Paithan Grant, Ind. Ant. Vol. XIV., p. 317.

‡ See Dr. Bhand. Early Hist., p. 115.

ट्टीनेन सह बहुना सैन्येन युयुधे परं महतीं हानिं प्राप्य पराजितोऽभूत् । ततश्च पराजितो रामदेवः ६०० मणपरिमितं मौक्तिकराशिं २ मणमितं मणिनिचयं १००० म० रजतं वार्षिकं करं च दातुं प्रतिश्रुत्य सन्धिं चकार । अग्रे च करदाने किं चिच्छैथिल्यं चकारेति सम्भाव्यते, यतो हि ७०६ यवनशके १२२८ शालि· शके ३०,००० सादिसैन्येन सह मल्लिककफूर-हगरदिनारीनामा वर्षत्रयात्संचितं करभारं संचेतुं प्रहितो बहुशो दक्षिणदिग्विभागं वशीकृत्य देवगिरिमुपरुरोध, रामदेवश्च तद्वशङ्गतस्तमनुजगाम आदिल्लीनगरं, यत्र स प्राप बहुमानं पुनस्थापितः स्वराजासने, राजरायन्पदव्या च भूषितो लेभे १लक्षटङ्कान् स्वगृहप्रत्यागमनव्ययकृते ।

ततः परं रामदेवः दिल्लीनगरे वार्षिककरप्रेषणे कदापि शैथिल्यं नाकरोद्यावज्जीवम् । ७०६ यवनशके १२३१ शालि· शके वारङ्गालीवशीकरणप्रसङ्गेन देवगिरावागतं मल्लिककफूरं खोज्याहाजीनामानं च यवनसेनापतिं रामदेवः स्वातिथ्येन समुपचचार, अस्मिन्नेव च वत्सरे परलोकं समुपजगामेत्येष रामदेववृत्तान्तः । तदेवं ११९३ शकात् (1271 A. D.) १२३१ शक (1309 A. D.) पर्यन्तं रामदेवराज्यं पर्यवस्यति ।

शङ्करदेवः ।

रामचन्द्रदेवस्य (रामदेव) पुत्रोऽयं १२३१ शके (1309 A. D.) राज्याधिकारमाससाद । अव्यवहितोत्तरे च संवत्सरे (1310 A. D.) यौ सेनापती रामदेवेन समुपचरितावभूतां तावेव पुनर्द्वारसमुद्रविजयप्रसङ्गाद्देवगिरिं मार्गेण सम्प्राप्तौ । तदाऽमुं शङ्करदेवं पितृकृतां मैत्रीं शिथिलयन्तमन्वभूताम् । अग्रेऽपि शङ्करदेवः प्रातिकूल्यं स्पष्टं समदर्शयत्, स्वविजयिभ्यः नियमितं वार्षिकं करं च नादाद्, यतः प्राप्तोऽन्य आक्रमणप्रसङ्गः । मल्लिककफूरनामा सेनापतिः चतुर्थपर्याये पुनर्दक्षिणदिशं प्रति प्रतस्थे ७१२ यवन· शके १२३४ शालि· शके (1312 A. D.) बलादाक्रम्य चामुं प्राणैर्वियोजयमास, प्रसारयामास च यवनराज्यं दाबुलनगराद् राइचुरमुडकलपर्यन्तं, देवगिरिं च निजावासस्थानमकरोत् । एवम् १२३१ शकात् (1309 A. D.) १२३४ शक (1312 A. D.) पर्यन्तं शङ्करदेवराज्यं सिद्धम् ।

अस्य च कनीयान् भ्राता **भीमदेव**नामको **भगिनी** चैका हरपालदेवपत्नी आसीत् । तत्र भीमदेवस्याग्रे किं वृत्तं तन्न विद्मः, परमस्य भगिनीपतिर्हरपालदेवः शङ्करदेवमरणोत्तरं पुनर्दक्षिणदेशे ऽभ्युत्थानमकरोत्, अत्रान्तरे च अल्लाउद्दीनः ७१६ यवनशके १२३८ शालि॰ शके (1316 A. D.) मृतः । अस्मिन्नेव रन्ध्रे **हरपालदेवः** पुनर्देवगिरिराज्यं प्राप ।

परमचिरादेव **मुबारकखिलजी**नामा यवनमहीपतिः स्वयमेव दक्षिणदेशं प्रति गतो मार्गे देवगिरिं प्राप्य युद्धोद्युक्तं हरपालमाचक्राम, कान्दिशीकं च तमनुद्रुत्य जीवग्राहं गृहीत्वा राजधान्या बहिर्द्वारे ऽस्य शिरो लम्बयामास ।

अयमेव च देवगिरियादवराजराज्यान्तिमकालः । अग्रे च **महम्मद्-तोग्लूक्** राजा एनं देवगिरिं स्वराजधानीमकरोद्, निवेशयामास च तत्र दिल्लीवास्तव्यं प्रजावर्गं, विदधे चास्य नाम **दौलताबाद्** इति यदद्य यावत्प्रसिध्यति ।

एतावता प्रबन्धेन अर्वाचीनो यादववंशवृक्ष एवं सिध्यति ।

१ भिल्लमः
२ जैत्रपालः १ (जैतुगिः)
३ सिङ्घणदेवः (सिंहदेवः)
४ जैत्रपालः २ (जैतुगिः)
५ कृष्णदेवः (कनरदेवः) — महादेवः ६
७ रामचन्द्रदेवः (रामदेवः) — आनमः
८ शङ्करदेवः (शङ्कलदेव) — भीमदेवः — सुता (हरपालभार्या)

इति ।

अथैषां राज्यसमयसुखावबोधाय प्रस्तारः प्रदर्श्यते ।

	राजानः	शकात् (A.D.)	शकः (A.D.)	राज्यवर्षाणि ।
१	भिल्लमः	११०६ (1187)	१११३ (1191)	५
२	जैत्रपालः	१११३ (1191)	११३२ (1210)	२०
३	सिङ्घणः	११३२ (1210)	११६६ (1247)	३८
४	जैत्रपालः	०	”	०
५	कृष्णदेवः	११६६ (1247)	११८२ (1260)	१४
६	महादेवः	११८२ (1260)	११९३ (1271)	१२
७	रामचन्द्रदेवः	११९३ (1271)	१२३१ (1309)	३६
८	शङ्करदेवः	१२३१ (1309)	१२३४ (1312)	४

समाप्तो ऽयार्वाचीनो यादववंशः ।

पूर्वलिखितहेमा· व्र· पुस्तकराजप्रशस्त्यनुरोधाद् मध्यमो ऽपि क्रममात्रेण प्रदर्श्यते, येन इतो ऽपि प्राचीनवृत्तान्तविचाररसिकानां विनोदः संभाव्यते ।

१ दृढप्रहारी
२ सेउणचन्द्रः १
३ धाडियसः १
४ भिल्लमः १
५ राजगिः १
६ वाडुगिः १
७ धाडियसः २
८ भिल्लमः २ (६२२ शके)
९ वेसुगिः १
१० अर्जुनः
११ भिल्लमः ३ (६४८ श·)
१२ वाडुगिः २
१३ वेसुगिः २
१४ भिल्लमः ४
१५ सेउणः २
१६ परम्मदेवः
१७ सिंहराजः
१८ मल्लगिः
१९ अमरगाङ्गेयः
२० गोविन्दराजः
२१ अमरमल्लगिः
२२ कालीयबल्लालः
२३ भिल्लमः ५ (१११३ शके) मृतः 1191 A. D.

हेमाद्रिव्रतखण्डराजप्रशस्तौ यथोपलब्धश्चन्द्रप्रभृतिप्राचीन-
यादववंश्यनृपक्रम इत्थम्—

१ इन्दुः	१६ सुयज्ञः	३१ जीमूतः	४६ भजमानः
२ बुधः	१७ उशना:	३२ विकृतिः	४७ विदूरथः
३ पुरूरवाः	१८ सितेयुः	३३ भीमरथः	४८ शूरराशिः
४ आयुः	१९ मरुतः	३४ नवरथः	(प्रतिक्षत्रः)
५ नहुषः	२० कम्बलबर्हिः	३५ दशरथः	४९ भोजः
६ ययातिः	२१ रुक्मकवचः	३६ शकुनिः	५० हृदिकः
७ यदुः	२२ पराजित्	३७ करम्भिः	५१ देवमीढुषः
८ क्रोष्टा	२३ ज्यामघः	३८ देवराजः	५२ शूरः
९ वृजिनीवान्	२४ विदर्भः	३९ देवक्षत्रः	५३ वसुदेवः
१० स्वाहितः	२५ क्रथः	४० मधुः	५४ कृष्णः
११ नृशङ्कुः	२६ कुन्तिः	४१ कुरुबलः	५५ प्रद्युम्नः
१२ चित्ररथः	२७ वृष्णिः	४२ पुरुहोत्रः	५६ अनिरुद्धः
१३ शशबिन्दुः	२८ निवृत्तिः	४३ आयुः	५७ वज्रः
१४ पृथुश्रवाः	२९ दशार्हः	४४ सात्वतः	५८ प्रतिबाहुः
१५ अन्तरः	३० व्योमा	४५ अन्धकः	

५९ सुबाहुः

पुत्रः ?	६० दृढप्रहारी	पुत्रः ?	पुत्रः ?
(पूर्वदिक्पतिः)	(दक्षिणदिक्प्रभुः)	(पश्चिमदिक्प्रभुः)	(उत्तरदिक्पतिः)

अत्रान्तिमाद् भिल्लमादर्वाचीनो यादववंशः प्रवृत्तः। उपरिनिर्दिष्टस्तु मध्यमो वंशः।

अत्र यत्रास्मः पार्श्वे शकाङ्का दत्तास्तद्वृत्तान्तज्ञानाय डा॰ भाण्डारकररचितदक्षिणेतिहास-पुस्तकं (Dr. Bhand. Early Hist.) द्रष्टव्यम्।

अत्र च डा॰ भाण्डारकरमहाशयेन धाडियसस्य ७ भ्रातृत्वेन भिल्लमो निर्दिष्टः। १३ वैसुगिनृपानन्तरमेतत्पुस्तकानुरोधादुपलभ्यमानोऽर्जुनो न प्रदर्शितः, केषां चित्रामान्तराण्यपि प्रदर्शितानि तन्मूलं तत एवावगन्तव्यम्। See Dr. Bhand.'s History, p. 104. अस्माभिस्तु हेमाद्र्यनुरोधाद्यथोक्तमेवोपन्यस्तम्। अयं सूक्ष्माक्षरमुद्रितो ग्रन्थः १७ पृ॰ अधो ज्ञेयः।

एतावता च प्रबन्धेनार्वाचीनकृष्णदेवनृपसमये ११६९ शकात् (1247 A. D.) ११८२ शका(1260.) भ्यन्तरे कल्पतरुरचनाकाल इति ग्रन्थकृतो ऽप्ययमेव समयः पर्यवसितः ।

एतद्ग्रन्थकारस्य **अमलानन्द** इति **व्यासाश्रम** इति च नामद्वयं तल्लेखादेव स्फुटीभवति । तथा हि अ॰ ३ पा॰ १ आरम्भे ।

कल्पादौ नूनमाशा हरिरसृजदमूः कीर्तिविस्तारविघ्नः
श्रीमद्**व्यासाश्रमस्य** प्रतिवदनमधात् कर्णयुग्मं विरञ्चिः ।
श्रोतुं वाचस्पतेर्वाक्सरणिषु विततं कल्पवृक्षं निबन्धं
भेजे वज्री सहस्रं चरितमभिनवं द्रष्टुमक्ष्यम्बुजानाम् ॥ १ ॥

इदम् **अमलात्मनः**—

मत्सरपित्तनिदानं विदुषामरुचिं चिकित्सति प्रबलाम् ।
स्वगुणगणामृतवर्षैः कृतिरेषा कर्णरन्ध्रगता ॥ २ ॥

अस्य च गुरुः **अनुभवानन्द** इत्यपि ग्रन्थे स्फुटम् । यथा॰ श्लो॰

स्वयंप्रभसुखब्रह्मदयारचितविग्रहम् ।
यथार्थो ऽ**नुभवानन्द**पदगीतं गुरुं नुमः ॥ ८ ॥ आरम्भे ।

अन्ते च ।

अमृतममृतेरप्यायासीदतीव सुदुर्लभं
प्रवरगुणवच्छिष्यैर्यच्च स्थितं सुखमाप्यते ।
अजनि कमला यस्माद्विद्यावपुर्निखिलार्तिहा
गुरुम**नुभवानन्दं** तं नौम्यपारकृपानिधिम् ॥ २ ॥

आनन्दात्मयतीश्वरप्रशिष्यो ऽयमित्यपि तत्रैवारम्भे ।

विद्याप्रश्रयसंयमाः शुभफला यत्सन्निधिस्थानतः
पुंसां हस्तगता भवन्ति सहसा कारुण्यवीक्षावशात् ।
आनन्दात्मयतीश्वरं तमनिशं वन्दे **गुरूणां गुरुं**
लब्धं यत्पदपद्मयुग्ममनघं पुण्यैरनन्तैर्मया ॥ ६ ॥

सुखप्रकाशा*दधीतविद्यो ऽयमित्यपि तत्रैव ।

---

* चित्सुखमुनिशिष्यस्तत्त्वदीपिकाटीकाकारः सुखप्रकाशः । एतत्कृततत्त्वदीपिकाटीका-पुस्तकं १५५८ वैक्रमवर्षलिखितं काशीस्थराजकीयसंस्कृतविद्यालयीयपुस्तकालये वर्तते ।

ग्रन्थग्रन्थ्यभिधाः स्फुटन्ति मुकुला यस्योदये कौमुदा
व्याकुर्वत्यपि यत्र मोहतिमिरं लोकस्य संशाम्यति ।
प्रोद्यत्तारकदिव्यदीप्ति परमं व्योमापि नीराज्यते
गोभिर्यस्य **सुखप्रकाश**शशिनं तं नौमि **विद्यागुरुम्** ॥ १० ॥

नासिकात्र्यम्बकक्षेत्रे निवसता ऽमलानन्दभगवता ऽयं ग्रन्थः कृत इति

"अस्ति किल ब्रह्मगिरिनामा गिरिवरः
त्रैयम्बकजटाजूटकलनाय विनिर्मिता ।
पाण्डुरेव पटी भाति यत्र गोदावरी नदी ॥
सकुसुमफलचूतरुद्धघर्मद्युतिकरपातवनालिषूपजाते ।
तमसि हरकिरीटचन्द्रनुन्ने धवलनिशा इव भान्ति वासराणि ॥"

एत*द्व्याख्यानावसरे **परिमले**† अप्पयदीक्षितानां "नासिका-त्र्यम्बकस्थाने निवसद्भिराचार्यै‡रयं ग्रन्थः कृत इति प्रसिद्धिः" इति लेखादवगम्यते । (परि· पृ· १४७ पं· ११–१२)

आस्तां तावत् प्रस्तुतोपयोगिन्यप्यप्रस्तुता चिन्ता, प्रस्तुतं तावदनुसरामः ।

तदमलानन्दसंग्रथितममुं **कल्पतरु**ग्रन्थं काशिकराजकीयसंस्कृतपाठालयस्थे द्वे पुस्तके, एकं च सहस्त्रबुद्धुपाह्वदामोदरशास्त्रिणो भामतीसहितम्, अन्यच्च काशीस्थपण्डितवरशिवकुमारमिश्रपुस्तकं संपूर्णम्, इतरे द्वे एकं काशीस्थतारकाश्रममठस्थं चतुस्सूच्यन्त,मितरच्चेदानीं देशं गतस्य पं· राममूर्तिशास्त्रिणस्तैलङ्गाक्षरलिखित,मित्येवं षट् पुस्तकानि गृहीत्वा मुद्रयितुमुपक्रान्तो ऽस्मि । प्रदर्शितवांश्चास्मि तत्र तत्रोपलब्धान् पाठभेदानधः, अन्तरान्तरागतेषु पूर्वमीमांसोत्तरमीमांसाधिकरणेषु प्रदर्शितवानस्मि तन्मूलस्थानानि, प्रतिपृष्ठं च तद्गतविषयं निर्दिष्टवानस्मि, प्रत्यधिकरणं चाधिकर-

* कल्पतरुः । पृ· ८४ ।

† अयं च परिमलग्रन्थः सकलशास्त्रपारदृश्वभिरप्पयदीक्षितैर्विरचितः कल्पतरुव्याख्यारूपो मयैव संशोध्य सपरिष्कारं विजयनगरसंस्कृतपुस्तकावल्यां (Vizianagram Sanskrit Series). मुद्र्यमाणो ऽनेन सहैव विदुषां नयनपथं यास्यतीत्याशासे ।

‡ अप्पयदीक्षितः परिमले कल्पतरुकारमेवाचार्यपदेन वारं वारं व्यपदिशति ।

यान्तर्गतानि सूत्राण्यधः प्रदर्श्य तन्नामानि सङ्ख्यां च लिखितवानस्मि, प्रतिपृष्ठं प्रान्तभागे भामत्यां तद्ग्रन्थलाभसौकर्याय भामतीपृष्ठाङ्कांश्चान्तरान्तरा निवेशितवानस्मि, प्रतीकानां प्रत्यभिज्ञासौकर्याय स्थूलाक्षरैस्तान् विशदीकृतवानस्मि, सङ्कलिततत्संख्यामपि च स्फुटीकृतवानस्मि । एवं सपरिष्कारं सावधानं च संशोध्य मुद्रणोत्तरं पुनरप्येकवारं निध्याय मद्दृष्टिमतिदोषेण मुद्रकजनदोषेण वा ऽवशिष्टा अशुद्धीः पृथक् शुद्धिपत्रं निर्माय निःसारितवानस्मि, मद्भ्रातृचरणैश्च महामहोपाध्यायश्रीदगङ्गाधरशास्त्रिभिः क्व चिदुपलब्धाऽशुद्धिप्रबोधनेन च सुतरामनुगृहीतोऽस्मि । एवमपि यच क्व चिन्मादृशाल्पज्ञजनदृष्टिमतिदोषसुलभसंभवा मुद्रकदोषसुलभा वा ऽशुद्धयो दृग्गोचराश्चेद्विपश्चितां तर्हि गुणगृह्यैस्तैः प्राथमिके ऽत्र मुद्रणे भवेयुरेव ताः क्षान्ता इति बाढं विश्वसन्नस्मि ।

पुनः पुनः कालातिपाताऽसहिष्णुभिर्विपश्चिद्भिस्तद्दिदृक्षुभिः परिचोदितो विचार्य मुद्रितस्य भागस्य प्रथमाध्यायसमाप्त्यन्तं सम्पूर्णग्रन्थार्धं तावत्पर्यन्तमेवैकं खण्डं साम्प्रतं विद्वद्वराणां पुरत उपहारीकरोमि । यावच्छक्यमवशिष्टखण्डस्यापि तथा करणे सत्वरं प्रयतिष्ये अर्थये च जगदीश्वरान्निखिलान्तरायपरीहारम् । आस्ते तावदिदानीमिदमेव विज्ञाप्यं यदेवं महता प्रबन्धेन सुपरिष्कृत्य मुद्रितो ऽयं यथार्थनामा **वेदान्तकल्पतरु**र्विलसतु सुहृदयहृदयालवाले, ददातु नैःश्रेयसं फलं तदभिलाषुकाणां, भवेच्च ग्रन्थकारस्य मामकीनस्यापि परिश्रमस्य साफल्यमिति विज्ञाप्य सकलवेदान्तप्रतिपाद्यं सर्वव्यापकं तद्देवान्तरं ज्योतिः प्रसादयामीति । शुभम् ।

वाराणस्याम्
वैक्रमसंवत् १९५२

मानवल्ल्युपाह्वस्तैलङ्ग-
रामशास्त्री ।

समन्वयाख्यप्रथमाध्यायान्तर्गताऽधिकरणसूची ।

· तत्र प्रथमे पादे

द्वितीयपादे

तृतीयपादे

* इदं व्यासाधिकरणमालानुसारेणाधिकरणान्तरम् । ग्रन्थकारेण प्रत्यधिकरणमिव एतदधिकरणादिमसूत्रं न प्रतीकतो निर्दिष्टमतो ऽनुमीयते दहराधिकरणे एव स एतदन्तर्भावं मन्यते इति । तदनुरोधादेव पुस्तके तस्य अधिकरणान्तरत्वेन प्रदर्शनं न कृतम् ।

प्रथमाध्यायगताधिकरणसूत्रसंख्या ।

पादे ।	अधिकरणानि ।	सूत्राणि ।	आदितः अधि० ।	आदितः सूत्राणि ।
१	११	३१	११	३१
२	७	३२	१८	६३
३	१४	४३	३२	१०६
४	८	२८	४०	१३४

कल्पतरुपुस्तके सांकेतिकचिन्हविवरणम् ।

अ·	अध्यायः
पा·	पादः
सू·	सूत्रम्
अधि·	अधिकरणम्
आ·	आह्निकम्
जै· सू· जैमिनिसू·	जैमिनिसूत्रपाठः
व्या· सू· व्याससू·	व्याससूत्रपाठः
पु· पा·	पुस्तकपाठः
मु· पु· पा·	मुद्रितपुस्तकपाठः
तै· पु· पा·	तैलङ्गाक्षरपुस्तकपाठः
आ· मु· जै· न्या· मा· पु·	आनन्दाश्रममुद्रितजैमिनीन्यायमालाविस्तरपुस्तके
मु· भा· पु·	मुद्रितभामतीपुस्तके
परि· पु·	परिमलपुस्तके
१ पु·	सहस्रबुद्ध्युपाह्वदामोदरशास्त्रिपुस्तकं भामतीसहितम् प्राचीनं शुद्धं च
२ पु·	काशीस्थराजकीयपाठालयस्थं प्राचीनम् पुस्तकम्
३ पु·	काशीस्थराजकीयपाठालयीयपुस्तकं समूलं नातिप्राचीनम्
४ पु·	काशीस्थतारकाश्रममठस्थम् चतुःसूत्र्यन्तं सपरिमलम्
५ पु·	काशीस्थपण्डितवरशिवकुमारमिश्रपुस्तकं शुद्धम् प्राचीनं च
कल्प·	कल्पतरुः
श्लो·	श्लोकः
टि०	टिप्पणी
पृ·	पृष्ठम्
पं·	पङ्क्तिः

टि० प्रान्त (Margin) गता अङ्का एशियाटिक् सोसाइटी (Bibliotheca Indica) मुद्रितभामतीपुस्तकानुसारात् स्थापिताः ते च स्थूलाः पृष्ठाङ्काः सूक्ष्माश्च पङ्क्त्यङ्का वेदितव्याः ।

शुद्धिपत्रम् ।

पृ·	प·	अशुद्धम् ।	शुद्धम् ।
६ ।	२५	प्राप्तत्वन	प्राप्तत्वेन
१५ ।	६	प्रपञ्चा	प्रपञ्चो
१६ ।	१	सामानाधिकरण्ये	समानाधिकरणे
१७ ।	१३	निवृत्यर्थ-	निवृत्त्यर्थ-
१९ ।	२७	क्षपकतया	क्षेपकतया
२२ ।	७	त्क्वाप्रत्यय-	क्त्वाप्रत्यय-
३२ ।	२३	उपकरकत्वात्	उपकारकत्वात्
३४ ।	२३	उतर-	उत्तर-
३५ ।	शिरसि Heading	काम्यष्टीनां	काम्येष्टीनां
४५ ।	६	व र्ताम्	वर्तताम्
४८ ।	१७	अत्रोत	अत्रेति
५३ ।	७	सम्भमः	संभवः
५५ ।	१६	नानात्वस्यष्टत्वात्	नानार्थस्येष्टत्वात्
५७ ।	३	विभुत्व-	विभक्तत्व-
६१ ।	५	अग्नोषोमीया	अग्नीषोमीयाः
६४ ।	१५	उतम-	उत्तम-
६५ ।	१८	सिद्ध-	सिद्धे
६६ ।	१	भवताति	भवतीति
६९ ।	१०	प्रकरणा-	प्रकरण-
७१ ।	२१	कुम्भाटेवं	कुम्भादेवं
७३ ।	१३	उपलक्षणात्	उपलक्षणत्वात्
८० ।	१३	बाधे-	बाधो
८१ ।	शिरसि Heading	वेदान्तेक-	वेदान्तैक-
८२ ।	८	लक्षस्य	लक्ष्यस्य
८४ ।	१३	शङ्कद्योती	शङ्काद्योती
८५ ।	†टि·	शब्धो	शब्दो
८६ ।	१	शब्दापक्रमात्	शब्दोपक्रमात्
९० ।	१५	प्रतातापि	प्रतीतापि
९४ ।	५	साधानस्य	साधनस्य
९८ ।	६	लवेन	प्लवेन
१०३ ।	१२	ज्ञात	ज्ञानं
१०८ ।	१२	समुदायकत्वात्	समुदायवत्त्वात्
११२ ।	२३	प्रधानप्रत्ययार्थं	प्रधानं प्रत्ययार्थं
११३ ।	१	मीलयस्त्वित्यर्थं	मीलयन्त्वित्यर्थः
११४ ।	§टि·	नेतरो० १५ मान्त्र० १६ तस्मिन्नस्य	मान्त्र० १५ नेतरो १६ । अस्मिन्नस्य
११६ ।	२१	चतुराय-	चतुरय-
१२७ ।	*टि·	उभयस्मि- न्नवि-	उभयस्मि- न्नप्य वि-
१३१ ।	†टि·	उपासना-	उपासा-
१३४ ।	२४	इत्यादि ष्ये	इत्यादिभाष्ये
१३५ ।	८	जावा-	जीवा-
१३५ ।	‖टि·	कर्तृव्यग्र-	कर्तृव्यग्र-
१४९ ।	९	षिज्ञा-	षिज्ञो
१५८ ।	७	एताश्च	एतांश्च
१६० ।	१४	प्रताता	प्रतीता
१६४ ।	१७	ब्रह्मणः	ब्रह्मणः
१६५ ।	१८	सा च क्वें-	सा च क्वे-
१७० ।	२२	बुद्ध्यपपादने	बुद्ध्युपपादने
१७३ ।	२२	साध्यव्याप्तेः	साध्याऽव्याप्तेः
१७४ ।	८	निजुन्हवे	निजुन्हुवे
१७६ ।	१५	जगम्भ	जगभ्म
१७९ ।	शिरसि Heading	वाक्यभ्यो	वाक्येभ्यो
१८३ ।	१२	प्रतिनीत्वा	प्रति नीत्वा
१९० ।	१८	वाक्यन	वाक्येन
१९१ ।	शिरसि Heading	तिवीता-	निवीता-
१९५ ।	१	उत्सर्जेद्	उद्धर्जेद्
१९८ ।	४	संभावा-	संभवा
२०० ।	२	तिच्चयमः	तच्चियमः
२०४ ।	१७	सामासार्थ- संख्या० इति ।	समासार्थः सं- ख्या० इति
२०८ ।	२५	सृष्टा	सृष्टाः
२१२ ।	†टि·	समाकर्षा	समकर्षात्
२१५ ।	२५	कर्तेति शब्द	कर्तेति शब्दे

प्रान्ताङ्कशुद्धिपत्रम् ।

अशुद्धाः		शुद्धाः		
पङ्क्तौ	अङ्काः	अङ्काः	पङ्क्तौ	पृष्ठे
४	३ । २२	३ । २२	३	५
१६	४ । ११	४ । १	१७	५
	६ । २	६ । ३	७	७
	,, । १८	५३ । १८	६	४१
	५७ । ५	५७ । ६	२४	४२
५	६२ । १०	६२ । १०	६	४७
	,, । १८	,, । २४	२४	६४
	८३ । २३	८३ । ४	१	६५
	,, । ६	१०३ । ६	२१	८०
	११० । ६	११० । ६	२१	८७
	११७ । १५	११० । १५	२७	८८
२	१११ । २१	१११ । २१	३	९०

अशुद्धाः		शुद्धाः		
पङ्क्तौ	अङ्काः	अङ्काः	पङ्क्तौ	पृष्ठे
११	११२ । ८	११२ । ८	१२	९०
२१	११३ । ६	११३ । ६	२२	९०
	१६२ । ६१	१६२ । ६	१४	१३२
	२३ । १३	२२३ । १३	२४	१६१
	२४० । २	२४० । १	२१	१६६
	२५२ । ११	२५३ । ११	१४	१७६
	,, । १२	,, । २१	२०	१८४
	२८८ । १२	२८८ । १५	१५	२००
	२६६ । ८	२६६ । १८	२४	२०४
	३२४ । १	३०४ । १	२६	२११
	३२० । १६	३२० । २३	१५	२२३

वेदान्तकल्पतरुः ।

ॐ नमः परमात्मने ।

यदज्ञातं जीवैर्बहुविधजगद्विभ्रमधरं
वियद्यद्वद्बालैस्तलमलिनतायोगि कलितम् ।
तदुन्मुद्रज्ञानप्रततसुखसद्ब्रह्म परमं
नमस्यामः प्रत्यक् श्रुतिशतशिरोभिः प्रकटितम् ॥ १ ॥
बोधाभीषुशतैरबोधतिमिरं हृद्व्योमगं दारयन्
प्रज्ञावारिधिमुन्नतिं च गमयन्सोमः सदोदेति यः ।
तं संसारसहस्ररश्मिजनितक्लेशापहं दक्षिणा-
मूर्तिं निर्मलयोगिचिन्त्यचरणाम्भोजं भजे शङ्करम् ॥ २ ॥
माद्यन्मोहमहेभकुम्भदलनप्रोद्भूतसन्मौक्तिक-
द्योतालंकृतसत्सुखाद्वयवपुः श्रीमान्नृकण्ठीरवः ।
प्रह्लादोक्तगिरः प्रमाणनविधौ दिव्याकृतिः स्तम्भतो
निर्यातः प्रकटीभवेत्स हृदयाम्भोजे ममाखण्डितम् ॥ ३ ॥
ललितैः पदविन्यासैर्या नृत्यति विबुधवदनरङ्गेषु ।
सच्छास्त्रवेदवाद्यैः सरस्वतीं तां नमस्यामः ॥ ४ ॥
भजमानविघ्नभित्तिप्रभित्तिकुद्दालमिव करेण रदम् ।
दधतं महागणेशं प्रणौमि सकलेष्टसंपदं ददतम् ॥ ५ ॥
यन्न्यायसूत्रग्रथितात्मबोधसौरभ्यगर्भश्रुतिपद्ममाला ।
प्रसाधयत्यद्वयमात्मतत्त्वं तं व्यासमाद्यं गुरुमानतोस्मि ॥ ६ ॥
वेदान्तार्थतदाभासक्षीरनीरविवेकिनम् ।
नमामि भगवत्पादं परहंसधुरन्धरम् ॥ ७ ॥
स्वयम्प्रभसुखब्रह्म*दयारचितविग्रहम् ।
यथार्थानुभवानन्दपदगीतं गुरुं नुमः ॥ ८ ॥

---

* सुखं ब्रह्मेत्यादिः पाठः २–५ पु० ।

विद्याप्रश्रयसंयमाः शुभफला यत्संनिधिस्थानतः
पुंसां हस्तगता भवन्ति सहसा कारुण्यवीक्षावशात् ।
आनन्दात्मयतीश्वरं तमनिशं वन्दे गुरूणां गुरुं
लब्धं यत्पदपद्मयुग्ममनघं पुण्यैरनन्तैर्मया ॥ ९ ॥
ग्रन्थग्रन्थ्यभिधाः स्फुटन्ति मुकुला यस्योदये कौमुदा
व्याकुर्वत्यपि यत्र मोहतिमिरं लोकस्य संशाम्यति ।
प्रोद्यत्तारकदिव्यदीप्ति परमं व्योमापि नीराज्यते*
गोभिर्यस्य सुखप्रकाशशशिनं तं नौमि विद्यागुरुम् ॥ १० ॥
वैदिकमार्गे वाचस्पतिरपि सम्यक् सुरचितं चक्रे ।
नयविजितवादिदैत्यः स जयति विबुधेश्वराचार्यः ॥ ११ ॥
रूढोऽयं वेदकाण्डान्नयमयविटपो भूरिशाखाविचारः
सद्वर्णानन्तपर्णः† समुदितपरमब्रह्मबोधप्रसूनः ।
साक्षाद्वस्तावचेयं ददद्मृतफलं जीवविश्वेशवीन्द्रैः
संसाराकोत्थितापप्रमथननिपुणस्तन्यते कल्पवृक्षः ॥ १२ ॥
कीर्त्या यादववंशमुन्नमयति श्रीजैत्रदेवात्मजे
कृष्णे क्ष्माभृति भूतलं सह महादेवेन संबिभ्रति ।
भोगीन्द्रे परिमुञ्चति क्षितिभरप्रोद्भूतदीर्घश्रमं
वेदान्तोपवनस्य मण्डनकरं प्रस्तौमि कल्पद्रुमम् ॥ १३ ॥

श्रीमच्छारीरकव्याख्यायाः प्रारिप्सितायां अविघ्नसमाप्त्यादिसिद्धये शास्त्रप्रतिपाद्यां परां देवतां प्रणमन् शास्त्रीयविषयादि‡ दर्शयति **अनिर्वाच्येति** । एका ह्यविद्या अनादिर्भावरूपा देवताधिकरणे§ वक्ष्यते अन्या पूर्वपूर्वविभ्रमसंस्कारस्तदविद्याद्वितयं सत्त्वासत्त्वाभ्याम् अनिर्वाच्यं सचिवं सहकारि यस्य तत्तथा । तत्सचिवता ब्रह्मणस्तद्विषयता तदाश्रयास्तु जीवा एवेति वक्ष्यते । न चाविद्यासाचिव्ये ब्रह्मणो ऽनीश्वरत्वमुपकरणस्य स्वातन्त्र्याविघातकत्वादित्याह **प्रभवत इति** । अतत्त्वतो ऽन्यथाभावो विवर्तः । न

---

* नीराजते इत्यसंगतः पाठः २ पु० ।
† सद्वर्णाद्दीर्घपर्णः इति ३-५ पु० । १ पु० पाठान्तरत्वेनैवं प्रदर्शितम् ।
‡ शास्त्रीयमित्यसमस्तः पाठः २ पु० ।
§ व्याससूत्र० अ० १ पा० ३ सू० २६-३३ ।

केवलं भूतानां ब्रह्मविवर्त्तत्वमपि तु जीवानामपि चराचरशरीरोपाधिकानां तत्प्रतिबिम्बत्वेन* तद्विवर्त्ततेत्याह **यतश्चेति** । अथ वा भूतसृष्टिवद्भौतिकसृष्टेरपि हिरण्यगर्भद्वारा ब्रह्मैव कर्तृ इत्यनेनोक्तम् । एवमज्ञान†विपर्यस्तत्वाभ्यां विषयत्वमुक्त्वा प्रयोजनतामाह **अपरिमितेति** ॥ १ ॥

जगद्विवर्त्ताधिष्ठानत्वेन ब्रह्मणः सर्वकर्तृत्वमुक्त्वा सर्वज्ञत्वं ज्ञानपदसूचितं वेदकर्तृत्वादिना साधयति **निःश्वसितमिति** । वीक्षणमात्रेण सृष्टत्वाद्भूतानि वीक्षितम् । हिरण्यगर्भद्वारा साध्यं चराचरं वीक्षणाधिकप्रयत्नसाध्यस्मितसाम्यात्स्मितम् । सर्वज्ञत्वसिद्ध्यर्थं चेतनधर्मसुप्तिमत्त्वेन चेतनतां सम्भावयति **अस्य चेति** । यद्वा विना ऽऽयासेन नामरूपसृष्टिप्रलयकर्तृत्वाद् ब्रह्मानेन स्तुतम् ॥ २ ॥

षड्भिरिति । ईश्वरस्य षडङ्गानि पुराणोक्तानि ।

सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अचिन्त्यशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥ इति ।

अव्ययानि वायुपुराणे पठ्यन्ते ।

ज्ञानं विरागतैश्वर्यं तपः सत्यं क्षमा धृतिः ।
स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च ।
अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे ॥ इति ।

वेदस्य षडङ्गानि निरुक्तादीनि‡ । अव्ययानि च चादयः ॥ ३ ॥

तिलकप्रियः स्वामी **तिलकस्वामी** । सर्वसिद्धिविधायित्वं स्मृतिसिद्धम् ।

आदित्यस्य सदा पूजां तिलकं स्वामिनस्तथा ।
महागणपतेश्चैव कुर्वन् सिद्धिमवाप्नुयात्§ ॥ इति ॥ ४ ॥

वेधसे विधात्रे ईश्वराय हरेः ज्ञानशक्तेरवतारः प्राप्तिर्यस्मिन् स तथा । तथा चाह श्रीपराशरः ।

---

* प्रतिबिम्बत्वेनेति तच्छब्दविकलः पाठः २ पु० ।   † अविज्ञातेति २ पु० पा० ।

‡ व्याकरणादीनीति ५ पु० पा० ।

§ याज्ञवल्क्यस्मृतिः । अ० १ श्लो० २९४ । यद्यपि सर्वेषु पुस्तकेषु तिलकस्वामिन इति पाठो दृश्यते तथापि स्मृतिपाठानुरोधान्मितात्क्षरानुरोधाच्चोपरितन एव पाठो युक्त इति स एव निवेशितः ।

द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुने ।
वेदमेकं सुबहुधा कुरुते जगतो हितम् ॥ इति ॥ ५ ॥

इह भगवता सूत्रकारेण साधनचतुष्टयसम्पत्त्यनन्तरं ब्रह्मजिज्ञासामु-
पदिशता जिज्ञास्यस्य ब्रह्मणः संदिग्धत्वसप्रयोजनत्वे समसूचिषातां*
तदाक्षेपसमाधानपरताम् आह कोऽयमित्यतः प्राक्तनस्य भाष्यस्य दर्शयति
२ । ४ **अथेत्यादिपरिहरतीत्यन्तेन** । अथशब्दः प्रतिग्रन्थं व्याख्यानप्रार-
म्भार्थः । इहाहम्प्रत्ययगम्यमात्मानमुपनिषत्प्रतिपाद्यमापाद्य जिज्ञास्यत्वा-
क्षेपस्तत्पुनर्ब्रह्मेत्यादौ तु तदतिरिक्तं ब्रह्मोररीकृत्य तस्य वेदान्तेभ्य एव
सिद्धेर्विचारविषयत्वाक्षेप इति भेदः । जिज्ञास्यत्वव्यापके सन्दिग्धत्वसप्रयोज-
नत्वे तद्विरुद्धे चासन्दिग्धत्वनिष्प्रयोजनत्वे तयोरुपलब्धिस्ततश्च व्यापका-
भावे व्याप्यजिज्ञास्यत्वाभाव इत्यर्थः । अत्र प्रयोगौ । मुमुक्षुणा ब्रह्म न वि-
चार्यं† तं प्रत्यसन्दिग्धत्वात् तथाविधकुम्भवत् । तथा ऽप्रयोजनत्वात् काक-
दन्तवत्‡दिति । आद्यं हेतुं विवृणोति **तथाहि** इत्यादिना । **बृंहणत्वात्**
देहादीनां परिणमयितृत्वात् । नन्वहंप्रत्ययस्य देहादिमिश्रविषयत्वात् कथं
विविक्तविषयत्वमत आह **न चाहमिति । देहालम्बन इति** । आत्मैक्या-
ध्यस्तदेहालम्बन इत्यर्थः । देहादात्मनो ऽहंप्रत्ययगम्यस्य भेदग्रहान्नाध्यास
इत्याह **तदालम्बनत्वे हीति** । बालस्थविरदेहयोः परिमाणभेदान्न प्रत्य-
भिज्ञेत्युक्तम् । परिमाणभेदेऽपि देहैक्यं मन्वानं प्रत्याह **स्वप्नान्तइति** ।
जाग्रत्यप्याह **योगेति** । मनुष्यः सन् कृत्रिमं व्याघ्रशरीरमभिमन्यमानो यो-
गव्याघ्रः । **नाहङ्कारालम्बनं देह इति** । अत्रापि देहशब्द आत्मैक्या-
ध्यस्तदेहपरः । अन्यथा हि जिज्ञास्यत्ववादिनापि तन्मात्रालम्बनत्वानङ्गीका-
रादनुक्तोपालम्भः स्यादिति । अथ वा लोकायतमतं प्रसङ्गादाशङ्क्य निरस्यते ।
। २ **प्रख्यानं** शब्दः । असत्यप्यारोपिते अभेदे इत्यर्थः । वास्तवाभेदस्याध्या-
सवादिनो ऽप्यनिष्टेः । लोकायतनिरासे तु यथाश्रुतो ऽर्थः । द्वितीयं हेतुं
विभजते **अप्रयोजनत्वाच्च** इत्यादिना । ननु किमिति नास्त्यन्यदात्मयाथा-
थात्म्यज्ञानं ब्रह्मात्मभावस्योपनिषद्भिरवबोधनादत आह **न चाहमि-**

* एतदग्रे-ते चाध्याससिद्ध्यधीनसिद्धिनी अत इत्यधिकं ३ पु ।
† न जिज्ञास्यमिति ५ पु. पा. । ‡ काकदन्तपरीक्षावदिति ५ पु. ।

तीति । युक्तमिति निर्देशात् पूर्वस्यैव सिद्धान्तत्वं व्यावर्त्तयति **अत्र चेति** ।
ननु पुरुषान्तरवचनो युष्मच्छब्दः कथमचेतने देहादौ प्रयुक्तो ऽत आह
इदमस्मदिति । नन्विदङ्कारप्रयोगेपि प्रत्यक्परागभावेन भवति भेदप्रतीतिः
एते वयमिति तु सामानाधिकरण्यं गौणं तथा त्वङ्कारप्रयोगे ऽपीति न वि- ३
शेषः कश्चिदत आह **इति बहुलं प्रयोगदर्शनादिति** । यद्यप्युभयत्र
गौणत्वमविशिष्टं तथापि विरलप्रयोगत्वात् स्फुटं त्वमहमिति सामानाधिक-
रण्ये गौणत्वं ततस्तन्न भेदं तिरोदधीतेत्यत्यन्तभेदसिद्धिः । इमे वयमिति
तु बहुलप्रयोगत्वेन निरूढमिति तिरोदधीत भेदमतो नात्यन्तभेद-
सिद्धिः । दृश्यते च लाक्षणिकत्वाविशेषे ऽपि प्रयोगबाहुल्याबाहुल्याभ्यां निरू-
ढसांप्रतिकते यथा पटः शुक्लो रथाङ्गनामा चक्रवाक इति । प्रयुञ्जते बहुलं
वेदाश्च कवयश्च अयमहमस्मीति एते वयमिमे दाराः कन्येयं कुलजीवित-
मित्यादि । न सहानवस्थानं दृष्टान्ते विवक्षितं दार्ष्टान्तिके तदभावात् किं
त्वन्योन्यात्मना ऽस्फुरणमित्यभिप्रेत्याह **परस्परेति** । ननूलूकादेः प्रकाशे
ऽप्यस्ति तमस्त्वारोपः तत्राह **न हीति** । समुदाचरन्त्यौ भेदेन भासमाने
वृत्ती वर्त्तने ययोस्ते तथा । उलूकादेरविवेकादारोप इत्यर्थः । इतरेतर-
भावानुपपत्तिर्नामेतरेतरभावप्रतीत्यनुपपत्तिर्विवक्षिता तन्मात्रानुपपत्तिसाधने
ऽध्यासवादिनं प्रति सिद्धसाधनत्वादित्यभिप्रेत्य दृष्टान्ते स्थित्वा वक्ति **परस्प-
रात्मतया प्रतिपत्तुमिति** । इतरस्येतरत्र भाव इति योजने धर्मिणोरपि
संसर्गाध्यासनिषेधः स्यात्तथा च सिद्धसाधनं तादात्म्याध्यासाभ्युपगमात् तन्नि- ४
वृत्त्यर्थमाह **इतरेतरत्वमिति** । **विनिमयो** व्यत्यासः । **रूपवत इति** ।
गगनस्य तु स्वगतसवितृकरादिप्रतिबिम्बनद्वारा सलिले प्रतिबिम्बितत्वविभ्रमः ।
ततश्च रूपवत एव प्रतिबिम्बभाव इति व्याप्तेर्न व्यभिचारः । आत्मनस्तु
नास्ति प्रतिबिम्बितत्वभ्रमकरं किं चिदित्यर्थः । धर्माध्यासो हि धर्मिणोरै-
क्यारोपेण प्रतिबिम्बभावेन वा दृष्ट इह प्रतिबिम्बभावे निरस्ते आरोपः
शिष्यतइत्याह **पारिशेष्यादिति** । अध्यासानुपपत्तिमुक्त्वा तदभावोप-
संहारार्थमतोस्मत्प्रत्ययेत्यादिभाष्यम् । अथ वा ऽहं मनुष्य इत्यादिप्रतीता-
वतस्मिंस्तत्प्रतीतित्वस्याध्यासलक्षणस्याभावे उक्ते लक्ष्याध्यासरूपत्वस्याभा-
वप्रदर्शनार्थं **विषयविपर्ययेणेति** । विषयो ऽचेतनः तस्य विपर्ययश्चैत-
न्यम् । इत्थम्भावे तृतीया । चिदात्मन ऐक्यारोपे हि विषयस्य चेतनत्व-

मिव भवतीति । तथापीति भाष्यसूचितामध्यासाभावहेतोर्विवेकग्रहस्यासि-
४ । २२ द्धिमाह **इदमत्राकूत*मित्यादिना** । यथा श्रुत्यादिष्वात्मतत्त्वं गीयते
तथा ऽहमित्यनुभवे यदि प्रकाशेत न त्वेतदस्तीति योजना । **परामर्शो**
मध्ये निर्देशः । **क्रियासमभिहारः** पौनःपुन्यम् । **दर्शनीया** सुन्दरी ।
न त्वेतदस्तीति यदुक्तं तत्प्रपञ्चयति **अहमनुभवस्त्विति** । उपप्लवो विप-
र्यासो ऽस्य नास्तीत्यनुपप्लवो ऽहमनुभवः कथं विपर्यासशून्य इत्यर्थः । **कथ-
मात्मतत्त्वगोचर** इत्यज्ञानं सूचितम् । प्रक्रमादिना तात्पर्यसिद्धावप्युपजीव्य-
२ । १७ विरोधादप्रामाण्यमाशङ्क्याह **न चेत्यादिना** । ज्येष्ठस्यापि पौर्वापर्यन्यायेन†
बाधमाशङ्क्याह **तदपेक्षस्येति** । आगमस्य किं स्वजन्यज्ञानगतप्रमितित्वे
प्रत्यक्षापेक्षा उत तदुत्पत्तौ । आद्ये‡ किं विपर्यासशङ्कानिरासाय संवादाय वा ।
एतद् द्वयं निरस्य द्वितीयं शङ्कते **प्रमिताविति** । आगमस्य किं प्रत्यक्ष-
गतव्यावहारिकप्रामाण्येन विरोध उत तत्त्वावेदकत्वेन । नाद्य इत्याह **न
हीति** । द्वितीयं प्रत्याह **न च तदिति** । एवमप्रामाण्यं निराकृत्योपचरि-
तार्थत्वं निरस्यति **न चानन्यपरमिति** । पूर्वं भेदाग्रहसिद्ध्यर्थमिदमुक्तम् ।
इदानीमुपजीव्यविरोधाभावाय/ विधायके शब्दे परो लक्ष्यः शब्दार्थो न भव-
तीति शबरस्वामिनोक्तं तत्तुल्यं वेदान्तेष्वपि । अनधिगतार्थबोधित्वेन तत्प-
रत्वसाम्यादिति§ । एवं तावदुपजीव्यत्वं प्रत्यक्षस्य निराकृत्य मुख्यत्वमा-
त्रस्य प्राबल्यहेतुतां निराकरोति **ज्येष्ठत्वं चेति** ।

। २४ **पौर्वापर्यइति** । षष्ठे स्थितम्‖ । ज्योतिष्टोमे ऽन्योन्यं संबध्य यज्ञशा-
लातो निर्गच्छतामृत्विजां विच्छेदनिमित्तं प्रायश्चित्तं श्रूयते यद्युद्गाता विच्छि-
न्द्यादद‌क्षिणेन यजेत यदि प्रतिहर्ता सर्वस्वदक्षिणेनेति । तत्रोद्गातृप्रतिहर्त्रोः
क्रमेण विच्छेदे विरुद्धप्रायश्चित्तयोः समुच्चयासम्भवात् किं पूर्वं कार्यमुत परम्
इति विशये ऽनुपजातविरोधित्वात्पूर्वमिति पूर्वपक्षे राद्धान्तः । पौर्वापर्ये सति
निमित्तयोः पूर्वस्य नैमित्तिकस्य दौर्बल्यमुत्तरस्य निरपेक्षस्य तद्बाधकतयो-
दितत्वात्पूर्वोदयकाले उत्तरस्याप्राप्तत्वेन पूर्वेण बाध्यत्वायोगात् । उक्तं हि ।

* इदमाकूतमिति २ पु॰ वर्जं सर्वेषु पाठः । मूले त्वत्रशब्दोऽस्तीति स एव पाठ उपरि न्यस्तः ।
† जैमिनिसू॰ अ॰ ६ पा॰ ५ सू॰ ५४ ।
‡ आद्ये ऽपीति २–३ पु॰ पा॰ । § सामान्यादितीति २ पु॰ पा॰ ।
‖ जैमिनिसू॰ अ॰ ६ पा॰ ५ सू॰ ५४ ।

पूर्वं परमजातत्वादबाधित्वैव जायते ।

परस्यानन्यथोत्पादाद् न त्वबाधेन संभवः ॥ इति ।

प्रकृतिवत् । यथा हि प्रकृतौ क्लृप्तोपकाराः कुशाः प्रथममतिदेशेन विकृतावुपकाराकाङ्क्षिण्यां प्राप्ताः कल्प्योपकारतया चरमभाविभिरपि शरैर्निरपेक्षैर्बाध्यन्ते तद्वदिदमिति । एवं तावच्छ्रुत्यादिगम्यात्मतत्त्वस्याहंप्रत्यये ऽनवभासादविविक्तविषयत्वमुक्तं संप्रति वादिनिरूपितस्यात्मनो ऽनवभासादपि तदाह **अपि चेति** । सर्वगतात्मवादिनं प्रत्याह **अहमिहेति** । न हि ६ ।
तदैवमिति । तव मते ऽहंप्रत्ययस्य विविक्तात्मविषयत्वादित्यर्थः । ननु तत्रात्मवचनो ऽहंशब्दो देहे उपचर्यते अत आह **गौणत्वे चेति** । भवतीत्यनुषङ्गः । उपचरितात्मभावस्य देहस्य ज्ञातृत्वानुपपत्तेः जानान इति प्रतीतिर्न हि भवतीत्यर्थः । न च ज्ञातृत्वमपि देहे उपचर्यते इति वाच्यम् । वक्तुः स्वज्ञानप्रकाशनपरे वाक्ये तद्विरोधात् । अथाहमालम्बने आत्मनि देहगतप्रादेशिकत्वमेवोपचर्यते तर्हि देहात्मनोर्भेदो ग्रहीतव्यो न च गृह्यत इत्याह **अपि च** इत्यादिना । अत्र गौणवादी प्रष्टव्यः । किं सिंहशब्दस्येव माणवके सांप्रतिकं देहादावहंशब्दस्य गौणत्वम् उत सार्षपरसादौ तैलशब्दस्येव निरूढम् । नाद्य इत्याह **परेति** । ,, ।

प्रमाणलक्षणे स्थितम्—तत्प्रख्यं चान्यशास्त्रम्[*] । अग्निहोत्रं जुहोतीति श्रूयते[†] तत्र संशयः । किम् अग्निहोत्रशब्दो ऽग्निदेवतागुणविधिरुत कर्मनामेति । तत्राग्नये होत्रं हविरस्मिन्निति समासान्तर्वर्तिन्या चतुर्थ्या ऽग्नेर्होमदेवतात्वप्रतीतेर्गुणविधिरिति प्राप्ते राद्धान्तः । यदग्नये च प्रजापतये च सायं जुहोतीत्यग्नेर्होमे देवतात्वप्रख्यापनात् प्राप्ते च विधिवैयर्थ्यान्नामधेयम् । न चात्र चतुर्थीसमाससम्भवस्तादर्थ्यप्रकृतिविकारयोरभावादिति । एवं नित्याग्निहोत्रवाचिनो ऽग्निहोत्रशब्दस्य गुणादन्यत्र वृत्तिं वक्तुं मुख्यार्थाद्गृहीतभेदं कर्मोदाहरति **प्रकरणान्तरेति** । ,, ।

भेदलक्षणे स्थितम्—प्रकरणान्तरे प्रयोजनान्यत्वम्[‡] । कुण्डपायिनामयने मासमग्निहोत्रं जुहोतीति श्रूयते । अत्र किं नित्याग्निहोत्रे मासगुणो

---

[*] जैमिनिसू॰ अ॰ १ पा॰ ४ सू॰ ४ । [†] श्रूयते इति २ पु॰ नास्ति ।
[‡] जैमिनिसू॰ अ॰ २ पा॰ ३ सू॰ २४ ।

विधीयते उत कर्मान्तरमिति । तत्र सत्यपि प्रदेशभेदे नाम्ना नित्याग्निहो-
त्रस्य बुद्धौ संनिधापनात्तत्समभिव्याहृतस्य जुहोतीत्याख्यातस्य तत्संनिधा-
पितार्थपरत्वान्नित्याग्निहोत्रानुवादेन मासो विधीयत इति प्राप्ते राद्धान्तः ।
न तावदत्राख्यातेन होमानुवादेन मासः शक्यो विधातुं कालस्य पुरुषानिष्पा-
द्यत्वेनानुपादेयत्वात् । नापि मासोद्देशेन नित्याग्निहोत्रविधिः । तस्यासं-
निधेः । न च नाम तत्संनिधापयत्यन्यत्र जुहोतीत्याख्यातेन पूर्वापरीभूतत-
योक्तस्य सिद्धार्थबोधिना नाम्ना ऽनुपस्थापनात् । तस्मात्प्रयोजनान्यत्वं विधेय-
भावनान्यत्वमिति । नन्वग्निहोत्रशब्दस्य कौण्डपायिने कर्मणि प्रयोगे किं
प्रयोजनम् । न तावन्नित्याग्निहोत्रेण सह क्रियात्वादिसादृश्यबोधस्तस्य वैय-
६ । १२ र्थ्यादत आह **साध्येति ।**

सप्तमे स्थितम्—उक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्यात्* ।
मासमग्निहोत्रमित्यत्रा†न्या चिन्ता किमग्निहोत्रशब्दो नित्याग्निहोत्रधर्मानि-
हातिदिशेद् न वेति । तत्र यद्ययं गौणः स्यात्तदा ऽग्निहोत्रवज्जुहोतीत्यति-
दिशेत्तद्धर्मान्न त्वयं गौणः जुहोतिसामानाधिकरण्यस्यात्रापि तुल्यत्वेन नाम-
धेयत्वादग्निदेवताविधानार्थत्वाद्वा ऽतो नातिदिशेदिति प्राप्ते सिद्धान्तः ।
न तावदत्राग्निदेवता विधातुं शक्या चतुर्थीसमासाऽसम्भवस्योक्तत्वात् । तत्र
सिद्धे कर्मभेदे ऽनेकार्थस्या‡न्याय्यत्वादेकत्राग्निहोत्रशब्दो मुख्यो ऽपरत्र गौणः ।
नित्याग्निहोत्रे च नामप्रवृत्तिनिमित्तस्याग्निदेवतासम्बन्धस्य भावात्तत्रैव मु-
ख्यता । अतः परशब्दः परत्र सादृश्यमुपादाय प्रवर्तते तच्च सादृश्यं कर्त-
व्यार्थबोधकाख्यातसमभिव्याहृतनाम्ना ऽग्निहोत्रवज्जुहोतीति साध्यत्वेन वि-
धेयमिति तत्सिद्ध्यर्थं नित्यधर्मानतिदिशेदिति । अतश्च नित्याग्निहोत्रधर्मा-
णां द्रव्यदेवतादीनामतिदेशो गौणप्रयोगफलमित्यर्थः । क्रियाया नित्याग्निहो-
त्रस्याभिधानं नामधेयमग्निहोत्रपदमुक्तं तत्प्रख्याधिकरणे§ । तस्यान्यत्र
श्रवणे विधिप्रदेशः विधेयधर्मातिदेशः स्यादिति सूत्रार्थः ।

। १३ लोकसिद्धसादृश्यां गौणीं वृत्तिमाह **माणवके इति ।** प्रकृते भेद-
ग्रहाभावमाह **न त्विति ।** निष्कृष्य लुठितः प्रतिभासितो गर्भो ऽसा-

---

* जैमिनिसू॰ अ॰ ७ पा॰ ३ सू॰ १ । † अत्रैवेति २ पु॰ पा॰ ।
‡ अनेकार्थत्वस्येति २पु॰ पा॰ । § जैमिनिसू॰ अ॰ १ पा॰ ४ सू॰ ४ ।

धारणाकारो यस्य स तथा तत्तया नानुभूयते । अनुभवे वा वादिविवादो न
स्यादित्यर्थः । एवं सांप्रतिकीं गौणतां निरस्य निरूढां निराचष्टे **न चात्य-** ६ । १५
न्तेति । निरूढत्वं नाम प्रयोगप्राचुर्यान्मुख्यवद्भानम् । निरूढे ऽपि गौणप्रयोगे
नार्थयोस्तादात्म्यं प्रतीयते प्रतीयते तु प्रकृते इति वैषम्यमित्यर्थः । **तत्**
तस्माद्गौणत्वव्यापकं विवेकज्ञानमिह व्यावर्त्तमानं गौणतामपि व्यावर्त्तयती-
त्येतत्सिद्धमित्यन्वयः । अभिज्ञारूपाहंप्रत्ययाद्विवेकासिद्धावपि प्रत्यभिज्ञारू-
पात्तत्सिद्धिमाशङ्क्याह **न च बालस्थविरेति** । आत्मैक्यं प्रत्यभिज्ञार्थः ।
भिन्नाभ्यामेकस्य भेदस्त्वनुमानात्तच्च शास्त्रादृते न ज्ञेयमित्यर्थः । तर्हि परी-
क्षकाणां देहादावहंशब्दो गौणः नेत्याह **परीक्षका अपीति** । अपरोक्ष-
भ्रमो न यौक्तिकबाधादुच्छिद्यतइत्यर्थः । देहपरिमाणात्मपक्षे किमारब्ध*
आत्मा उतावयवसमुदायः । नाद्य इत्याह **अनित्यत्वेति** । द्वितीये आ-
त्मावयवानां चैतन्यं समुदायस्य वा । नाद्य इत्याह **प्रत्येकमिति** । द्वितीये
ऽपि समुदायापत्तिः शरीरोपाधिकी वा स्वत एव वा काकतालीया वा ।
आद्यं निरस्य द्वितीयं निरस्यति **न च बहूनामिति** । न तृतीय इत्याह ७ । १
य एवेति । यादृच्छिकसंश्लेष इव यादृच्छिकविश्लेषो ऽपि स्यादिति स्वस्था-
नामेवाकस्मादचैतन्यापत्तिरित्यर्थः । यद्गौणत्रादिना विवेकग्रहमुपपाद्य कृशो
ऽहमित्यादिप्रत्ययानां गौणत्वमुक्तं तदविवेकसिद्धौ निरस्तमित्याह **एते-**
नेति । अहंप्रत्ययस्याऽविविक्तविषयत्वे शास्त्रीयविषयसिद्धिमभिधाय प्रयोजन-
सिद्धिमप्याह **तदेवमुक्तेनेति** । पूति दुर्गन्धि कूष्माण्डफलमिव कृतस्तथो-
क्तः । तात्पर्यमुपवर्ण्य भाष्यं योजयति **तदेवं सर्वप्रवादीत्यादिना** ।
स्वरूपमन्योन्यात्मकताऽन्योन्यधर्माध्यासौ । निमित्तमितरेतराऽविवेकः । फलं
व्यवहारः । अहमिदं शरीरमिति प्रतीत्यभावाद्भाष्यायोग†माशङ्क्याह **वस्तुत**
इति । अहमिति प्रतीते ऽपि वास्तवमनात्मत्वमस्तीति इदंशब्दप्रयोग
इत्यर्थः । धर्म्यध्यासाभावादुक्तं धर्माध्यासाभावं परिहरति **अध्यस्तदेहा-** ८ । ७
दिभावे इति । धर्मिणोस्तादात्म्याध्यासकार्यमहमिदमिति व्यवहारं प्रद-
र्श्य धर्माध्यासकार्यं प्रदर्शयति **ममेदमिति** । नन्वध्यस्य व्यवहार इत्यनु-

* किमवयवैरारब्ध इति बहिः शोधितं ५ पु० ।

† अयोग्यमिति न समञ्जसः पाठः १ पु० । भाष्यायोग्यत्वमिति ५ पु० पा० ।

पपन्नं भुक्त्वा व्रजतीतिवदेकस्य क्रियाद्वये कर्तृत्वाऽनभिधानादत आह **अत्र चेति**। व्यवहारक्रियाचिद्रूपस्य कर्तुरध्यासे ऽपि कर्तृत्वात् क्त्वाप्रत्ययः स्यादित्यर्थः।

ननूपसंहारभाष्ये नैसर्गिको ऽध्यास इत्यभिधानाद्व्यवहारो ऽपि नैसर्गिकत्वविशिष्टो ऽध्यास एव तत्कथं क्रियाभेदः। उच्यते। इह कार्यभूतव्यवहारनैसर्गिकत्वेन सामर्थ्यसिद्धाध्यासनैसर्गिकत्वोपसंहारादविरोधः। अध्यासाभिधानक्रिययोः पूर्वापरीभावो* न युक्तः। चितो बुद्ध्यादितादात्म्यं विना क्रियान्वयाऽयोगादध्यस्य व्यवहार इत्यनेनाध्यासस्य व्यवहारहेतुतोक्तौ मिथ्याज्ञाननिमित्त इत्यनेन पौनरुक्त्यं चेति के चित्। तन्न। पूर्वपूर्वभ्रमसंस्कृताऽविद्यया चितः संप्रतितनाध्यासक्रियाश्रयत्वात्। पुनरुक्तिं परिहरति
८।११ **पूर्वकालत्वेति**। सुप्तोत्तिष्ठतीतिवदहेतुत्वभ्रमं व्यावर्त्य स्फुटयतीत्यर्थः। जातिव्यक्त्योरिवार्थगतं तादात्म्यमविवेक इति भ्रमं व्यावर्तयति **विवेकाग्रहेणेति**। भाष्ये मिथुनीकरणस्य व्यवहारहेतुत्वमानन्तर्याद् भाति न तु मिथ्याभूतप्रतियोगिसम्पादनेन विवेकाग्रहहेतुतेति शङ्कां व्युदस्यन् योजयति **सत्यानृते इति**। मिथुनीकरणाद्विवेकाग्रहस्ततो ऽध्यास इत्यर्थः। युगलीकरणं नामाधिष्ठानारोप्ययोः स्वरूपेण बुद्धौ भानम्। ननु मिथुनं कृत्वेति किमिति नोक्तमत आह **न च संवृतीति**। अभूततद्भावे कृभ्वस्तियोगे सम्पद्यमानकर्तरि च्विः†। यस्य यो भावो न भूतः स तद्भावं चेत्सम्पद्यते तस्मिन्नभूततद्भावे वर्तमानात् प्रातिपदिकात् कृभ्वस्तीनां‡ योगे च्विप्रत्ययो भवति। अस्य च्वावितीकारः। ततश्च मिथुनभावो ऽप्यवास्तव इत्यर्थः। समारोपप्रतीत्योरितरेतराश्रयत्वे शङ्किते व्यवहारानादित्वमसांप्रतमित्याशङ्क्याह
९।५ **व्यवहारानाऽदितयेति**।

अनादितयेत्यचे§के पर्यनुयुञ्जते। न मिथ्याज्ञानतत्संस्कारव्यक्त्योरनादित्वम्। तज्जात्योस्तु न निमित्तनैमित्तिकभावः। न च प्रवाहो वस्त्वस्तीति।

---

* क्रिययोः समानकर्तृकरूपनिर्देशः पूर्वापरीभावश्चेति ५ पु० पा०।

† यद्यपि संपद्यकर्तरि च्विरित्येव सौत्रः पाठस्तथापि सर्वपुस्तकानुरोधादर्थे भेदाभावाच्चोपरितन एव पाठ आदृतः। अभूततद्भावे इत्यपि वार्तिकपूरितांशः।

‡ धातूनामित्यधिकम् ५ पु०।

§ अनादित्वादिति ५ पु० पा०।

तत्र ब्रूमः

तदाकृत्युपरक्तानां व्यक्तीनामेकया विना ।
अनादिकाला वृत्तिर्या सा कार्याऽनादिता मता ॥

मिथ्याज्ञानत्वतत्संस्कारत्व*जात्यालिङ्गितव्यक्तीनां मध्ये ऽन्यतमव्यक्त्या विना यदनादिकालस्याऽवर्तनमन्यतमयोगनियम† इति यावत् । तासामनादित्वमत्र च निमित्तनैमित्तिकयोरनादित्वमुक्तम् । भ्रमोपादानं तु वक्ष्यति देवताधिकरणे‡ ।

सत्यानृते मिथुनीकृत्येत्यत्र वस्तुसत्तावर्जमारोप्यस्य प्रतीतिमात्रमुपयोगीत्युक्तमिदानीं प्रतीतिरेवानृतस्यायुक्तेत्याक्षेपाभिप्रायमुत्तरभाष्यस्याह
स्यादेतदित्यादिना । युष्मदस्मदित्यादिस्तु विवेकाग्रहादाक्षेप इति ६ । ९
भेदः । **प्रतीतिरेव त्विति** । अपरोक्षेत्यर्थः । प्रतीतिमात्रनिषेधे त्वसत्पदस्याबोधकत्वापत्तेरनुवादायोगः स्यादिति । ननु नात्यन्ताऽसन् देहादिः किं त्वनिर्वाच्यस्ततः प्रतीतिः किं न स्यादत आह **प्रकाशमानत्वमिति** । अतिरिक्तसत्तामभ्युपगच्छन्तं प्रत्याह **द्वैतेति** । द्वैताभ्युपगमे ऽप्याह **सत्तायाश्चेति** । आत्मन्यध्यासे आक्षिप्ते ऽध्याससामान्यलक्षणकथा वृथेत्याशङ्क्याह **लोकसिद्धमिति** । पूर्वदृष्टग्रहणेनाऽऽक्षेपप्रतिक्षेपो भविष्यतीति भावः । अवभासपदस्यावयवार्थमादाय संक्षिप्तमध्यासलक्षणमाह **अवसन्न इति** । अवसाद उच्छेदः । अवमानो यौक्तिकतिरस्कारः|| । अवभासपदस्य रूढमर्थमादाय विस्तृतं लक्षणं भाष्यवाक्यार्थत्वेनाह **तस्येति** । परत्रेत्यादिपदैरसत्ख्यातिनिरासेन प्रपञ्चनमित्यर्थः । **स्वरूपेण सदपीति** । अपिशब्देन स्वरूपेणासत्त्वमपि मरु¶मरीचिकोदकग्रन्थे वक्ष्याम इति सूचितम् । स्मृतिरूपविशेषणव्यावर्त्यमाह **स्यादेतदित्यादिना** । पूर्वदृष्टस्य परत्र तादात्म्यावभास इति धर्म्यध्यासमभिप्रेत्य लक्षणवाक्यार्थे ऽतिव्याप्तिमाह
स्वस्तिमत्यामिति । परत्र आश्रये परधर्मावभास इति धर्माध्यासं विव- १० । ६

---

* मिथ्याज्ञानतत्संस्कारत्वेति ५ पु॰ पा॰ ।

† अन्यतमयोग इति नियमशब्दरहितः पाठः २ पु॰ ।

‡ व्याससू॰ अ॰ १ पा॰ ३ सू॰ २४–३३ । § पूर्वशब्दविकलो दृष्टग्रहणेनेति १–५ पु॰ पाठः ।

|| तिरस्कार इतीति अधिक इतिशब्दः १–५ पु॰ । ¶ मरुशब्दो नास्ति २–३ पु॰ ।

चित्वा ऽऽह **पाटलिपुत्रे इति** । अवभासपदस्य रूढार्थग्रहणादतिव्याप्तिरु-
१०।९ पपन्नेत्याह **अवभासपदं चेति** ।

सकृच्छ्रुतपदस्यार्थद्वयक्लृप्तिर्न दुष्यति ।
संक्षिप्तविस्तृताऽध्यासलक्षणद्वयलाभतः ॥

एवं च मिथ्याज्ञानमध्यास इत्यवभासपदेन व्युत्पाद्य प्रत्यभिज्ञाया-
मतिव्याप्त्यभिधानं शोभतेतरामित्युपहासाऽनवसरः* । ननु पूर्वदृष्टमारोपणीय-
मनृतमित्युक्तं कथं तत्पदाङ्कितलक्षणस्य प्रत्यभिज्ञायामतिव्याप्तिः । उच्यते ।
स्मृतिरूपपदाभिधास्यमानाऽसंनिधानसिद्धवत्कारेण तदभिधानं न तु पूर्वदृष्ट-
पदसामर्थ्येनेत्यदोषः । प्रत्यभिज्ञाया अपि संस्कारजत्वेनाऽव्यावृत्तिमाशङ्क्याह
असंनिहितेति । स्मृतिरूपपदेन चासंनिहितविषयत्वे† विवक्षिते तावति
चोक्ते स्मृतावतिव्याप्तिस्तन्निवृत्तये परत्रेत्युक्तमित्यपि द्रष्टव्यम् । अनेनाऽसंनि-
हितस्य परत्र प्रतीतिरध्यास इति लक्षणमुक्तम् । असंनिधानं चारोप्यस्या-
धिष्ठाने परमार्थतो ऽसत्त्वं न देशान्तरसत्त्वमिति नापराद्धान्तः ।

अथ वा ऽसंनिधानेन सत्ख्यातिरिह वारिता ।
अवभासादसत्ख्यातिर्नृशृङ्गे तददर्शनात् ॥

असंनिहितस्य परत्र प्रतीयमानस्य पूर्वदृष्टत्वे ऽर्थसिद्धे ऽपि पुन-
र्ग्रहणं पूर्वप्रमितत्वव्यावर्तनफलमित्युक्तमेव । स्वप्नज्ञाने प्रमाणयोग्यशुक्त्याद्य-
धिष्ठानाभावात्परत्रेति विशेषणाऽव्याप्तिमाशङ्क्याह **नापीति** । स्मृतौ विभ्रमः
स्मृतिविभ्रमः । स्मर्यमाणे स्मर्यमाणरूपान्तरारोप इति यावत् । अनुभूयमाने
पित्तादौ यत्संनिहितत्वं पूर्वदृष्टं तदिहारोप्यम् । अन्यार्थं लक्षण‡विशेषणत-
योक्तपूर्वदृष्टत्वस्य गृह्यमाणविषयत्वेन प्रसिद्धभ्रमेष्वव्याप्तिमाशङ्क्याह **एव-
मिति** । अत्र पीतिमशङ्खयोरेकैकशो ऽनुभवकाले दृष्टपीतिम्नः पश्चाच्छङ्खे
समारोप इति वक्तव्ये न रूपमारोप्यं किं तु सामानाधिकरण्यमित्याशङ्क्य
१०।१७ तस्यापि पूर्वदृष्टत्वमाह **तथा हीति**। पीतिमतपनीययोः संसर्गग्रहेणाऽसंसर्गो
न गृह्यते तथा पीतत्वशङ्खयोरपीति सारूप्यम् । आदर्शादिष्वारोप्यमुखस्य
स्वचक्षुषा पूर्वदृष्टत्वाभावादव्याप्तिमाशङ्क्याह **एवमिति** । पूर्वदृष्टयोरभिमुख-

* उपहासो ऽनवसर इति ५ पु· पा· ।
† विषये इति १ पु· पा· । ५ उपरितनः पाठो बहिः शोधितः ।
‡ अध्यासलक्षणे ऽन्यार्थं लक्षणेति २ पु· पा· । अध्यासलक्षणे इति ३ पु· पा· ।

योरादर्शोदकयोर्देश एव देशो यस्य तस्य भावः तत्ता । तयोरेवाभिमुख्यं
चेत्यर्थः । शीघ्रं भ्रमिताऽलातज्वालासु पूर्वदृष्टचक्राकारताया आरोपः । अभ्रेषु
ग्रहादेः । मण्डूकवसाक्ताक्षग्राह्यवंशेषु वसावर्णेषु च पूर्वदृष्टोरगतद्वर्णसामाना-
धिकरण्यारोप इत्यर्थः । **तथा सतीति** । रज्ज्वादीनां सर्पात्मत्वादेः सत्त्वे ११ । १
सतीत्यर्थः । उच्चलन्ती तुङ्गतरङ्गभङ्गानां तरङ्गावच्छेदानां* माला यस्याः सा
मन्दाकिनी तथा । अभ्यर्णं निकटम् । मरीचीनां तोयात्मत्वं न सदित्युक्ते
यन्मरीचीनां तोयरूपेणाऽसत्त्वं तन्मरीचय एवातो नाऽसत्ख्यातिरिति शङ्कते
यद्युच्येतेति । निरस्तसमस्तसामर्थ्यस्येत्यर्थक्रियाकारित्वसत्त्वाऽयोग उक्तः ।
निस्तत्त्वस्येति स्वरूपसत्ताभावः । तद् द्वयमत्यन्ताऽसत्त्वे हेतुः । अनिर्वचनीय-
मतं निरस्य शून्यमतं निरस्यति सद्वादी **न च विषयस्येति** । स्वप्र-
त्ययः स्वसमानाकारः पूर्वप्रत्ययः । अदृष्टान्तसिद्धो ऽसाधारणः । ज्ञान-
स्यापि पूर्वज्ञानाधीनं सत्त्वमतो न क्वापि स्वरूपसत्त्वमित्यर्थः ।

नन्वविद्यया असत्प्रकाशनमिति बौद्धाः । तत्कथं विज्ञानमसत्प्रकाश-
नमत आह **तस्मादिति** । **ज्ञानान्तराऽनुपलब्धेरिति** । शक्त्याश्रयत्वेना- १२ ।
भिमताज् ज्ञानाज् ज्ञानान्तरानुपलब्धेरित्यर्थः । उपलब्धौ वा तस्यापि ज्ञापक-
त्वेन ज्ञानान्तरापेक्षायामनवस्थापाताच्चेत्यर्थः† । सति हि कस्मिंश्चित्कस्य चिदु-
पकारो भवति प्रत्ययस्य निरूपणं त्वसत्यप्यायतते । न च स्वोपकारिण्यसति
प्रत्युपकारं कं चित्करोति इत्यतो ऽतिसुखी प्रत्यय इत्युपहासः । अनाधाने हेतु-
माह **असत इति** । असतः प्रत्ययप्रथनस्य चाविनाभावं संबन्धमाशङ्क्य निराचष्टे
असदन्तरेणेति । **अहो बतेति** । कार्यकारणभावः स्वभावश्च बौद्धाभिम-
तमविनाभावमूलमिह नास्तीत्यर्थः । एवं सदेव भातीति पूर्ववादिनोक्ते सिद्धा-
न्त्याह **अत्र ब्रूम इति** । पूर्वपक्ष्याह **न सतत्त्वा इति** । तोयात्मनेत्यनुषङ्गः ।
अत्र हेतुमाह **तदात्मनेति**‡ । तदात्मना ऽसत्त्वस्य मया ऽपीष्टत्वादित्यर्थः ।
तर्हि असत्ख्यातिः स्वीकृता । नेत्याह **द्विविधं चेति** । तोयमपेक्ष्य ज्ञातं ,, । १
मरीचिरूपमेव तोयरूपेणाऽसत् तच्च भावरूपमिति नासत्ख्यातिरित्यर्थः । तो-
यरूपेणाऽसत्त्वं मरीचिरूपमेव तच्चाबाध्यं तच्चेद् भ्रमगोचरस्तर्हि न भ्रमबाध-

* तरङ्गभङ्गावच्छेदानामिति ५ पु॰ पा॰ ।

† एतदग्रे अहो बतेतीत्यधिकं बहिर्लिखितं ५ पु॰ ।

‡ तदात्मनामिति भामतीपुस्तके प्रमादाद् मुद्रितम् ।

प्रसिद्धिः स्यादित्युक्ते पूर्ववाद्याह **अद्धेति** । बाढम् । मरीचीनामतोयात्मत्वं स्वरूपं तत्तथा भ्रमो न गृह्णाति किं तु भावान्तरतोयात्मना मरीचींस्तोयाभावरूपान् गृह्णातीति भ्रमत्वमित्यर्थः । तोयाभावात्मकमरीचिरूपे यदा-
१२ । २० रोपितं तोयत्वं तत्तच्च सदसद्वेति विकल्प्याद्यं निरस्यति **हन्तेति** । द्वितीये तु किं तुच्छमसत्सदन्तरं वा । नाद्यो ऽपराद्धान्तात् । न द्वितीय इत्याह **वस्त्वन्तरमेव हीति** । अस्मिन् हि भ्रमे मरीचयस्तोयं चेति द्वे वस्तुनी भासेते । तत्र मरीचितोयतादात्म्यं यदि वस्तु तर्हि तोयाद्वस्तुनो वस्त्वन्तरभूता मरीचयो वा स्युर्मरीचिभ्यो वस्त्वन्तरं तोयं वा स्यान्नान्यत् । अन्यस्यास्मिन् भ्रमे ऽनवभासनादुभयत्र दूषणमाह **पूर्वस्मिन्नित्यादिना** । एवं सत्ख्यातिं निरस्यासत्ख्यातिनिरासमप्युक्तं स्मारयति **न चेदमिति** । फलितमाह **तस्मादिति** । एवं मरीचितोयतादात्म्यमनिर्वाच्यं प्रसाध्य सदेव भातीति नियममभाङ्क्षीत् । तथा च स्वरूपेणाऽनिर्वाच्यमपि तोयं भ्रमे ऽवभासितुमर्हतीति मुधा ऽमुष्य देशान्तरादौ सत्त्वकल्पनेत्याह **तदनेनेति** । नन्वभिनवतोयावभासाभ्युपगमे पूर्वदृष्टत्वं भाष्योक्तं विरुध्येत तत्राह **अत एवेति** । अभिनवत्वे ऽप्यारोप्यस्य पूर्वदृष्टग्रहणमुपयुज्यते आरोपणीयसमानमिथ्यावस्त्वन्तरोपदर्शकस्य पूर्वदर्शनसंस्कारद्वारेणोपयोगादिति ।

स्वरूपेण मरीच्यम्भो मृषा वाचस्पतेर्मतम् ।
अन्यथाख्यातिरिष्टा ऽस्येत्यन्यथा जगृहुर्जनाः ॥

एवं तावद्देहादिः सन् भासमानत्वादात्मवदित्यनुमानस्य मरीचिकोदकादावनेकान्ततोपपादनेन देहादेरनिर्वाच्यत्वमुक्तं संप्रत्यबाधितत्वेन सोपाधिकतामाह **देहेन्द्रियादीति** । अबाध्यत्वमात्मनः सत्त्वे उपाधिर्न प्रतिभासमानत्वम् । न च साधनव्याप्तिर्देहादिबाधस्य तत्र तत्र वक्ष्यमाणत्वादित्यर्थः । विपक्षस्य मरीचितोयादेः सत्त्वान्न पक्षेतरता ।

ननु प्रत्यक्षादिप्रमाणार्पितदेहादिः यदि मिथ्या तर्हि आत्मनि को विस्रम्भस्तत्राह **चिदात्मा त्विति** । तत्त्वावेदकप्रमाणप्रमितत्वादात्मनः सत्त्वं न व्यावहारिकप्रमाणसिद्धदेहादेरिति वक्ष्याम इति भावः ।

यदुक्तमाक्षेपवादिना प्रकाशमानत्वमेव चिदात्मनो ऽपि सत्त्वमिति
१३ । १३ तदपि विशेषाभ्युपगमेन परिहरति **अबाधितेति*** । स्वयंप्रकाशत्वादबाधित-

* भामतीपुस्तके अबाधितः इति प्रमादाद् मुद्रितम् ।

मात्मनः सत्त्वं न दृश्यस्य देहादेः । दृग्दृश्यसंबन्धाऽनिरूपणादित्यर्थः ।
न च सत्तातद्वद्भेदादद्वैतहानिरित्याह **सा चेति** । यत्तु सत्तासमवायादेः
सत्तालक्षणत्वमखण्डि तदनुमोदते **न त्विति** । १३ ।

यत्तु कश्चित्प्रललाप संसारस्याऽनृतत्ववचनं* न तावद् ब्रह्मज्ञाननिबर्ह-
णीयत्वाय शास्त्रप्रामाण्यात् सत्यस्यापि ज्ञानान्निवृत्तेः । न च संसारिणो ऽसं-
सारिब्रह्मैकत्वार्थम् । औपाधिकस्य संसारस्य सत्यस्याप्युपाधिनिवृत्त्या निवृत्तौ
जीवस्य ब्रह्मैक्यसम्भवादिति । तन्न । सत्यस्यात्मवदनिवृत्तेः । यत्तु सामा-
न्यतो दृष्टमनुमानं ज्योतिष्टोमो न स्वर्गफलः क्रियात्वान्मर्द्दनवदिति । तन्न ।
तत्र स्वर्गोद्देशेन यागविधिना विरोधेन कालात्ययात् । अत्र तु सत्यः प्रपञ्चो
ज्ञाननिवर्त्य इत्यागमाभावेन तदभावात् । प्रत्युत मिथ्यात्वस्य बन्धस्य ज्ञान-
निवर्त्यत्वश्रुत्यर्थापत्तिसिद्धेः । यदपि तार्क्ष्यध्यानादिना सत्यं विषादि नश्य-
तीति । तदपि न । विषादेः सत्यत्वाऽसिद्धेः । ध्यानस्य चाऽप्रमात्वेनादृष्टान्त-
त्वात् । सेतुदर्शनं च चोदितक्रियात्मनैवैनोनिबर्हकं न प्रमित्यात्मना । पश्य-
तामपि सेतुं म्लेच्छानां श्रद्धाविरहिणां वा अघाऽनुपघातात् । आत्मप्रमा तु दृष्टद्वा-
रेण बन्धनिवर्तनी न विधिद्वारा । तद्विधेः समन्वयसूत्रे† पराकरिष्यमाणत्वात् ।

यत्तूपाधिध्वंसात्संसारध्वंस इति । तन्न । सत्योपाधेरारम्भणाद्यधिक-
रणे‡ वक्ष्यमाणनयेनाऽसम्भवात् । मिथ्योपाधिस्वीकारे चाविवादादिति ।

नन्वध्यासलक्षणे मतान्तरोपन्यासो मतिसंवादाय दूषणाय वा । नाद्यो
विप्रतिपत्तेर्न द्वितीयो दूषणाऽनभिधानादत आह **स चायमिति** । परत्र
परावभास इत्युक्तलक्षणे सति संवाद एव क्रियते । एवंलक्षणकत्वं चाध्या-
सस्यानिर्वाच्यतयैवेति मरु§मरीचिकोदकनिरूपणे दर्शितम् । विप्रतिपत्तिस्त्व-
धिष्ठानारोप्यविशेषविषयेत्यर्थः । अन्यत्रान्यधर्माध्यास इति भाष्यं धर्मग्रह-
णेन बुद्ध्याकारत्वसूचनादात्मख्यात्यनुवादार्थम् । तत्र बौद्धानां मतभेदेन
भ्रमाधिष्ठानविशेषमाह **सौत्रान्तिकनये इति** । यद्यपि सौत्रान्तिकस्य वैभा- ,, । १
षिकवदर्थो न प्रत्यक्षस्तथापि ज्ञानगतार्थसारूप्येणानुमीयमानत्वादस्ति ताव-
दधिष्ठानम् । आरोप्यं तु ज्ञानाकार एव भ्रान्तिज्ञानाकारसदृशस्य बाह्यार्थस्या-
भावादित्यर्थः । सहोपलम्भनियमादित्याद्यनुमानमुपरिष्टाद्बौद्धाधिकरणे‖ निरा-

---

* वर्णनमिति ५ पु· पा· । † व्याससू· अ· १ पा· १ सू· ४ । ‡ व्याससूत्र· अ· २ पा· १ सू· १४ ।
§ मरुशब्दो नास्ति २–५ पु· । ‖ व्याससूत्र· अ· २ पा· २ सू· २८ ।

१४ । १० करिष्यत इत्यर्थः । **प्रतिपत्तुः प्रत्ययादिति** । सामानाधिकरण्ये पञ्चम्यौ ।
ज्ञानात्मकात्प्रतिपत्तुरित्यर्थः ।

वस्तुतस्त्वहमुल्लेखयोग्यरजतस्य भ्रमादिदन्तया प्रतीतिरिति शङ्कते **भ्रान्तमिति** । भ्रान्तिरूपविकल्पस्य हि स्वरूपमविकल्पकं ग्राह्यं तदेव बाह्यत्वेन सविकल्पकत्वेनाध्यवसेयमित्यर्थः । सिद्धे ज्ञानाकारत्वे एवं कल्प्येत तदेव कुतस्तत्राह **ज्ञानाकारतेति** । प्रागुक्तन्यायात् प्रवेदनीयेत्यर्थः । बाधकप्रत्ययः किं साक्षाज् ज्ञानाकारतां दर्शयत्यर्थाद्वेति विकल्प्याद्यमनुभवविरोधेन निरस्य द्वितीयं शङ्कते **पुरोवर्त्तित्वेति** । इदन्ताप्रतिषेधोऽनिदन्तां गमयेत्स च देशान्तरादिसत्त्वेऽपि स्यादित्यन्यथोपपत्तिमाह **असंनिधानेति** । अख्यातिमते हि रजतस्यासंनिधानाऽग्रहः संनिहितत्वेन व्यवहारहेतुत्वाद् भ्रमः । तन्निषेधोऽसंनिधानग्रहरूपो बाधः प्रागभावनिवृत्तिरूपत्वाद्भावस्य । तस्मादारोप्योऽर्थः प्रतिपत्तुरसंनिहितो भवतीत्यर्थः । यदुक्तं
,, । १९ कल्पनागौरवमिति तत्राह **न चैष इति** । सर्वसंमतस्य व्यवहारमात्रबाधस्य स्वीकारात्कस्य चिदप्यर्थस्याऽबाधादतिलाघवमित्यर्थः । ननु न व्यवहार एव निषेध्यः किं तु शुक्तौ प्रतीतं रजतमित्यन्यथाख्यातिमाशङ्क्याह **न च रजतमेवेत्यादिना** । ननु मा भातु रजतज्ञाने शुक्तिः पुरोदेशसत्तामात्रेण त्वालम्बनं किं न स्यादत आह **न खल्विति** । सर्वेषां पुरोवर्त्तिनां लोष्टादीनामित्यर्थः । अथ रजतसदृशशुक्ते रजतज्ञानहेतुसंस्कारोद्बोधकत्वेनालम्बनत्वं तत्राह **नापीति** । एवमर्थमारोपितं प्रतिषिध्य मिथ्याज्ञानमपि निह्नुते **अपि चेति** । ननु मिथ्याव्यवहारसिद्ध्यर्थं विपर्ययो वाच्यस्तत्राह **तथा चेत्यादिना** । शुक्तिस्वरूपस्य इदमात्मकसामान्यं प्रति विशेषस्याऽग्रहादिदमिति द्रव्यमात्रग्रहणं भवतीत्यर्थः । **गृहीतग्रहणस्वभावेति** । गृहीतमिदमिति प्रकाशनस्वभावेत्यर्थः । **संनिहितरजतेति** । संनिहितरजतगोचरं हि ज्ञानमिदमिति रजतमित्याकारयोरसंसर्गं न गृह्णाति तयोः संसृष्टत्वेनासंसर्गाभावात् । न च स्वगतं विवेकमेकज्ञानत्वादेवमेते अपि ग्रहणस्मरणे परस्परं भिन्ने अपि स्वगतभेदं न गृह्णीतः । नाप्यसंसृष्टौ स्वगोचरौ तथैव निवेदयत इति सारूप्यम् । काचो हरितद्रव्यविशेषः । निषेध्यभ्रमाभावे निषेधानुपपत्तिमाशङ्क्याह
। । २२ **भेदाऽग्रहेति** । इतरेतराभावबोधादितरेतराभावाऽग्रहनिवृत्तौ तद्धेतुकव्यव-

हारनिवृत्तिर्बोधफलमित्यर्थः । **तस्माद्यथार्था इति** । **सर्वे विप्रतिपन्ना**
इत्येको धर्मिनिर्देशः । **संदेहविभ्रमा** इत्यपरः । अयथार्थव्यवहारहेतुत्वेन
मतद्वयसंमताः प्रत्यया धर्मिण इति नाश्रयासिद्धिः । **अन्ये त्विति*** । पुरोव-
र्तिनि रजतमिदमिति सामानाधिकरण्यव्यपदेशस्तथाविधप्रवृत्तिश्चास्तीति ता-
वत् सर्वजनीनम् । तत् सामानाधिकरण्यप्रत्ययाद्रजतमिदमित्येवंरूपाद्भवति
नान्यथेत्यर्थः । अन्यथासिद्धिमाशङ्क्याह **तदेतदिति** । अगृहीतविवेकं स्मरण-
ग्रहणद्वयमयथाव्यवहारहेतुरेकैकं वा । नाद्यः । ज्ञानयोरयौगपद्यात् । न द्वितीय
इत्याह **न हि रजतप्रातिपदिकार्थेति** । ग्रहणे ऽपि तुल्यमिदं यदि तदिच्छे- १७ ।
त्तर्ह्येव प्रवर्ततेत्यर्थः । ज्ञातसम्बन्धस्य पुंसो लिङ्गविशिष्टधर्म्येकदेशदर्शनाद् लिङ्गि
विशिष्टधर्म्येकदेशे बुद्धिरनुमानमिति शबरस्वामिन आहुः । समारोपे तु प्रमित्य-
भावे ऽप्येकदेशदर्शनमस्तीत्यर्थः । पुरोवर्तिनि साधने प्रवर्तके फलज्ञाने ऽनै-
कान्तिकतानिवृत्त्यर्थमाह **नियमेनेति** । फलस्य हि नानोपायसाध्यत्वान्न
तज्ज्ञानमुपाये नियमेन प्रवर्तकम् । स्मरणे व्यभिचारनिवृत्त्यर्थमाह **तत्रेति** ।
वाय्वादौ व्यभिचारमाशङ्क्याह **अर्थिन इति** । वाय्वादिर्हि प्रसह्य प्रवर्तयति
न त्वर्थितामनुरुन्धे । यच्चोक्तं समीचीनज्ञानहेतुभ्यो न मिथ्याज्ञानजन्मेति
तत्राह **दृष्टं चेति** ।

परिहृतं न्यायकणिकायामिति । एवं हि तत्र व्युत्पादितम् । १८ ।
किमव्यभिचारितैव प्रामाण्यमुत तद्धेतुरथ तद्व्यापिका येन क्व चिद्व्यभिचारद-
र्शनाद् ज्ञानानामप्रामाण्यमापतेत् । सर्वथा ऽप्यसम्भवः । व्यभिचारिणामपि
सितनीलादिषु चक्षुरादीनां बोधकत्वेन प्रामाण्यादव्यभिचारिणामपि दहनादौ
धूमादीनां कुतश्चिन्निमित्तादनुपजनितदहनादिज्ञानानामप्रामाण्यात् । भवतु
ज्ञानकारणं व्यभिचारे ऽपि बोधकं ज्ञानेन त्वव्यभिचारो ऽपेक्ष्यः स्वकार्ये
इति चेत् । किं ज्ञेयावभासे ऽपेक्ष्यः उत प्रवृत्त्यादिकार्ये । न प्रथमः । जन्म-
नैव ज्ञानस्य ज्ञेयावभासात्मकत्वात् । न चरमः । अव्यभिचारग्राहिणो ऽर्थक्रि-
यासंवादादिज्ञानस्य ज्ञानान्तरादव्यभिचारनिश्चये ऽनवस्थापातादनिश्चये वा
ऽनवधृतप्रामाण्यादस्मात्प्रथमज्ञानप्रामाण्याऽसिद्धेः । स्वतः प्रामाण्ये च प्रथमे
ऽपि तथात्वापातादिति । ननु किं प्रामाण्यस्य स्वतस्त्वम् । ज्ञानसामग्रीमात्र-

---

* अन्ये त्विति २-१-४ पु॰ नास्ति ।

जत्वं चेद् न। प्रामाण्यस्य जातित्वे स्मृतित्वाऽनधिकरणज्ञानगतबाधात्यन्ता-
भावरूपोपाधित्वे वा द्वयोरपि नित्यत्वेन जन्माभावादिति। तदुच्यते। इयं
रूपप्रमा अर्थसम्प्रयोगत्वाऽनधिकरणैतच्चक्षुर्गतगुणजन्या न भवति प्रमात्वात्
श्रोत्रजप्रमावत्। तथा एषा प्रमा उक्तविधगुणज्ञानाऽधीनज्ञाना न भवति
तथाविधगुणज्ञानाधीनप्रवृत्तिकरी च न भवति। तत एव तद्वदेवेति ज्ञप्ति-
व्यवहारयोरपि स्वतस्त्वसिद्धिरिति।

१८ । २० भाष्ये ऽन्यथाख्यातिः स्वीकृतेति भ्रमं व्यावर्त्तयन् व्याचष्टे **अन्य-
स्यान्यधर्मकल्पनेति**। अवभासपदव्याख्यानं **कल्पनेति**। सर्वतन्त्राऽवि-
रुद्धोऽर्थः **सर्वतन्त्रसिद्धार्थः**। (सर्वतन्त्रसिद्धान्तः*) यथा प्रमाणं प्रमेयमि-
ति। रजतवदिति न सादृश्यविवक्षा ऽपि तु भासते परं रजतवत्। न हि वस्तुतो
रजतमिति मिथ्यात्वं विवक्षितमित्याह **न पुनरिति**। एवमारोप्यसिद्धसं-
म्भवप्रयुक्ते आक्षेपे परिहृते पुनरात्मनो ऽधिष्ठानत्वानुपपत्त्या ऽध्यास आक्षि-
प्यतइत्याह **पुनरपीति**। आत्मनो ग्राह्यत्वे स्वग्राह्यत्वं परग्राह्यत्वं वा।
नाद्य इत्याह **न खल्विति**। न द्वितीय इत्याह **आत्मान्तरेति**।
संविदाश्रयत्वेन सिद्धिमाशङ्कते **स्यादेतदिति**। स्वप्रकाशफलस्य जन्मादि-
१९ । २२ निषेधेनात्मत्वमुपपादयति **तथा हीत्यादिना**।

नन्वभ्युपेयते संविदपराधीनप्रकाशेति आत्मा तु जडः किं न
स्यादिति मन्वानं संविदाश्रयत्ववादिनं प्रत्यात्मस्वप्रकाशत्वबाधाह **तथा-
पीति**। अर्थात्मसंबधिन्यां संविद्यजडायामपि नार्थात्मनोः प्रकाशमानता-
सिद्धिः पण्डितेपि पुत्रे पितुरपाण्डित्यवदित्युक्ते वैषम्यं शङ्कते **स्वभा-
वेति**। आश्रयविषययोः पारतन्त्र्यनियमात्स्वभावसंबद्धा संविन्न पुत्रः
पित्रभावे ऽपि भावादित्यर्थः। पुत्रगतजन्यत्वमपि नित्यं पितृगतजनकत्व-
सापेक्षमिति साम्यमाह **हन्तेति**। अर्थात्मनोः प्रकाशेन सह संवित्प्रकाश
इत्युक्ते यः संविदः प्रकाशो यश्चार्थात्मनोस्तौ संविदः सकाशाद्भिन्नावभिन्नौ
२० । ७ वा। नाद्य इत्याह **तत्किमिति**। संविदः प्रकाशव्यतिरेके संविदप्रकाशरूपा

---

* सर्वतन्त्राविरुद्धोर्थः सर्वतन्त्रसिद्धोर्थः सर्वतन्त्रसिद्धान्त इति १ पु॰ पा॰। सर्वतन्त्रावि-
रुद्धोऽर्थः सर्वतन्त्रसिद्धान्त इति २ पु॰। भामती मु॰ पु॰ सर्वतन्त्रसिद्धान्त इति वर्तते लिखित-
पुस्तकेषु केषु चित् सर्वतन्त्रसिद्धार्थ इति वर्तते अतोऽयं पाठभेद इति भाति।

सती घटवदस्वप्रकाशा स्यात् । आत्मार्थप्रकाशयोः संविद्व्यतिरेके संविदर्थात्म-
प्रकाशरूपा न भवेत् किंतु ज्ञापिका स्यात् तथा चानवस्थेत्याशयः । अभे-
दमाशङ्कते **अथेति** । संविदश्चार्थात्मनोश्च प्रकाशावित्यर्थः । कथंभूतौ
तावित्यपेक्षायां स एवाह **संविदेवेति** । दूषयति **एवमिति** । संविदति-
रिक्तप्रकाशाऽनङ्गीकारे संविदर्थात्मनां साहित्यमुक्तं स्यात् तथा च पुत्रपाण्डि-
त्यतुल्यतेत्यर्थः । अर्थसंविदोः सहभावमङ्गीकृत्याऽनुपयोग उक्तः । स एव क्व
चिदसिद्ध इत्याह **न चेति** । अतीतादिबुद्धिस्तत्सहिता तद्विषयहानादिबु- २० । १९
द्धिजनकत्वाद्वर्तमानबुद्धिवदिति शङ्कते **तद्विषयेति** । तद्विषयाश्च ताः हा-
नादिबुद्धयश्च इति विग्रहः । तद्विषयहानादिबुद्धिजनकत्वादिति हेतौ तद्वि-
षयत्वविशेषणस्याऽसिद्धिमाह **नेति** । तां परिहरति **हानादिजननादि-
ति** । सिद्धे च हेतावतीतादिसंविदामर्थसहभावसिद्धेस्तद्विषयत्वसिद्धिरित्याह
अर्थविषयेति । अर्थविषयहानादिप्रवृत्तिजननाद्धानादिबुद्धेरर्थविषयप्रका-
शत्वे ऽतिप्रसङ्गं दर्शयन्विशेषणाऽसिद्धिं द्रढयति **तत्किमिति** । **अर्थइति**
सप्तमी । प्रयत्नवदात्मदेहसंयोगोऽर्थविषयप्रवृत्तिहेतुरपि जडत्वान्नार्थविषयप्रका-
शश्चेत्संवित्प्रकाशो ऽपि स्वप्रकाशत्वात् स्वभावे साक्षी अर्थे त्वप्रकाशनाद्
जड एव । अर्थस्यापि स्वप्रकाशरूपान्तर्भावेन सिद्धिश्चेदर्थसंविद्भेदो न स्यादि-
त्यभिप्रेत्याह **नन्वयमिति** ।

मा भूद्भेद इति वदन्तं बौद्धगन्धिनमेकदेशिनं निराकरोत्याचेप्रा
न च प्रकाशस्येति । सिद्धान्त्यभिमतं संविद्विवर्त्ततया तदभेदेनार्थसि-
द्धिमध्यासाऽसम्भवं वक्ष्यामीति मन्वानो ऽनुवदति **तस्मादिति** । एवं २१ । १
संविदः स्वप्रकाशतां विषयस्य च तदध्यस्ततामुक्त्वा तस्या आत्मत्वसिद्ध्यर्थ-
मद्वितीयतामाह **न चास्येति** । **आजानतः** स्वभावतः । इत्थं तर्कि-
ते* आत्मस्वप्रकाशत्वे प्रयुज्यते । देवदत्तसुप्तिकालो† देवदत्तात्मा ऽस्तीति
व्यवहारहेतुसाक्षात्कारवान् कालत्वादितरकालवदिति । न च सुप्तावहंवृत्ति-
रस्ति न च पुरुषान्तरं साक्षात्कर्त्तुमर्हति । ईश्वरमते योगिमते वा ऽनैश्वरे-
त्ययोगजेति च विशेषणीयमिति स्वप्रकाशत्वसिद्धिरिति । तदेवं पक्षान्तरनि-
रासेन स्वप्रकाश आत्मेति स्थापितम् । अस्मिन् पक्षे ऽध्यासाक्षेपकतया भाष्यं

* तर्कितमिति १ पु॰ पा॰ ।   † सुषुप्तिकाल इति २ पु॰ पा॰ ।

योजयति **तदयमिति** । प्रत्यक्छब्दार्थमाह **अशक्येति** । **प्रतीपं** प्राति-
२१ । ८ लोम्येन । तदेव दर्शयति **निर्वचनीयमिति** । **कथमिति** थमुप्रत्यया-
न्तस्य किंशब्दस्य रूपम् । तच्च किंशब्द आक्षेपार्थे इत्यर्थः । अप्रथमान-
त्वपक्षे दूषणं **सर्वो हीति** । भाष्योक्तमाह **सदातने ऽपीति** ।

भाष्यकारेणात्मनो ऽस्मत्प्रत्ययविषयत्वोपवर्णनेना ऽविषयत्वस्यासिद्धि-
रुक्ता सा न युक्ता स्वप्रकाशस्य विषयत्वायोगादित्याशङ्क्यौपाधिकरूपेण
विषयतामाह **सत्यमित्यादिना** । बुद्धिमनःप्राणेन्द्रियाणां परलोकगतौ
आश्रयभूतानि भूतसूक्ष्माणि* सूक्ष्मं शरीरम् इन्द्रियाणि बाह्यानि† ।
ननु स्वतो ऽविषयत्वमौपाधिकरूपेण विषयत्वमिति किमिति व्यवस्था-
प्यते स्वत एव शुक्तिवद् ग्रहणाऽग्रहणे किं न स्यातामित्याशङ्क्य निरं-
शत्वान्नेत्याह **न हि चिदेकरसस्येति** । ननु चिद्रूपे भात्यप्यानन्दादि
न भातीति दृष्टम् । नेत्याह **न खल्विति** । तर्हि साक्षिप्रतिभासे आन-
२२ । १३ न्दाद्युल्लेखोपि स्यादित्याशङ्क्याह **गृहीता एवेति** । यथा खल्वभिज्ञायां
भासमानमपि देवदत्तैक्यं तत्तेदन्तोपाधिद्वारकसामानाधिकरण्यापरामर्शाद्वि-
विक्तं नोल्लिख्यते एवं चिद्रूपभाने ऽपि दुःखप्रत्यनीकत्वादिरूपेणापरामृष्टा
आनन्दादयो ऽप्यगृहीता इव भान्तीत्यर्थः । ननु चित्प्रतिभासे तदात्मत्वादा-
नन्दादयो भान्ति चेत्तर्हि बुद्ध्यादिभ्यश्चैतन्यस्य भेदो ऽपि प्रतीयेत‡ तच्च वि-
द्यमानत्वात् तथा च बुद्ध्याद्यध्यासाऽयोग इत्याशङ्क्याह **न चात्मन इति** ।
आनन्दादीनां वास्तवत्वाच्चैतन्यैकरसता न भेदस्यापीत्यभानमित्यर्थः ।
यदुक्तं विषयत्वे युष्मत्प्रत्ययविषयत्वापत्तिः§ ततश्चानात्मत्वमिति तत्राह
तस्य चेति । इदमात्मकत्वेन विषयत्वमनिदमात्मकत्वेनास्मदुल्लेखश्चो-
पपद्यते इत्यर्थः । इदमनिदमात्मकत्वं जीवस्य तद्धर्मान्वयप्रदर्शनेनोपपाद-
यति **तथा हीति** । **विच्छुरणात्** मिश्रणात् । ननूपाधिपरिच्छेदमन्त-
२३ । २ रेणान्य एव परमात्मनो जीवो ऽहंप्रत्ययविषयोऽस्तु तत्राह **न खल्विति** ।
अस्मत्प्रत्ययविषयत्वमपि जीवस्याहम्प्रत्ययविशिष्टे ऽन्तःकरणे व्यवहारयो-

---

* सूक्ष्माणि वेति वाशब्दो ऽधिकः ३ पु॰ । † सत्यमित्यादिनेति प्रतीकाग्रे–बुद्धिमनसी एव सूक्ष्मं शरीरमिन्द्रियाणि बाह्यानि । बुद्धिमनःप्राणेन्द्रियाणां परलोकगताश्रयभूतानि भूतसूक्ष्माणि वा सूक्ष्मं शरीरम् इति पाठः ३ पु॰ । पूर्वोत्तरवाक्ययोर्व्यत्यस्तः पाठः ५ पु॰ ।

‡ प्रकाशेतेति २ पु॰ पा॰ । § विषयापत्तिरिति ५ पु॰ पा॰ ।

ग्यत्वापत्तिर्न कर्मत्वमतो न कर्मकर्तृत्वविरोध इत्युपसंहारव्याजेनाह **तस्मादिति** । स्वप्रकाशे यावत्सत्त्वं प्रकाशनान्नारोप इति पक्षः पूर्वपूर्वाध्यासवशादप्रकाशसमर्थनेन निरस्तः । इदानीमप्रथमाने नास्त्यारोप इति पक्षमुपन्यस्यति* **स्यादेतदित्यादिना** । अपरोक्षत्वाऽभावश्चाप्रथमानता । अपरो- २३ ।
क्षभ्रमाधिष्ठानत्वे ह्यपरोक्षेणात्मना भवितव्यम् । स चेन्नाऽपरोक्षस्तस्मिन्नध्यासोपयोगिप्रथनाभावान्नाध्यास इत्यर्थः । रूपरहितद्रव्यत्वात् स्पर्शरहितद्रव्यत्वादिति द्वौ हेतू वक्ति **नभो हीति** । वायुः स्पर्शनप्रत्यक्ष इति पक्षे द्वितीय एव हेतुः । **दुःखाकरोति** वस्तुवृत्तेनादुःखिनं दुःखिनं करोतीत्यर्थः । वस्तुस्वरूपं च† तदवधारणं चेति कर्मधारयमभिप्रेत्याभिव्यक्तं स्वरूपज्ञानमाह **चिदात्मरूपमिति** ।

निरुपद्रवभूतार्थेति । भावनाप्रकर्षाद्विशदाभं सर्वविषयं ज्ञान- २५ । १
मुत्पद्यते तेन विषयीकृतस्य निरुपद्रवपरमार्थस्वभावस्य संस्कारबलादनुवर्तमानविपर्ययैर्न बाधः । कुतः । बुद्धेः परमार्थभावनाजन्याया वस्तुपक्षपातित्वेन प्राबल्यात् । ननु लङ्घनाभ्यासवन्नैरात्म्यादिभावनापि सातिशयमेव कार्यं जनयति कथं सर्वविषयज्ञानलाभ इति शङ्कामपाकर्तुमयत्नवत्त्वे ऽपीत्युक्तम् । लङ्घनाभ्यासे हि यो युगमात्रदेशलङ्घने प्रयत्नस्ततो ऽधिको द्वियुगदेशलङ्घने ऽपेक्ष्यते । नैरात्म्यादितत्त्वविषयप्रत्ययाभ्यासे तु यादृशः प्रथमप्रत्ययोत्पादे प्रयत्नः तादृश एव द्वितीयादावपि वैशद्याधिक्यं च दृश्यते । तच्च निरतिशयं भवितुमर्हति । यत्र हि यो ऽभ्यासः कार्योत्कर्षकरः प्राक्तः प्रयत्नादधिकप्रयत्नानपेक्षश्च स तत्र निरतिशयकार्योत्कर्षं करोति पुटपाकाभ्यास इव सुवर्णस्य रक्तसारतामिति । अयत्नवत्त्वे ऽप्यधिकप्रयत्नाऽनपेक्षत्वे ऽपि बुद्धेस्तत्पक्षपातित्वेनोदयान्निरतिशयोत्कर्षसिद्धिश्चेत्यर्थः ।

तमेतमित्यादिभाष्यस्याध्यस्य लोकव्यवहार इति भाष्येण पौनरुक्त्य-
माशङ्क्याह **यदुक्तमिति** । प्रमाकरणानि प्रमाणानि नाऽविद्यावन्तं प्रेरकत्वे- „ । १८
नाश्रयन्त्यनुपयोगादित्याक्षेपाभिप्रायमाह **तत्त्वपरिच्छेदो हीति** । विरोधाभिप्रायमाह **नाऽविद्यावन्तमिति** । अहमभिमानहीनस्येति भाष्यपदं

* उपन्यस्य निरस्यतीति २ पु॰ पा॰ । † चशब्दो नास्ति १ पु॰ ।

२६ । ६ व्याचष्टे **तादात्म्येति** ।। तादात्म्याध्यासो देहादिधर्म्यैक्याध्यासः । ममाभि-
मानहीनस्येत्येतद्व्याकरोति* **तद्धर्मेति** । अध्यासहीनस्य प्रमातृत्वानुपपत्ति-
मुपपादयति **प्रमातृत्वं हीति** । निर्व्यापारे चिदात्मनि प्रमाणप्रेरणं व्यापारः
परोपाधिरध्यस्त† इति प्रमाणानामविद्यावत्प्रेर्यत्वमित्यर्थः । **दण्डिन
इति** । यथा दण्डदण्डिसमुदायलक्षणद्वारेण समूहिपरो दण्डिशब्दः एवमि-
न्द्रियशब्दोपि इन्द्रियाऽनिन्द्रियप्रमाणपर इति व्यवहार इति । क्रियामात्रो-
पादानात्समानकर्तृकक्रियापेक्षक्त्वाप्रत्ययायोगमाशङ्क्याऽर्थाक्षिप्तकर्तुरुपादानेन
परिहरति **व्यवहारक्रिययेति** । **व्यवहार्याक्षेपादिति** । व्यवहारिण
आक्षेपादित्यर्थः । अनुपादाय व्यवहारो न सम्भवतीत्यनुपपन्नम् । अनुपादानस्य
प्रमातृकर्तृकत्वेनासम्भवनस्य व्यवहारकर्तृकत्वेन कर्तृभेदादित्याशङ्क्याह **अनु-
पादायेति** । नैवमिह संबन्धो ऽनुपादाय न सम्भवतीति किं तर्ह्यनुपादाय
„ । २० यो व्यवहारः स न सम्भवतीति । **किमिति पुनरिति** साङ्ख्यस्य शङ्का ।
अथ स्वयमेवेति स्वभाववादिनः । **अथ देह एवेति** लौकायतिकस्य । एवं
प्रमाणप्रेरकत्वेनाध्यासं समर्थ्य प्रमाश्रयत्वेनापि समर्थयति **आतश्चेति**‡ ।
अवश्यं चेत्यर्थः । मा भूत्प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरेतावता कथं प्रमाणा-
नामध्यासाश्रितत्वमित्याशङ्क्य चिदचिद्रूप§संवलितप्रमाया आश्रयः प्रमाता ऽपि
तत्स्वभावो भवितुमर्हति । न च चिदचित्संवलनमध्यासमन्तरेणेति सम्भ-
वन्ति प्रमाणान्यध्यासाश्रयाणीत्याह **प्रमायां खल्विति** । परिणामविशेष
उद्भूतसत्त्वः प्रमेयप्रवण इति सुखादेर्व्यवच्छिनत्ति । परिणामतया च
जाड्यमुक्तम् । यदि चिदात्मा तत्रान्तःकरणे ऽध्यस्येत तर्ह्येव तत्परिणामश्चि-
द्रूपो भवेदित्यर्थः । **तत्सिद्धौ चेति** । प्रमाश्रयत्वं हि प्रमातृत्वमित्यर्थः ।
अनेन नाऽविद्यावन्तमिति ग्रन्थस्याक्षेपः परिहृतः । **तत्त्वपरिच्छेदो
हीति** ग्रन्थस्थं परिहरति **तामेव चेति** । **प्रमातृत्वेन चेति** । अनुप-
२७ । १७ लक्षणे हि प्रमातृत्वशक्तिः स्वयमेव कल्प्या नाध्यासोपपादिका प्रमा तु
चिदचिद्रूपगर्भिणी कल्पयत्यध्यासमिति ।

---

* एतत्पदं व्याकरोतीति २ पु· पा· ।   † परोपाधिना ऽध्यस्त इति २ पु· पा· ।

‡ मुद्रितभामतीपुस्तके ऽतश्चेति स्थाने आतश्चेति शोध्यम् ।

§ चिद्रूपेत्येव २ पु· पाठः ।

तथा च पारमर्षमिति । शेषलक्षणे ऽभिहितम्—शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्तस्मात्स्वयं प्रयोगे स्यात् * । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत्र संशयः । किं साङ्गे प्रधाने यजमान एव कर्त्ता उतोद्देशत्यागात्मकप्रधाने एव यजमानस्य कर्तृत्वमङ्गेषु यथायथमृत्विजामिति । तत्रेदं पूर्वपक्षसूत्रम् । साङ्गप्रधानस्य प्रयोगे ऽनुष्ठाने स्वयं यजमानः कर्ता स्यात् । यतः शास्त्रगम्यं फलं प्रयोक्तरि प्रतीयते कुतस्तल्लक्षणत्वाच्छब्दप्रमाणकत्वादर्थस्य । स्वर्गकामो यजेतेति स्वर्गोद्देशेन भावनां विदधदाख्यातं भावनाक्षिप्तकर्तृसंबद्धं फलमवगमयति । आत्मनेपदेन च फलस्य कर्तृगामिता गीयते । साङ्गं प्रधानं फलसाधनमिति सर्वत्र याजमानत्वे प्राप्ते सिद्धान्तः—अन्यो वा स्यात्परिक्रयाम्नानाद्विप्रतिषेधात्प्रत्यगात्मनि† । यदि यजमान एव सर्वत्र कर्ता स्यात् तर्हि दक्षिणाभिः परिक्रयणमृत्विजामनर्थकं स्यात् । स्वस्मिँश्च परिक्रयो विप्रतिषिद्धस्तत आध्वर्यवादिकमृत्विग्भिरेव कार्यं तस्मिंश्च परिक्रयद्वारा प्रयोजककर्तृत्वाद्यजमान एव साङ्गफलभागिति । अत्र च पूर्वपक्षसिद्धान्तयोः कर्तृगामिनि फले न विगानमिति पूर्वपक्षसूत्रमपि तावत्यंशे प्रमाणमित्युदाहृतम् । २८ । १४

अशनायाद्यतीतपदसूचिताऽकर्तृत्ववैपरीत्यमाह **प्रयोक्ता हीति** । असंसार्यात्मपदसूचिताभोक्तृत्ववैपरीत्यमाह **कर्मजनितेति** । अपेतब्रह्मेत्याद्युक्ताऽनधिकाररूपवैपरीत्यमाह **अधिकारीति** । अधिकारित्वस्य व्याख्यानं **स्वामीति** । **अकर्त्ता** कर्तृत्वशक्तिरहितः । ननु ब्रह्मज्ञानेन कर्मविधयो यदि यदा कदापि बाधिष्यन्ते तर्ह्यप्रमाणं स्युस्तत्राह **न च परस्परेति** । **महापातकेति** । महापातकं ब्रह्मवधादि । उपपातकं गोवधादि । २९ । २२
संकरीकरणादीनि च मनुनोक्तानि ।

खराश्वोष्ट्रवराहाणामजाविकवधस्तथा ।
संकरीकरणं ज्ञेयं मीनाऽहिमहिषस्य च ॥
निन्दितेभ्यो धनाऽऽदानं वाणिज्यं शूद्रसेवनम् ।
अपात्रीकरणं ज्ञेयमसत्यस्याभिभाषणम्‡ ॥

---

* जैमिनि सू॰ अ॰ ३ पा॰ ७ सू॰ १८ ।

† जैमिनिसू॰ अ॰ ३ पा॰ ७ सू॰ २० । ‡ मनुस्मृतिः । अ॰ ११ श्लो॰ ६८ । ६९ ।

कृमिकीटवयोहत्यामद्यानुगतभोजनम् ।
फलैधःकुसुमस्तेयमधैर्यं च मलावहम्* ॥ इति ।

आदिशब्दात्तदुक्तं जातिभ्रंशकरादि गृह्यते ।

ब्राह्मणस्य रुजः कृत्यं घ्रातिरघ्रेयमद्ययोः ।
जैह्म्यं पुंसि च मैथुन्यं जातिभ्रंशकरं हि तत्† ॥ इति ।

३० । ३ अभ्यर्हितत्वाद्धर्म्यध्यासः प्रथमं वक्तव्य इत्याशङ्क्याह **तत्राह-मिति** । गृहीतविवेकत्वात्पुत्रादीनामात्मनि तद्धर्माध्यासाऽसम्भवमाशङ्क्याह **देहतादात्म्यमिति** । देहगतस्वामित्वस्यारोपे कथं साकल्यवैकल्यारोपसिद्धि‡स्तत्राह **स्वस्य खल्विति** । देहगतस्वामित्वस्य ये सकलत्वविकलत्वे ते चेदात्मन्यध्यस्ते कथं बाह्यग्रहणं भाष्ये तत्राह **बाह्येति** । साक्षिशब्दार्थमाह **चैतन्योदासीनताभ्यामिति** । सक्रियोपाधेरात्मन्यारोपादात्मनि कर्तृत्वभोक्तृत्वे उपपादिते इत्यर्थः । **चैतन्यमिति** । अन्तःकरणादिगतमित्यर्थः । साक्षिणि इति निर्देशात् शुद्धे ऽध्यास इति भ्रम§मपनयति **तदनेनेति** । **प्रकृतमिति** । उपोद्घातरूपेणाध्यासं वर्णयतो भाष्यकारस्य प्रथमं बुद्धिस्थत्वेन प्रकृतं विषयप्रयोजनमित्यर्थः । एवमध्यासे सम-
३१ । १४ र्थिते सति|| प्रसिद्धत्वादजिज्ञास्यत्वमाक्षेपावसरोक्तं निरस्तमित्याह **एतदुक्त-मिति** । **पश्वेरन्निति** भाष्यगतारभ्यन्तइतिपदस्य व्याख्या । अतत्परवेदान्तप्रत्ययो यद्यप्यप्रमा तथाप्यभ्यस्तो वास्तवकर्तृत्वादिनिवर्तक इत्याशङ्क्याह **न चासाविति** ।

अधिकरणमारचयति **एतावानिति** । वेदान्तशास्त्रमनारभ्यमारभ्यं वेति विषयप्रयोजनाऽसम्भवसम्भवाभ्यां संशयः । वेदान्तैरध्ययनविधिना सामान्यतः प्रयोजनवदर्थावबोधपरतां नीतैर्विशेषतश्च संदिह्यमानार्थतया विचाराकाङ्क्षैराक्षेपादस्याधिकरणस्य श्रुतिसङ्गतिः । समन्वयाद्यशेषविचारहेतुत्वाच्छास्त्रप्रथमाध्यायप्रथमपादसङ्गतयः ।

३२ । ६ आशङ्कापनयनपूर्वकं पूर्वपक्षमाह **यद्यपीत्यादिना** । अविवक्षितार्थत्वं वेदान्तानां शङ्कितुमशक्यम् । अध्ययनविधेर्दृष्टार्थत्वस्य तुल्य-

---

* मनुस्मृतिः । अ॰ ११ श्लो॰ ७० । † मनुस्मृतिः । अ॰ ११ श्लो॰ ६७ ।

‡ वैकल्यारोपोक्तिरिति १ पु॰ पा॰ ।

§ अध्यासभ्रममिति इतिशब्दविकलः पाठः १ पु॰ । || सतीति नास्ति ३ पु॰ ।

त्वात् । न च कार्यपरत्वात्सर्ववेदस्य सिद्धरूपे ब्रह्मणि वेदान्तानामप्रामाण्यशङ्का लोकवेदयोर्वाक्यार्थस्याऽविशेषेण सिद्धरूपे ब्रह्मणि वेदान्तानां मन्त्राणामिव देवतादौ प्रामाण्यसम्भवात् । नाप्यनुत्पत्तिलक्षणाप्रामाण्यं शङ्क्यम् । ब्रह्मात्मैक्यबोधित्वाद्वेदान्तानाम् । अतो नाऽनारभ्यं शास्त्रमित्यर्थः । परिहरति **तथापीति** । प्रमाणस्वरूपपर्यालोचनेन मीमांसाऽनारम्भ-
मुक्त्वा प्रमेयस्वरूपालोचनयापि तमाह **न चेति** । **वक्ष्यमाणेनेति** । तत्पु- ३२ ।
नर्ब्रह्मेत्यादावित्यर्थः ।

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

वृत्तिव्यक्तस्वरूपज्ञानमभिप्रेत्याह **तत्र साक्षादिति** । इष्यमाणत्वेन ज्ञानस्य प्रयोजनसूचनमुपपाद्य संशयसूचनमुपपादयति **जिज्ञासा त्विति** । **सा हीति** । सा न्यायात्मिका मीमांसा अनेन* ग्रन्थेन शिष्यतइत्यर्थः । विषयप्रयोजनब्रह्मस्वरूपप्रमाणयुक्तिसाधनफलविचाराणां च प्रतिज्ञानाद्बह्वर्थसूचनता† । **लघूनि** असंदिग्धार्थानि । सांशयिकं‡ हि नानार्थस्फोरकत्वेन गुरु । सूचितार्थत्वे§ हि मुख्यार्थस्याप्यवश्यम्भावित्वाद्बह्वर्थत्व-
सिद्धिः । बहूनामप्रकृतत्वात् तत्रातिनिर्द्धारणाऽयोगमाशङ्क्याह **तेष्विति** । ३४ ।
अथैष ज्योतिरित्यत्रापूर्वसंज्ञायोगिविधास्यमानकर्मप्रारम्भार्थो ऽथशब्दः । अधिकरणं तु गुणोपसंहारे|| ऽनुक्रमिष्यते । प्रधानस्य जिज्ञासायाः शास्त्रेणाप्रतिपाद्यमानत्वात्तत्प्रतिपादनप्रारम्भार्थो मा भूद् ब्रह्मतज्ज्ञानप्रारम्भार्थो भवत्वित्याशङ्क्याह **न चेति** । दण्डी प्रैषानित्यत्र हि मैत्रावरुणः प्रेष्यति चान्वाहेति मैत्रावरुणस्य प्रैषानुवचने प्राप्तत्वादविवक्षा इह तु जिज्ञासाया नाविवक्षा कारणम् । प्रत्युत तदविवक्षायां विषयप्रयोजनसूचनं न स्यादित्यर्थः । ननु किं संशयसूचनेन निर्दिष्टे ब्रह्मतज्ज्ञाने एव विषयप्रयोजने सिध्यत-
स्तत्राह **न हीति** । **अप्रस्तूयमानत्वात्** प्रत्यधिकरणमप्रतिपाद्यमान- ३५ ।
त्वात् । मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्येति सूत्रे माङ् माने इत्यस्य ङानुबन्धस्य धातोर्नान्तत्वं निपातितम् । अस्य च पूजितविचारार्थत्वं प्रसि-

---

* अनेनेति नास्ति ३ पु० ।

† वचनतेति पाठः २-३-५ पु० ।

‡ संशायकमिति ३ पु० पाठः ।

§ सूचितार्थत्वेनेति ३ पु० पा० ।

|| जैमिनिसू० अ० २ पा० २ सू० २२ ।

द्धिबलात्स्वतो नान्तस्य तदर्थत्वं स्मृतिसिद्धमिति मान्नित्यादिधातुभ्यः सन् भवत्यभ्यासस्य च दीर्घ इत्यर्थः । धातोः कर्मण इत्युत्तरसूत्रे इच्छार्थे सन्विधानादयमनिच्छार्थे इति गम्यते । लक्षितविचारप्रारम्भार्थो ऽथशब्दो ऽस्तु
३५ । ११ नेत्याह **न च स्वार्थपरस्येति** । वाच्याया जिज्ञासायाः संशयसूचनेन वाक्यार्थान्वयोपपत्तौ न लक्षणा । अधिगतविषयप्रयोजनस्तु स्वत एव विचारे प्रवर्त्स्यतीत्यर्थः । अथाधिकारार्थ इत्यत्राथशब्दस्यानन्तर्यार्थत्वं वदन् प्रष्टव्यः किं पूर्वप्रकृतादथशब्दादानन्तर्यमुत निरन्तरादानन्तर्यपक्षात् । नाद्य इत्याह **पूर्वप्रकृतस्येति** । द्वितीये पूर्वप्रकृतमथशब्दमपेक्ष्य किं निरन्तरानन्तर्यार्थत्वपक्षादानन्तर्यं ब्रूयाद् द्वितीयो ऽथशब्दो ऽधिकारार्थत्वपक्षस्य उतानपेक्ष्यैव । नाद्यः । अवश्यापेक्षणीयत्वात्पूर्वप्रकृतापेक्षाया अथशब्दस्य तादर्थ्ये सत्यर्थान्तरकल्पनानवकाशात् । न द्वितीय इत्याह **न च प्रकृतानपेक्षेति***। एकधर्म्यपेक्षणे हि तन्निरूपकयोः पक्षयोस्तुल्यार्थत्वेन विकल्पः कल्प्यतइत्यर्थः । नानेन भाष्येण पूर्वप्रकृतापेक्षाया आनन्तर्यरूपत्वमुच्यते । आनन्तर्यरूपत्व†पक्षे विकल्पाप्रतिभानात् किं तूभयथापि ब्रह्मजिज्ञासाहेतुभूतप्रकृतसिद्धिरस्ति प्रयो-
३६ । १८ जनमतः फलद्वारेणाव्यतिरेक इत्युच्यतइत्याह **अस्यार्थ इति** । ननु उभयथा फलाभेदे किमित्यानन्तर्यग्रहस्तत्राह **परमार्थतस्त्विति‡** । अन्यदप्यदृष्टादिकमपेक्ष्य भवन्ती जिज्ञासा यस्मिन् सति भवत्येवेत्यर्थः । **ब्रह्मेति§** । स्वाध्यायाध्ययनानन्तरं ब्रह्मजिज्ञासाया भवितुं योग्यत्वात्तदानन्तर्यमथशब्देन वक्तुं युक्तमित्यर्थः । योग्यत्वे कारणमाह **ब्रह्मणो ऽपीति** । **अत्र चेति||** । स्वाध्यायस्य नित्यत्वात्तदानन्तर्यमयुक्तमिति तद्विषयमध्ययनं लक्षयतीत्यर्थः । ननु धर्मजिज्ञासासूत्रे ब्रह्मानुपादानात् कथं तेन गतार्थता तत्राह **धर्मशब्दस्येति** । नन्विच्छायां विनियोगो न ज्ञाने इति तत्राह **ज्ञानस्यैवेति** । अर्थतः प्राधान्याद् ज्ञानस्य तत्रैव विनियोग इत्यर्थः । साक्षात्कारोपयोगं यज्ञादीनामाह **तत्रापीत्यादिना** । विशेषहेत्वभावो
३७ । ७ ऽसिद्ध इत्याह **तत्त्वमसीति** । योग्यतावधारणे कर्म किमप्रमाणतयोप-

---

* पूर्वप्रकृतानपेक्षेति मूलाऽपरिगृहीतः पाठः ५ पु० ।   † रूपत्वेति नास्ति ३ पु० ।

‡ एतदग्रे **यस्मिन्निति** इति अधिकं दृश्यते ३ पु० । अर्थसंगतिरपि एवं साध्वी भवति ।

§ ब्रह्मेतीति न दृश्यते १-२-५ पु० । || न दृश्यते १-२-५ पु० ।

युज्यते उत प्रमाणतया । नाद्यः । अप्रमाणात्प्रमाणकार्योत्पादव्याघातादित्याह
तत्किमिति । प्रमाणं कारणं यस्य तत्तथा । न द्वितीयः । कर्मणः* प्रमा-
णत्वप्रसिद्ध्यभावादित्याह **प्रत्यक्षादीति** । पातञ्जलसूत्रे स इति चित्तवृ-
त्तिनिरोध उक्तः । **दृढभूमिः** । तत्त्वप्रतिपत्तौ दृढ उपाय इत्यर्थः । नित्या-
नामेव संस्कारद्वारा भावनाङ्गत्वमुक्त्वा सर्वकर्मणामुत्पत्तिविधिविहितरूपमुपा-
दाय भावनाङ्गतां विनियोगवचनवशेनाह **अन्ये त्विति** । संयोगः ३९ । ९
शेषत्वबोधनं चतुर्थे चिन्तितम् ।

एकस्य त्विति । खादिरे पशुं बध्नाति खादिरं वीर्यकामस्य यूपं कुर्वी-
तेति च श्रूयते । तत्र संशयः किं काम्ये इव खादिरता नित्ये ऽपि स्यादुत नेति ।
तत्र फलार्थत्वेनानित्याया नित्यप्रयोगाङ्गता न युक्ता । यत्तु नित्येपि खादिरत्व-
श्रवणं तत्काम्यस्यैव पशुबन्धनयुक्तयूपरूपाश्रयदानार्थं ततो न नित्ये खादिर-
तेति प्राप्ते राद्धान्तः । एकस्य खादिरत्वस्य उभयत्वे क्रत्वर्थपुरुषार्थत्वरूपोभया-
त्मकत्वे वचनद्वयेन क्रतुशेषत्वफलशेषत्वलक्षणसंयोगभेदावगमान्न नित्याऽनि-
त्यसंयोगविधिविरोधः । न चाश्रयदानाय नित्यवाक्यम् । संनिधानादेवाश्रयला-
भात् । तत उभयार्था खादिरतेति† ।

विशेषणत्रयवतीति । आदरनैरन्तर्यदीर्घकालत्ववतीत्यर्थः । ३९ । १
कर्मापेक्षत्वेन ब्रह्मभावनायास्तदवबोधापेक्षामुपपादयन् कर्मावबोधानन्त-
र्यमिति भाष्यं घटयति **न चेति** । दृष्ट उपकारस्तुषविमोकादिरदृष्टः
प्रोक्षणादिजः प्रयाजादिजश्च । स चासौ यथायोगं सामवायिकः क्रतु-
स्वरूपसमवायी । आराद् दूरे फलापूर्वसिद्धावुपकारश्च तस्य हेतुभूतानि औप-
देशिकानि प्रत्यक्षविहितानि आतिदेशिकानि प्रकृतेर्विकृतावतिदेशप्राप्तानि
क्रमपर्यन्तानि क्रमेणाप्यवच्छिन्नान्यङ्गानि तेषां ग्रामः समूहस्तत्सहितं परस्प-
रविभिन्नं कर्मस्वरूपं तदपेक्षिताधिकारिविशेषश्च तयोः परिज्ञानं विना कर्माणि
न शक्यान्यनुष्ठातुमित्यन्वयः । औपदेशिकातिदेशिकेति शेषलक्षणादारभ्यो-
परितनतन्त्रस्यापेक्षोक्ता । क्रमपर्यन्तेति पञ्चमनयस्य । अङ्गग्रामेति तार्त्तीयस्य ।
सहितेति चातुर्थिकस्य प्रयोज्यप्रयोजकविचारस्य । परस्परविभिन्नस्येति द्वितीय-

* कर्मण इति नास्ति २ पु॰ ।
† इदं संयोगपृथक्त्वाधिकरणे द्रष्टव्यम् । जैमिनिसू॰ अ॰ ४ पा॰ ३ सू॰ ५ ।

लक्षणार्थस्य । तदधिकारीति षष्ठाध्यायार्थस्य । दृष्टादृष्टेति संस्कारकर्मत्वगुण-
कर्मत्व*प्रधानकर्मत्वादिचिन्तायाश्च द्वितीयाध्यायगताया अपेक्षेत्युक्तम् ।
४० । ५ **द्विरवत्तेति** । आग्नेययागः स्वोत्पत्तये ध्रुवदानं जुहोतीतिवचनाद् द्विर्हविषो ऽवद्यतीति विहितं द्विरवत्तपुरोडाशमपेक्षतइति । भावनासाध्ये साक्षात्कारे यदि कर्मापेक्षा तर्हि स ब्रह्मस्वरूपमन्यो वा । स्वरूपत्वे न कर्मापेक्षेत्याह **स चेत्यादिना** । पिष्टं संयौतीति विहितमिश्रणस्य पिण्ड उत्पाद्यः । गां दोग्धीति विहितदोहनेन प्राप्यं पयः । साक्षात्कारस्य ब्रह्मस्वरूपाद्भेदे ब्रह्म जडं स्यात्तच्चेन्द्रियाद्यगोचरः शब्दश्च परोक्षप्रमा†हेतुरिति केवलभावनाभूः साक्षात्कारो ऽप्रमा स्यादित्याह **ततो भिन्नस्य चेति** । मन्थरः स्तिमितः । स्फुरन्त्यो ज्वाला जटाकारा अस्य सन्तीति जटिलः । **न च कूटस्थेति** । कूटस्थनित्यतया पूर्वरूपापायलक्षणो विकारो ऽभिनवगुणोदयरूपसंस्कारश्च न स्तः । सर्वव्यापितया न प्राप्तिः । कूटस्थनित्यत्वाविरुद्धं दोषविघा-
११ । २४ त‡संस्कारमाह **अनिर्वचनीयेति** । प्रतिसीरा तिरस्करिणी । रङ्गव्यापृतो नटः । आरोह उच्छ्रयः । विस्तारपरिमाणं परिणाहः । उपासना किमापातज्ञानाभ्यासो निश्चयाभ्यासो वा । आद्यं भङ्क्त्वा द्वितीयं शङ्कते **नन्विति** । ननूपासनैवाविद्यां निवर्त्तयतु किं साक्षात्कारेण यत्र कर्मोपयोगस्तत्राह **न चेति** । ननु रज्जुसर्पादिभ्रमा अपरोक्षा अप्याप्तवचनादिजनितपरोक्षज्ञानैर्निवर्त्तन्ते । सत्यं ते निरुपाधिकाः कर्तृत्वादिस्तु सोपाधिक इत्यभिप्रेत्य तथाविधमुदाहरति **दिङ्मोहेति** । नौस्थस्य तटगततरुषु चलद्वृक्षभ्रमः अपरोक्षे ब्रह्मणि शब्द एवापरोक्षज्ञानहेतुरन्यथा तु तत्र परोक्षज्ञानस्य
४१ । २३ भ्रमत्वापातादिति तत्राह **न चैष इति** ।

अयमभिसन्धिः । स्वतो ऽपरोक्षस्यापि ब्रह्मणः पारोक्ष्यं भ्रमगृहीतम् । तत्रापरोक्षप्रमाकरणादेव तत्साक्षात्कारः । अन्तःकरणं च सोपाधिके आत्मनि जनयत्यहंवृत्तिमिति सिद्धमस्यात्मन्यपरोक्षधीहेतुत्वम् । तत्तु शब्दजनितब्रह्मात्मैक्यधीसन्ततिवासितं तत्पदलक्ष्यब्रह्मात्मतां जीवस्य साक्षात्कारयति अक्षमिव पूर्वानुभवसंस्कारवासितं तत्तेदन्तोपलक्षितैक्यविषयप्रत्यभि-

---

* गुणकर्मत्वेति नास्ति १–५ पु॰ ।
† परोक्षप्रकाशेति ३ पु॰ पा॰ ।
‡ निर्घातेति ३ पु॰ पा॰ ।

ज्ञाहेतुः शब्दस्तु नापरोक्षप्रमाहेतुः क्लृप्तः । प्रमेयापरोक्ष्ययोग्यत्वेन प्रमायाः साक्षात्कारत्वे देहात्मभेदविषयानुमितेरपि तदापत्तिः । दशमस्त्वमसीत्यत्रापि तत्संनिवादक्षादेव साक्षात्कारः । अन्यादेस्तु परोक्षधीरेव । अपि च ।

वेदान्तवाक्यजज्ञानभावनाजा ऽपरोक्षधीः ।
मूलप्रमाणदार्ढ्येन न भ्रमत्वं प्रपद्यते ॥

न च प्रामाण्यपरतस्त्वापातः । अपवादनिरासाय मूलशुद्ध्य*नुरोधात् । दृश्यते त्वग्र्यया बुद्ध्येत्यादेर्नयबृंहितवचनादित्यमुररीकारः । साक्षादपरोक्षा†दित्येवमाकारैव धीः शब्दादुदेति न तु परोक्षं ब्रह्मेति । सा तु करणस्वभावात्परोक्षा ऽवतिष्ठते न भ्रम इति सर्वमवदातम् ।

स्वरूपप्रकाशस्याभिव्यक्तिसंस्कारमुपपाद्य व्यञ्जकान्तःकरणवृत्तेरुत्पाद्यतामाह न चेति । वृत्तिविषयत्वे ब्रह्मणो ऽस्वप्रकाशत्वमाशङ्क्यासमुच्चयमतेन‡ कर्मोपयोगाय साम्य§माह न चैतावतेति । स्वप्रकाशस्यैव शाब्दज्ञानविषयत्वं त्वया ऽपीष्टमित्यर्थः । परिहारसाम्यमाह सर्वेति । ननु निरुपाधिब्रह्मसाक्षात्कारगोचरः कथमुपहिततेति|| तत्राह न चान्तःकरणेति । निरुपाधि ब्रह्मेति विषयीकुर्वाणा वृत्तिः स्वस्वेतरोपाधिनिवृत्तिहेतुरुदयते । स्वस्या अप्युपाधित्वाविशेषात् । ततः¶ स्वसत्तायां विनाशहेतुसांनिध्याद्विनश्यदवस्थत्वम् । एवं च नानुपहितस्य विषयता न चोपाधेर्निवर्तकान्तरापेक्षेति भावः । ननु वृत्तिविशिष्टस्य शबलतया न तत्त्वसाक्षात्कारगोचरता । वृत्त्यवच्छिन्नात्मविषयत्वे च वृत्तेः स्वविषयत्वापातः** विशेषणाग्रहे विशिष्टाग्रहादुपलक्षितस्य तु न वृत्त्युपाधिकतेति । उच्यते । वृत्त्युपरागोऽत्र सत्तयोपयुज्यते न प्रतिभास्यतया ऽतो वृत्तिसंसर्गे सत्यात्मा विषयो भवति न तु स्वत इति न दोषः ।

ननूपाधिसंबन्धाद्विषयत्वं विषयत्वे चोपाधिसंबन्धो विषयविषयित्वलक्षण इतीतरेतराश्रयमत आह अन्यथेति । न ब्रह्मसाक्षात्कारस्य ब्रह्मवि- ,, । १
षयत्वप्रयुक्तं चैतन्यप्रतिबिम्बितत्वं किं तु स्वतः । घटादिवृत्तिष्वपि साम्यात् ।

---

* मूलबुद्धीति २-४ पु० पा० ।
† अपरोक्षमित्येवेति २ पु० पा० ।
‡ सिद्धान्तिमतेनेति ५ पु० ।
§ मते ऽपि परिहारसाम्यमिति ३ पु० पा० ।
|| कथं तस्योपहिततेति ३ पु० ।
¶ तस्या इति ५ पु० पा० ।
** विषयत्वापत्तेरिति ३ पु० पा० ।

चैतन्यं च ब्रह्मेति स्वाभाविको वृत्तेस्तत्संबन्ध इत्यर्थः । यच्च स्वरूपव्य-
२।१३ तिरिक्तसाक्षात्कारस्य भ्रमत्वमिति तत्राह **न चेति** । विषयविसंवादाभावात्
प्रमात्वमित्यर्थः । जीवचैतन्यमात्रापरोक्षेऽपि शुद्धानन्दात्मत्वादेः पारोक्ष्यान्न
तदाकारसाक्षात्कारो यथार्थ इत्याशङ्क्याह **न हीति** । शुद्धादीनां स्वभावत्वे
ऽप्युपाधितिरोधानादविभावनम् । वेदान्तज्ञानेन * तत्तदुपाध्यपगमे यथा-
वदभिव्यक्तो जीवो ब्रह्मेति गीयते स चेदुपाध्यभावस्तर्हि तदतिरिक्तः परोक्षः
कथं साक्षात्कारे भायादत आह **न चेति** । यथा परैरन्योन्याभावो न भव-
ति घट इति व्यपदिश्यमानो ऽपि घटतदन्योन्याभावव्यतिरिक्तो नाभाव
उपेयते । न च घटतदन्योन्याभावयोरेकता । एवमस्माकं निरुपाधिकं ब्रह्म ।
न चोपाध्यभावस्ततो ऽन्य इत्यर्थः । ननु चैतन्याभिन्नाश्चेदानन्दादयस्त-
द्वदविद्यादशायां विभाव्येरन् उपाधिरुद्धाश्चेच्चैतन्येऽपि निरोधस्तुल्यस्तदभे-
२।१९ दादिति शङ्कामुपसंहारव्याजेन परिहरति **तस्मादिति** । यथा षड्जादयो
गान्धर्वशास्त्राभ्यासात् प्रागपि स्फुरन्तस्तद्रूपेणानुल्लिखिता न श्रोत्रेण व्यज्यन्ते
व्यज्यन्ते तु शास्त्रवासितेन तेन एवं वेदान्तवाक्यजन्यब्रह्मात्मैकताका-
रज्ञानवासितान्तःकरणेन तद्भावाभिव्यक्तिर्न प्रागिति । निषादर्षभगान्धारष-
ड्जमध्यमधैवतपञ्चमाः स्वराः । एषां समुदायो ग्रामः । मूर्च्छना तु तेषामा-
रोहाऽवरोहौ । समुच्चयपक्षमिदानीं निराकरोति **नेति** । तत्र किमिह वा
जन्मान्तरे वा ऽनुष्ठितं कर्म संस्कारद्वारा ज्ञानोत्पत्तावुपयुज्यते उतेहैवावगते
ब्रह्मणि कृतकर्मणां भावनया समुच्चय इति । द्वितीये किं भावनाफलसाक्षा-
त्कारे कर्मोपयोग उत भावनास्वरूपे इति । न तावत्कार्य इत्याह **तस्या
इत्यादिना** । तदुच्छेदकस्य कर्मण इति समानाधिकरणे षष्ठ्यौ । **सजाती-
येति** । सजातीयाश्च ते स्वयं च परे च तेषां विरोधिनस्तथोक्ताः । अवगते
तत्त्वे विपर्यासदर्शनेन कर्मानुष्ठानसम्भवात् समुच्चय इति प्रत्यवस्थानं दूष-
यति **अत्रोच्यतइति** । **विदुष इति** । क्रियाकर्त्रादिर्वास्तव इति निश्च-
यवद् इत्यर्थः । ननु विदुषश्चेदधिकारस्तर्हि क्रियाकर्त्रादेर्वास्तवत्वमित्या-
३।२ शङ्क्याह **क्रियाकर्त्रादीति** । **विद्वस्यमानः** अविद्वानेव विद्वान् भवन्विद्व-
दाभास इत्यर्थः । लोहितादिडाज्भ्यः क्यषिति क्यषन्तस्य रूपम् । अत

* वेदान्तजेति पाठान्तरम् ।

एवाविद्वान्कर्मकाण्डे ऽधिकार्यभिमत इति । **अविद्वद्विषयत्वं वर्णयां बभूवेति*** । प्राक् चेत्यादिभाष्येणेत्यर्थः । यदि प्रतीयमानाधिकारनिमित्तस्य ब्राह्मण्यादेः शास्त्रनिमित्तमिथ्यात्वप्रत्ययादश्रद्दधानो विध्यनधिकारी तर्ह्यति-
तिप्रसङ्ग इति शङ्कते **स्यादेतदिति** । भिन्नमुल्लङ्घितं शास्त्रनिषिद्धं कर्म ४४ । १२
येन स तथा तस्य भावस्तत्ता अतिक्रान्तनिषेधतेत्यर्थः । अवगतमिथ्याभावस्याप्यधिकारनिमित्तस्य प्रतीयमानत्वान्निषेधाधिकारहेतुता । न च अश्रद्दधानता इहाधिकारहेतुरतत्त्वविदो ऽपि नास्तिकत्वेनाश्रद्दधतो निषेधाधिकारात् । इतरथा निषेधलङ्घिनस्तस्य प्रत्यवायाभावापाताद्विधिषु तु श्रद्धा ऽप्यधिकारहेतुरिति । ब्रह्मविदो नाधिकार इत्याह **नैवमित्यादिना** । यद्यपि यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति श्रद्धा†रहितमपि कर्म वीर्यवदिति स्यास्यति‡ तथापि सा श्रद्धा भक्तिरूपा । इयं तु प्रमाणद्वारा विश्वासात्मिकैव तदभावे ऽनधिकार एवेति । **न श्रद्दधान इति** । नकारोयं प्रतिषेधवाची । यत एवावगतब्रह्मभावो विधिषु नाधिकार्यत एव ज्ञानानन्तरं कर्मानुष्ठानासम्भवान्नोपासनोत्पत्तौ कर्मापेक्षेति द्वितीयक-
ल्पा§नवकाश इत्याह **अत एवेति** । एतद्विभजते **निर्विचिकित्सेति** । ४५ । ५
पितृमनुष्यदेवलोकाप्तिहेतुभिः कर्मप्रजाधनशब्दवाच्यापरविद्याभिर्नामृतत्वमाप्नुवन्तः किं तु त्यागसाध्यज्ञानेनेत्यर्थः । तथा हि श्रुत्यन्तरम् । पुत्रेणैवायं लोको जय्यो विद्यया देवलोकः कर्मणा पितृलोक इति । इह भवान्तरे वा ऽनुष्ठितं कर्म सत्त्वशुद्धिद्वारेण ज्ञानोत्पत्तिहेतुरिति पक्षमङ्गीकर्तुं शङ्कते **तत्किमिति** । **आरात् दूरे** । इमं पक्षमुपपादयति **तथा हीति** । प्रधानेन प्रत्ययार्थेनेच्छया ऽऽख्यातोपात्तभावनायाः कार्यस्य संप्रत्ययात्समन्वयादिति । अनेन कर्मणा इदं ममाङ्गमन्तःकरणं संस्क्रियते पुण्येन चोपधीयतउपचीयतइति यो विदित्वा चरति कर्म स आत्मशुद्ध्यर्थं यजन्नात्मयाजी स च देवयाजिनः काम्यकर्तुः श्रेयानिति शातपथश्रुत्यर्थः । स यदेव यजेतेत्यत्र प्रकृतं
यज्ञादि । श्रुत्यन्तरमाह **नित्येति** । ४६ । ४

नित्यानां संस्कारद्वारा ज्ञानोत्पादकतोक्ता इदानीं यदुक्तं समुच्चय-

---

* अविद्वद्विषयत्वं शास्त्रस्य वर्णयाम्बभूवेति मूले पाठः ।

† विद्ययेति श्रद्धेति ३ पु॰ पा॰ । ‡ व्यवस्थाप्यते इति ३ पु॰ पा॰ ।

§ द्वितीयपक्षेति ३ पु॰ पा॰ ।

४६ । ९ वादिना सर्वेषां कर्मणां ज्ञानकार्ये मोक्षे समुच्चय इति तत्राह **कॢप्तेनैवेति**। नित्यानां फलं पापक्षयं ज्ञानमाकाङ्क्षते न स्वर्गादि तत्र यथा प्रकृतौ कॢप्तोपकाराणाम् अङ्गानामतिदेशे न प्रकृतोपकारातिरिक्तोपकारकल्पनमेवं ज्ञाने विनियुक्तयज्ञादीनां कॢप्तनित्यफलपापक्षयातिरेकेण न नित्यकाम्यकर्मसाधारणमोक्षोपयोग्युपकारः कल्प्यः। पापक्षयस्य च ज्ञानोत्पत्तिद्वारत्वं ततस्तु तमित्यादिशास्त्रसिद्धम्। न च वाच्यं नित्येभ्यः पापक्षयस्य*तस्माच्च ज्ञानोत्पत्तेरन्यतः सिद्धौ किं यज्ञेनेत्यादिनेति। नित्यानां ज्ञानोत्पत्तिप्रतिबन्धकदुरितनिबर्हकत्वस्य विशेषतः शास्त्रान्तरादसिद्धेः। अस्मिंश्च विनियोगे सति ज्ञानोद्देशेन नित्यान्यनुतिष्ठतोऽवश्यं ज्ञानं भवति इतरथा शुद्धिमात्रमनियता च ज्ञानोत्पत्तिरिति विनियोगोपयोगः। ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मण इत्यादिस्मृतेरियं श्रुतिर्मूलम्। श्रुतिस्त्वेतादृशी तुल्यत्वे नैतामनुवादयति। **न संयोगपृथक्त्वेन साक्षादङ्गभाव** इत्यनेन साक्षादङ्गभावो निषिध्यते न संयोगपृथक्त्वम्। सर्वापेक्षाधिकरणे† संयोगभेदस्याश्रयिष्यमाणत्वात्। तस्मादयमर्थः। संयोगपृथक्त्वमस्तीत्येतावता न साक्षादङ्गभावसिद्धिरारादङ्गभावेऽपि तदुपपत्तेरिति नित्यानां दुरितक्षयफलत्वे नित्यकाम्यवैषम्यायोगमाशङ्क्य **नित्येहितेनेत्युक्तम्**। **चित्तसत्त्वं** चित्तगतः सत्त्वगुणः। **प्रत्यक्षोपपत्तीति**। संसारस्यासारत्वं दृष्टविषये प्रत्यक्षग्राह्यमदृष्टे तूपपत्त्या। प्रत्यक्षोपपत्त्योश्च प्रवृत्तिद्वारं चित्तगतसत्त्वं तस्य पापकपाटनिवृत्त्यपावरणे उद्घाटने सतीत्यर्थः। धर्मब्रह्मावबोधयोर्हेतुहेतुमद्भावाभावेऽपि क्त्वाश्रुत्या पौर्वापर्यमाशङ्कते **स्यादेतदिति**।

४७ । १६ **अग्निहोत्रयवागूपाकवदिति**। पञ्चमे स्थितम्—अर्थाच्च‡। अग्निहोत्रं जुहोति यवागूं पचतीत्यत्र किं होमपाकयोर्यथापाठं क्रम उत पाक एव प्रथम इति संशये नियामकश्रुत्यभावाद्धोमनिर्वृत्तेश्च द्रव्यान्तरेण सम्भवाद्यवागूपाकस्य चारादुपकरकत्वाद्धोमप्राथम्ये प्राप्ते राद्धान्तः। पदार्थः प्रयोजनापेक्षोऽनुष्ठानविधिरेव प्रयोजनोपयोगिनं क्रमविशेषं नियच्छतीति§पक्त्वैव होतव्यम्। न च द्रव्यान्तरानयनं श्रुतद्रव्य||वैयर्थ्यप्रसङ्गात्। न च दृष्टार्थत्वे स-

---

* पापक्षयः स्यादिति ३ पु० पा०।

† व्याससू० अ० ३ पा० ४ सू० २६।

‡ जैमिनिसू० अ० ५ पा० १ सू० २।

§ इति प्रमाणसद्भावादिति ३ पु० पा०।

|| कृतद्रव्येति ३ पु० पा०।

त्याराादुपकारकत्वं पाकस्येति ।

पाठस्थानेति । क्रमेण वा नियम्येत क्रत्वेकत्वे तद्गुणत्वात्* । ४८ । १।
समिधो यजतीत्यादिषु क्रमपठितप्रयाजेषु चिन्ता किं यथापाठमनुष्ठानक्रम उत न । तत्र वाक्यानां स्वार्थमात्रावसितत्वान्न क्रमपरतेत्यनियमप्राप्तौ सिद्धान्तः । यथैतानि वाक्यानि स्वार्थविधायीनि तथा ऽनुष्ठानापेक्षितस्मृत्युपयोगीन्यपि तानि च क्रमवन्ति स्वाध्यायविध्यध्यापितानि क्रमवन्त्येव स्मरणानि जनयन्ति स्मृतस्य चानुष्ठानमिति स्मरणक्रमेणानुष्ठानं नियम्येत† । एवं क्रमपाठो ऽपि दृष्टार्थो भविष्यति । तस्मात् पाठक्रमेण नियम इति । सूत्रार्थ स्तु एकस्मिन् क्रतौ श्रूयमाणानां प्रयाजानां‡ पाठक्रमेण प्रयोगक्रमो नियम्येत । तस्य पाठक्रमस्यानुष्ठाने लोके गुणत्वावगमात् तद्यथा स्नायादनुलिम्पेत भुञ्जीतेति । स्थानाच्चोत्पत्तिसंयोगात्§ । ज्योतिष्टोमविकारे साद्यस्कसञ्ज्ञे ऽतिदेशप्राप्तेष्वग्नीषोमीयादिपशुषु सहत्वगुणविधानार्थं वचनं श्रूयते सह पशूनालभतइति तद्विधानाच्च प्राकृतः प्रथममग्नीषोमीयस्ततः सवनीयः ततो ऽनुबन्ध्य इत्येवंरूपः क्रमो निवर्त्तते । सहत्वं चेदं सवनीयस्थाने । तथा सति हीतरयोस्तुल्यवत् स्थानचलनं भवति । सवनीयश्चाश्विनग्रहग्रहणानन्तरकालः प्रकृतावाम्नायते । आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोतीति । तत्रैककालत्वलक्षणसहत्वासम्भवादवश्यंभाविनि क्रमे कः प्रथमं प्रयुज्यतामित्यपेक्षायां किमनियमेनैषां प्राथम्यमुत सवनीयस्येति संशयः । तत्र नियामकश्रुत्याद्यभावादनियमे प्राप्ते राद्धान्तः । स्थानात्सवनीयप्राथम्यं नियम्येत कुत उत्पत्तिसंयोगात् । प्रकृतौ सवनीयस्याश्विनग्रहणानन्तर्यमुत्पत्ताववगतं विकृतौ च तेनैव कालेन स उपस्थापितः अग्नीषोमीयस्तु सहत्ववचनेन स्वस्थानाच्चालितस्ततः प्रथमं|| सवनीस्यैवोपाकरणादिप्रयोगः । इतरयोस्तु तत्साहित्यवचनात् तदानन्तर्ये मिथस्त्वनियमः । अथ वा प्रकृतिदृष्टपौर्वापर्यस्याऽसति बाधके त्यागायोगात् प्रथममग्नीषोमीयमुपाकृत्यानुबन्ध्य उपाकर्त्तव्य इति । मुख्यक्रमेण चाङ्गानां तदर्थत्वात्¶ । सारस्वतौ भवत एतद्वै दैव्यं मिथुनं यत्सरस्वती सरस्वां-

---

* जैमिनिसू॰ अ॰ ५ पा॰ १ सू॰ ४ ।

† नियम्यते इति २ पु॰ पा॰ ।

‡ प्रयाजादीनामिति २ पु॰ पा॰ ।

§ जैमिनिसू॰ अ॰ ५ पा॰ १ सू॰ १३ ।

|| प्रथममिति नास्ति ३ पु॰ ।

¶ जैमिनिसू॰ अ॰ ५ पा॰ १ सू॰ १४ ।

श्चेति सरस्वतीदैवतं सरस्वद्दैवतं च युगपत्कर्मद्वयं श्रूयते। तत्र च सरस्वतीदैवतस्य याज्यानुवाक्यायुगलं प्रथममाम्नायते तदनन्तरं पुंदैवतस्य। तत्र मन्त्राणां प्रयोगशेषत्वाद्याज्याऽनुवाक्यापाठक्रमेण प्रधानक्रमो ऽवगतः। अङ्गविशेषे निर्वापादौ संशयः किमनियतो ऽस्य क्रम उत प्रधानक्रमेण नियत इति। तत्र याज्याऽनुवाक्यापाठक्रमस्य प्रधानमात्रगोचरत्वादङ्गानामनुष्ठानक्रमे श्रुत्याद्यभावान्मुख्यक्रमस्य च प्रमेयत्वेन प्रमाणत्वानुपपत्तेरनियमे प्राप्ते सिद्धान्तः। मुख्यक्रमेणाङ्गानां क्रमो नियम्येत तदर्थत्वात् प्रधानार्थत्वादङ्गानाम्। यद्यपि मुख्यक्रमस्य याज्याऽनुवाक्यापाठक्रमापेक्षया प्रमेयत्वं तथापि प्रमितस्यास्य धूमादेरिवान्यत्र प्रमाणत्वमविरुद्धम्। प्रधानस्य हि प्रयोगविधिना साङ्गस्यैव प्रयोगश्चोदितः स चावर्जनीयाद्व्यवधानादधिकव्यवधिमङ्गानां न सहते। यदि तु प्रधानान्तरसंनिधावन्याङ्गानुष्ठानं तदा तेनैव स्वप्रधानादङ्गानि विप्रकृष्येरन्। अतो मुख्यक्रमादङ्गक्रमनियम इति।

प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमात्*। वाजपेये सप्तदश प्राजापत्यान् पशूनालभतइति सप्तदश यागा अङ्गत्वेन श्रूयन्ते तेषां च वैश्वदेवीं कृत्वा सह प्रचरन्तीति प्रयोगसाहित्यश्रवणादेकोपक्रमोपसंहार एक एवावान्तरप्रयोगः। तेनैषामतिदेशप्राप्ताः प्रोक्षणादिधर्मा न एकैकत्र समापनीयाः किं तर्हि सर्वेषु पशुष्वेक एव पदार्थः परिसमापनीयस्ततो ऽन्यस्ततो ऽन्यः†। इतरथा ह्येकस्मिन्पशौ सर्वाङ्गानुष्ठाने प्रधानस्याङ्गैर्विप्रकर्षः स्यात्। तत्र प्रथममेकपदार्थानुष्ठाने विशेषतो वेदाभ्यनुज्ञाभावादिच्छैव नियामिका।

तदेवं स्थिते द्वितीयादिपदार्थप्रयोगे संशयः किं प्रथमइव द्वितीयादावपीच्छैव कारणमुत प्रथमप्रवृत्त्यैव नियम इति। तत्र पूर्वपक्षः। न तावत् श्रुत्याद्यस्ति नियामकम्। प्रथमाङ्गप्रवृत्तिश्च पौरुषेयी वेदेन नाभ्यनुज्ञायतइति न तद्वशादुत्तरनियमः। तेन प्रथमतराश्रित‡पुरुषेच्छैव चरमतराङ्गनियामिका। प्रयोगसौकर्यं चैवं लभ्यते। इतरथा हि प्रथमं प्रयोगानुसन्धानव्यग्रमनस उपरितनं च प्रयोगं तद्वशेन तन्वानस्य मतिक्लेशः स्यात्। तस्मादनियम इति प्राप्ते राद्धान्तः। एकप्रयोगतया तुल्यकालानां प्रोक्षणा-

---

* जैमिनिसू० अ० ५ पा० १ सू० ८। † ततो ऽन्य इति सकृदेव दृश्यते ३-१ पु०।
‡ तराङ्गाश्रितेति १ पु० पा०।

ध्यङ्गानां प्रवृत्त्या क्रमनियमः । कुतस्तदुपक्रमात् तेन प्रधानेनाङ्गानामुपक्रमात्
तदेकप्रयोगत्वादित्यर्थः । सप्तदश यागाङ्गानि सह प्रयोज्यानि प्रथमाङ्गानुष्ठाने
सति द्वितीयादौ षोडशभिर्व्यवधानमभ्यनुजानन्ति न ततो ऽधिकम् । प्रावृ
त्तिकक्रमाश्रयणे च सप्तदशसु, प्रथमाङ्गानुष्ठाने द्वितीयो धर्मः प्रथमादिपशुषु
क्रियमाणः षोडशभिरेव व्यवधीयते । क्रमान्तराश्रयणे ऽधिकैरपि व्यवधानं
स्यात् । अतः प्रयोगवचनकोपपरिहाराय प्रवृत्त्या नियम इति ।

शेषाणां शेषिणां च क्रमापेक्षायां हेतुमाह **युगपदिति** । युगपद- ४८ ।
नुष्ठानप्राप्तौ क्रमः स्यात्तदेव कुतस्तत्राह **एकपौर्णमासीति** । षण्णां
मध्ये त्रयः पूर्णमास्या संबद्धास्त्रयो ऽमावास्यया । कालैक्ये ऽपि यदि कर्तृ-
भेदः स्यात् तदा न क्रमो ऽपेक्ष्येत तन्मा भूदित्याह **एकाधिकारीति** ।
स्वामित्वेनाधिकारित्वं तस्यैवानुष्ठातृत्वेन कर्तृत्वम् । एकाधिकारिकर्तृकत्वे
हेतुमाह **एकप्रयोगवचनेति** । यजेतेत्याख्याते कर्त्रैक्यस्य विवक्षित-
त्वात्प्रयोगवचने कर्त्रैक्यं सिद्धम् । एकप्रयोगवचनपरिग्रहे हेतुमाह
एकफलवदिति । एकाश्चासौ फलवतः प्रधानस्य उपकारश्च तस्मिन्
समुच्चित्य साधनत्वेन उपनिबद्धाः शेषाः एकेन फलेनावच्छिन्नाः शेषिणो
ऽत एकप्रयोगवचनोपगृहीता इति ।

सौर्यार्यमणेति । एकादशे* स्थितम्—अङ्गवत् क्रतूनामानुपूर्व्यम्† । ,, । ९
सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः आर्यमणं चरुं‡ निर्वपेत्स्वर्गकामः प्राजा-
पत्यं चरुं निर्वपेच्छतकृष्णलमायुष्कामः इत्यादिषु क्रमपठितक्रतुषु चिन्ता§
किं पाठक्रमेण प्रयोज्या उताऽनियमेनेति । तत्र यथा ऽङ्गानां समिदादीनामे-
केन युगपत्करणाशक्तेः क्रमाकाङ्क्षायां पाठात् क्रमनियमः एवं क्रतूनामपीति
प्राप्ते राद्धान्तः । न वा ऽसंबन्धात्‖ । अङ्गेष्वेकप्रयोगवचनपरिग्रहादस्ति क्रमा-
काङ्क्षा क्रतुषु नानाफलेषु नैकः प्रयोगवचनो ऽस्ति न च सर्वे मिलित्वा
प्रयोजयन्ति तेनैषामेकप्रयोगवचनसंबन्धाभावान्नास्ति क्रमाकाङ्क्षा किं तु पुरु-
षस्य । न च तदाकाङ्क्षितं विधिप्रतिपाद्यमिति तदिच्छयैव क्रमः पाठक्रम-

---

* पञ्चमे इति वक्तव्ये एवंलेखः पारम्परिकलेखकभ्रममूलक इति प्रतिभाति । सर्वेषु पुस्तकेषु पाठ एवमेवोपलभ्यते ।

† जैमिनिसू॰ अ॰ ५ पा॰ ३ सू॰ ३२ । ‡ अर्यम्णो चरुमिति २–४ पु॰ पा॰ ।

§ पठितेषु चिन्तेति ३ पु॰ पा॰ । ‖ जै॰ सू॰ अ॰ ५ पा॰ ३ सू॰ ३३ ।

स्त्वध्ययनार्थं इति । युगपत्पाठासम्भवेनावर्जनीयतया पाठक्रमस्यागतत्वात्तन्नियमस्य चाध्ययनार्थत्वादित्यर्थः ।

गोदोहनस्य पुरुषार्थत्वं चतुर्थे चिन्तितम्—यस्मिन्प्रीतिः पुरुषस्य तस्य लिप्सा ऽर्थलक्षणा ऽविभक्तत्वात्* । दर्शपूर्णमासयोर्गोदोहनेन पशुकामस्य प्रणयेदिति श्रूयते । तत्र गोदोहने क्रत्वर्थत्वपुरुषार्थत्वसंदेहे पशुकामस्येति समभिव्याहाराद्वाक्येन क्रतूपकारकत्वेन† चोभयार्थमिति प्राप्ते सिद्धान्तः । नोपकारकत्वं शेषत्वं किं तु तादर्थ्यम् । तथा च गोदोहनस्य पशुशेषत्वान्न क्रत्वङ्गत्वम् । अङ्गापेक्षा च क्रतोरुपकारायान्यार्थस्यापि क्रतूपकारकत्वमविरुद्धम् । तेन वाक्यात्पुरुषार्थमेवेति । यस्मिन्निर्वृत्ते पुंसः प्रीतिः फलं भवति तस्य लिप्सा फलप्रयुक्ता न विधितः । कुतस्तस्य फलसाधनस्य प्रीत्या विभागाभावादिति सूत्रार्थः ।

अस्य चाप्प्रणयनाश्रितत्वात्तत्क्रम एव क्रम इति गोदोहनस्य प्रण-
४९ । १ यनाश्रितत्वमुपपादयति **नो खल्विति** । कल्प्यतां तर्हि व्यापारावेशस्तत्राह **प्रणयनाश्रितमिति** । प्रणयनान्तरविशिष्टविधिमाशङ्क्य प्रतीयतइत्युक्तम् । संनिहितलाभेन विशिष्टविधिरित्यर्थः । सामर्थ्यरूपाद् लिङ्गाच्च प्रणयनाश्रितत्वमाह **योग्यत्वाच्चेति** ।

,, । ३ **यथा वा दर्शपूर्णमासाभ्यामिति**‡ । चतुर्थे चिन्तितम्—उत्पत्तिकालाङ्गविशये कालः स्याद्वाक्यस्य तत्प्रधानत्वात्§ । दर्श‖पूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति श्रूयते । तत्र संदेहः किमिदमङ्गस्य विधायकमुत कालस्येति । तत्र क्त्वाश्रुतेरङ्गस्य तत्राङ्गत्वं यजेतेति विधिप्रत्यासत्तेः सोमस्यैव । ननु द्रव्यद्वारेणान्यत्र विहितसोमयागस्य प्रत्यभिज्ञानात्कथं तद्विधिः । उच्यते । तत्कार्यस्येहाप्रत्यभिज्ञानाद्वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेतिवत् । न ह्यत्र ब्रह्मवर्चसं बृहस्पतिसवकार्यं प्रतीतम् अतो ऽङ्गं बृहस्पतिसवो वाजपेयस्य । एवं च सोमयागो ऽपि दर्शपूर्णमासेष्टिं प्रत्यङ्गत्वेन विधीयतइति

---

* जै· सू· अ· ४ पा· १ सू· २ । † वाक्येन पुरुषार्थत्वेन क्रतूपकारकत्वेनेति ३ पु· पा· ।

‡ दर्शपौर्णमासेति भामती मु· पु· पाठः । एतत्प्रतीकनिर्देशस्तद्व्याख्याग्रन्थश्च नो खल्वितीति गतप्रतीकात् पूर्वं भामतीग्रन्थानुसारात् स्थापयितुमुचितः ।

§ जै· सू· अ· ४ पा· ३ सू· ३७ । ‖ यथा दर्शेत्यादिपाठः १ पु· ।

प्राप्ते उच्यते* । अस्मिन्कालाङ्गविधिसंशये कालो विधेयः स्यात्† । कुतः । अस्य वाक्यस्य कालप्रधानत्वात् । यदि कर्मविधिरेव स्यात् तर्हि रूपेण द्रव्यदेवतेन भाव्यम् । न चेह देवतारूपमस्ति । अथाव्यक्तत्वेनोद्भिदादिष्विव सौमिकी देवता ऽतिदेशेन प्राप्येत तर्हि सोमोऽपि प्राप्येतेति सोमेनेति व्यर्थं स्यादतः सोमयागप्रत्यभिज्ञार्थमेव तत् । प्रत्यभिज्ञाने च न विधिसम्भवः । बृहस्पतिसवस्तु वाजपेयप्रकरणे श्रुतस्तत्र प्रकरणान्तरन्यायात् कर्मान्तरमेव विधीयते । नामधेयमपि यजिपरतन्त्रतया न प्रत्यभिज्ञापकं किं तु तत्रैव धर्मलक्षणया वर्त्तते । अतो नाम्नैव प्रसिद्धबृहस्पतिसवधर्माणां प्रापितत्वाद्युक्तं कर्मविधानमिति ।

यथा ऽऽग्नेयादीनामिति । एकादशे चिन्तितम्—प्रयोजनाभिसंबन्धात् पृथक्त्वं ततः स्यादैककर्म्यमेकशब्दाभिसंयोगात्‡ । आग्नेयादिषु संशयः किं तन्त्रमेषां फलमुत भेदेनेति । तत्र परस्परनिरपेक्षैरुत्पत्तिविधिभिर्विहितानां प्रधानानां पृथक्फलाकाङ्क्षत्वात्तत्§संनिधौ श्रूयमाणं फलं भेदेनाभिसंबध्यते । ततः प्रतिप्रधानं फलभेद इति प्राप्ते राद्धान्तः । यद्यप्येषां पृथक्त्वं पृथगुत्पत्तिविहितता तथाप्यैककर्म्यम् । क्रियतइति व्युत्पत्त्या फलं कर्म । ऐककर्म्यमेकफलत्वमित्यर्थः । कुतः‖ । प्रयोजनेन समुच्चितानां संबन्धाद्धेतोः । स एव कुतः । एकशब्दाभिसंयोगात् । दर्शपूर्णमासशब्देन हि समुदायवाचिना निर्दिश्य फले विधीयन्ते आग्नेयादयः । यथा ग्रामेणोदपानः खेय इति समुदायशब्दनिर्देशात् समुदितैः पुंभिरुदपानः खन्यते न प्रतिपुरुषं कूपभेदः एवमिहापि । ननु गणायानुलेपनमित्यादौ समुदायशब्दनिर्दिष्टमप्यनुलेपनादि प्रतिपुरुषमावर्त्तते तद्वत् किं न स्यात् । नेति वदामः । युक्तमनुलेपनादेः संस्कारत्वाद् दृष्टार्थत्वाच्च प्रतिसंस्कार्यमावृत्तिरिह फलमुद्दिश्य विधीयमानानामुपादीयमानानामेवाग्नेयादीनां विवक्षितं साहित्यमिति फलतन्त्रतेति । ४६ । १६

संग्रहे जिज्ञासयोः फलादिभेदं निर्दिश्य विभजने ज्ञानयोस्तत्कथनमयुक्तमित्याशङ्क्याह **जिज्ञासाया इति ।** इच्छाया ज्ञानपराधीन- ,,

* राद्धान्त इति ३ पु॰ पा॰ ।
† स्यादिति नास्ति १ पु॰ ।
‡ जै॰ सू॰ अ॰ ११ पा॰ १ सू॰ १ ।
§ तच्छब्दो नास्ति ३ पु॰ ।
‖ तत इति ३ पु॰ पा॰ ।

तया ज्ञानफलमेव तत्फलमित्यर्थः । फलभेदे वक्तव्ये कारणभेदकथनं भाष्ये
४९ । २४ अनुपयोगीत्याशङ्क्याह **न केवलमिति** । विधेयाऽविधेयक्रियाज्ञानफलयो-
रुत्पाद्यता व्यङ्ग्यता च भेद इत्यर्थः । अनुष्ठानान्तरेत्यत्रान्तरशब्दार्थमाह
शाब्दज्ञानेति* । क्व चिद् ब्रह्मविदाप्नोति परमित्यादौ ज्ञानफलं साध्यत्वेन
प्रतीतमपि न्यायबलाद्वचनान्तरवशाच्चाभिव्यक्तिपरत्वेन व्याख्याय फलभेद
उक्तो जिज्ञास्यभेद†स्तु प्रतीतिसमयएव स्फुट इत्याह **जिज्ञास्यभेद-
मिति** । ननु भवतेरकर्मकत्वाद्भावार्थत्वे च नपुंसकत्वप्रसङ्गाद्भव्यशब्देन
कथं जिज्ञास्यविषय‡भेदसिद्धिरत आह **भवितेति** ।

ननु तयोरेव कृत्यक्तखलर्था इति कृत्यानां भावकर्मणोः स्मरणादचो
यदिति सूत्रविहितयत्प्रयान्तस्य भव्यशब्दस्य कर्तृवाचित्वमयुक्तमित्याश-
५० । ४ ङ्क्याह **कर्त्तरि कृत्य इति** । भव्यगेयेत्यादिना हि सूत्रेण भावकर्मवाचिता-
नियममपोद्य कृत्यप्रत्ययान्ता एव भव्यादिशब्दा विकल्पेन कर्तरि निपा-
त्यन्ते । अतो भवतीति व्युत्पत्त्या भव्यशब्दः कर्तृवाची । पक्षे च भा-
वकर्मणोः । अस्य च भवतेरनुपसर्गत्वात्प्राप्तिवाचित्वाभावाच्च कर्माप्राप्तिः ।
भावे तु भव्यमनेनेति स्याद् नेह सः । पुँल्लिङ्गनिर्देशात् उत्पाद्यधर्मा-
पेक्षणाच्च । अतः कर्त्तरि कृत्य इति । ननु भवितुः कथं ज्ञानकाले सत्त्वाभाव
इत्याशङ्क्य ज्ञानोत्तरभाविप्रयोजकव्यापारापेक्षणादित्याह **भविता चेति** ।
भवतिर्ह्यसिद्धकर्तृकक्रियावाची न पच्यादिवत् सिद्धकर्तृकक्रियस्ततो भविता
स्वतो ऽसिद्धः सन् भावकव्यापारापेक्षनिष्पत्तिरर्थात् साध्यो भातीति । अत
एवाहुः ।

करोत्यर्थस्य यः कर्ता भवितुः स प्रयोजकः ।
भविता तमपेक्ष्याथ प्रयोज्यत्वं प्रपद्यते ॥ इति ।

भाष्ये भूतशब्दस्यातीतवाचित्वभ्रमं निरस्यति **भूतमिति** । नन्वा-
,, । १० ज्ञाभ्यर्थनानुज्ञानां लोके चोदनात्वात् कथं वेदे चोदना ऽत आह **आज्ञा-
दीनामिति** । उत्कृष्टपुंसः स्वाभिलषितोपायकार्यत्वाभिधानमाज्ञा । यथा

---

* शब्दज्ञानेतीति १ पु॰ पा॰ । मूले ऽपि पाठद्वैविध्यं दृश्यते ।
† जिज्ञास्यविषयभेद इति ३ पु॰ पा॰ । ‡ विषयशब्दो नास्ति २-३ पु॰ ।

ग्रामानयेति । एतदेव हीनस्याभ्यर्थना यथा माणवकमध्यापयेति । प्रवृत्तस्य
प्रयोज्यस्य तद्धितोपायोक्तिरनुज्ञा । तथा कुरु यथा हितमिति । नैतासां
सम्भवो वेदे इत्युपदेशश्चोदना । उपदेशो ह्यप्रवृत्तनियोज्यस्य प्रयोजनो-
पायबोधको लोके ऽवगतो यथा गोपालवचसि सुपथकथनपरे ऽनेन पथा
याहीति । न हीहाज्ञा प्रयोक्तुर्निकर्षात् । नाभ्यर्थना स्वप्रयोजनाभावात् । नाप्य-
नुज्ञा प्रयोज्यस्याप्रवृत्तत्वात्तदिह नियोज्यस्याप्रवृत्तस्य हितोपायकर्त्तव्यतोक्तिर-
पौरुषेये ऽपि वेदे भवत्येवेति । तस्य धर्मस्य ज्ञायते ऽनेनेति ज्ञानं प्रमाणमुप-
देशो विधिरिति जैमिनीयसूत्रावयवार्थः । स्वविषयइति भाष्ये स्वशब्देन चोद-
ना ऽभिधीयतइति मत्वा ऽऽह । **स्वसाध्ये इति*** । स्वस्याः प्रतिपाद्ये विषये ५० । १३
भावनायामित्यर्थः । धर्मस्येत्युक्त्या भावनोपसर्जनभूता ऽपि शब्दतो ऽर्थतः
प्राधान्यात् स्वशब्दार्थ इति गृहीत्वा ऽऽह **तद्विषये इति** । ननु भावनाधात्व-
र्थयोर्विधिशब्देन पुरुषप्रवर्त्तनमशक्यं प्रमाणस्य वाय्वादिवत्प्रेरकत्वायोगा-
दित्याशङ्क्याह **भावनाया इति** । साक्षाद्भावनायास्तदवच्छेदकत्वद्वारेण
चार्थाद्धात्वर्थस्येष्टोपायतां बोधयति विधिर्बोधयित्वा च तदिच्छामुपाहरति
इच्छंश्च पुरुषः प्रवर्त्तते । तदनेन क्रमेण नियुञ्जाना चोदना धर्ममवबोधयती-
त्यर्थः । **ब्रह्मचोदना** ब्रह्मवाक्यम् । यथा धर्मचोदना प्रवृत्तिहेतुं बोधं
जनयति नैवं ब्रह्मचोदनेत्याह† **अवबोधस्येति** । ब्रह्मचोदनया सिद्ध-
वस्तुविषयस्य प्रवृत्त्यहेत्वर्थमात्रावबोधस्य जन्यत्वादिति भाष्यार्थः । ननु मा
नाम जनि धर्मबोधवद् ब्रह्मबोधाद्विषये प्रवृत्तिः स एव तु विधितः किं न
स्यादिति शङ्कते **नन्विति** । विध्येकवाक्यत्वेन वस्तुबोधनाद्वेदान्तानां न
सिद्धबोधमात्रपर्यवसानमित्यर्थः ।

भाष्ये ऽवबोधनिर्द्देश एव विध्यविषयत्वे हेतुगर्भ इति व्याचष्टे **अय-
मभिसंधिरिति** । यथा विशिष्टविधौ विशेषणविधिरर्थान्न विशेषणे तात्पर्यं ,, । २३
वाक्यभेदादेवं विषयविशिष्टप्रतिपत्तिविधिसामर्थ्याद् ब्रह्मनिश्चय इत्याशङ्क्याह
न च बोधस्येति । विशिष्टक्रियाविधानादुक्ता‡ विशेषणस्य प्रमा वैशिष्ट्यस्य
वास्तवत्वात् । प्रतिपत्तिविधिस्तु न विशेषणसत्तामाक्षिपति । वाचं धेनु-

---

* स्वशब्दो नास्ति मु॰ भा॰ पु॰ । परं तत्र १ पाठान्तरं द्रष्टव्यम् । एतद्व्याख्यानुसारात्स-
मुचितश्च तत्र स्वशब्दः । † नोदनेति १ पु॰ पा॰ ‡ विधेर्युक्तेति ३ पु॰ पा॰

मुपासीतेत्यादावारोप्यस्यापि* विधेयधीविषयत्वादित्यर्थः । एवं क्रमप्रमाणाभावसिद्धौ

ब्रह्मधीर्न नियोगेन धर्मबुद्धेरनन्तरा ।
तत्क्रमे मानहीनत्वात् स्नानभुज्यादिधीरिव ॥

५१ । १६ नित्यानित्यवस्तुविवेक इति भाष्यमाक्षिपति **तद्विषयश्चेदिति** । अनित्याद् ब्रह्मणो विवेकः किं निश्चय उत ज्ञानमात्रम् । आद्यं दूषयति **कृतमिति** । द्वितीये विपर्ययः संशयो वा । नाद्यः । ततः शास्त्रश्रवणे प्रवृत्त्ययोगात् । न द्वितीयः । प्रपञ्चाऽनित्यत्वानिश्चये तद्वैराग्याऽयोगादित्याह **तथा चेति** । समाधत्ते **तस्मादिति** । निश्चय एव विवेकः । न च शास्त्राऽनारम्भः । इदं नित्यमिदमनित्यमित्यनिश्चयात्† । आत्माऽनात्मसमुदाये नित्यत्वमनित्यत्वं च स्तो धर्मौ तयोश्च धर्मिभ्यां भवितव्यमित्येतावन्मात्रं निश्चितम् । यद्यपि घटादेरनित्यता ऽवधारिता तथापि सकलानात्मसु नावधारितेति । नित्यत्वस्य व्याख्या **ऋतमिति** । उक्तविवेकस्य प्रयोजनमाह **तथा चेति** ।

सत्याऽसत्ययोरुपादेयाऽनुपादेयत्वे हेतुमाह **तदेतेष्विति** । सुखत्वान्नित्यमुपादेयं दुःखत्वादनित्यं त्याज्यमित्यर्थः । दृष्टे ऽनुभव उपपत्तिस्त्वदृष्टे । विगीतं सदधिष्ठानमसत्यत्वाद्गन्धर्वपुरीवद् इत्यादिव्याप्यसिद्धिमाशङ्क्याह **न खल्विति** । न चैयतो विवेकस्य स्वरसत उदये शास्त्रविफलता सगुणनिर्गुणविवेकाखण्डसमन्वयादेरसिद्धेरिति । न नित्यादिविवेकमात्रं वैराग्यहेतुः किं तु तदभ्यास इत्याह **अथास्येति** । अस्य पुरुषश्रेष्ठस्य संसारसमूहे ऽनित्यत्वादिविषयं प्रसंख्यानं धीसन्ततिरुपावर्त्तते इत्यन्वयः । **अवीचिः** नरकविशेषः ।

५२ । ११ **जायस्व म्रियस्वेति** । पुनः पुनर्जायते म्रियते चेत्यर्थः । क्रियासमभिहारे लोडिति पौनःपुन्ये सर्वलकारापवादेन लोटः स्वादेशस्य च विधानात् । आरभ्य ब्रह्मलोकमवीचिपर्यन्तं जननमरणाभ्यामावर्त्तमानं क्षणाद्यवान्तरसर्गपर्यन्तैः‡ कालैः संसारसागरस्योर्मिभूतैरनिशमूह्यमानमितस्ततो नीयमानमात्मानमन्यं च जीवसमूहमवलोक्येति योजना ।

---

* आरोपितस्यापीति २ पु॰ पा॰ । † इदं नित्यमित्यनिश्चयादिति २ पु॰ पा॰ ।

‡ अहोरात्राद्यवान्तरसर्गपर्यन्तैरिति ३ पु॰ पा॰ । § सागरस्येति २-३ पु॰ नास्ति । १-५ पु॰ तथा पाठस्य दृष्टत्वादर्थसामञ्जस्याच्चोपरि तथैव निवेशितम् । मूले ऽपि अयमेव पाठः प्राय उपलभ्यते ।

उक्तपरिभावनाया इहामुत्रार्थभोगविरागहेतुतामाह **ततो ऽस्येति** । ५२ । १६
अनित्यसंसारस्य किं चिदधिष्ठानमस्तीति इयान्* विवेको न तु ब्रह्मेति । तदुक्तम् **ईदृशादिति**† आभोगो मनस्कारः । आदर इति यावत् । अतदात्मिका। वैराग्यस्य शमादिहेतुतामाह **तत इति** । ज्वाला जटा‡ अस्य सन्तीति तथोक्तः । अद्धैव तत्त्वविषया वित्तमस्य न गवादीति तथा ऽभिहितः§ । मोक्षेच्छा भवतु कुतस्तावता ब्रह्मजिज्ञासा अत आह **तस्य चेति** ।

नित्याऽनित्यविवेकादिहेतुत्वस्याथशब्दादवगतेः किमतःशब्देनेत्याशङ्क्य नानेन जिज्ञासां प्रति साधनकलापस्य हेतुतोच्यते किं तु तत्स्वरूपा-
ऽसिद्धिपरिहारहेतुरभिधीयते इत्याह **अत्रैवमित्यादिना** । शल्कं शकलम् । ,, । १८
शुचि नरशिरःकपालं प्राण्यङ्गत्वाच्छङ्खवदित्यस्य नारं स्पृष्ट्वा ऽस्थि सस्नेहं सवासा जलमाविशेदित्यागमविरोधः । कृतकत्वानुमानानुगृहीतात्तद्यथेति वाक्याद् न्यायहीनम् अपामेत्यादिवाक्यमापेक्षिकामृतत्वादिपरं व्याख्येयमित्याह **क्षयितेति** । यत्त्वभिहितं भास्करेण|| नित्यानित्यविवेकादेरप्रकृतत्वान्न तदानन्तर्यमथशब्दार्थो ऽत एव कर्मणां क्षयिष्णुफलत्वं ब्रह्मज्ञानस्य च मोक्षहेतुत्वमतःशब्देन न परामृष्टं युक्तमिति तं भाष्यभावव्याख्यया ऽनुकम्पते **अत्र चेति** । तर्हि सकला वेदान्ताः परामृश्येरन् नेत्याह **योग्यत्वादिति** । अथशब्दो¶क्तहेतुत्वसमर्थनयोग्यत्वादित्यर्थः । हेतुमद्ब्रह्मजिज्ञासाया हेतूनां नित्यानित्यविवेकादीनां सूत्रकारस्य बुद्धिस्थत्वात्तदानन्तर्यार्थत्वमथशब्दस्य युक्तमेव* ।

चतुर्थीसमासाभावे हेतुमाह **तादर्थ्येति** । पाणिनिः किल चतुर्थी ५५ । १३
तदर्थार्थबलिहितसुखरक्षितैरिति तादर्थ्यसमासं सस्मार । चतुर्थ्यन्तः शब्दस्तदर्थवचनादिभिः शब्दैः समस्यते । चतुर्थ्यन्तशब्दार्थस्तच्छब्देन परामृश्यते । तस्मै इदं तदर्थम् । यथा कुण्डलाय हिरण्यमित्यत्र कुण्डलं चतुर्थ्यन्तशब्दार्थस्तच्छेषो हिरण्यं तत्र कुण्डलशब्दश्चतुर्थ्यन्तः कुण्डल-

---

* इयान् इति ३ पु· नास्ति ।
† एतादृशादिति मु· भा· पु· पाठः ।
‡ जटाकारा इति ३-२ पु· पा· ।
§ तथोक्त इति ३ पु· पा· ।
|| यत्तु भास्करेणेति ३ पु· पा· ।
¶ अतःशब्देति ३ पु· पा· ।
* सूक्तमेवेति २ पु· पा· ।

शेषवाचिना हिरण्यशब्देन समस्यते कुण्डलहिरण्यमिति । तथा ऽर्थशब्दा-
दिनापि ब्राह्मणार्थं पयः इत्यादि द्रष्टव्यम् । कात्यायनेन त्वयं समासः
प्रकृतिविकृत्योर्नियमितः चतुर्थी तदर्थमात्रेणेति चेत्तर्हि* सर्वत्र प्रसङ्गो ऽवि-
शेषात् प्रकृतिविकृत्योरिति चेदश्वघासादीनामुपसंख्यानम् इति । एवं
५५ । १४ चार्थात्प्रस्तुते तन्निषेधसिद्धिरित्याह **प्रकृतीति । इत्येवमादौ** ब्रह्मजि-
ज्ञासेत्येवमादावित्यर्थः । नन्वश्वार्थो घासो ऽश्वघास इत्यादावप्रकृतिवि-
कारे ऽपि तादर्थ्यसमासो दृष्ट इत्याशङ्क्य कात्यायनेनैव समासान्तरमुपसंख्या-
तमित्याह **अश्वघासादय इति ।**

ननु षष्ठीसमासाभ्युपगमे ब्रह्मणो जिज्ञासाव्यावर्त्तकत्वेन गुणत्वात्प्रधा-
नपरिग्रह इति भाष्यस्याप्राधान्यभङ्गस्तत्राह **षष्ठीसमासे ऽपीति ।**
ब्रह्मोज्झं वेदत्यागः । प्रतिपत्तौ विशेषणत्वेनानुबध्यतइत्यनुबन्धः । स्वरू-
पेण निरूपितायां जिज्ञासायां पश्चात्संबन्धिन्यपेक्षा ब्रह्म च ज्ञानद्वारा जिज्ञा-
सारूपनिरूपकमिति प्रथमोदिताकाङ्क्षावशेन ब्रह्मजिज्ञासायाः कर्मत्वेन संब-
ध्यते न तु संबन्धिमात्रतयेत्यर्थः । जिज्ञासाज्ञानयोर्विषयाधीननिरूपणं
५६ । १६ वैधर्म्यदृष्टान्तेन प्रपञ्चयति **न हीति ।**

ननु प्रमाणयुक्त्यादि जिज्ञासायाः कर्म भविष्यति† ब्रह्म तु
संबन्धित्वेन निर्दिश्यताम् । न । निर्दिष्टकर्मलाभे कल्पना‡नुपपत्तेरित्याह
नन्वित्यादिना । संभन्त्स्यते संबद्धं भविष्यति । ननु श्रुतकर्मत्यागा-
ऽयोगे स्थिते कथं शेषषष्ठी शङ्क्यतइत्यत आह **निगूढाभिप्राय इति ।**
प्रमाणादिबहुश्रौतत्व§सिद्धिरित्यभिप्रायस्य निगूढता । ननु ब्रह्मसंबन्धिनी
जिज्ञासेत्युक्ते कर्मा ऽनिर्देशादनिरूपितरूपा जिज्ञासा स्याद् नेत्याह **सामा-
न्येति ।** बहुप्रतिज्ञानां श्रौतत्वलाभा||त्कथं प्रयासवैयर्थ्येन परिहारस्तत्राह
निगूढेति । एकस्यापि प्रधानस्य श्रौतत्वं वरं न तु गुणानां बहूनामपीति ।
५७ । ५ **वाच्यस्येति ।** शब्दोपात्तत्वेन साक्षात्संनिधिः । प्रथमापेक्षितस्येत्याकाङ्क्षा ।
प्रथमसंबन्धार्हस्येति योग्यता । एतैर्युक्तस्य कर्मत्वस्य संबन्धः प्रथमः सन्नपि

---

* तर्हीति नास्ति ३ पु॰ ।
† भवत्विति पाठः ३ पु॰ ।
‡ कर्मकल्पनेति ३ पु॰ पा॰ ।
§ बहुप्रतिज्ञानां श्रौतत्वादिति ३ पु॰ पा॰ ।
|| श्रौतत्वादिति २ पु॰ पा॰ ।

जघन्यः । एतैः रहितस्य संबन्धिमात्रस्य संबन्धो जघन्यः सन् प्रथम इति कल्पनं व्याहतमित्यर्थः । कर्तृकर्मणोः कृतीति कृद्योगे कर्मणि षष्ठीस्मरणाद्वाच्यं कर्मत्वं जिज्ञासापदस्य चाकारप्रत्ययान्तत्वात् कृद्योगः । यस्तु कर्मणि चेति कर्मणि षष्ठ्या समासप्रतिषेधः स च उभयप्राप्तौ कर्मणीति या कर्तृकर्मणोरुभयोरपि सामर्थ्यादुपादानप्राप्तौ कर्मण्येवेति नियमिता षष्ठी तद्विषयः । यथा ऽऽश्चर्यो गवां दोहो ऽगोपालकेनेति । एवं ह्याश्चर्यं व्यज्येत यदि दुर्दोहानां गवां दोहे कर्मत्वमकुशलस्य चाऽगोपालस्य कर्तृत्वम् । प्रस्तुते तु ब्रह्मकर्मत्वमेवोपादीयते न कर्तृगतो ऽतिशय इत्युभयप्राप्त्यभावात्कर्तृकर्मणोः कृतीत्येव षष्ठी । तेन ब्रह्मजिज्ञासेत्युपपन्नः समास इति ।

भाष्ये प्रत्यक्षनिर्द्देशो न युक्तः* शाब्दत्वात्कर्मत्वस्य तत्राह **प्रत्यक्षेति**। ५७ । ९
अविरुद्धमपि परोक्षत्वं व्याख्येयप्रत्यक्षत्वस्य प्रतियोगित्वाद्व्याख्यातम् । परमते कर्मत्वस्य लाक्षणिकत्वं चरमान्वयप्रसञ्जनार्थम् । नन्वयुक्तमपि ज्ञानस्येच्छाविषयत्वं सौत्रजिज्ञासापदात्प्रमीयताम् । न । न्यायसूत्रे उपदेशमात्रेणाऽविश्वासादित्याह **नेति** । साक्षात्कारसाधनं ज्ञानमिच्छाविषय इति प्रतिज्ञाय फलविषयत्वादिच्छाया इति हेतुरयुक्तो व्यधिकरणत्वात्तत्राह **तदुपायमिति**। फलेच्छाया एवोपायपर्यन्तं प्रसरादविरोध इत्यर्थः । **भवतु ब्रह्मविषयाऽवगतिरिति** । स्वरूपावगतिः स्वविषयव्यवहारहेतुत्वेन तद्विषयोक्ता । ब्रह्मणोऽपि धर्मवदसुखत्वान्न तदवगतिः पुमर्थ इत्याह **एवमपीति**। श्रुतिस्वानुभवावगतानिर्दुःखानन्दमभिप्रेत्य परिहारो **ब्रह्मावगतिर्हीति**। **प्रतिभान्** प्रतिभासमानः । **अर्थ्यमानत्वात्** प्रार्थ्यमानत्वात् । अविद्यानिवृत्तिर्न स्वरूपा†ऽवगत्या नित्यनिवृत्त्यापातादपि तु वृत्तित इत्याह **अविद्यादीति** ।

पदार्थान्व्याख्याय सूत्रतात्पर्य‡माह **तस्मादित्यादिना** । **विग-** ५८ २२
लितदुःखेति वृत्तिव्यक्तस्वरूपाभिप्रायम् । सूत्रस्यानुवादत्वव्यावृत्तये तव्यप्रत्ययमध्याहरति **एषितव्यमिति** । किमिति ज्ञानमेषितव्यं वेदान्तेभ्य एव तत्सिद्धेरिति न । सन्देहादिना प्रति§बन्धादित्याह **तत्रेति** । नन्वि-

---

* निर्देशो ऽनुपपन्न इति २ पु॰ पा॰ । † ब्रह्मस्वरूपेति २ पु॰ पा॰ ।
‡ सूत्रवाक्यार्थमिति ३ पु॰ पा॰ । § संदेहादिप्रतीति ३ पु॰ पा॰ ।

५६ । ३ च्छाया विषयसौन्दर्यलभ्यत्वात्किं तत्कर्तव्यतोपदेशेन तत्राह **इच्छानिमे-नेति** । ज्ञातुमिच्छा हि सन्दिग्धे विषये निर्णयाय भवति निर्णयश्च विचारसाध्य इति तत्कर्तव्यता ऽर्थाद्गम्यतइत्यर्थः । आर्थिके चास्मिन्नर्थे कर्तव्यपदाध्याहारः । श्रौतस्तु मुमुक्षानन्तरं ब्रह्मज्ञानेच्छा भवितुं युक्ता इत्येष एव । तथा चाधिकारार्थत्वमथशब्दस्य निषेद्धुं ज्ञानेच्छा जिज्ञासाशब्दार्थ इत्युपपादनेन न विरोध इति । ननु धर्मग्रहणाद्विधीनामर्थविवक्षा तत्र कृता न वेदान्तानाम् । नेत्याह **धर्मग्रहणस्येति** ।

उपलक्षणतया वेदान्तानामर्थविवक्षाप्रतिज्ञावद्विचारप्रतिज्ञा ऽपि तत्रैवास्त्वित्याशङ्क्योपरि प्रतिपादनाऽदर्शनान्नेत्याह **यद्यपीति** । ब्रह्मविचारप्रतिज्ञायास्तत्र सम्भवमङ्गीकृत्य परिहार उक्तः । इदानीं सम्भव एव नास्तीत्याह **नापीति** । अविरक्तस्य ब्रह्मविचारे प्रवृत्त्ययोगादित्यर्थः । ब्रह्ममीमांसारम्भायेति प्राचा तन्त्रेणागततोक्ता । **नित्यादिविवेकानन्तर्यायेति** । तत्रत्यप्रथमसूत्रेणेहत्यप्रथमसूत्रस्य* । युष्मदस्मदित्यादिना ह्यहंप्रत्यये जीवस्य प्रसिद्धेरसंसारिब्रह्मात्मत्वस्य चाभावाद् विषयमाचिक्षिपे । अत्र तूपेत्य ब्रह्मात्मभावं† वेदान्तेभ्यस्तत्सिद्धप्रसिद्धिभ्यामाक्षेप इति विभागमाह **वेदान्तेभ्य इति** । संमुग्धप्रसिद्धस्य जिज्ञास्यत्वसम्भवादाक्षेपायोगमाशङ्क्याह **निश्चयज्ञानेनेति** । अनिश्चायकत्वं तु वेदान्ताना‡मयुक्तं निर्दोषत्वादित्याह
,, । १५ **अपौरुषेयतेति** । निष्पादिता प्रमितिलक्षणा क्रिया यस्य कर्मणो विषयस्य स इह तथोक्तः । यद्यपि निर्दोषो वेदस्तथापि सामान्यतो दृष्टनिबन्धनवचनव्यक्त्याभासप्रतिबद्धः संदिग्धार्थः स्यादतो विचारात् प्रागापातप्रसिद्धिं दर्शयन्नप्रसिद्धत्वपक्षोक्तं दोषमुद्धरति **प्रागपि§ ब्रह्ममीमांसाया इति** । भाष्ये ब्रह्मास्तित्वप्रतिज्ञा भाति‖ कथं प्रतीतिपरत्वव्याख्येत्याशङ्क्य प्रत्याय्येन¶ प्रत्ययलक्षणामाह **अत्र चेति** । मुख्यार्थपरिग्रहे बाधमाह **तदस्तित्वस्येति** । **विमर्शे** संशये । **देहाद्यभेदेनेति** भेदाऽभेदमतेन शङ्का । तत्त्वमसिवाक्यनिर्विष्ट**तत्पदलक्ष्यप्रसिद्धिमुक्त्वा वाच्यप्रसिद्धि-

* सूत्रस्यागततोक्तेति ३ पु॰ पा॰ ।
† ब्रह्मात्मतामिति ३ पु॰ पा॰
‡ वेदानामिति ३ पु॰ पा॰ ।
§ प्रागपीति २-३ पु॰ नास्ति ।
‖ ब्रह्मास्तित्वं प्रतिभातीति २ पु॰ पा॰ ।
¶ प्रत्याय्येनेति ३ पु॰ पा॰ ।
** निविष्टेति २ पु॰ । निर्दिष्टेति ३ पु॰ पा॰ ।

माह **अविद्योपाधिकमिति** । अविद्याविषयीकृतमित्यर्थः । **शक्ती-
ति**[*] । शक्तिज्ञानाभ्यां कारणं लक्ष्यते । यो हि जानाति शक्नोति च स करोति
नेतर इत्यनुविधानादित्यर्थः ।

सदेवेत्यादिवाक्यात्प्रसिद्धिमुक्त्वा पदादपि सोच्यतइति वक्तुं पृच्छति
कुतः पुनरिति । वाक्यात्प्रसिद्धस्यैव पुनरपि कुतो हेत्वन्तरात्प्रसिद्धिरि- ६० । २२
त्यर्थः । ननु बृंहतिधातुरतिशायने व`तामापेक्षिकं तु तद् बृहत् कुम्भ इतिवद्[†]
नेत्याह **अनवच्छिन्नमिति** । प्रकरणादिसङ्कोचकाभावादित्यर्थः । पदान्तरं
साक्षान्नित्यत्वादिबोधकं[‡] नित्यादि[§]पदम् । उक्तविशेषणानामन्यतमेनापि
रहितस्य न महत्त्वसिद्धिरतो ब्रह्मपदादुक्तवस्तुसिद्धिरिति । **तत्पदार्थस्य
शुद्धत्वादेरिति** समानाधिकरणे षष्ठ्यौ । जीवस्य हि विशुद्धत्वाद्येव
तत्पदेन समर्प्यते न पदार्थान्तरमिति । प्रसिद्धिर्हि ज्ञानं ज्ञातारमाकाङ्क्षति
तेन व्यवहितमपि सर्वस्येत्येतदस्तित्वप्रसिद्धिरित्यनेन संबन्धनीयम् । तथा
सति प्रतिज्ञाविशेषणं सत्कैमुतिकन्यायं द्योतयिष्यति न तु सर्वस्यात्मत्वा-
दिति हेतुविशेषणं वैयर्थ्यादित्यभिप्रेत्याह **सर्वस्येति** । पांसुमन्तौ पादौ
यस्य स तथा । हलं वहतीति हालिकः । सर्वस्य ब्रह्मास्तित्वप्रसिद्धिः ।
सर्वो हि तत्प्रत्येतीति साध्यहेत्वोरविशेषमाशङ्क्याह **प्रतीतिमेवेति** । अहं
न नास्मीति प्रत्येतीति योजनायाम् अस्तित्वं न सिध्येत् । असत्त्वनिषेधे
ऽप्यनिर्वाच्यत्वस्यानिवारणात् । अतो ऽहमस्मीति न प्रत्येतीति योजनैव
साध्वीति ।

अहमिति प्रतीतेरहङ्कारमात्रविषयत्वान्नात्मप्रसिद्धिः सिध्येदिति शङ्कते
नन्वहमिति । ऋजुयोजनायां ह्यव्याप्यादव्यापकप्रसञ्जनं स्यान्न हि प्रसि- ६१ । ११
द्ध्यभावो नास्तित्वप्रतीत्या व्याप्तः । सुषुप्तौ विश्वाभावप्रतीतिप्रसङ्गात् । तन्मा
भूदिति व्यवहितेन संबन्धयति **अहमस्मीति न प्रतीयादिति** ।
शङ्कितुरनुशयमपाकरोति **अहङ्कारास्पदमिति** । अहमिति प्रतिभासस्य
चिदचित्संवलितविषयत्वमध्यासभाष्ये समर्थितम् । तथा चाहमिति प्रतीति-
रात्मविषया ऽपि । अत आत्मप्रसिद्ध्यभावे ऽहमिति प्रतीतिर्न स्यादित्यर्थः ।

---

* इदं नास्ति २-३ पु० ।
† कुम्भवदितीति ३ पु० पा० ।
‡ नित्यत्वादिवाचकमिति ३ पु० पा० ।
§ नित्यत्वादीति २ पु० पा० ।

तदस्त्वमेति । तत्त्वमसिवाक्ये तत्पदस्य प्रकृत*सच्छब्दवाच्यब्रह्मपरामर्शिनस्त्वंपदेन सामानाधिकरण्यादित्यर्थः । ननु ब्रह्मात्मैकत्वस्य वाक्यार्थस्याऽप्रसिद्धत्वेनाप्रतिपाद्यत्वाक्षेपे पदार्थप्रसिद्धिप्रदर्शनमनुपयोगीत्याशङ्क्याह **तस्मादिति** । पदार्थयोरवधृतयोस्ताभ्यां गृहीतसंबन्धपदद्वयसमभिव्याहारादपूर्वो वाक्यार्थः सुज्ञान इत्यर्थः ।

एवं तावदापाततो वाक्यात्पदतश्च प्रसिद्धेर्ब्रह्मणः शास्त्रेण शक्यप्रतिपादनत्वसम्बन्धं सामर्थ्याऽसाधारणरूपविषयत्वं समाधातुमाक्षिपतीत्याह
१ । २० **आक्षेप्तेति** । ब्रह्मण आत्मत्वेन लोकप्रसिद्धमभावाद्वाक्यीयप्रसिद्धि†रनूद्यतइत्याह **तत्त्वमसीति** । ननु तृतीयाया इत्थंभावार्थत्वं विहायात्मत्वेन हेतुना ब्रह्म यदि लोके प्रसिद्धमात्मा च ब्रह्मेति त्वयैवोक्तत्वादिति व्याख्यायतां तदा हि लोकशब्दो रूढार्थः स्यात् । उच्यते । तत्पदार्थमात्रस्य प्रसिद्धिस्तदा ऽनूदिता स्यात् । तस्याश्चाजिज्ञास्यत्वं प्रति न हेतुत्वम् । ज्ञाते ऽपि पदार्थे वाक्यार्थस्य जिज्ञासोपपत्तेरिति । स्यादेतद्यदि ब्रह्मात्मत्वेन प्रसिद्धमिति भाष्यमनुपपन्नम् । न हि महावाक्ये ब्रह्मानुवादेनात्मत्वं विधीयते किं तु लोकसिद्धजीवानुवादेनागममात्रसिद्धब्रह्मत्वम् अत आह **अभेदविवक्षयेति** । अन्यत्र हि वाक्यार्थबोधोत्तरकालं पदार्थानामुद्देश्योपादेयभावो न व्यावर्तते अत्र त्वखण्डवाक्यार्थसाक्षात्कारे स बाध्यतइति द्योतयितुमात्मपदे प्रयोज्ये ब्रह्मपदं ब्रह्मपदे चात्मपदं प्रयुक्तमित्यर्थः ।

ननु विरुद्धा प्रतिपत्तिर्विप्रतिपत्तिः सा च वस्त्वभावसाधिकेति कथं
। २४ विषयलाभस्तत्राह **तदनेनेति** । न विरुद्धप्रतीति‡मात्रेणाभावावगमः किं तु प्रमाणमूलतया ऽतः साधकबाधकप्रमाणाभावे विप्रतिपत्तिः संशयबीजमित्यर्थः । ननु साधारणाकारदृष्टौ संशयो न त्विह क्षणिकविज्ञानस्थिरभोक्त्रादावस्ति साधारणो धर्म इत्याशङ्क्य विप्रतिपत्त्यन्यथानुपपत्त्या तं साधयति **विवादाधिकरणमिति** । देह आत्मा इत्यादिविवादाश्रयो धर्मी पराग्व्यावृत्तो ऽहमास्पदं सर्वतन्त्रेष्वभ्युपगत इति मन्तव्यम् । तत्र हेतुमाह **अन्यथेति** । आश्रयशब्दो विषयवाची । भिन्नविषया विप्रतिपत्तयो न स्युरतो

---

* प्रकृतेति नास्ति २ पु॰ । † वाक्यप्रसिद्धिरिति ३ पु॰ पा॰ ।
‡ विरुद्धप्रतिपत्तीति ५ पु॰ पाठान्तरम् ।

विवदमानानामप्येकमालम्बनमविगीतम् । अत्रोपपत्तिमाह **विरुद्धा हीति** । विप्रतिपत्तिशब्दावयवप्रतिपत्तिशब्दार्थस्य ज्ञानस्य सालम्बनत्वात् यत्किञ्चिदालम्बनं सिद्धम् । वीत्युपसर्गप्रतीतविरोधवशाच्च तदेकमिति सिध्यति । एकार्थोपनिपाते हि धियां विरोधः । अत्र वैधर्म्योदाहरणमाह **न हीति** ।

साधारणधर्मिस्फुरणे ऽपि न शास्त्रार्थस्य बुद्धिसमारोहो न हि ६२ । १०
साधारणः शास्त्रार्थस्तत्राह **तस्मादिति** । यस्माद्विप्रतिपत्तिरेकालम्बना यतश्चैकस्मिन्नालम्बने पूर्वधीविषय*निषेधेन विरुद्धधीरुदेति तस्मात्प्रतियोगितया विप्रतिपत्त्येकस्कन्धत्वेन तत्त्वम्पदार्थतदेकत्वप्रतीतिर्लोकशास्त्राभ्यां सर्वैरेष्टव्येति । तर्हि क्व विगानमत आह **तदाभासत्वेति** । लौकायतिकादीनां सा प्रतीतिराभासः । आस्तिकानां तत्पदार्थप्रतीतिस्तत्त्वमर्थैकत्वप्रतीतिश्च गौणतायां तथा त्वंपदार्थधियो ऽसङ्गसाक्ष्यालम्बनत्वे च विगानमिति । त्वंपदार्थविप्रतिपत्तिप्रदर्शनस्य† वाक्यार्थविप्रतिपत्तौ पर्यवसानमाह **अत्रेति** । देहादिक्षणिकविज्ञानपर्यन्तानां **चैतन्यं** चेतनत्वमात्मत्वमित्यर्थः । भोक्तैवात्मेति—पक्षे भोक्तृत्वं किं विक्रिया उत चिदात्मत्वम् । नाद्यः । कर्तृत्वपक्षादविशेषादित्याह **कर्तृत्वे ऽपीति** । ,, । १८
द्वितीयं प्रत्याह **अभोक्तृत्वे ऽपीति** । सक्रियत्वरूपभोक्तृत्वाभावे ऽपीत्यर्थः । सांख्या हि जननमरणादिनियमाद् निर्विशेषा अपि चेतनाः प्रतिदेहं भिन्ना इति मेनिरे । भिन्नानां च कुम्भवद्विनाशजाड्यापत्तिरतो न नित्यतत्पदार्थैकतेति । अथ वा मैवानुमायि भेदादनित्यतात्मभेदाभ्युपगम एव ब्रह्मात्मैकत्वविरोधीत्याह **अद्वैतेति** । लौकायतिकादिनिरीश्वरमतानुभाषणेनैव तत्पदार्थईश्वरे ऽपि विप्रतिपत्तिः सूचिता ऽतस्तादृशब्रह्मात्मैकवाक्यार्थेपि विप्रतिपत्तिरर्थाद्युक्तेत्याह **त्वंपदार्थेति** । **वेदप्रामाण्यवादिनो** मीमांसकादयः । **शरीरादिभ्य इति** शरीरादिशून्यपर्यन्तेभ्य इति **जीवात्मभ्य इति** कर्तृभोक्तृभ्यः केवलभोक्तृभ्य इति **स्वाभाविकमस्येति** नैयायिकादिमतेनेत्यर्थः । युक्तिवाक्येति भाष्यस्थतच्छब्दस्य प्रत्येकं युक्तिवाक्याभ्यां संबन्धीकरोति **युक्तीति** । आत्मा स

---

* पूर्वविषयेति ३ पु॰ पा॰   † विप्रतिपत्तिदर्शनस्येति २ पु॰ पा॰ ।

मोक्तुरिति पक्षे मूलं युक्तिवाक्ये अन्यत्र तदाभासाविति । अनर्थं चेया-
६३ । १६ दिति भाष्यार्थमाह **अपि चेति ।** भाष्ये तर्कस्य पृथगुक्तेर्वेदान्तमीमांसा किं न तर्कः । नेत्याह **वेदान्तमीमांसेति ।** अर्थापत्तिरनुमानं चात्र तर्को ऽभिमतः तद्रूपा वेदान्तमीमांसा तस्या अविरोधिनः श्रुतिलिङ्गादयस्तार्त्तीयाः पाञ्चमिकाश्च श्रुत्यर्थादयो वेदप्रामाण्यपरिशोधकाः कर्ममीमांसायां विचारिताः । वेदस्य प्रत्यक्षादीनां तदर्थादीनां* च लक्षणादीनि न्यायशास्त्रैर्विचारितानि । स्मृत्यादिभिश्च वेदानुमाने ऽनुमानचिन्तोपयोगः । तेन विहितजातिव्यक्तिपदार्थविवेके वेदस्वरूपग्रहणे च न्यायशास्त्रस्योपयोगः । सर्वे चैते प्रमाणानुग्राहकत्वेन तर्का उच्यन्तइति† ॥

६४ । १ **जन्माद्यस्य यतः ॥ २ ॥**

अनन्तराधिकरणेन प्रारिप्सितसमस्तविचारस्य सम्बन्धमाह **तदेवमिति ।** सकलशास्त्रं प्रतीकेन संगृहीतम्‡ । विषयादिसद्भावात् समर्थिते विचारारम्भे तमुपजीव्योत्तरविचारप्रवृत्तेर्हेतुहेतुमल्लक्षणः संबन्ध इत्यर्थः । प्रथमसूत्रेण द्वितीयसूत्रस्याक्षेपलक्षणां सङ्गतिमाह **एतस्येति ।** मुमुक्षुणा ब्रह्मज्ञानाय वेदान्तवाक्यविचारः कर्त्तव्य इति प्रतिज्ञायां ब्रह्मस्वरूपविचारवत्प्रमाणयुक्तिसाधनफलविचाराणामर्थात् प्रतिभाने कथं प्रथमं ब्रह्मैव विचार्यते ऽत आह **अत्रोत ।** अत्र यतो वेत्यादिवाक्यं ब्रह्म लक्षयति उत नेति लक्षणस्य लोकप्रसिद्ध्यप्रसिद्धिभ्यां विशये§ पूर्वपक्षमाह **तत्र यद्यावदिति ।** पूर्वाधिकरणाक्षेपपरिहारत्वा||दस्य तत्रत्यब्रह्मलक्षणनिरूपकत्वाच्च तदीयमेव मुमुक्ष्वभिलषितमोक्षलाभः प्रयोजनमिति न पृथग्वक्तव्यम् । यदाह्याचार्यः शबरस्वामी ।

> आक्षेपे चापवादे च प्राप्त्यां लक्षणकर्मणि ।
> प्रयोजनं न वक्तव्यं यच्च कृत्वा प्रवर्त्तते ॥ इति ।

यत्र पूर्वाधिकरणसिद्धान्ताक्षेपेण पूर्वः पक्षः तत्राक्षेपिकी । यत्र तु पूर्वाधिकरण¶सिद्धान्तेन पूर्वपक्षः तत्रापवादिकी सङ्गतिः । प्राप्तिस्तदर्थचिन्ता

---

* तदर्थानामिति ३-२ पु॰ पा॰ ।

† अत्र प्रथमे जिज्ञासाऽधिकरणे १ सूत्रम्-**अथातो ब्रह्मजिज्ञासा** १ इति ।

‡ गृहीतमिति ३ पु॰ पा॰ ।

§ विषये इत्यसमञ्जसः पाठः १ पु॰ ।

|| परिहारादिति ३ पु॰ पा॰ ।

¶ सिद्धान्तेत्यारभ्यैतावदन्तो ग्रन्थो नास्ति १ पु॰ ।

कृत्वा प्रवर्तनं कृत्वा चिन्ता सा चाभ्युपगमवाद इति । सजातीयविजातीय-द्रव्याद्*व्यावृत्तिप्रयोजनो धर्मो लक्षणं नाम । तदिह परिदृश्यमानं जगदेव लक्षणं ब्रह्मण उत नित्यशुद्धत्वादिस्वरूपमिति विकल्प्य नाद्य इत्युक्ते द्वितीयमाशङ्क्याह **न चेति** । ननु लोकाऽसिद्धमपि वेदेन ज्ञाप्यतामत आह
एवं चेति । न जगद् ब्रह्मलक्षणं किं तु तत्प्रति कारणत्वं तच्च जीवाविद्या- ६४ । १९
विषयीकृतस्य धर्म इत्युपलक्षणमुपपादयति **मा भूदिति । तादात्म्येनेति** ऐक्येन । ततो भेदेन **तद्धर्मतयेति । तदुत्पत्त्या त्विति ।** तदुत्पन्नत्वेन जगत्स्वकारणं लक्षयति ज्ञापयति कारणत्वं तु लक्षण†मित्यर्थः । **व्रज्याया गतेः** । जन्म आदिर्ययोः स्थितिभङ्गयोस्तौ जन्मादी इत्यन्यपदार्थौ यदि विशेषरूपेण विवक्ष्यते तर्हि जन्मादी अस्येति निर्देशे गौरवं स्यात्तन्मा भूदिति सामान्यविवक्षया नपुंसकप्रयोगः सूत्रे कृतः । तत्र‡ नपुंसकैकवचनप्रयोगार्हं समाहारमाहेत्याह **लाघवायेति** ।

श्रुतीरविशदाः काश्चिद्भाष्याणि विषमाणि च ।
वाचस्पत्युक्तभावानि पदशो विभजामहे ॥

तद्गुणसंविज्ञान इति§ । तच्छब्देन बहुव्रीह्यर्थो ऽन्यपदार्थ उच्यते । तस्य गुणत्वेन संविज्ञानं यस्मिन्समासे स तथोक्तः । सर्वस्य विशेषणत्वे समासाऽसम्भवात् समासार्थैकदेशो विशेषणमिति लभ्यते । अनादौ संसारे कथं जन्मा-
दिस्तत्राह **जन्मन इति** । श्रुत्या वा कथमयुक्तं निर्दिष्टमत आह ,, । २०
वस्त्विति । नानादेः संसारस्यादिर्जन्मोच्यते किं तर्हि प्रतिवस्तु । घटस्य हि जन्मैवादिरिति । इदमः संनिहितवचनत्वात्प्रत्यक्षमात्रपरामर्शित्वमाशङ्क्य|| प्रतीतिमात्रं संनिधिरित्याह **अस्येति** । सर्वस्य जगतो न जन्माकाशादेरनादित्वात्तत्राह **षष्ठीति** । वियदधिकरण¶न्यायात्तस्याप्य**स्ति जन्मादिसम्बन्ध इत्यर्थः । जगतो जन्मादेर्वा ब्रह्मासम्बन्धान्न लक्षणत्वमित्याशङ्क्याह **यत इति** । व्याख्यातमेतदधस्तात् । एवं सूत्रपदानि व्याख्याय प्रथमसूत्राद् ब्रह्मपदानुषङ्गेण तच्छब्दाध्याहारेण च वाक्यार्थमाह **अस्य जगत**

---

* द्रव्यादिति नास्ति १-५ पु० । † ब्रह्मलक्षणमिति ३-५ पु० पा० ।
‡ तत्रेति २ पु० नास्ति । § भाष्यप्रतीकग्रहणम् । एवमग्रेऽपि तत्र तत्र बोध्यम् ।
|| परामर्शित्वमयुक्तमित्याशङ्क्येति ३ पु० पा० । ¶ व्या० सू० अ० २ पा० ३ सू० १ ।
** तत्रापीति ५ पु० पा० ।

इत्यादिना भाष्येण । तद्गतैर्विशेषणैर्लक्षणे ऽतिव्याप्तिः परिह्रियतइत्याह **स्यादेतदित्यादिना** । स्वभाव एव नियन्तेति स्वभाववादो यदृच्छापक्षस्तु न किं चिन्नियामकमस्तीति । **व्यासेधति** प्रतिषेधति । उत्पत्तेः प्रागसतः कथं बुद्धावालेखनमत आह **अत एवेति** । यदसदिति प्रसिद्धं तद् बुद्ध्यारूढरूपेण सदेव अन्यथा तुरङ्गशृङ्गवत् कर्मत्वनिर्देशायोगादिति सत्कार्यवादिनश्चाहुः ।

१६ **वैश्वानरीयेष्ट्यादिष्विति** । चतुर्थे स्थितम्* फलसंयोगस्त्वचोदितेन स्यादशेषभूतत्वात्† वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते इत्युपक्रम्य यस्मिन् जातएतामिष्टिं निर्वपति पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवतीति श्रूयते । तत्र किं पूतत्वादि पितुः फलमुत पुत्रस्येति संदेहे फलस्य कर्तृगामित्वनियमादितरथा प्रेरणानुपपत्तेः पितुरिति प्राप्ते राद्धान्तः । यस्मिन् जाते निर्वपति‡ स पूत इति जातगामित्वेन फलाम्नानात् फलभोक्तृत्वेना§चोदिते पितरि फलसंयोगो न स्याद्वचनस्य तं प्रत्यशेषभूतत्वात् । यत्त्वफलभागिनो न प्रेरणेति । तन्न । पूतत्वादिगुणवत्पुत्रवत्तयैव पितुः प्रीत्युत्पत्तेः प्रेरणावकल्पनात् । अतः पुत्रगामि फलमिति । अत्रानेककर्तृभोक्तृजीवानां सृज्यत्वेन निर्देशात् जगत्कर्तृत्वायोग्यतोक्ता ।

६ **मनसापीति** । जगतस्तान् प्रति कार्यत्वायोग्यतेति विशेषणद्वयेन जीवकर्तृकत्वनिषेधः । व्याकृतस्य इत्यनेनानभिव्यक्तबीजावस्थजगतो ऽभिव्यक्त्यभिधानादणवः प्रागसद् द्व्यणुकाद्यारभन्तइति मतव्युदासः । शेषं विशदं‖

टीकायाम् । तदेव लिलक्षयिषितजगद्योनिब्रह्मसजातीयतया परभ्रमपरिकल्पितप्रधानादेरुक्तविधजगत्प्रकृतित्वं ब्रह्म व्यवच्छिनत्ति । विजातीयात्पुनः कार्यात्कारणत्वादेव । तथा च सजातीयविजातीयव्यवच्छेदकत्वेन¶ जगत्प्रकृतित्वस्य सिद्धं लक्षणत्वम् । **धर्मलक्षणेति** । धर्म इति लक्षणमिति अवस्थेति त्रीणि लक्षणानि यस्य परिणामस्य स तथोक्तः । स चोत्पत्तावन्तर्भवतीति । धर्मपरिणामं विवृणोति **धर्मिणो हीति** । कनकादेर्धर्मिणो

---

* चिन्तितमिति ३ पु· पा· ।
† जै· सू· अ· ४ । पा· ३ । सू· ३८ ।
‡ जाते एतामिष्टिं निर्वपतीति ३ पु· पा· ।
§ फलभागित्वेनेति ३ पु· पा· ।
‖ सुगमंमिति ३ पु· पा· ।
¶ व्यवच्छेदफलत्वेनेति ३ पु· पा· ।

धर्मरूपपरिणामो नाम मुकुट*कटकादिरिति सांख्यप्रक्रिया । तत्र निरूप्यमाणे
परिणामशब्दालम्बने तस्य कटकादेर्हेमादित उत्पत्तिरित्यर्थः । लक्षणपरि-
णाममुदाहरति **एवमिति** । प्रत्युत्पन्नत्वं वर्त्तमानत्वं कटकादिकार्यस्य ६६ । १०
वर्त्तमानत्वातीतत्वभविष्यत्वरूपो लक्षणपरिणामः सो ऽप्युत्पत्तिरित्यर्थः ।
अवस्थापरिणाममुदाहरति **एवमवस्थेति** । अतीतादेरेवातीतत्वातीतत-
रत्वातीततमत्वादिरूपो नवपुराणत्वाद्यापत्तिरवस्थापरिणामो नाम स चोत्प-
त्तिरेवेत्यर्थः । अपक्षयस्य विनाशान्तर्भावमाह **अपक्षयस्त्विति** । तच्च
न मूलकारणेति । पुरुषाणां श्रुतिमन्तरेणातीन्द्रियार्थे दर्शनसामर्थ्याभा-
वादित्यर्थः । न च वृद्ध्यादिविकारकथनादेव मूलकारणे दृष्टत्व†मनुमेयम-
न्यथा ऽप्युपपत्तेरित्याह **महासर्गादिति** । परमकारणादुत्पत्त्यादयो न
गृहीता इति शङ्कापनुत्तये योत्पत्तिर्ब्रह्मणो यतो वेति वाक्ये जायन्तइत्युत्प-
त्तिरभिहिता या च तत्रैव स्थितिर्जीवन्तीत्युक्ता यश्च तत्रैव प्रलयो ऽभिसं-
विशन्तीत्युक्तस्तउत्पत्त्यादयः सूत्रे गृह्यन्तइति भाष्यार्थः । तत्रोत्पत्तिमात्रा-
देव लक्षणस्यालक्ष्यव्यावृत्ति‡सिद्धौ स्थितिलयोपादानमाशङ्कानिवृत्त्यर्थमित्याह
उत्पत्तिमात्रमिति । उत्पादकत्वं निमित्ते ऽपि दृष्टमित्युपादानत्वसि- ६७ ।
द्ध्यर्थं लयाश्रयत्व§मुक्तमित्यर्थः । नन्वेवमपि लयाधारत्वादेवोपादानत्वं
लभ्यते न हि दण्डादिषु कुम्भादयो लीयन्ते ऽत इतरवैयर्थ्यम् । मैवम् । उपा-
दानत्वमेव न कुलधर्मतयोक्तं किं तु प्रकृतिविकाराभेदन्यायेनाद्वैतसिद्धये ।
एवं च भवतु ब्रह्म जगत उपादानमधिष्ठाता तु उत्पत्तिस्थित्योरन्यः स्यात्
कुम्भकार इव कुम्भस्योत्पत्तौ राजेव च राज्यस्थेम्नीति‖ मा शङ्कीत्युत्पत्तिस्थिति-
ग्रहणमिति । लक्षणाख्यकेवलव्यतिरेक्यनुमानादेव प्रतिज्ञातब्रह्मप्रमितेः शास्त्र-
योनित्व¶समन्वयाधिकरण**योर्वैयर्थ्यमित्याशङ्क्याह **तदनेनेति** । ब्रह्मज्ञा- ,, । १३
नाय वेदान्तविचार आरभ्यतइति प्रतिज्ञायां विशेषणत्वेन ब्रह्म विषय इति
प्रतिज्ञाविषयस्येत्युक्तम् । लक्षणं हि सिद्धस्य वस्तुनो भेदमवगमयति ईदृशं

---

* मुकुटेति २-३ पु· नास्ति । † कारणदृष्टत्वमिति १-२ पु· पा· ।

‡ लक्ष्यस्यालक्ष्याद् व्यावृत्तीति ३ पु· पा· ।

§ लयाश्रितत्वमिति १ पु· पा· स्थितिलयाश्रयत्वमिति ३ पु· पा· ।

‖ राज्यस्थितावीति ३ पु· पा· । ¶ व्या· सू· अ· १ पा· १ सू· ३ ।

** व्या· सू· अ· १ पा· १ सू· ४ ।

तदिति तत्स्वरूपं वा न सताम् । कार्येण च कारणं किं चिदस्तीति मितम् ।
तत्त्वेकमनेकं वेति संदिग्धं तस्य यदैकत्वं सेत्स्यति तदा भवति तत्सर्वज्ञं
सर्वशक्ति च नेतरथा । अयमेव संशयः कल्पनालाघवसंज्ञकतर्केणोत्कटैककोटि-
कतां नीतः सम्भावना समभवन्न निर्णयः । विचित्रप्रासादादीनां बहुकर्तृकत्वस्य
६१ । १४ प्रायेण दृष्टत्वात्तदिदमुक्तं **सम्भावनोक्तेति** । एवं च वक्ष्यमाणाधिकरण-
द्वयेन प्रमाणं वाच्यमित्यर्थः । एतदेवेति भाष्येण युक्तीनामासां सम्भावना-
हेतुत्वं दृढीक्रियतइत्याह **इत्थं नामेति** । नैयायिकैरपि प्रमाणादमूषां भेदो
नाज्ञायि युक्तीनाम् । ततः स्तोकैवासां प्रमाणादूनतैवं च सम्भावयन्तितरा-
मित्यर्थः । **सुहृद्भावेनेति** । उत्तराधिकरणारम्भात् प्राक् क्षणमपि शिष्याणाम-
नुपपत्तिशङ्का मा भूदिति कृपयेत्यर्थः । अत्र नावेदविन्मनुते तं बृहन्तं नैषा
तर्केण मतिरापनेयेत्यादिशास्त्रात्प्रागु क्तयुक्त्या च वेदैकगम्यं ब्रह्मेति समाधत्त-
,, । २३ इत्याह **परिहरतीति** । वाक्यार्थविचारणाशब्देन शाब्दबोध उपासनास-
हित उक्तः परस्तादवगतिरेवेति मध्ये ऽध्यवसानशब्दो न युक्त इत्याशङ्क्य
नायं ज्ञानवचनः किं तु संस्कारसहितलयविक्षेपाविद्यासमाप्तिवचन इत्याह
सवासनेति । वृत्तिरूपसाक्षात्कारस्याविद्याध्वंसिनो मध्ये विद्यमानत्वे
ऽपि न सो ऽध्यवसानशब्देन गृहीतः । अविद्यानिवृत्त्या स्वरूपाभिव्यक्तिं प्रति
व्यवधानाद्दिति । विमतं चेतनपूर्वकं कार्यत्वादित्यादियुक्तिः शब्दाविरोधिनी
वस्तु विशेषनिर्द्धारणे तदुपजीविनीति वक्तव्यम् । ब्रह्मात्मत्वस्य* केवलयुक्त्य-
गोचरत्वस्वाभाव्या†दित्याह **तदुपजीवि चेत्यपीति** । यथा हि किल
गन्धारदेशेभ्य आनीय चौरैररण्ये कश्चिद्बद्धचक्षुः निहित आप्तोपदेशतस्त-
दुपदिष्टस्य साकल्येन न गृहीतत्वात्पण्डितः स्वयमूहापोहक्षमतया च मेधावी
गन्धारान् प्राप्नोत्येवं परब्रह्मण आच्छिद्य विवेकदृष्टिं निरुध्याऽविद्यादिभिः
संसारारण्ये निहितो जन्तुः परमकारुणिकगुरूपदेशतः स्वस्वभावं प्रतिपद्यत-
इति भाष्यस्यार्थत्यर्थः । यदुक्तं ब्रह्मणो मानान्तराविषयत्वे कुतो मननमिति
६८ । ७ तत्राह **शब्दाविरोधिन्येति** । कारणस्य सर्वज्ञत्वादिसिद्धौ युक्तिः शब्द-
मुपजीवति न स्वतन्त्रा । कारणस्य तत्त्वं सम्भावयन्तीति‡कर्त्तव्यता न

---

* ब्रह्मात्मतत्त्वस्येति ३ पु० पा० ।

† युक्त्यगोचरस्वाभाव्यादिति १ पु० पा० । युक्त्यगोचरत्वादिति ३ पु० पा० ।

‡ कारणमात्रं तु सम्भावयन्तीति २ पु० । एवं शोधितं ३ पु० । कारणमात्रस्य तत्त्वं सम्भा-
वयन्तीति तै० पु० ।

मानान्तरमित्यर्थः । भाष्यस्थानुभवशब्दार्थमाह **अन्तःकरणेति** । ननु
कथं वृत्तिः प्रमाणमिति भाष्ये उक्तं निष्फलत्वादित्याशङ्क्य तत्कृताविद्यानिवृ-
त्तिद्वारा स्वरूपाभिव्यक्तिरुपचारात्फलमस्तीत्याह **तस्येति** । धर्मजिज्ञासायां
श्रुत्यादय एव प्रमाणमित्ययुक्तं वेदविषयश्रोत्रप्रत्यक्षाद्यपेक्षणादित्याशङ्क्य ज्ञात-
व्ये धर्मे न साक्षात्कारतदुपयोगियुक्त्यादीनां सम्भवो ब्रह्मजिज्ञासा तु साक्षा-
त्कारपर्यन्तेत्याह **यद्यपीत्यादिना** । न केवलं ब्रह्मजिज्ञासायामनुभ-
वादीनां सम्भ्रमः किं तु तत्त्वसाक्षात्कारमन्तरेणापरोक्षसंसारभ्रमनिवृत्त्ययोगा-
त्तेन विना न पर्यवसानं चेत्याह **अनुभवार्थेति** । ब्रह्मजिज्ञासायामिति ६८ । १६
सप्तम्यन्तं पदं षष्ठ्यन्तत्वेन विपरिणमय्यानुभवावसानत्वाद् ब्रह्मजिज्ञासा-
या इति भाष्यं योज्यम् । अनुभवो ऽवसाने समाप्तौ फलत्वेन यस्याः सा
तथोक्ता धर्मजिज्ञासायां त्वनुभवः कारणत्वेनोपक्रमे उपयुक्त इत्यर्थः । इहा-
नुभवः स्वरूपाभिव्यक्तिर्न वृत्तिः । तत्र हेतुमाह **परेति** । न वृत्तिर-
नित्यत्वाद्विचारस्य पुष्कलं फलमित्यर्थः । तदनुभव एव त्वित्यत्र वृत्तिरुक्ता
एवकारेण तु तत्कृताविद्यानिवृत्तिद्वारेण स्वरूपाभिव्यक्तिरशक्यतरेति सूचितम् ।
भाष्ये भूतशब्दः परमार्थवचनः । चशब्दः शङ्कानिवृत्त्यर्थः । व्यतिरेकः प्रपञ्चाभा-
वोपलक्षितस्वरूपं तद्विषयसाक्षात्कारस्य विकल्परूपो ब्रह्मणा सह विषयवि-
षयिभावरूपः सम्बन्धो ऽस्ति न तु तत्त्वतः । उक्तं हीदं प्रथमसूत्रे वृत्तिवि-
षयत्वमपि तयैवोपहितस्य न निरुपाधेरिति तन्न प्रस्मर्तव्यमित्यर्थः ।
अन्यथाकर्तुमित्यत्र कर्तुमित्यस्यानुषङ्गो भाष्ये कार्यः । करणापेक्षत्वादन्यथाकर-
णस्य उदितहोमः कर्तुं शक्यो ऽनुदिते त्वन्यथेति तदाह **कर्तुमिति** ।
भाष्यस्थविध्यादिशब्दानुदाहृतवाक्येषु योजयति **गृह्णातीत्यादिना** । ६९ । १२
नारं स्पृष्ट्वा ऽस्थि सस्नेहं सवासा जलमाविशेदिति नारास्थिस्पर्शनिषेधः ।

शिरःकपाली ध्वजवान् भिक्षाशी कर्म वेदयन् ।
ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात्* ॥

इति ब्रह्मघ्नः शवशिरसो नारास्थ्नो ध्वजत्वेन धारणविधिः । भाष्ये
प्रतिज्ञैव भाति न हेतुरत आह **एतदुक्तमिति** । स्वातन्त्र्येण कर्तुं
समर्थो ऽपि हिताहितोपायत्वमजानन् तद्बोधकविधिनिषेधापेक्ष इत्यर्थः ।

---

* याज्ञवल्क्यस्मृति॰ अ॰ ३ श्लो॰ २४३ ।

१० । ४ अन्तःकरणजकल्पनाद्वैविध्यमाह **सवासनेति** । जाग्रद्वासनावासितं मन एव स्वप्नकारणं जाग्रत्संशयविपर्ययाः* संस्कारसहितान्तर्बहिःकरणजा इत्यर्थः । यथावस्तुत्वं वस्त्वनुसारित्वं यासां नास्ति तास्तथोक्ताः । **न वस्त्विति** । संशया न विकल्पयन्ति विपर्यया नान्यथयन्तीत्यर्थः । खानि इन्द्रियाणि व्यतृणद्धिंसितवान् पराङ् पश्यति लोकः । प्रत्यगात्मनस्त्वविषयत्वमिति अपरोक्षत्वात् प्रत्यगात्मप्रसिद्धिरित्यचेति । **उपरिष्टात्** तर्कपादे† । **उपपादितं चेति** । विमतं धीमत्कृतं कार्यत्वादित्यनुमानान्नेश्वरसिद्धिः । जीवजत्वेन सिद्धसाधनत्वादुपकरणाद्यभिज्ञकर्तृकत्वसाधने कतिपयतदभिज्ञतायां सर्वज्ञासिद्धेः । सर्वतदभिज्ञकर्तृकत्वे सपक्षस्य साध्यहीनत्वात् । कुम्भं निर्मितवतः कुम्भकारस्य चैत्रकर्म्याण्योर्गमित्यनवबोधात्साधारणे ऽपि सिद्धसाधनत्वान्मनःसंयोगहीनस्य चोपलब्ध्येऽभावादमनस्कस्याप्यैश्वर्यादुपलब्धिसम्भवे तत एव विनैवोपलब्ध्या जगन्निर्माणसम्भवेनोपलब्धिमत्कर्तृकत्वस्यैव विलोपेन वृद्धिं गृह्णतो‡ मूलच्छेदादित्यादि न्यायकणिकायां व्युदपादीति । उपरिष्टात् समन्वयसूत्रे । जन्मादिसूत्रेण यतो वेत्यादिवाक्यं लक्ष्यमिति भाष्ये उक्तं तदर्थं श्रुतिसूत्रयोरर्थप्रत्यभिज्ञां दर्शयति **श्रुतिरिति** ।

अत्र स्वरूपलक्षणपरत्वं सूत्रस्य दर्शयितुं तस्य चेति भाष्यं तद्व्याचष्टे

११ । १२ **अत्र चेति** । जगद्विशेषणैः पूर्वनिर्णये ऽपि श्रुतित इह निर्णीयते । कारणं ब्रह्मा ऽनूद्य वाक्येनानन्दत्वविधानात्स्वरूपलक्षणसिद्धिरानन्दः सत्यादेरुपलक्षणम् । नन्वानन्दादेर्भेदे न ब्रह्मलक्षणत्वम् । अभेदे वाक्यार्थासिद्धिः । गुणभूतपदार्थविशिष्टः प्रधानपदार्थो हि वाक्यार्थः । अत्रोच्यते । यत्र पदार्थः प्रमितः तत्र स एवे§तरपदार्थविशिष्टः प्रतिपाद्यः । यस्त्वज्ञातः स नान्यैः शक्यो विशेष्टुमिति स एव वाक्येन प्रमेयः । प्रमिते चैतस्मिन् वाक्यस्य समाप्तेर्न विशिष्टपरत्वम् । यथा प्रकृष्टप्रकाशश्चन्द्र इति प्रकर्षप्रकाशद्वारा चन्द्रलक्षणान्न तद्वैशिष्ट्यं मानान्तरादेव तत्सिद्धेः । उपायस्तु वैशिष्ट्यम् अखण्डचन्द्रसिद्धौ । तच्चाविरोधाच्चन्द्रे ऽनुज्ञायते । सत्यादिवाक्ये त्वनन्तादिपदैर्बोध्यते वैशिष्ट्यम् । एवं च

---

* जाग्रत्स्वप्नविपर्यासा इति १ पु. जाग्रत्स्वप्नविपर्यया इति तै. पु. ।

† द्वितीयाध्यायद्वितीयपादे । ‡ गृह्णत इति २ पु. पा. । § एवशब्दो नास्ति २ पु. ।

अविशिष्टमपर्यायानेकशब्दप्रकाशितम् ।
एकं वेदान्तनिष्णाता अखण्डं प्रतिपेदिरे ॥

ननु चन्द्रलक्षणमिदं ततश्चन्द्र इतरस्माद्भिद्यते चन्द्रशब्देन व्यवहर्त्तव्यो वा प्रकृष्टप्रकाशत्वाद्व्यतिरेकेण तमोवदिति व्यावृत्तिविशिष्टस्य वाच्यत्वविशिष्टस्य च वाक्येन प्रतिपाद्यत्वमिति । तन्न । अप्रमिते चन्द्रे व्यावृत्तेरनवबोधात् प्रमिते ऽपि प्रमाणान्तरात् प्रमितिर्लक्षणवाक्याद्वा । प्रथमे सामान्यतः प्रमितिर्विशेषतो वा । नाग्रिमः । सामान्यस्यैव व्यावृत्तिसिद्धौ चन्द्रस्य तदसिद्धिप्रसङ्गात् । न चरमः । विशेषग्राहिप्रमाणादेव व्यावृत्तिसिद्धौ लक्षणवैफल्यात् । न द्वितीयः । लक्षणवाक्याच्चन्द्रप्रमितौ तस्य तत्रैव पर्यवसाने व्यावृत्तिपरत्वानुपपत्तेः । न च चन्द्रशब्दवाच्यत्वं साध्यते अचन्द्रे चन्द्रशब्दवाच्यत्वसाधने व्याघातात् । अथ चन्द्रत्वमप्यभिप्रेत्य चन्द्रशब्दवाच्यत्वं साध्यते तर्हि चन्द्रत्वमेव साध्यतामवश्यापेक्षितत्वात्कृतमश्रुतवाच्यत्वकल्पनया । तस्मात्प्रकृष्टत्वे सति प्रकाशत्वमज्ञातचन्द्रज्ञापकम् । अर्थाद्व्यावृत्त्यादिसिद्धिः । एवं चैतदपास्तम् एकेन पदेन यावदुक्तं तावतो ऽपरेणाभिधाने पर्यायत्वमधिकाभिधाने विशिष्टवाक्यार्थत्वापत्तिरिति । वाच्यार्थनानात्वस्येष्टत्वाल्लक्ष्यस्य चैकत्वात् । न हि चन्द्रद्वयमस्ति न च लक्षणस्य विशिष्टत्वाल्लक्ष्यं विशिष्टं स्यात् । न हि भवति* सामान्यवत्त्वे सत्यस्मद्बाह्येन्द्रियग्राह्यत्वं विशिष्टमित्यनित्यत्वमपि विशिष्टं तर्हि अनित्यत्वस्यैव लक्षणानात्मकत्वाल्लक्ष्यस्य ब्रह्मणः सत्याद्यात्मकत्वं न स्यादिति चेन्नैतदस्ति । यतः

सत्तादीनां हि जातीनां व्यक्तितादात्म्यदर्शनात् ।
लक्ष्यव्यक्तिरपि ब्रह्म सत्त्वादि न जहाति नः ॥

इह हि कल्पितभेदव्यक्त्याश्रितैः सामान्यैर्या व्यक्तयो लक्ष्यन्ते तास्तद्रूपत्वं न जहति तरङ्गचन्द्रानुगतचन्द्रत्वेन लक्ष्यचन्द्रव्यक्तिरिव चन्द्रात्मत्वमेवं ब्रह्मापि मायाकार्यकुम्भादिकल्पितव्यक्त्यनुगतं सत्तया लक्ष्यमाणं सत्त्वं न हास्यति । तथा ज्ञानत्वानन्दत्वाभ्यामप्यन्तःकरणवृत्त्युपधानलब्धभेदचिदानन्दविशेषानुगताभ्यां लक्ष्यमाणचिदानन्दव्यक्त्योरपि योज्यम् । यथा च सद्भेद औपाधिक एवं सज्ज्ञानानन्दभेदो ऽपि सत्त्वरहितज्ञाना-

* मा हि भूदिति २-५ पु० पा० ।

नन्दयोः शून्यत्वप्रसङ्गाद्बोधात्मत्वरहितसतश्च भानाभावप्रसङ्गाद् दृश्यत्वे कल्पितत्वेन सत्त्वायोगात्सद्बोधात्मकसाक्षिणश्च परप्रेमास्पदत्वेनानन्दस्वाभाव्यावगमादिति । तथा च कल्पितभेदसामान्यतदपेक्षव्यस्त्याकारबाधेन सत्यज्ञानानन्दात्मकं ब्रह्म निश्चीयते । प्रयोगो ऽपि सत्यादिवाक्यं विशिष्टार्थपरत्वरहितं लक्षणवाक्यत्वात्प्रकृष्टप्रकाशादिवाक्यवदिति । तथा ।

उपाधिभेदभिन्नो ऽर्थो येनैकः प्रतिपाद्यते ।
तदपि स्यादखण्डार्थं महत्खं कुम्भखं यथा ॥

निरंशस्य हि जीवस्याणुत्वमनन्तत्वं वा स्यात् तत्र नाणुत्वं सकलदेहव्यापिङ्गादानुपलम्भप्रसङ्गाद् विभोश्च न नभोवद् द्रव्यत्वावान्तरजात्यनाधारस्येश्वराद्भेदायोगात् । तस्मादनन्तब्रह्मात्मनो ऽस्य परिच्छेद औपाधिकः । श्रूयते च जीवस्य परस्मादौपाधिको भेदः

यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैको ऽनुगच्छन् ।
उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजो ऽयमात्मा ॥ इति ।

नन्वेवंभूतब्रह्मणः कथं जगद्योनित्वमत आह **एतदिति*** ।

१२ । १ **शास्त्रयोनित्वात् ॥ ३ ॥**

अत्र हेतुमात्रं प्रति† भाति नैतज्जगद्योनित्वे साध्याविशेषादित्यसङ्गतिमाशङ्क्यार्थिकप्रतिज्ञया सङ्गतिमाहेत्याह **सूत्रान्तरमिति** ।

अथ वा वेदनित्यत्वाद् ब्रह्मणो विश्वयोनिता ।
नेति शङ्कामपाकर्तुं शास्त्रयोनित्वमुच्यते ॥

अस्मिन्पक्षे श्रौतप्रतिज्ञयैव सङ्गतिः । अभ्युच्चयार्थत्वेन हेतुपौनरुक्त्यं परिहरति **न केवलमिति** । हेत्वन्तरसमर्थनाच्चाधिकरणान्तरत्वम् । अस्य महत इत्यादिवाक्यं ब्रह्मणो वेदकर्तृत्वेन सर्वज्ञत्वं न साधयत्युत साधयतीति वेदस्य सापेक्षत्वप्रसङ्गाऽप्रसङ्गाभ्यां संशये पूर्वपक्षमाशङ्क्य निराकरिष्यते । सिद्धान्तोपक्रमभाष्यं व्याचष्टे **चातुर्वर्ण्येत्यादिना** । पुराणन्यायमीमांसा धर्मशास्त्रं षडङ्गानि दश विद्यास्थानानि । **तया तया द्वारेति** । सृष्टिवाक्यापेक्षितसर्गादिप्रपञ्चनद्वारा पुराणमद्वैतपरं जातिव्यक्तिलक्षणनिरूप-

* अत्र द्वितीयं जन्माद्यधिकरणं समाप्तम् । तत्र जन्माद्यस्य यतः २ इत्येकं सूत्रम् ।
† प्रतिशब्दो नास्ति २ पु० ।

णेन न्यायो वैदिकपदार्थशुद्ध्यर्थः शेषोपयोगस्तु व्यक्तः । उक्तमर्थं प्रमाण- यतीति । अत्रायं* भाष्यविभागः । महत इत्यारभ्य ब्रह्मेत्यन्तेन निःश्वसितश्रुत्या विभुत्वहेतूपकृतया ब्रह्मकार्यं वेद इत्युक्तम् । न हीदृशस्येत्यारभ्यास्तीत्यन्तेन व्यतिरेकमुखेन सर्वज्ञत्वप्रतिज्ञा । यदित्यादिना लोक इत्यन्तेन व्याप्तिरुक्तेति । विस्तरत्वं शास्त्रविशेषणं व्याप्त्यनुपयोगाद् व्यर्थमित्याशङ्क्य महाविषयत्वाद्वेदस्य ब्रह्मज्ञानेन तुल्यविषयत्वभ्रमनिवृत्तिः प्रयोजनमित्याह विस्तरार्थमिति । यस्मादित्यस्य तस्येत्यनेन व्यवहितेन संबन्धमाह वेदस्येति । इदमिहानुमानम् । ब्रह्म वेदविषयादधिकविषयज्ञं ७३ । ९
तत्कर्तृत्वाद्यो यद्वाक्यप्रमाणकर्ता स तद्विषयादधिकविषयज्ञो यथा पाणिनिरिति । सर्वावभासकवेदकर्तृत्वेन पक्षधर्मताबलात्सर्वज्ञत्वसिद्धिरिति । यद्वा ऽयं घट एतदन्यासर्ववित्कर्तृकत्वानधिकरणैतदन्यावेदत्वानधिकरणसकर्तृकान्यः घटत्वाद् घटान्तरवदिति । ईक्षणादिप्रयत्नापेक्षणादप्रयत्नशब्दः सौकर्यापेक्ष इत्याह ईषदिति । अधुना पूर्वपक्षम् आशङ्क्य निराक्रियते । कर्तृमत्त्वेन वेदस्य सापेक्षत्वं वदन् प्रष्टव्यः । सापेक्षता किं पुरुषनिर्वर्त्यत्वमात्रादभिनवानुपूर्वीविरचनाद्वा मानान्तरोपलब्धार्थविषयवचनरचनाद्वा कतिपयकालविरचित†सर्वसंप्रदायस्य वेदस्यैकपुरुषान्निःसरणाद्वा । नाद्यस्तत्रापि संमतत्वादित्याह ये ऽपि तावदिति । व्यक्तिरभिव्यक्तिः । द्वितीये क्रमान्यत्वमात्रमभिनवत्वं विसदृशक्रमत्वं वा । आद्यो भवद्भिरप्यङ्गीकृतः । चरमस्तु नास्माभिरपि स्वीकृत इत्याह तस्मान्नृत्तेति । तृतीयस्त्वनभ्युपगमनिरस्त इत्याह वैयासिकं त्विति । अनुवर्तमाना आचक्षत इत्यनुषङ्गः । ननु विवर्तत्वे वेदान्तानां यादृच्छिकत्वापातान्न क्रमनियमः स्यादत आह यथा हीति । सर्वज्ञस्य सर्वशक्तेर्ब्रह्मणो नोपाध्यायवत् क्रमानुरोधो युक्त इति । तत्राह यथात्रेति । ७४ । २०

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तदर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतो ऽपराधात्‡ ॥

इति श्रूयते ।

---

* अत्रेति नास्ति २ पु । † कालरचिते इति २ पु॰ ।

‡ पाणिनीयशिक्षायाम् ।

चतुर्थे निराकरोति **न चैकस्येति** । सर्वदा संप्रदाया*विच्छेदमिच्छद्भिरपि संप्रदायप्रवर्तकेष्वाश्वास आस्थेयः स वरमेकस्मिन्नेव ब्रह्मण्यवगतसार्वज्ञ्ये कृत इति भावः । ननु न वयमीश्वरं पश्यामः कथं तत्कर्तृके
७५ । ५ वेदे विश्वासस्तत्राह **सर्गादिभुवामिति** ।

वेदान्ता ब्रह्मणि प्रमाणं न वेति सिद्धवस्तुबोधात्फलभावाभावाभ्यां सिद्धं रूपादिहीनं वस्तु बोधयतो वाक्यस्य मानान्तरसापेक्षत्वाऽनपेक्षत्वाभ्यां वा संशये पूर्वाधिकरणद्वितीयवर्णकेनाक्षेपिकीं सङ्गतिम् उक्त्वा पूर्वपक्षभाष्यं व्याचष्टे **किमाक्षेपइत्यादिना** । कथमिति थमुप्रत्ययान्तः किंशब्द आक्षेपे । जैमिनिसूत्रोपन्यासो न व्युत्थितसिद्धान्तिविश्रम्भायापि तु दृढपूर्वपक्षनिरासार्थं सिद्धान्तावश्यारम्भायेत्याह **पारमर्षेति** । अभिधेयाभावो ऽनुभवविरोधान्न युक्तो वक्तुमित्याह **आनर्थक्यं चेति** । भाष्ये पौनरुक्त्यमाशङ्क्य संग्रहविवरणत्वमाह **अत इत्यादीति** । **वान्तमिति** । उपासनादिक्रियान्तरविधानार्थत्वं वेत्येतदन्तमित्यर्थः । ननु किमिति वेदान्तानामर्थवादवद्विधिपदैकवाक्यता मन्त्रवत्पार्थगर्थ्यमस्त्वित्याशङ्क्य तर्हि तद्वद्विधिभिर्वाक्यैकवाक्यता स्यादित्याह भाष्यकारो मन्त्राणां चेति ।

इषे त्वेत्यत्र छिनद्मी†त्यध्याहराच्छाखाच्छेदः‡ क्रिया भाति क्व चित्त्वा§ऽग्निर्मूर्द्धेत्यादौ तत्साधनं देवतादीति । मन्त्राश्च श्रुत्यादिभिः क्रतौ विनियुक्ताः । ते किमुच्चारणमात्रेणादृष्टं कुर्वन्तः क्रतावुपकुर्वन्त्युत दृष्टेनैवार्थप्रकाशनेनेति संदेहः । तत्र न तावद् दृष्टार्थत्वमेव मन्त्राणां शक्यं वक्तुमुपायान्तरेणापि मन्त्रार्थस्य स्वाध्यायकालावगतस्य चिन्तादिना प्रयोगसमये स्मृतिसम्भवात्तावन्मात्रार्थत्वे मन्त्राणां नित्यवदाम्नानवैयर्थ्यात् । अथ तु मन्त्रैरेवा॥र्थप्रत्यायननियमाददृष्टं कल्प्येत तदुच्चारणादेव कल्प्यतां तस्य पुंव्यापारगोचरत्वात्स्वव्यापारे च पुरुषस्य नियोगात्तत्र च फलाकाङ्क्षणादिति प्रापय्य प्रमाणलक्षणे राद्धान्तितम् ।

---

* सर्वसंप्रदायेति १ पु· । सर्वथासंप्रदायेति २ पु· पाठः ।

† शाखां छिनत्तीति १ पु· पाठः । ३ पु· तै· पु· च एवमेवासीत्परमुपरितनः पाठस्तत्र शोधितः । ‡ शाखाभेद इति १ पु· पा· ।

§ क्व चित् क्व चिच्चेति २ पु· पा· । ॥ ऋष्यनुमन्त्रैरेवेति पाठः २ पु·

यस्य दृष्टं न लभ्येत तस्यादृष्टप्रकल्पना ।
लभ्यते ऽर्थस्मृतिर्दृष्टा मन्त्रोच्चारणतस्त्विह ॥
अर्थस्मृतिः प्रयोगार्था प्रयोगाच्च फलोदयः ।
इति दृष्टार्थसंपत्तौ नादृष्टमिह कल्प्यते ॥

यस्तु मन्त्रैरेव स्मर्तव्यमिति नियमस्तस्य न किं चिद्दृष्टमस्तीत्यदृष्टं कल्प्यते । तस्माद्दृष्टादृष्टार्था मन्त्रा* इति । **उत्पत्तिविधेरिति** । अधिका १६ । ११
रविधितः प्रवृत्तिलाभादुत्पत्तिविधिरज्ञातकर्मस्वरूपबोधपर इत्यर्थः । **अनागतेति** । भावो भावना तद्विषयः सर्वो विधिः । यतः स उत्पाद्य उत्पाद्यत्वे हेतुरनागतत्वम् । अधिकारः फलसम्बन्धबोधनम् । विनियोगो ऽत्र क्रियायाः फलशेषत्वज्ञापनम् । प्रयोगो ऽनुष्ठापनम् । कर्मस्वरूपज्ञानमुत्पत्तिः । फलसम्बन्धः क्रियाया न शेषत्वमन्तरेण तच्च नानुष्ठानं विना अनुष्ठानं च नाज्ञाते इत्यविनाभावः । सिद्धं चेत्पुंव्यापारानपेक्षं फलमारभेत सदा ऽऽरभेतेति नाधिकारादिसंभव इत्यर्थः । सर्वेषामविनाभावे सर्वत्र चातूरूप्यमस्तीति कथमवान्तरभेदस्तत्राह **तद्वाक्यानां त्विति** । उपसंहरति† **यथेति** । सर्वविधिषूत्पत्त्यादयः प्रतीयन्ते अग्निहोत्रं जुहुयादित्यत्राप्यग्निहोत्रेणेष्टं भावयेदित्यर्थो न त्वग्निहोत्रस्य भाव्यत्वमफलत्वात् । न चाग्निहोत्रस्वरूपसत्ता बोध्या अभूद्भवति भविष्यतीत्यापत्तौ विध्युत्खातापातात् । तस्मादधिकारविधितः प्राग्विनियोगाद्यनुवादेनोत्पत्तिविधिः स्वरूपपरो भवति । ब्रह्मणि तु भावनाभावादनुवाद्यस्यापि विनियोगादेरभावान्नोत्पत्तिविधिरित्याह **तस्मादिति** । विधिपरत्वे वेदान्तानां न केवलमनुवादत्वाभावो ऽपि तु विपरीतार्थत्वं च न स्यात् पक्षान्तरे तु स्यादित्याह **एवं चेति** । **यादृशमिति** । जीवाद्भिन्नमित्यर्थः । जीवे ब्रह्मदृष्ट्यारोपान्न भेदग्राहिप्रमाणविरोध इत्यर्थः । **तदिति** । सूत्रपदोक्तां सिद्धान्तपक्षप्रतिज्ञाम् इत्यर्थः‡ ॥

तत्तु समन्वयात् ॥ ४ ॥ ११ । ४

सम्यगन्वय इति । तात्पर्यं सम्यक्त्वम् । ननु शास्त्रयोनित्वद्वितीयवर्णकाक्षेपसमाधानरूपमिदमधिकरणं तत्र च यतो वेति वाक्यमुदाहृ-

* दृष्टार्था मन्त्रा इति २–३ पु० पा० । † उदाहरतीति ५ पु० पा० ।
‡ अत्र तृतीयं शास्त्रयोनित्वाधिकरणं समाप्तम् । तत्र **शास्त्रयोनित्वात्** ३ इत्येकं सूत्रम् ।

तमिह किमिति तदुपेक्षितमत आह यतो वेति । तद् ब्रह्म सर्वज्ञमि-त्यादिभाष्ये यत इत्यादिवाक्यप्रमेयकीर्त्तनात्तत् प्रमाणं बुद्धिस्थं भवतीति नोदाहृतमित्यर्थः । वेदान्तानां ब्रह्मात्मैकत्वे उपक्रमोपसंहारैक्यं तात्पर्य-

१७ । १३ लिङ्गं सदृष्टान्तमाह येनेति ।

भेदलक्षणे चिन्तितम्*—पौर्णमासीवदुपांशुयाजः स्यात्† । जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ उपांशुयाजमन्तरा यजति विष्णुरुपांशु यष्टव्यो ऽजामित्वाय प्रजापतिरुपांशु यष्टव्यो ऽजामि-त्वायाग्नीषोमावुपांशु यष्टव्यावजामित्वायेति श्रूयते । तत्रोपांशुयाजम-न्तरा यजतीति किं समुदायानुवाद उतापूर्वयागविधिरिति विशये यथा ऽऽग्नेयादियागानां य एवं विद्वान् पौर्णमासीं यजते य एवं विद्वानमा-वास्यां यजतइति समुदायानुवादौ । एवमिदमपि विष्ण्वादिवाक्यविहित-यागानां समुदायानुवादः । तत्र हि विष्ण्वाद्या देवताः श्रूयन्ते । सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायामाज्यमिति ध्रौवाज्यद्रव्यसिद्धिः । तव्यप्र-त्ययाश्च विधायकाः श्रूयन्ते । न त्वन्तरावाक्ये ऽस्ति द्रव्यदैवतं रूपम् यजतीति च वर्तमानापदेशः । तदुक्तम् ।

> यागान् विष्ण्वादिसंयुक्तान् विहितान् रूपवत्तया ।
> अरूपमन्तरावाक्यमगत्यैवावलम्बते ॥

१ । १५ इति पूर्वपक्षः । एतदधिकरणसिद्धान्तमाह अनूचोरिति । निरन्त-रयोराग्नेयाग्नीषोमीययोः पुरोडाशयोः करणे आलस्यं स्यादिति दोषं सङ्कीर्त्य तदपनयनार्थं‡मुपांशुयाजमाज्यद्रव्यकं विधायानन्तरमजामित्वायेति तद्वि-धानलब्धं जामितादोषसमाधानमुपसंहरति । अतः सार्थवादोपक्रमोपसंहा-रैकरूप्याद् एकमिदं वाक्यम् एकवाक्यता चोपांशुयाजविधौ लभ्यते नेतर-त्रानेकयागविधाविति । ननु तव्य§विहितयागानां समुदायानुवादो ऽयमिति तत्राह अपूर्वेति । तथाहि । यष्टव्य इति कर्मप्राधान्यं विष्ण्वादिवाक्ये

---

* स्थितमिति २ पु॰ पा॰ । † जै॰ सू॰ अ॰ २ पा॰ २ सू॰ ६ ।
‡ तदपनयार्थमिति २ पु॰ पा । § तव्यप्रत्ययेति २ पु॰ पा॰ ।

प्रतीयते यागस्तूपसर्जनम् । तच्च कर्मत्वमप्रधानीकृत्य यागप्राधान्यं लक्षणीयं कर्मतया च देवतात्वं ततो गुरुतरा कल्पना । अन्तरावाक्ये तु श्रुतं यागप्राधान्यं विधिश्च पञ्चमलकाररूपः । यत्तु रूपाभाव इति तन्न । ध्रौवाज्यलाभात् । आग्नेयादीन्यागान् क्रमेणाम्नाय मन्त्रकाण्डे तत्क्रमेणैव याज्यानुवाक्या आम्नातास्तत्रोपांशुयाजस्थाने वैष्णवप्राजापत्याग्नीषोमीयास्तिस्रः ऋचः* पठ्यन्ते ।ताभिस्तुल्यार्थत्वेन विकल्पमानाभिर्विष्णवादिदेवतानां समर्पितत्वात् । तस्मादपूर्वं उपांशुयाजो विधेयः । विष्णवादिवाक्यानि त्वर्थवादाः । इत्थं महीयानुपांशुयाजो यदस्मिन्विष्णवादयो यष्टव्या इति ।
एवं वाक्यान्तराणामिति । ऐतरेयके आत्मा वा इदमेक एवेत्युपक्रम्य ७१ । १९
स एतमेव पुरुषं ब्रह्म ततमपश्यदिति तमेव ब्रह्मात्मानमभिधाय समाप्तौ प्रज्ञानं ब्रह्मेत्युपसंहृतम् । वाजसनेयके ऽप्यहं ब्रह्मास्मीत्युपक्रम्यायमात्मा ब्रह्मेत्युपसंहृतम् । आथर्वणे कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति सर्वात्मकं ब्रह्मोपक्रम्य ब्रह्मैवेदममृतं पुरस्तादिति तदेव निगमितम् । वेदान्ता यदि सिद्धवस्तुपरास्तर्हि मानान्तरसापेक्षाः स्युः पुंवाक्यवदिति पूर्ववाद्यभिमतस्य प्रसङ्गे हेतोः पौरुषेयत्वेन सोपाधिकत्वं भाष्यगतापिशब्देन द्योत्यतइत्याह **अयमभिसन्धिरिति** । तस्यैवानैकान्तिकत्वमाह **प्रत्यक्षादीनामपीति** । वाक्यस्य सतः सिद्धवस्तुपरत्वे पौरुषेयत्वापत्तिरिति साधनव्याप्तिमुपाधेः शङ्कते **यद्युच्येतेति** । वाक्यत्वादि लिङ्गं यस्य स तथा । कार्यपरतायां हि वेदान्तानां न वाक्यत्वादिना सापेक्षत्वमनुमेयं पौरुषेयत्वस्योपाधित्वादेवं न च साधनव्याप्तिरित्याह **कार्यार्थत्वइति** । तत्त्वेन याथात्म्येनाकार्ये मानान्तरायोग्यत्वस्यासिद्धत्वात्तत्परत्वे ऽपि वेदान्तानां पौरुषेयत्वं सम्भवतीति समा साधनव्याप्तिः ततश्च दुरपवादं वाक्यत्वादिलिङ्गकं पौरुषेयत्वमित्याशयेनाह **अत्र ब्रूम इत्यादिना**† । **किं पुनरिति** । कृतियोग्यस्य कार्यत्वे भावार्थस्यापि तत्त्वेन मानान्तरयोग्यत्वमित्यर्थः । तर्ह्यलौकिकं कार्यमिति शङ्कते **अपूर्वमिति** । तर्हि मानान्तरा- ७८ । २१
ऽनवगते सङ्गतिग्रहाऽयोगाल्लिङादीनामबोधकत्वापात इत्याह **हन्तेति** ।

---

* ऋच इति नास्ति २ पु० ।

† ब्रूम इतीति २ पु० पा० ।

ननु यजेतेति श्रुतेः कार्यता भात्यतो ऽपूर्वसिद्धिरिति तत्राह **लोकानु-
सारत इति** । स्वर्गकामपदसमभिव्याहारसञ्जातकार्यतर्कानुगृहीतवेदादेव क्रि-
१९ । १ याविलक्षणापूर्वे लिङादीनां संबन्धग्रह इति शङ्कते **स्वर्गकाम इति** । अयं
तर्को ऽतिप्रसङ्गीत्याह **चैत्येति*** । कर्तृस्मरणात् स्पष्टदृष्टपौरुषेयत्वेन बुद्धा-
देव च सामकार्यार्थत्वे वेदानामपि पौरुषेयत्वस्य वाक्यत्वादिना ऽनुमित-
त्वादकार्यार्थत्वं समानमित्यर्थः । स्मर्यमाणकर्तृकत्वेन वाक्यत्वादि सोपा-
धिकमित्याशङ्क्य सिद्धार्थवेदान्तेष्वपि तत्सममतः† कार्यार्थत्वमनपेक्षता-
यामप्रयोजकमित्याह **अन्यतस्त्विति** । वर्तमानसंप्रयोगजप्रत्यक्षस्य कार्य-
रूपधर्मगोचरत्वानुपपत्तेर्योगसामर्थ्यस्यापीन्द्रियविषयेष्वेवातिशयकारित्वान्न
धर्मस्य प्रत्यक्षता लिङ्गाद्यभावाच्च नानुमेयत्वादि । न चाज्ञाते पुंसां वचन-
रचना सम्भविनीति वैदिकी रचना न पौरुषेयीति न्यायकणिकायां व्युत्पा-
दितम् । नन्वपौरुषेयतया ऽनपेक्षत्वे ऽप्यग्निर्हिमस्य भेषजमितिवन्माना-
न्तरगृहीतग्राहित्वमित्याशङ्क्य तत्त्वमसीति ब्रह्मात्मभावस्येति भाष्यशेषेण
,, । १३ परिहृतमित्याह **न चानधिगतेति** । सर्वस्मिन्नुपपादितेऽर्थे भाष्यं संवाद-
यति **तदिदमिति** । सिद्धार्थत्वे सत्यपुरुषार्थनिष्ठत्वं स्यादिति द्वितीय‡
पूर्वपक्षबीजम् । सर्वक्लेशप्रहाणादिति भाष्यस्यप्रशब्दार्थमाह **सोऽयम-
स्येति** । बाह्यानुष्ठानाऽनपेक्षमज्ञाननिवृत्त्यानन्दाविर्भावफलमन्वयव्यतिरेकनि-
दर्शनयुगलद्वयप्रदर्शनपुरःसरं ब्रह्मज्ञानस्य दर्शयति **एतदुक्तमित्यादिना** ।
ग्रैवेयकं ग्रीवालङ्कारः । **समूलघातमिति** । कषादित्वादनुप्रयोगः§ ।
सह मूलेनोपहन्तीत्यर्थः । **समारोपितनिबन्धन इति** । समारोपिता-
ऽविद्या निबन्धनं यस्य जीवभावस्य स तथोक्तः । आत्मानमेव लोकं चैत
न्यम् । देवता सगुणं ब्रह्म । आदिशब्दात् प्राणविशुद्ध्यादि गृह्यते । उपा-
। । २१ सनावाक्यैकदेशमुपास्यसमर्थकं विविनक्ति **आत्मेतीति** । यदवादि पूर्व-
पक्षिणा न क्वचिदपि वेदवाक्यानां विधिमन्तरेणार्थवत्तेति तत्र किं यदि
वेदान्ता विधिमन्तरेण प्रमाणं तर्ह्यर्थवादाः किं न स्युरिति प्रतिबन्दी मता ऽथ
वा वेदवाक्यस्य सिद्धपरस्यान्यत्रा ऽदर्शनाद्व्याप्त्यभावेन न वेदान्तानां सिद्धवस्तु-

---

* हन्त चैत्येति २ पु. ।
† समानमत इति २ पु. पा. ।
‡ द्वितीयमिति नास्ति १ पु. ।
§ कषादित्वाणमुल्प्रयोग इति २ पु. पा. ।

परत्वमिति । आद्यमर्थवादाधिकरणपूर्वपक्षं संगृह्णन्नाशङ्कते **स्यादेतादि-** ८१ । ४
त्यादिना । रुदतो यदश्रु अशीर्यत तद्रजतमभवत्तस्माद्रजतमदक्षिण्य-
मिति निन्दा । बर्हिषि बर्हिःसाध्ये यागे रजतं न देयमिति निषेधशेष
इति सिद्धान्तं दर्शयन्नर्थवादानां नोपेक्षाफलत्वमिति तावदाह **स्वाध्या-**
येति । प्रयोजनपर्यवसायिबोधजनकत्वतदभावाभ्यां विशेषं दर्शयन् प्रति-
बन्दीं परिहरति **न च वेदान्तेभ्य इति ।** ननु निषेध एव स्वनिषेध-
स्यानर्थहेतुत्वान्यथानुपपत्त्या निन्दां कल्पयिष्यति नेत्याह **तद्यदीति ।**
अर्थवादादेव निन्दालाभे निषेधकस्य निषेधे निन्दायां च तात्पर्यं न कल्प्य-
मित्यर्थः ननु सो ऽरोदीदिति वाक्ये निन्दा न भाति किं तु भूतानुवाद
इत्याशङ्क्य मुख्यार्थे प्रयोजनाभावान्निन्दा लक्ष्यतइत्याह **लक्ष्यमाणेति ।**
द्वितीयमुद्भाव्य निषेधति **ननु विध्यसंस्पर्शिन इत्यादिना ।** तच्च स्वत ,, । २३
इत्युपपादितं न्यायकणिकायामित्यर्थः । ननु प्रमायाः कार्येण प्रमाणानां
तज्जनकत्वमनुमेयं कथं नानुमानगम्यमिति भाष्यमित्याशङ्क्याह **यद्य-**
पीति । कार्यार्थापत्त्यपरपर्यायानुमानेन मानान्तरेण वा प्रमा नोत्पद्यते
किं तूदितायां तस्यामनुमानं प्रवर्त्ततइत्यर्थः । प्रमाणान्तरं तावदपेक्ष्यमाणं
न दृश्यते । एतदर्थापत्त्यपेक्षणे दूषणमाह **नापीति ।** अपेक्ष्यतइत्यनुषङ्गः ।
उत्पन्नायां प्रमायां प्रमाणानां प्रमाजनकत्वस्यानुमानं ततश्च प्रमोत्पत्तिरिति
परस्पराश्रयप्रसङ्गः । शास्त्रप्रामाण्यमनुमानगम्यत्वेन न भवतीति च भाष्यार्थो
न पुनरनुमानेन ज्ञेयमिति । कार्यविरहिवेदान्तेभ्यः प्रमा यद्युत्पद्यते तदा
स्वतः परतो वेति चिन्ता न तूत्पद्यतइत्यत आह **ईदृगिति ।** सिद्धे
ब्रह्मणि वेदान्तेभ्यः प्रमोत्पत्तिरनुभवसिद्धेत्यर्थः । यद्यनुभवसिद्धा ऽप्यन्यत्र
सिद्धार्थार्थवादादावदर्शनादपह्नूयेत तदा ऽतिप्रसङ्ग इत्याह **अन्यथेति ।** ८२ । ७
एवं तावत्सिद्धेर्थे ऽपि प्रमाणान्तरपरतन्त्राणां पौरुषेयवाक्यानामङ्गीकृत्य
प्रामाण्यं वेदान्तेषु क्रियाविषयतामन्तरेण नैरपेक्ष्यपुरुषार्थपर्यवसाने न लभ्येते
इति मतं ब्रह्मात्मैक्यस्य प्रमाणान्तरागम्यत्वेन तदवगममात्रायत्तप्रयोजन-
लाभेन च पराणुदत्* । इदानीं कार्यान्वितएवार्थे पदसङ्गतिग्रहेण सिद्धं

---

* परास्तमिति ३ पु· पा· ।

वस्तु न शब्दप्रमेय*मिति वेदान्तानुपासननियोगपरान् ये मन्यते तन्मतेन
८२ । ११ पूर्वपक्षमाह **अज्ञातेति** । अथ वा ऽऽरोपितब्रह्मभावस्य जीवस्योपास्तिपरा
वेदान्ता न ब्रह्मात्मत्वे प्रमाणमिति पूर्वः पक्षः† ।

अयं तु सन्तु वेदान्ता मानं ब्रह्मात्मवस्तुनि ।
किं तु ज्ञानविधिद्वारेत्येष भेदः प्रतीयताम् ॥

अत एव भाष्यं यद्यपि शास्त्रप्रमाणकं ब्रह्मेति । अतः कार्यविषया-
द्वाक्याद् ब्रह्मनिश्चय इति प्रतिज्ञासामर्थ्यादेव न सिद्धार्थादिति लभ्यते ।
तत्र हेतुः सिद्धे वस्तुन्यज्ञातसङ्गतित्वेति । यत्र वृद्धप्रयुक्तशब्दविषयत्वं तत्र
सङ्गतिः शब्दस्य गृह्यते सिद्धे तु तद्भावर्तमानं स्वव्याप्यं सङ्गतिग्रहं व्यावर्त्त-
,, । १४ यतीत्यभिप्रेत्याह **यत्र हीति । लोकेनेति ।** वृद्धैः प्रयोगव्यापकवक्तृवि-
वक्षाश्रोतृप्रतिपत्तीच्छयोरभावात्सिद्धे प्रयोगाभावमाह **न चेति । रूपमात्रं**
वस्तुमात्रम् । सर्वपदानां कार्यार्थत्वे सति पर्यायत्वमाशङ्क्याह **तत्र किं चि-
दिति । कार्यार्थः** कार्यशेषः । अत्र प्रयोगः । गोपदं न कार्यानन्विते गोत्वे
गृहीतसम्बन्धं तत्र वृद्धैरप्रयुक्तत्वात् तुरगपदवत् । एवं सर्वत्र सिद्धे वस्तु-
न्युत्तमवृद्धस्य शब्दप्रयोगाभावमुक्त्वा मध्यमवृद्धप्रवृत्तेर्व्युत्पत्तिलिङ्गभूतायास्त-
त्राभावाच्च तत्र न व्युत्पत्तिरित्याह **अपि चेति** । शास्त्रत्वेनेत्यादिहेतून्
व्याचष्टे **अपि चेत्यादिना । न च रज्जुरिति** । नकारो ऽयं सांसारिक-
धर्माणां न च निवृत्तिरिति उपरि सम्बन्धनीयः । **यथाकथं चिदिति ।**
सिद्धपदार्थसंसर्गस्य नियोगाविनाभावादिहापि मा भैषीरिति नियोगं कल्प-
यित्वा ऽन्यपरादेव वाक्यात्सिद्धरूपार्थनिश्चय इत्यर्थः । **किं त्विति**‡ ।
आत्मप्रतिपत्तिर्विषयो ऽवच्छेदको यस्य तत्तथा । ननु नियोगो ऽपूर्वमिति
प्राभाकरैर्वाक्यार्थो वर्ण्यते स किमन्य एव कार्यो नेत्याह **तच्चेति** । कार्यप-
रेभ्यो वेदान्तेभ्यः कथं वस्तुसिद्धिरित्याशङ्क्य विध्याक्षेपलक्षणोपादानप्रमाणा-
,, । १८ दित्याह **न चेति** । स्वप्रतीत्युपाधित्वेन विषयस्य स्वनिर्वर्त्तकत्वेन कर-
णस्य । कार्यं स्वावच्छेदकज्ञाननिरूपणाय ज्ञायमानमात्मानमपेक्षते चेत्तर्हि

---

* शब्दमेयमिति २-३ पु० पा० ।
† पूर्वत्र पूर्वः पक्ष इति १ पु० । पूर्वपक्ष इत्येव ३ पु० ।
‡ इदं १-३-४-पुस्तकेषु न दृश्यते ।

न श्रौतत्वमात्मन इत्याशङ्क्य विध्याक्षिप्तस्य श्रौतत्वे गुरुसंमतिमाह **यथा** ८३ । २३
ऽऽहुरिति । तत्सिद्ध्यर्थं विधेयसिद्ध्यर्थम्*। **उपादीयते** इत्यस्य व्याख्यानम् **आक्षिप्यते** इति । ज्ञानस्य प्रमात्वात्प्रत्यक्षवन्न विधेयता आत्मनश्च नित्यत्वात्तदयोग इत्याशङ्क्याह **विधेयता चेति ।** ज्ञानमिहोपासनं तच्च क्रियेत्यनुष्ठेयम्। आत्मनस्तु स्वरूपसत्ताविनिश्चितिरज्ञातज्ञप्तिर्विधेयतेति न विरोध इत्यर्थः । ननु वाग्धेनूपास्त्यादाविवारोप्यस्य विधेयधीविषयत्वं किं न स्यादत आह **आरोपितेति ।** ब्रह्मास्मीति ज्ञाने यादृगर्थो भाति तद्भाव आरोपितो यस्य स तथा । तस्यान्यस्य ज्ञाननिरूपकत्वे तेन प्रतिभासमात्रार्थेन तज् ज्ञानं निरूपितं न स्यात् । न च सत्यां गतौ युक्त आरोप इति । इयं च प्रतिपत्तिविधिविषयतयेति भाष्यस्य व्याख्या । प्रतिपत्तिविधेर्नियोगस्य विषयभूतप्रतिपत्तिं प्रत्यवच्छेदकत्वेन विषयतयेति भाष्यार्थः ।

एवमाहवनीयादयो ऽपीति । यदाहवनीये जुहोतीति विहिते ८४ । १०
क आहवनीय इति वीक्षायां वसन्ते ब्राह्मणो ऽग्नीनादधीतेत्यादिविधिभिः संस्कारविशिष्टो ऽग्निराहवनीयो गम्यते तथा ऽपूर्वदेवतास्वर्गादिकं विधिपरेणैव शास्त्रेण समर्प्यते । श्लोकोक्तहेतुद्वयं भाष्येण सङ्गमयति **प्रवृत्तिनिवृत्तिपरस्येति ।** तद्भूतानां†मिति सूत्रोदाहरणेन कार्यान्विते ऽर्थे शब्दसङ्गतिर्न सिद्ध इत्युक्तम् । आम्नायस्य‡त्येतद्विहायेतरवाक्यैः प्रवृत्त्यादिपरस्य शास्त्रत्वमुक्तम्§ । तेन तु सिद्धरूपपरस्य न शास्त्रत्वमुक्तम्|| । तस्य वेदस्य कर्मावबोधो नियोगज्ञानं दृष्टं प्रयोजनं चोदनासूत्रेण¶ चोदनेति शब्देन क्रियाया नियोगस्यानुष्ठापकं वचनमाहुरिति । तत्तेषु पदार्थेषु भूतानां वर्तमानानां** क्रिया कार्ये तदर्थत्वेन समाम्नायः समुच्चारणमित्यर्थः । **न चेति**†† । नियोगस्य स्वकीयत्वेन बोद्धारं **नियोज्यम् अधिकारिणं** कर्मणि स्वामिनं तत्रैव
कर्त्तारम् **अनुष्ठातारम्** इति । नियोज्यभेदो नियोज्यविशेषः । अमृत- ,, । १५

---

* विधिप्रसिद्ध्यर्थमिति २ पु० । † जै० सू० अ० १ पा० १ सू० २५ ।
‡ जै० सू० अ० १ पा० २ सू० १ । § शास्त्रत्वमित्युक्तमिति २–३पु० पा० ।
|| शास्त्रत्वमित्युक्तमित्यत्रापि पूर्ववत् पाठः २–३ पु० ।
¶ जै० सू० अ० १ पा० १ सू० २ । ** वर्तमानार्थानामिति २ पु० पा० ।
†† न चेति १–३ पुस्तकयोर्न दृश्यते ।

स्वकाम इति अश्रवणान्नियोज्यासिद्धिमाशङ्क्याह **ब्रह्म वेदेति** । भवतीति सिद्धरूपेणावगतस्य फलस्य साध्यत्वाभिव्यक्त्यर्थमेवंकामशब्दवाच्यनियोज्यविशेषाकाङ्क्षायां विपरिणामेन ब्रह्म बुभूषुर्विद्यादिति वाक्यार्थः स्यादित्यर्थः ।

८४ । १८ **रात्रिसत्रेति** । चतुर्थे चिन्तितम्—क्रतौ फलार्थवादमङ्गवत्कार्ष्णाजिनिः* । प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्तीति श्रूयते । तत्र रात्रिशब्देनाऽऽयुर्ज्योतिरित्यादिवाक्यविहिताः सोमयागविशेषा उच्यन्ते । किमत्र स्वर्ग एवाधिकारिविशेषणमुत प्रतिष्ठेति संशयः । तत्रैवंकाम इत्यश्रवणाद्विधिशक्तिलभ्यः स्वर्ग एव विशेषणं संदेहे हि वाक्यशेषस्वीकारो न निश्चये । निश्चितश्चेह सर्वाभिलषितः स्वर्गो विधिसामर्थ्यान्नियोज्यविशेषणम् । या तु प्रतिष्ठाविषया श्रुतिः सा ऽपि लक्षणया स्वर्गपरैव कल्प्यतइति प्राप्तं क्रतौ रात्रिसत्रादौ न प्रतिष्ठादि विवक्षितमित्येतावन्मात्रेणाङ्गवदिति सूत्रे प्रयाजाद्यङ्गफलार्थवादोदाहरणं न तु तद्वत् पदार्थत्वमस्ति रात्रिसत्राणाम् । एवं प्राप्ते उच्यते । फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यात्† । प्रतिष्ठाफलस्य निर्देशात्तदेवाधिकारिविशेषणम् । यत्तु विधिशक्त्या स्वर्ग इति । तन्न । मुख्यार्थश्रुतिपदानुगुण्येन विधिशक्तौ पर्यवसितायामानुमानिकस्वर्गकल्पनानवकाशात् । तस्माद्वाक्यशेषस्थमेव फलमिति‡ ।

,, । २० **असमवेतार्थतयेति** । अश्रूयमाणत्वेन ब्रह्मभवनशब्देनासमवेतः स्वर्गो ऽर्थस्तत्परतयेत्यर्थः । यद्यपि ब्रह्मभवनस्य फलत्वे ऽप्येवङ्काम इति लक्षणा ऽऽस्तीति परोक्षवृत्तिता तुल्या तथापि श्रुतं ब्रह्मभवनं न हीयते हीयते तु पूर्वपक्षे । तदिदमुक्तम् **अत्यन्तेति** ।

पिण्डपितृयज्ञन्यायो ऽनुक्रम्यते । चतुर्थ एव निरणायि—पितृयज्ञः स्वकालत्वादनङ्गं स्यात्§ । अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीत्यत्रानारभ्याधीतवाक्ये श्रुतः पिण्डपितृयज्ञः क्रत्वर्थः पुरुषार्थो वेति संशये कर्मवाच्यमावास्याशब्दसमभिव्याहारात्तदङ्गत्वम् । यद्यपि कालस्यापि साधा-

---

* जै० सू० अ० ४ पा० ३ सू० १७ । † जै० सू० अ० ४ पा० ३ सू० १८ ।

‡ विश्वजिन्न्यायेनेति वक्तव्ये विश्वजिति नैमित्तिकाधिकारे फलकल्पना कृत्वा चिन्तयेति पिण्डपितृयज्ञः स्थिरोदाहरणत्वेनोदाहृतः-इति २-तै० पुस्तकयोरधिको ग्रन्थः **पिण्डपितृयज्ञन्यायेनेत्यादि** भामतीग्रन्थव्याख्यारूपः । भा० पृ० ८४ प० १६ ।

§ जै० सू० अ० ४ पा० ४ सू० १६ ।

रणो ऽयं शब्दस्तथापि फलकल्पनापरिहाराय कर्मवाच्येव । अतः क्रत्वर्थ इति प्राप्ते सिद्धान्तः । कालकर्मसाधारणो ऽप्यमावास्याशब्दो ऽपराह्णशब्दसमानाधिकृत इह कालपर एव । न च साधारण्यम् । काले रूढत्वात्कर्मणि च तत्सम्बन्धेन लाक्षणिकत्वात् । तस्मात्कर्मसमभिव्याहाराभावाद्विश्वजिन्न्यायेन* स्वर्गकामनियोज्यकल्पनया स्वर्गफलः पिण्डपितृयज्ञ इति ।

ननु ज्ञानविधिर्यदि ब्रह्मभावफलः† कथं तर्हि भाष्ये ऽमृतत्वकाम-
स्येत्युक्तं तत्राह **ब्रह्मभावश्चेति** । अमृतत्वशब्देन‡ ब्रह्मभावनिर्दिष्टस्य ८४ । २१
प्रयोजनमाह **अमृतत्वं चेति** । अत्र भाष्यकारेण ब्रह्मज्ञानं विधेयमिति निर्देशाद् द्रष्टव्य इति विध्युदाहृतेश्च प्रमाणज्ञानविध्यङ्गीकारेण पूर्वपक्ष इति भ्रमः स्यात् तन्निवर्तयति **अत्र चेत्यादिना** । **दृशेरिति** । द्रष्टव्य इति वाक्योपात्तदृशिधातोरुपलब्धिवचनत्वेनोपासनाऽनभिधायकत्वादित्यर्थः । स्वाध्यायविधेरर्थावबोधपर्यन्तत्वात्तेनैव श्रवणजन्यज्ञानस्य प्रापितत्वादित्यर्थः । भावनया ऽऽधेयं जन्यं वैशद्यं यस्य तत्प्रत्यक्षं तथा ।

वाजिनवदिति । यथा ऽऽमिक्षार्थविहितदध्यानयनाद्वाजिनमप्रयोज- ८५ । ६
कमानुषङ्गिकतया जायते एवमदृष्टरूपामृतत्वाय विहितादुपासनात्साक्षात्कारो नान्तरीयकतया जायत इति तदुत्पादनं न विधेयमित्यर्थः ।

चतुर्थे स्थितम्—एकनिष्पत्तेः सर्वं समं स्यात्§ । तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति श्रूयते । तत्र संशयः‖ । किमामिक्षैव दध्यानयनं प्रयुङ्क्तेऽतोत वाजिनमपीति । तत्रैकस्माद्दध्यानयनात्पयसः सकाशादामिक्षावाजिनयोर्निष्पत्तेः सर्वमामिक्षादि प्रयोजकं स्यादिति प्राप्ते सिद्धान्तः । संसर्गरसनिष्पत्तेरामिक्षा वा प्रधानं स्यात्¶ । अत्र हि दधिसंसृष्टं पय एव प्रकृतं देवतासंबन्धि निर्दिश्यते सा वैश्वदेवीति । न पुनस्ततो निष्पन्नं किं चित्तत्र नयतेर्द्विकर्मकत्वाद्यत्प्रति दध्यानीयते तत्पय आनयनस्य संस्कार्यम्** । संस्कार्यमेव प्रयोजकम् । संस्कृतस्य च पयस

* जै॰ सू॰ अ॰ ४ पा॰ ३ सू॰ १५ ।

† ज्ञानविधेर्यदि ब्रह्मभावः फलमिति २ पु॰ पा॰ ।

‡ अमृतशब्देनेति २ पु॰ पा॰ ।

§ जै॰ सू॰ अ॰ ४ पा॰ १ सू॰ २२ ।

‖ संदेह इति २-तै॰ पु॰ पा॰ ।

¶ जै॰ सू॰ अ॰ ४ पा॰ १ सू॰ २३ ।

** संस्कार्यमिति २ पु॰ नास्ति ।

आमिक्षात्वात् तस्याश्च स्त्रीत्वात्स्त्रीलिङ्गमविरुद्धम् । ननु यदि दधिसंस्कृतं पय एव रूपभेदे ऽप्यामिक्षा भूत्वा दध्यानयनं प्रयुञ्जीत तर्हि वाजिनमपि दधिसंयुक्तं पय एवेति किं न प्रयुञ्जीत । नेत्युच्यते । संसर्गरसनिष्पत्तेः । दधिसंसृष्टस्य पयसो यो रसः तस्यामिक्षायामुपलम्भाद्रूपभेदे ऽपि तस्यामस्ति संसृष्टं पय इति अनुमीयते । रूपाभेदे ऽपि तक्रपयसोरिव रसभेदोपलम्भाद् न वाजिने तस्य कटुतिक्तरसत्वादिति हेतुद्वयविवरणेन पूर्वकृतेनोत्तर-
८५ । १० ग्रन्थस्य व्याख्यातत्वमाह **अर्थवत्तयेति** ।

वेदान्ता यद्युपासां विदधति विधिसंशोधिमीमांसयैव
प्राच्या तर्हीरितार्था इति विफलमिदं ब्रह्मजिज्ञासनं स्यात् ।
अप्यत्युच्चातिनीचो जनिमृतिभयभाग् वैधधीसाध्यमोक्षः
कर्मोत्थैः स्वर्गपश्वाद्यतिमधुरफलैः को ऽपराधः कृतो नः ॥

वेदान्ता यद्युपासनाविधिपरास्तर्हि विहितोपासनायाः पक्षमासादि-
कालमिततया तत्साध्यफलमपि सातिशयमनित्यं च स्यादतो न विधिप-
रत्वं वेदान्तानामिति तात्पर्यम् अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो
,, । १४ युक्त इत्यन्तस्य भाष्यस्य दर्शयति **पुण्यापुण्येत्यादिना** । भाष्ये यद्वि-
षया जिज्ञासेति धर्मस्य प्राचि तन्त्रे विचारितत्वोक्तिरुपास्तेरपि विहिताया
धर्मत्वेन पुनरविचार्यत्वाय । अधर्मापीत्यधर्मोक्तिः पुण्यफलभोगावसानइवो-
पास्तिफलभोगसमाप्ता*वधर्मफलं भोक्तव्यमिति दर्शनाय । चोदनालक्षणत्वो-
क्ति†र्यागवद्विहितोपास्तेर्धर्मत्वार्थम् । एवं शरीरवागित्यादिविशेषणानि कर्म-
फलवदुपास्तिफलस्य शरीरोपभोग्यत्वादि प्रसञ्जयितुम् । सम्पतत्यनेनास्मा-
ल्लोकादमुं लोकमिति सम्पातः । कर्म दृष्टं श्रौतम् । पूर्तं स्मार्तं वाप्यादि ।
दत्तं दानमिति । **आत्यन्तिकमिति** । देवदत्तस्यात्यन्तिकमशरीरत्वं देव-
दत्तशरीरप्रागभावासमानकालीनो देवदत्तशरीरध्वंसः सर्वोपाधिप्रत्यस्तमयो-
पलक्षितं स्वरूपमिति यावत् । विधेयोपास्तिवादिनं प्रति तत्फलस्य मोक्षस्य
,, । १९ नित्यत्वादिप्रसञ्जनमिष्टप्रसङ्ग इत्याशङ्क्याह **एतदुक्तमिति** । उपास्तिविधेः
फलं ब्रह्मात्मत्वमुताविद्यानिवृत्तिर्विद्योदयो वेति विकल्प्य क्रमेण निराकरोति

* उपास्तिफलसमाप्तावित्ति १-३ पु० पा० । † लक्षणोक्तिरिति १ पु० ।

त्वया ऽपीत्यादिना । उपासनाऽपूर्वमपि चेतःसहकार्यतश्च विध्यवकाश ८५ । २०
इत्यर्थः । ऐहिकस्य मर्द्दनसुखवन्न विधिफलत्वमित्याशङ्क्याह **दृष्टं चेति** । कारीर्यादिनियोगा इह जन्मनि नियतसस्यद्ध्यादिफलाः* चित्रादि नियोगफलं पश्वादि भुवि भोग्यमपीह वा जन्मान्तरे वा भवति । **तत्कार्यमिति** । तदपूर्वकर्तव्यत्वेनावबोद्धुं नार्हतीत्यर्थः । अपूर्वं चेन्न साक्षात्कारोपयोगि तर्ह्युपासनक्रियैव तदर्थं विधीयतां नेत्याह **न च तत्काम इति** । नन्ववघातवदुपास्तावप्यस्तु नियमापूर्वं नेत्याह **न च ब्रह्मभूयादिति** । नेह परमाऽपूर्ववन्नियमाऽपूर्वसाध्यमस्ति ब्रह्मभावस्य नित्यत्वादित्यर्थः ।

विश्वजिन्न्यायेनेति । विश्वजिता यजेतेत्याद्यश्रुताधिकारं लि ८६ । १६
ङ्गप्रकरणालब्धाधिकारं चोदाहरणम् । निषेधे हि सामर्थ्यात्प्रवृत्तक्रियो ऽधिकारी लभ्यते अङ्गविधिषु तु प्रकरणाद् इति न चिन्त्यो† ऽधिकारः । एवं सतीह संदेहः किं नियोज्यो ऽध्याह्रियतां न वेति । तत्र लोके द्वारं द्वार‡मित्यादौ क्रियया विना कारकाभिधानाऽपर्यवसानाद्युक्तो ऽध्याहारः । इह तु विषयेण कार्यस्यान्विताभिधानपर्यवसानादनध्याहारे प्राप्ते उच्यते । अत्राप्यभिधेयापर्यवसानद्वारा ऽभिधानापर्यवसानमेव । कार्यं हि साध्यत्वेन कृतिनिरूप्यम् । नरव्यापाररूपा च कृतिः सा च यथा स्वसाध्यधात्वर्थनिरूप्यैवं स्वाश्रयनरनिरूप्या । तदेवं कृतेः कर्तापि कार्ये कृतिद्वारा संबन्धित्वेन निरूपक इति तमन्तर्भाव्यैव नियोगधीः । न चासावबुद्धा ऽऽत्मनः कार्येण संबन्धं स्वतस्तेन संबध्यते स्वसंबन्धिकार्यबोद्धा च नियोज्य इति सो ऽध्याहार्य इति स्थिते चिन्ता किं सर्वेषामध्याहार उत एकस्येति । तत्राऽविशेषात्सर्वेषामिति प्राप्ते उच्यते । एकेनाकाङ्क्षाशान्तेरेकस्येति । एवं स्थिते विचारः किं यस्य कस्य चिन्नियोज्यस्याध्याहार उत स्वर्गकामस्येति । तत्राविशेषादनियम इति प्राप्ते उच्यते । स स्वर्गः स्यात्सर्वान् प्रत्यविशिष्टत्वात्§ । स्वर्गकाम एवाध्याहार्यः । विशेषो हि गम्यते । पुरुषाणां सुखाभिलाषित्वात् । दुःखनिवृत्तेरपि तत्रैवान्तर्भावात् । दुःखनिवृत्तिस्तु न सुखाऽविनाभूता । सुषुप्ते सत्यामपि तस्यां सुखजन्माऽदर्शनात् अनवच्छिन्नस्य सुखस्य स्वर्गत्वात् तस्य

---

* सस्यादिफला इति ३ पु॰ पा॰ ।
† न तत्र चिन्त्य इति २ पु॰ पा॰ ।
‡ एकं द्वारमिति नास्ति २ पु॰ ।
§ जै॰ सू॰ अ॰ ४ पा॰ ३ सू॰ १५ ।

च सर्वसुखविशेषान् प्रत्यविशिष्टत्वाद्विशेषे च मानाभावात्स्वर्ग एव नियोज्यविशेषणं स्यादिति । कृत्वा चिन्तेयम् । यः सत्रायावगुरेत्स विश्वजिता यजेतेति सत्रप्रवृत्तस्यावगुरणोपरमे निमित्ते प्रायश्चित्ततया विहितत्वेन साधिकारत्वादिति ।

८७ । ३ **यत्किलेति** । स्वाभाविकनित्यचैतन्यात्मकस्य ब्रह्मात्मत्वस्य साध्यत्वं व्याहतमित्यर्थः । भाष्ये कूटस्थनित्यमिति विशेषणं न परिणामिव्यवच्छेदाय सिद्धान्ते तन्नित्यत्वासंमतेः । अतो वैयर्थ्यमित्याशङ्क्याह **परे हीति** । परभ्रान्तिव्यवच्छेदेत्यर्थः । इदं तु पारमार्थिकमिति भाष्ये कूटस्थनित्यत्वे पारमार्थिकत्वं हेतूकृतं तत्तदा घटेत यदि यत् पारमार्थिकं तदविकृतमिति व्याप्तिः स्यात् तदर्थं परिणामिनित्यस्य भ्रमसिद्धत्वमाह **परिणामीति** । परिणामो हि पूर्वरूपत्यागेन रूपान्तरापत्तिः । तत्र पूर्वरूपस्य सर्वात्मना त्यागेन रूपान्तरोत्पत्तौ जातस्य प्राक्तनरूपत्वं व्याहतमतो ऽनित्यत्वमित्युक्ते शङ्कते **एकदेशेति** । य एकदेशो नश्यति स धर्मिणः सकाशाद्भिन्न इति पक्षे न धर्मिणः परिणामः किं त्वेकदेशस्य स चानित्य इति
८७ । ११ न परिणामिनित्यत्वसिद्धिरित्याह **भिन्नश्चेदिति** । नश्यतश्चैकदेशस्य धर्म्यभेदे सर्वात्मना वस्त्वपगमान्न नित्यत्वमित्याह **अभेदे इति** । पक्षद्वयोक्तदोषपरिहारायैकमेव कार्यकारणात्मकं वस्तु तस्य कार्याकारेण परिणामित्वं तानि च कार्याणि भिन्नानि कारणाकारेण च नित्यत्वं तच्चाभिन्नमिति शङ्कते **भिन्नाऽभिन्नमिति** । यत्प्रमाणविपर्ययेण विरोधेन वर्तते तत्र विरुद्धमिति संप्रत्यय इत्यनुषङ्गः । एकस्य कार्यकारणरूपेण द्व्यात्मकत्वे प्रमाणमाह **कुण्डलमिति** । **स्थिरवभासेति** । हेम हेमेति वा कुण्डलं कुण्डलमिति वेत्यर्थः । अपर्यायानेकशब्दवाच्यत्वेन हेमकुण्डलयोर्भेदः सामानाधिकरण्याच्चाभेद इत्युक्ते हेमत्वस्य कुण्डलव्यक्त्याश्रितत्वाद्वा कुण्डलाकारसंस्थानस्य कनकत्वस्य चैकद्रव्याश्रितत्वेन वा सामानाधिकरण्यं नाभेदादित्याशङ्क्य व्यभिचारयति **आधारेति** । आधारेति दृष्टान्ते सिद्धौ भेदाभेदौ
८८ । १ दार्ष्टान्तिके योजयति **तथा चेति** । लोके कार्यस्य कुण्डलादेः कारणात्मकत्वात्परमकारणस्य च सतः सर्वत्र हेमवदनुगमात् सन् घट इत्यादिसामानाधिकरण्यवशेन जगतः कार्यस्य सत्ता कारणरूपेणाभेदो व्यावृत्तकार्यरूपेण

च भेद इत्यर्थः । **भेद इति** । किं रूपादिवद्भावरूपो धर्म उतैक्याभावः । ना- ८८ । ६
द्यः । ऐकान्तिकाभेदानिषेधात् । द्वितीयमाशङ्क्याह **किमयं कार्येति** । **तत्त्वे-
नेति** । कटकत्ववर्द्धमानकत्वरूपेण तयोरितरेतराभेदप्रसङ्ग इत्यर्थः । का-
र्यस्य कारणाभेदे च सर्वकार्याणामेककार्यात्मकत्वप्रसङ्गः एककार्यस्य सर्वका-
र्याभिन्नेन कारणेनाभेदादित्याह **अपि चेति** । एवमेककार्यात्मकत्वादितर-
कार्याणां तस्य च कारणादभेदाद्भेदाऽसिद्धावैकान्तिकाद्वैतापात इत्याह **तथा
च हाटकत्वमेवेति*** । कटकस्य हि द्वे रूपे स्तो हाटकत्वं कटकत्वं च । तच्च
हाटकरूपेणास्य कुण्डलादिभिरभेद इष्ट एव न कटकरूपेण व्यावृत्तत्वात्त-
स्येति प्रस्मृतपराभिसंधिः स्वप्रक्रियया शङ्कते **अथेति** । सिद्धान्ती तु कट-
कहाटकयोरभेदाद्धाटकस्य कुण्डलादिष्वनुवृत्तेरभेदे कटकस्यापि तैरभेदः
स्यादिति पूर्वोक्तमेव परिहारं स्मारयति **यदि हाटकादिति** । कटकस्य
कुण्डलादिष्वनुवृत्त्यनभ्युपगमे तेष्वनुवृत्तहाटकादभेदाभावः स्यादिति प्रति-
जानीते **नानुवर्त्तते चेदिति** । अनुवृत्ताद्व्यावृत्तस्य भेदे व्याप्तिमाह **ये
हीति** । उपनयमाह **नानुवर्त्तत इति** । अर्थाद्धेतुसिद्धिर्द्रष्टव्या । निगम-
यति **तस्मादिति** । कुण्डलादिषु† हेमानुवृत्त्या यदि तदभेदात्कटकादी- ८९ । १
ना‡मनुगमः तदा सत्तानुवृत्त्या तदभिन्नवस्तूना§मितरेतराभेदापत्तेर्व्यवहारप-
रिप्लव इत्याह **सत्तेति** । **इति**‖ **विभागो न स्याद्** इत्यस्य प्रत्येकं संबन्धः ।
इह क्षीरे इदं दधि नेदं तैलमिति संसर्गतदभावव्यवस्था न स्यात् । इदं
पटादिकमस्मात् कुड्याद्भिद्यते इदं कुड्यमस्मात्कुड्यान्न भिद्यते इत्यसङ्करो
न स्यात् । इदानीं वसन्ते काले इदं कोकिलरुतमस्ति इदमम्बुदध्वानं
नेति व्यवस्था न स्यात् । इदं कुम्भाद्येवं कम्बुग्रीवत्वादिप्रकारमिदं पटादि
नैवमिति प्रकारासङ्करो न स्यादित्यर्थः । उक्तास्ववस्थासु हेतुमाह **कस्य
चिदिति** । कुतश्चिदित्यपि द्रष्टव्यम् । इतश्च कार्यस्य कारणेन न
वास्तवमैक्यमित्याह **अपि चेति** । निश्चितकनकादभेदान्न कुण्डलादिषु ,, । ४
संशय इत्युक्ते संशयसम्भवं भेदप्रयुक्त्या शङ्कते **अथेति** । सिद्धान्त्यविनि-

---

* हाटकत्वमेवेतीति प्रायः पुस्तकेषूपलभ्यते परं मूले **हाटकमेव** इति दृश्यते ।

† कटकादिष्विति २ पु पा० । ‡ कुण्डलादीनामिति २–३ पु० पा० ।

§ सर्ववस्तूनामिति २-४ पु० । ‖ इतीति नास्ति २ पु० ।

:९ । ६ गममाह **नन्विति** । हेमनिर्णयेन कटकादीनां निर्णये तद्भेदः कारणं तद-
भावाद्भेदरूपान्निर्णयकार्याभाव औत्सर्गिकः प्राप्तः स कारणस्याभेदस्य* भावा-
दपोद्यते घटसामग्रीत इव तत्प्रागभावस्ततः कनकनिश्चये कटकादि-
निश्चयादविनिगम एव न किं तु वैपरीत्यनिश्चय इत्याह **प्रत्युतेति** ।
तेषां कुण्डलादीनां जिज्ञासा तद्विषयज्ञानानि चेत्यर्थः । वस्तुतः कार्यकार-
णयोरभेदाभावं सप्रमाणकमुपसंहरति **तेनेति** । यदि हेमकुण्डलयोर्न भे-
दाभेदौ तर्हि सामानाधिकरण्यं न स्यान्न ह्यत्यन्तभेदे तद्वर्त्ति कुण्डलक-
टकयोरदर्शनात् । नाप्यत्यन्ताभेदे† हेम हेमेत्यनुपलम्भादिति पूर्ववाद्युक्त-
मनुवदति **कथं तर्हीति** । यदि हेम्नः सकाशात् कुण्डलादीनां भेदा-
भेदौ तर्हि तेषामनुवृत्तहेम्नः सकाशाद् अभेदादितरेतरव्यावृत्तिर्न स्यान्न
स्याच्च हेम्नि निर्णीते संशय इति प्रतितर्कैण मिथो विरोधाख्येन **सामाना-**
। १८ **धिकरण्यानुपपत्तितर्कं** दूषयति **अथेति** । अत्यन्ताभेदे मा नामो‡पपादि
हेमादेरनुवृत्तिव्यावृत्तिव्यवस्था मा च घटिष्ट हेम्नि ज्ञाते कुण्डलादिजिज्ञासा भे-
दाभेदमते ते किं न स्याताम् इत्याशङ्क्य पूर्वोक्तमविनिगममुत्सर्गापवादं
च स्मारयति **अनैकान्तिके चेति** । एवं§ निरुद्धे ऽनेकान्तवादिनि
स्वमतेन सामानाधिकरण्यमुपपादयति **तस्मादिति** । विरोधादन्यतरबाधे
ऽप्यभेदो बाध्य इति सौगतमतमाशङ्क्याह **अभेदोपादानेति** । भेदः
किं धर्मिप्रतियोगिनोर्व्यासज्य वर्त्तते उत प्रतियोगिनमपेक्ष्य धर्मिण्येव ।
आद्ये धर्मिप्रतियोगिनोः प्रत्येकवर्त्त्येकत्वापेक्षेत्युक्त्वा द्वितीये धर्म्यैक्यापेक्षे-
त्याह **एकाभावे चेति** । ततः स्वसत्तायामभेदापेक्षत्वाद्भेदस्य स एवाभेदे
। २४ ऽध्यस्त इत्यर्थः । प्रतीतावपि भेदस्यैवाभेदापेक्षेत्याह **नायमिति** । मृत्ति-
केति श्रुतिः|| कारणमेव सत्यमित्याह अतो ऽत्यन्ताभेदपरेति । अनंश-
त्वमाकारभेदराहित्यं नित्यतृप्तत्वादीनि श्रुत्युक्तान्येव भाष्ये ऽनूदितानीति
नासिद्धानि कार्यविलक्षणाऽनधिगतविषयलाभात् स्वमते शास्त्रपृथक्त्वसिद्धि-
रतस्तद्ब्रह्मेति भाष्ये उक्ता । प्राग्विमोक्षनित्यत्वान्नियोगायोग उक्तः । इदानीं

---

* सद्भावादिति ५ पु॰ पा॰ । † अत्यन्ताभेदेनेति २ पु पा॰ ।
‡ नामेति नास्ति २ पु॰ । § एवमिति नास्ति २ पु॰ ।
|| श्रुतेरिति १-५ पु॰ श्रुतिशब्दो नास्ति २ पु॰ ।

तत्साधनज्ञानस्य केवलदृष्टार्थत्वाच्च स उच्यतइत्याह **तदेवमित्या-** ९० । १३
दिना । उपपाद्य इत्यस्य **निवारिका इत्याह** इत्यनेन संबन्धः ।
एवं फलस्वभावेन नियोगाभावमुक्त्वा फलिज्ञानस्वभावेनाप्युच्यतइत्याह
अविद्याद्वयेति । स्वत इति * । विहितक्रियारूपेणेत्यर्थः । न्यायसूत्रे
दोषो रागादिः प्रवृत्तिः कर्म । आरोप्यत्वसाम्ये ऽप्यध्यासात्सम्पदो भेदमाह
मन इति । आरोप्यप्रधाना सम्पदधिष्ठानप्रधानो ऽध्यासः । आरोपितस्त-
द्भावो ब्रह्मादिभावो यस्य तन्मनआदि तथा । **वन्ह्यादीनि** इत्यादिशब्दात्सू-
र्यचन्द्रादयो गृह्यन्ते (**वागादीनिति**† । चक्षुःश्रोत्रमनांसि संवृज्य उद्यम्य
लयं गमयितुं चालयित्वेत्यर्थः । **संवरणादिति** । उद्यमनादित्यर्थः । यो
हि यदुद्यच्छति तत्स्ववशतया संवृणोतीति ‡) **सात्मीभावादिति** । ९२ । १०
साम्येन कारणात्मत्वोपगमनादित्यर्थः । यद्यपि श्रुतौ स्वापे प्राणः संवर्ग
उक्तः तथापि न्यायसाम्याल्लयस्य चात्र प्रकटत्वात्प्रायणमुदाहृतम् । अग्न्यादे-
रुपलक्षणात्सर्वाश्रयत्वं वायुप्राणयोरुपास्यमित्याह **सेयमिति । दशा-
शागतं** दशदिग्गतम् । संवर्गदृष्टान्तं निगमयति § **यथेति** । दार्ष्टान्तिक-
माह **एवमिति । बृंहणक्रियया** देहादिपरिणमनक्रियया । **आत्मदर्श-
नोपासनादय इति** । दर्शनं प्रमितिः । एतच्च प्रमाणज्ञानं विधेयमिति
मतमवलम्ब्योक्तम् । आदिशब्दो दृष्टान्तभूतमनआद्युपास्त्यर्थः ।

स्तुतशस्त्रवदिति । भेदलक्षणे ऽभिदधे—स्तुतशस्त्रयोस्तु संस्कारो ,, । १६
याज्यावद्देवताभिधानत्वात्‖ । आज्यैः स्तुवते प्रउगं शंसतीति स्तुत-
शस्त्रे समाम्नाते । आज्यप्रउगशब्दौ स्तोत्रशस्त्रविशेषनामनी । प्रगी-
तमन्त्रसाध्यं देवतादिगुणसंबन्धाभिधानं स्तोत्रम् । शस्त्रमप्रगीतमन्त्र-
साध्यम्¶ । ते किं देवताप्रकाशनाख्यसंस्कारार्थत्वेन गुणकर्मणी उता-
पूर्वार्थत्वेन प्रधानकर्मणी इति संदेहे गुणसंबन्धाभिधानाद्गुणिन्या देव-

* न स्वत इति इति प्रतीकाकारः २ पु० । † इतिशब्दो नास्ति ५ पु० ।

‡ ( ) एतन्मध्यगग्रन्थस्थाने संवृज्य उद्यम्य लयं गमयितुं चालयित्वेत्यर्थः । **संवरणादिति** । उद्यमनादित्यर्थः । यो हि यदुद्यच्छति स स्ववशतया तत्संवृणोतीति । **वागादीनिति** । चक्षुःश्रोत्रमनांसि इति व्युत्क्रमेण पाठः २ पु० । § नियमयतीति १ पु० पा० ।

‖ जै० सू० अ० २ पा० १ सू० १३ । देवताभिधानादिति २ पु० पा० ।

¶ अप्रगीतसाध्यमिति १–३ पु० पा० ।

ताया अभिधानेन याज्यावत्क्रतूपयोगिदेवतास्मरणस्य दृष्टत्वाद्गुणकर्मत्वे प्राप्ते सिद्धान्तः । अपि वा स्तुतिसंयोगात्प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदध्याताम्* । स्तुतिरिह विहिता श्रूयते स्तौति शंसतीति । स्तुतिश्च गुणाभिधानेन स्वरूपप्रकाशनम् । यथा विशालवक्षाः क्षत्रिययुवेति† । यत्राभिधानविवक्षा न तत्र स्तुतिं प्रतीमो यथा यो विशालवक्षास्तमानयेति । तस्मात् स्तौतिशंसती श्रौतार्थलाभाय प्रकरणे अपूर्वोत्पत्तिं प्रति स्तोत्रशस्त्रे विदध्यातामिति । एवमिहात्मोपासनं प्रधानकर्म आत्मा भूतो भव्यशेष इति । अवेक्षितमिति निष्ठया आज्ये कर्मण्यवेक्षणं गुणीकृ-

।। १८ तम् । भाव्युपयोगमाज्यस्याह **दर्शपूर्णमासेति** । पूषानुमन्त्रणमन्त्रवदुत्कर्षं वारयति **प्रकरणिना चेति** । ग्रहणे हेतुमाह **उपांशुवदिति** । सर्वस्मै वेति वाक्यात्सर्वार्थमप्याज्यमुत्पत्तावविहितद्रव्यकोपांशुयागाङ्गम् । आग्नेयादीनामुत्पत्तिशिष्टपुरोडाशाद्यवरोधात्सत्यप्यत्राज्यभागाद्यङ्गेष्वाज्यनिवेशेन प्रधानहविष्ट्वमिति । द्रव्यसंस्कारकस्य गुणकर्मत्वे जैमिनीयसूत्रमुदाहरति **यैस्त्विति‡** । यैरवघातादिभिर्द्रव्यं चिकीर्ष्यते संस्कर्तुमिष्यते गुणस्तत्र प्रतीयेत द्रव्ये गुणभूतं कर्म प्रतीयेतेत्यर्थः । आत्मोपास्त्यादेः संस्कारकर्मत्वं प्रकरणाद्वाक्याद्वा भवद्भवेन्नाद्य इत्याह दृष्टान्तवैषम्यपूर्वकं **दर्शपूर्णमासेति** । न द्वितीय इत्याह **न चानारभ्येति** । **यद्ययमिति** । विधित्वाभावो हि पूर्वपक्षोपन्यासे वर्णित इति ।

।। १२ **सुवर्णं भार्यमितिवदिति§** । शेषलक्षणे ऽभिहितम्—अद्रव्यत्वात्तु शेषः स्यात्‖ । तस्मात्सुवर्णं हिरण्यं भार्यं दुर्वर्णो ऽस्य भ्रातृव्यो भवतीत्यनारभ्याधीते संशयः । किं शोभनवर्णहिरण्यधारणं क्रत्वङ्गमुत पुरुषधर्म इति । तत्र फलकल्पनाभयात् क्रतुनिवेशः । दुर्वर्ण इत्यादि त्वेवंकामशब्दविरहान्न फलपरम् । न च सत्त्रवद्विपरिणामः¶ ।

---

* जै॰ सू॰ अ॰ २ पा॰ १ सू॰ २४ । † क्षत्रियो युवेति २ पु॰ पा॰ ।

‡ जै॰ सू॰ अ॰ २ पा॰ १ सू॰ ८ ।

§ सुवर्णं हिरण्यं भार्यमितिवदितीति २ पु॰ । मूलेप्येवं पाठस्तस्मिन् पुस्तके ।

‖ जै॰ सू॰ अ॰ ३ पा॰ ४ सू॰ २७ । अद्रव्यदेवतात्वात्तु शेषः स्यादिति शबरस्वामिलिखितः पाठः । उपरितनस्तु पाठो वार्तिकोक्तः साधुतर इति परिमलग्रन्थादवसीयते ।

¶ सक्तुवद्विपरिणाम इत्यपि क्व चित्पाठः परिमलदर्शनादवसीयते ।

क्रत्वङ्गत्वेन गतिसम्भवात् । तथा च वैदिककर्मत्वसाम्यादग्निहोत्रादिप्रकरणनिवेश इति प्राप्ते अद्रव्यत्वाद् द्रव्यदेवतासंबन्धराहित्यान्न स्वतन्त्रं कर्म किं तु क्रतुशेष इति सूत्रार्थः । सिद्धान्तस्तु । अप्रकरणे तु तद्धर्मस्ततो विशेषात्* । तद्धर्मः पुरुषधर्म एवंजातीयकः । यतो ऽप्रकरणे ऽयमाम्नातः प्रकरणाधीताद्धर्माद्विशिष्यते । न चाहवनीये जुह्वतीति होमानुवादेनाहवनीयविधानवत्क्रत्वनुवादेन धारणं विहितं येन साक्षाद्वाक्येन क्रतुसंबन्धि भवेद् नाप्यव्यभिचारिक्रतुसंबन्धाश्रयद्वारा वाक्यात्पर्णमयीतावत्क्रतुमुपनिपतेत् । सुवर्णधारणस्य लोके ऽपि विद्यमानत्वेन क्रत्वव्यभिचाराभावात् । तस्माद्विनियोगभङ्गेन हिरण्यसाधनकं धारणं वाक्यशेषगतफलाय विधीयते इति पुरुषधर्म इति । एवमिहाप्यात्मसाधनकदर्शनेनामृतत्वं भावयेदिति विधानात् प्रधानकर्मतैवेति ।

अपूर्वं विषयो जन्यमस्येत्यपूर्वविषयम् । न केवलम् इक्षुक्षीरादिरसविशेष एवानभिधेयः प्रतीयते अपि तु सर्ववाक्यार्थोऽपि । तथा सति ब्रह्माप्यनभिधेयमेव वेदान्ततात्पर्यगम्यमित्याह **एवमन्य-** ९३ ।
त्रापीति । गामानयेति हि वाक्ये गवानयनकर्तव्यता ऽर्थः सो ऽपि साधारण इति न विवक्षितगवानयनं वक्ति वाक्यं प्रकरणादिवशेन त्वर्थात्तत्सिद्धिरिति । **अदूरविप्रकर्षेणेति** । साक्षादनभिधानादस्ति विप्रकर्षः । स चादूरे वस्तुगतधर्मपरामर्शद्वारा वस्तुविशेषस्य लक्षणया प्रतिपादनादिति प्रत्यगात्मत्वेनाविषयतया प्रतिपादयति । भाष्यं व्याचष्टे वेदान्तानामदूरविप्रकर्षेण वस्तुबोधकत्वमुपपादयति **त्वंपदार्थो हीति** । **व्याप्नोतीति** । यत्तदविद्याविलसितमित्यर्थः । **तत्** तत्र सतीत्यर्थः । अविषयीभूतोदासीनतत्पदार्थस्य प्रत्यगात्मनश्च तत्त्वमसीति सामानाधिकरण्येनास्य संसारिणः प्रमातृत्वाभावात्तन्निवृत्तौ प्रमित्या प्रमेयं व्याप्नोतीत्येवम्भावस्य निवृत्तौ त्रयः प्रकारा निवर्तन्तइत्यर्थः । **विगलितेति** । ९४ ।
विगलिता पराङ्गेन वृत्तिर्वर्तनं यस्य स विगलितपरागवृत्तिस्तादृशः प्रत्यक्त्वमापन्नो ऽर्थो यस्य तद्विगलितपरागवृत्त्यर्थं तस्य भावस्तत्त्वमेतत्तदस्त्वंपदस्य तदा काले भवति । कदेत्यत आह **त्वमिति हीति** । **तदा**

* जै॰ सू॰ अ॰ ३ पा॰ ४ सू॰ २६ ।

तत्पदेन । एकार्थस्यैव व्याख्या **विशुद्धेति । आन्तरश्लोको** * मध्य-
९४ । १२ श्लोकः । **परपक्ष इति** । साध्यश्चेन्मोक्षो ऽभ्युपगम्येतानित्य एव स्यादिति भाष्येणापादितैवानित्यता ऽनूद्यते नित्ये ऽपि मोक्षे ऽविद्यानिवृत्तिसंस्कारः कर्मसाध्य इति पक्षप्रतिक्षेपेणानित्यत्वं स्थापयितुमित्यर्थः । **उपवेलं** वेलायाः समीपे विकृतः । तत्र हेतुः **अतिबहुलेति** । समुल्लसन्तः फेनपुञ्जस्तबकाः‡ यस्य तस्य भावस्तत्ता । पोतेन दीव्यति व्यवहरतीति **पौतिकः** । अशुद्धिः§ब्रह्मणि सत्युताऽसती प्रथमस्तु भिन्नाभिन्नविकल्पनाभ्यां|| निरसनीयः । चरमं निरस्यति **न त्विति । अनाद्यविद्यामलेति** । शङ्कितुर्वास्तव्यविद्या ऽभिमतेति । **ननु** नित्यशुद्धत्वादात्मनि न हेयत्वसम्भव इत्युक्ते कथं शङ्का ऽत आह **एतदुक्तमिति** । ब्रह्मणि नाविद्या किं तु जीवे सा चानिर्वाच्येत्युक्तमध्यासभाष्ये । तथाविधा च ज्ञाननिरस्येत्युपास्तिर्विफलेत्यर्थः । निघर्षणव्याख्यानम् **इषुकेति** । एतच्च
९६ । ६ धात्वर्थः संयोगविभागावेवेति मतमाश्रित्य । **अन्याश्रया त्विति** । यद्यपि स्पन्दरूपा भावना चैत्राश्रिता दर्पणस्योपकरोति तथापि संयोगविभागाख्यधात्वर्थद्वारा तौ च नात्मनीत्यर्थः । संयोगविभागातिरिक्तधात्वर्थपक्षे ऽपि समानं धात्वर्थस्य संयोगविभागद्वारा ऽतिशयजनकत्वात् । न चात्मनि क्रियाजन्यातिशयसम्भव इति । **तदा** तच्छब्देन बाध्येरन्नित्युक्तं बाधनं परामृशति तद् अव्यवहितम् । अनित्यत्वमात्मनः प्रसज्येतेत्युक्तं त्वनित्यत्वं व्यवहितमिति । ननु देहादावहंविभ्रमवत इव संस्कार्यत्वमिति कथम् । स्वत एव किं न स्यादत आह **अनाद्यनिर्वाच्येति** । ननु नाविद्यामात्रोपहिते सुषुप्तवद्व्यवहारसिद्धिरत आह **स्थूलेति** । स्थूलसूक्ष्माणि च तानि यथाक्रमं शरीरेन्द्रियाणि । आदिशब्दात्प्राणादयः । संहतत्वमपि न
९६ । १२ तटस्थत्वेन तत्संयोगित्वं¶ किं तु तत्र प्रविष्टत्वमित्याह **तत्संघातेति** । प्रवेशो ऽपि न भेदेन प्रतिभासमानत्वेन किं तु ऐक्याध्यासेनेत्याह **तदभेदेनेति** । अङ्गरागश्चन्दनादिः । फलितमाह **तेनेति** । देहादावैक्येना-

---

* अन्तराश्लोक इति १ पु॰ पा॰ । † अतिबहुलेति सु॰ भा॰ पु॰ पाठः ।
‡ समुल्लसिताः स्तबका यस्येति २ पु॰ पा॰ ।
समुल्लसन्तः स्तबका इति ३-५ पु॰ पा॰ । § अविशुद्धिरिति १ पु॰ पा॰ ।
|| विकल्पाभ्यामिति २-तै॰ पु॰ पाठः । ¶ तत्सङ्गित्वमिति ३ पु॰ पा॰ ।

ध्यस्ते आत्मनि क्रिया ऽऽरोप्यते तज्जन्यसंस्कारश्च अतो नान्याश्रितक्रि-
याफलभाक्त्वमन्यस्येति न व्यभिचार इत्यर्थः । आरोपितसंस्कारान्न फलभाक्त्व-
मिति शङ्कामहम्प्रत्ययस्य रूप्याद्यध्यासवैलक्षण्येन परिहरति **सांव्यवहा-** ९६ । १६
रिकेति । स्नु प्रस्रवणे इति धातुमभिप्रेत्याह **अविगलितमिति** । क्रि-
यानुप्रवेशद्वारान्तरं मोक्षे भवत्विति शङ्कायां भाष्ये तदभावप्रतिज्ञैव भाति
न हेतुरित्याशङ्क्याह **एतदुक्तमिति** । न च विदिक्रियाविषयत्वेनेति भाष्ये
ज्ञानाविषयत्वस्योक्तत्वात्पुनः शङ्कोत्तरे व्यर्थे इत्याशङ्क्य परिहारान्तराभिप्रा-
यतामाह **अयमर्थ इत्यादिना** । यदवादि पूर्वपक्षे ज्ञानस्य भावार्थत्वाद्
विधेयत्वमिति तत्र क्रियात्वमभ्युपेत्य विधेयत्वं निराक्रियतइत्याह **सत्य-**
मिति । वस्तुतो विदिक्रियायाः कर्मभावानुपपत्तेरित्यर्थः । औपाधिकं तु कर्म-
त्वमनिष्टं नियोगवादिनाम् । यदा तु ज्ञानं क्रियैव न भवतीत्येवंपरतया भाष्यं
व्याख्यायते तदा पचतीतिवज्जानातीति पूर्वापरीभावप्रसिद्धिर्दुश्चिकित्सा
स्यादिति । **वैलक्षण्यान्तरमिति** । ज्ञेयवैलक्षण्यं प्रागुक्तमिदानीं ज्ञानस्या-
विधेयत्वं वैलक्षण्यमुच्यतइति । यत्र विषये या वस्त्वनपेक्षा चोद्यते तत्र सा
क्रियेति तच्छब्दाध्याहारेण योजयितुं यत्रशब्दार्थमाह **यत्र विषये इति** ।
ध्यानस्य वस्त्वनपेक्षामुक्त्वा पुरुषेच्छाधीनत्वमुपपादयति **न हि यस्यै इति** । ९७ । २०
वषट्करिष्यन् होता विध्यर्थानुष्ठानात्प्राक् प्रमाणवशाद्ध्याने न सिध्यति ।
ततः* पुरुषेच्छावशवर्तीति शब्दज्ञानाभ्यासो वा तस्यैव साक्षात्कारपर्यन्तता
वा पुरुषेच्छाधीनेत्याशङ्क्याह **न चेति** । उपासनायाः साक्षात्कारे ऽनुभवप-
र्यन्तताशब्दोक्तसाक्षात्कारस्याविद्यापनये प्राप्तत्वादित्यर्थः । क्रियायाः क्व चि-
द्वस्तुस्वरूपविरोधित्वं प्रमाणज्ञानाद्वैलक्षण्यमाह **क्व चिद्वस्तुस्वरूपविरो-**
धिनीति । वस्तुतन्त्रत्वमपाकरोतीति । अनेन ज्ञानमेव तन्न क्रि-
येति भाष्ये क्रियाशब्देन क्रियागतमवस्तुतन्त्रत्वं लक्षयित्वा प्रतिषिध्यत-
इति व्याख्यातम् । अत एव हि भाष्यकारो ब्रह्मज्ञानं न चोदनातन्त्रमिति दा-
र्ष्टान्तिके चोदनातन्त्रत्वं प्रतिषेधति न ब्रवीति न क्रियेति । अतः क्रियात्व-
मभ्युपेत्य ज्ञाने विधेयत्वं न मृष्यतइति गम्यते । **सांप्रदायिकं** गुरुमुखा- ९८ । १८
ध्ययनादि । विधिः कार्यं विषयो येषां ते विधिविषयाः । यः समर्थः शक्तः स

---

* अत इति २-तें॰ पुस्तकयोः पाठः ।

कर्त्ता यः कर्त्ता स कर्मण्यधिकृतः स्वामी यो ऽधिकृतः स नियोगं स्वकीयतया बुध्यमानो नियोज्यः स च तत्रैव वर्णितरूपे विषये भवति तस्मिन्नसति न भवतीत्यर्थः ।

९९ । ३ उक्तविषयत्वस्य श्रवणादावभावमाह **न चैवमिति।** श्रवणं हि
ब्रह्मात्मनि तत्त्वमसिवाक्यस्य तच्छब्दश्रुत्यादिपर्य्यालोचनया तात्पर्य्यावगमः ।
अस्य च विषयविशेषावच्छिन्नप्रत्ययस्याऽनवगमे तत्कर्त्तव्यत्वबोधायोगात् ।
अवगमे च श्रवणस्यैव जातत्वात्पुनः कर्त्तुमकर्त्तुमन्यथा वा कर्त्तुमशक्यत्वात् । एवं मननस्यापि विषयविशेषनियतयुक्त्यालोचनस्यावगतस्य कर्त्तुमशक्यत्वादिति । उपासनस्यापि यथाश्रवणमननं प्रत्ययावृत्तेरवगमे द्वित्रिवारावृत्तेरवश्यम्भावाद्दिधित्सितार्थस्य ज्ञातस्य न पुनः कर्त्तव्यत्वं दर्शनस्य त्वशक्यत्वं स्फुटमिति । **अन्यतः प्राप्ता इति ।** दर्शनार्थे कर्तव्यत्वेनान्वयव्यतिरेकावगतान् श्रवणादीननुवदन्ति वचांसि तद्गतप्राशस्त्यलक्षणया तेषु रुचिमुत्पाद्यानात्मचिन्तायामरुचिं कुर्वन्ति प्रवृत्त्यतिशयं जनयन्तीत्यर्थः ।
प्रकृतसिद्ध्यर्थं सिद्धे वस्तुनि वेदान्तप्रामाण्यसिद्ध्यर्थे सिद्धे वस्तुनि सङ्गतिग्रहविरहादि दूषयितुमित्यर्थः । उपनिषदां सिद्धबोधकत्वे आक्षिप्ते पुरुषस्योपनिषद्गम्यत्वसिद्धवत्कारो भाष्ये ऽनुपपन्न इत्याशङ्क्य तदुपयोगिन्यायः
१०० । ३ सामर्थ्याद् द्योतित इत्याह **इदमत्रेति ।** परनरवर्त्तिशब्दार्थावबोधलिङ्गस्य
प्रवृत्तेः सिद्धवस्तुन्यसंभवान्न व्युत्पत्ति*रित्युक्तम् अज्ञातसङ्गतित्वेनेति । तत्राह **कार्यबोधे इति ।** यदुक्तमर्थवत्तयेति तत्सिद्धपुत्रजन्मादिबोधे ऽपि हर्षादिप्रयोजनलाभान्न शब्दानां कार्यपरत्वं नियच्छतीत्याह **अर्थवत्तैवमिति ।** आखण्डलादीनाम् इन्द्रादीनां चक्रवालं समूहः । धौतानि शोधितानि कलधौतमयानि सौवर्णानि शिलातलानि यस्य स तथा । प्रमदवनानि प्रमदाभिः सह नृपाणां क्रीडावनानि तेषु विहारिणां संचरणशीलानां मणिमयशकुन्तानां रत्नमयपक्षिणां निनदः शब्दः । **अभ्यर्णं** निकटम् । प्रतिपन्नं जनकस्य पितुरानन्दनिबन्धनं पुत्रजन्म येन स तथोक्तः । सिन्दूररञ्जितपुत्रपदाङ्कितः पटः पटवासः स एवोपायनमुपहारो लाटानां प्रसिद्धः । **महोत्पलं** पद्मम् । **अर्थवत्तैवमिति** श्लोकभागं व्याचष्टे **तथा चेति ।** अनेन

---

* व्युत्पत्तिसिद्धिरिति २ पु॰ पा॰ ।

सिद्धस्याप्यप्रतिपित्सितत्वाप्रतिपिपादयिषितत्वे प्रत्युक्ते । **शास्त्रत्वं हित-**
शासनाद् इत्येतद्व्याचष्टे **एवं चेति** । प्रवृत्तिनिवृत्त्याश्रयणं हि शास्त्रे १०१ । १५
पुरुषार्थाय तं तु वेदान्ता अन्तरेणाप्यायासं ज्ञानादेवानयन्तीति भवन्तितरां
शास्त्राणीत्यर्थः । **तत्सिद्धमिति** । तच्छब्देन तस्मादर्थेन सिद्धशब्दव्युत्प-
त्त्यादि परामृशता वक्ष्यमाणहेतोरसिद्धिरुद्धृता । ज्योतिष्टोमादिवाक्ये बाधं
परिहरति **विवादेति** । **भूतार्थविषयाणीति** । न कार्यविषयाणीत्यर्थः ।
इतरथा भूतार्थप्रतीतिमात्र*जनकत्वसाधने सिद्धसाधनात् प्रमितिजनकत्व-
स्य साधने हेतोः साध्यसमतापातात् । यत्तच्छब्दावपि प्रस्तुतभूतार्थं परामृ-
शतः । उपोपसर्गः सामीप्यार्थमाह । नीत्ययं निश्चयार्थः । सदेरर्थमाह
सवासनामिति । वस्त्वक्रियाशेषं वेदान्तविषयं दर्शयितुं भाष्ये विशेष-
णानि प्रयुक्तानि व्याचष्टे **अहंप्रत्ययेत्यादिना** । भाष्ये ऽसंसारि इति त्वंप-
दलक्ष्यनिर्देशः ब्रह्मेति तस्य ब्रह्मत्वमुक्तम् । क्रियारहितत्वमसंसारित्वं व्यवहि-
तमप्यनन्यशेषत्वमुत्पाद्याद्यभावे हेतुत्वे न संबन्धयति **अतश्चेति** । उत्प- १०२ । ५
त्त्यादिभिराप्यं साध्यम् । सक्तवो हि प्राङ् न विनियुक्ताः । न च होमेन रक्षा-
शेषा उपयोक्ष्यन्ते ऽतो न संस्कार्या इति विनियोगभङ्गे र होमप्राधान्यमिति ।
अनन्यशेषत्वे स्वप्रकाशस्यत्वं हेतुत्वेन योजयति **कस्मादिति** । एवं सि-
द्धार्थव्युत्पत्तिसमर्थनेनौपनिषदां ब्रह्मात्मैक्ये प्रामाण्यमुक्तम् । इदानीं भवत्व-
न्यत्र सिद्धे पुत्रजन्मादौ सङ्गतिग्रहो न ब्रह्मण्यविषयत्वादतो न तत्रौपनिष-
त्प्रामाण्यमित्याशङ्क्य तत्परिहारपरत्वेन भाष्यमवतारयति **स्यादेतदित्या-**
दिना । स्वयम्प्रकाशत्वेन स्फुरत्यात्मनि समारोपितदृश्यनिषेधेन लक्षणया
शक्यं शास्त्रेण निरूपणमिति भाष्याभिप्रायमाह **यद्यपीत्यादिना** ।

ननु प्रमाणान्तरमिते तथाविधस्य निषेधा†त्कथमात्मन्युपाधिनिषेध-
द्वारा लक्षणा ऽत आह‡ **न हि प्रकाश इति** । भासमाने भासमानं निषेध्यमि- ,, । २१
त्येतावन्न तु§ मानेन भासमाने इति वैयर्थ्यात्तदिह स्वतो भात्यात्मनि तत्सा-
क्षिक उपाधिः शक्यनिषेध इति तदवच्छेदको ऽपि न न भासतइत्यन्वयः । न
केवलं निषेधमुखेनैवाविषयनिरूपणमपि त्वात्मादिपदैरपि व्याप्त्याद्यभिधान-

* मात्रेति नास्ति २ पु॰ ।
† तथा विधिनिषेधस्य निषेधादिति २ पु॰ ।
‡ तत्र आहेति १ पु॰ ।
§ निषेध्यं न तु इति ३ पु॰ पा॰ ।

मुखेन परिच्छेदाभावोपलक्षितस्वप्रभ आत्मा लक्षणीयः स चात्मपदयुक्तान्नेति
वाक्यादात्मेति निरूप्यते ब्रह्मपदयुक्ताच्चायमात्मा ब्रह्मेत्यादेर्ब्रह्मेति निरू-
१०२ । २२ प्यतइत्याह **तेनेति** । इतिरिदमर्थे । य आत्मा इदं न इदं नेति चतुर्थे
व्याख्यातः स एष पञ्चमाध्याये निरूप्यतइत्यर्थः । न केवलमधिष्ठान-
त्वेन प्रपञ्चसत्ताप्रदत्वादात्मसत्यता ऽपि तु तत्स्फुरणप्रदत्वाच्चेत्याह **अपि
चेति** । संस्कार्यत्वनिरासप्रस्तावे साक्षी चेतेति मन्त्रोदाहरणेन प्रत्युक्तत्वा-
दिति भाष्यार्थः । न ह्यहंप्रत्ययविषयेत्यादिभाष्यमात्मनो ऽनधिगतत्वेनौप-
निषदत्वोपपादनार्थं तदवतारयति **एतदेवेति** । भाष्ये तत्साक्षीति वि-
धिकाण्डानधिगतत्वमुक्तम् । सर्वभूतस्थत्वेन बौद्धसमयानधिगतिः । विन-
श्यत्सु सर्वेषु भूतेषु स्थितो न विनश्यतीत्यर्थः । सावयव आत्मेति विवस-
नसमयानधिगतिः । समत्वेन जीवोत्पत्तिवादिपञ्चरात्रतन्त्रानधिगतिः । कूट-
स्थनित्यत्वेन काणादादितर्कानधिगतिरेकः सर्वस्यात्मेति वर्णितम्* । अ-
न्यतो ऽनधिगतिमुक्त्वा बाधाभाव उक्तः अत इति । अधिगते हि बाधे-
नानधिगतइत्यर्थः । अथ वा सर्वस्यात्मत्वेन प्रत्याख्यातुं न शक्य औप-
निषदस्य पुरुषस्यानन्यशेषत्वादिति भाष्यं तद्योसावुपनिषत्स्वित्यादिना वि-
वृतं पुनरभिहितविशेषणस्यात्मनो ऽहंप्रत्ययविरोधमाशङ्क्य तन्मिथ्यात्वे-
नौपनिषदत्वं विवृतम् । अनन्यशेषत्वविवरणाय विधिशेषत्वं वेति भाष्यं
तदनुषङ्गेण व्याचष्टे **न शक्य इति** । विध्यशेषत्वे आत्मत्वादिति हेतुं
व्याचष्टे **कुत इत्यादिना** । मा भूद्विधेयकर्मशेषत्वेन विधिविषयत्वमा-
त्मनः स्वत एव विधीयतां निषिध्यतां चेत्याशङ्कामपनेतुं न हेय इति
,, । ६ भाष्यम् । तच्चापि हेतुत्वेनात्मत्वादित्येतद्योजयति **अपि चेति** । अनन्य-
शेषत्वे स्वतो विधेयत्वाभावे चात्मत्वं हेतुरित्यपि† चशब्दार्थः । **अत इति** ।
भाष्योक्तादेव हेतोरित्यर्थः । तमेवाह **सर्वेषामिति** । ननु घटादिविना-
शस्य मृदादौ दर्शनात्कथं पुरुषावधिः सर्वस्य लयो ऽत आह **पुरुषो हीति** ।
कल्पितस्याधिष्ठानत्वाऽयोगादात्मतत्त्वमेव तत्तदवच्छिन्नमनिर्वाच्यविश्वोदय-
व्ययहेतु‡रित्यर्थः । ननु पुरुषो ऽप्यनिर्वाच्य इति नेत्याह **पुरुषस्त्विति** ।

---

* वर्णित इति २ पु॰ पा॰ । † हेतुरपीति ३ पु॰ पा॰ ।

‡ विश्वोदयाऽप्ययहेतुरिति ३ पु॰ पा॰ ।

अनन्तो ऽनवधिः । विकारो नास्तीत्युक्तं भेदाऽभेदविचारे । धर्मान्यथा-
त्वविक्रियाया अभावमुक्त्वा तद्धेत्वभावमप्याह **अपि चेति** । भाष्ये यत १०५ । ४
एव धर्मान्यथात्वाभावो ऽत एव नित्यशुद्धादिस्वभावः । पुरुषावधिः सर्वस्य लय इत्यत्र श्रुतिमाह **तस्मात्पुरुषादिति** । कल्पितस्याकल्पितमधिष्ठानमित्युक्तयुक्तिपरामर्शी तस्माच्छब्दः । निरतिशयस्वतन्त्रतया विधिशेषत्वाभावे श्रुतिमुदाहृत्य मानान्तराऽगम्यतया वेदान्तैकवेद्यत्वे श्रुतिमुदाहरति तं त्वेति । **तस्य** वेदस्येत्यर्थः । ननु तर्हि धर्मावबोधनमिति वक्तव्यं तत्राह **धर्मस्य चेति** । ननु प्रतिषेधानामनुष्ठेयाबोधकत्वात्कथं कर्मावबोधप्रयोजनता ऽत आह * **प्रतिषिध्यमानेति** । शाबरवचनवदाम्नायस्येति† सूत्रे आम्नायशब्दो विधिनिषेधपर इति सिध्यति । विकल्पमुखेन परिहारान्तरं चाह **अपि चेति** । **द्रव्यगुणकर्मणां** तच्छब्दानामित्यर्थः । क्रियार्थत्वादित्यत्रानर्थक्यमित्यत्र चार्थशब्दो ऽभिधेयपरः प्रयोजनपरो वेति विक-
ल्प्याद्यं निरस्य द्वितीयं निरस्यति **यद्युच्येतेत्यादिना** । ननु चोदना १०५ । २०
हि भूतं भवन्तं भविष्यन्तमित्येवंजातीयकं शक्नोत्यवगमयितुमिति शाबरवचसि विधिवाक्यस्य भूतादिबोधिता भाति न द्रव्यादिशब्दानां क्रियाप्रयोजनता ऽत आह **कार्यमर्थमिति** । कार्यान्वितभूतबोधित्वे विधिवाक्यस्य कथं तन्न्यायेन ब्रह्मवाक्येष्वक्रियाशेषभूतवस्तुबोधित्वसिद्धिरत आह **अयमभिसंधिरिति** । कार्यान्वितबोधित्वनियमः शब्दानां किं व्युत्पत्तिबलादुत प्रयोजनार्थम् । तत्र केवलभूतवस्त्ववगमादपि प्रयोजनसिद्धिमुत्तरत्र वक्ष्यति । न तावद्व्युत्पत्तिबलादित्याह **न तावदिति** । **कार्यार्थे** कार्यशेषे । ननु कार्यान्वितपरत्वनियमाभावे पदानामतिलाघवायान्वितपरत्वमपि त्यज्यतामत आह **नापीति** । तत्किमिदानीं विशिष्टे पदशक्ति-
र्नेत्याह **स्वार्थमिति** । १०६ । १०

अयमभिसंधिः । पदैः पदार्था एवाभिधीयन्ते अर्थान्तरान्विततया उपलक्ष्यन्ते । अन्यथा स्वरूपमात्रातिरेकिविशिष्टाभिधाने गौरवं स्यात् । नन्वभिहितार्थस्वरूपाणां विशिष्टैरनविनाभावात्कथं लक्षणा । न हि गवार्थस्यानयत्यन्वयाविनाभावः चारयतिनाप्यन्वयात् । न चार्थान्तरमात्रान्वयो लक्ष्यः ।

---

* बोधनं प्रयोजनं तत्राहेति २ पु॰ पा॰ । † जै॰ सू॰ अ॰ १ पा॰ २ सू॰ १ ।

तस्य व्यवहारानुपयोगात् । तन्न । अनविनाभाविभिरपि मञ्चैः पुरुषलक्षणात् । ननु मा भूदनविनाभावनियमस्तथापि वाच्यस्य लक्ष्येण संबन्धो वाक्यार्थे चानन्वयो वाच्यः । मञ्चा हि संबद्धाः पुंभिर्न च वाक्यार्थे ऽन्वीयन्ते । यथाह शालिकनाथः ।

वाच्यार्थस्य च वाक्यार्थे संसर्गानुपपत्तितः ।
तत्संबन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते ॥ इति ।

तदिह गामानयेत्यादौ न श्रौतार्थस्य वाक्यार्थेनानन्वयः । नाप्यन्वितस्य लक्ष्यस्यास्त्यभिधेयेन संबन्धो ऽन्वितस्यान्वयान्तराभावात्तत इह न लक्षणेति ।

अत्रोच्यते । मुख्यार्थपरिग्रहे ऽनुपपत्तिस्तावल्लक्षणाया निदानं तत्र यथा पदेन पदार्थलक्षणायां वाच्यार्थस्य वाक्यार्थे संबन्धानुपपत्तिः एवं वाक्यार्थप्रत्ययोद्देशेन प्रयुक्तस्य पदवृन्दस्य ये ऽभिधेया अनन्वितपदार्थास्तेषां वाक्यार्थाभावानुपपत्तिरेवान्वितलक्षणाया निदानम् । न चान्वितरूपस्याभिधेयस्वरूपेण संबन्धानुपपत्तिः । विशिष्टस्वरूपयोस्तादात्म्यस्य कस्यापि स्वीकारात् । नन्वेवमप्यभिहितार्थैरर्थान्तरान्वितलक्षणायां कथं नियमः । अर्थान्तराणामानन्त्यात् । तदुच्यते* ।

आकाङ्क्षाऽऽसत्तियोग्यत्वसहितार्थान्तरान्वितान् ।
पदानि लक्षयन्त्यर्थानिति नातिप्रसङ्गिता ॥

प्रयोगस्तु गोपदं गामानयेति वाक्येनानयत्यन्वितगोत्व†वाचकम् पदत्वात्तुरगपदवदिति ।

१०६ । ११ एतत्सर्वमाह एकेति । एकप्रयोजनसिद्ध्युपयोगित्वं हि पदार्थानामितरेतरवैशिष्ट्यमन्तरेण न घटते ऽतः प्रयोजनवत्त्वाये‡कवाक्यत्वाय च लक्षणया ऽन्वितपरत्वं पदानां वाच्यमित्यर्थः । ननु विशिष्टानामप्यर्थानां भेदात्कथमेकवाक्यता ऽत आह तथा चेति । गुणभूतनानापदार्थविशिष्टप्रधानार्थस्यैक्यादेकवाक्यत्वमित्यर्थः । पदानामनन्विता-

* उच्यते परिहार इति १ पु· पा· । † आनयनान्वितगोत्वेति २ पु· पा· ।
‡ प्रयोजनत्वायेति २ पु· पा· ।

योग्यपर्यवसाने ऽन्वितपर्यवसाने च भट्टसंमतिमाह **यथाहुरिति** । यदा १०६ । १२
लक्षणया योग्येतरान्वितपरत्वं पदानां पदार्थानां च लक्षणायां द्वारत्वेन तत्परत्वं तदा वेदान्तानां कार्याऽनन्वितब्रह्मपरत्वोपपत्तिरित्याह **एवं च सतीति** । भव्यार्थत्वेनेति भाष्ये भव्यशब्दो भवनकर्तृवचनत्वादुत्पाद्यमात्रपरो मा भूदित्याह **भव्यमिति** । भाष्ये भूतस्य क्रियात्वप्रतिषेधस्य प्रसक्तिमाह **नन्विति** । भव्यसंसर्गिणा रूपेण भूतमपि भव्यमित्यत्र किं कार्यं भव्यमुत क्रिया । उभाभ्यामपि भूतार्थस्य नैक्यमित्याह **न तादात्म्येति** । कार्यं हि साध्यतया प्रयोजनं भूतं साधकतया प्रयोजयतीति प्रवृत्तिनिवृत्तिव्यतिरेकेणेत्यादिभाष्येण कार्यान्वयनियमभङ्गेन कूटस्थनित्यवस्तूपदेशस्य समर्थितत्वे ऽपि कार्यान्विते व्युत्पत्तिनियममभ्युपेत्यापि परिहारान्तरं वक्तुमुक्तशङ्कामनुवदतीत्याह **शङ्कत इति** । अङ्गीकृते कार्यान्वितव्युत्पत्तिनियमे कूटस्थनित्योपदेशानुपपत्तिरित्याह **एवं चेति** । भवतु कार्यान्विते भूते सङ्गतिग्रहस्तथापि स्वरूपं तत्र प्रतीयतएव विशिष्टे ऽपि स्वरूपसद्भावात् । ततः किमत आह **तथा चेति । स्वनिष्ठभूतविषया इति ।** कार्यानन्वितभूतविषया इत्यर्थः । न त्वनन्वितविषयत्वमेव । अन्विते पदतात्पर्यस्य समर्थितत्वात् । ते च वक्ष्यमाणोदाहरणेषु दृश्यमाना नाध्याहारादिभिः क्लेशेनान्यथयितव्या इत्यर्थः ।

स्यादेतत् । कार्यान्विते गृहीतसङ्गतेः पदस्य कथं शुद्धसिद्धाभिधायिता न हि गोत्वे गृहीतशक्ति गोपदमभिदधाति तुरगत्वमत आह **न हीति** । १०७ । ८
एवं मन्यते कार्यान्वयो न शब्दार्थः किं तूपाधिः । तथा हि । कर्तव्यतातदभावावगमाधीनत्वात् प्रवृत्तिनिवृत्त्योः प्रवृत्तिनिवृत्तिसाध्यत्वात्प्रयोजनस्य तदधीनत्वाच्च विवक्षाप्रयोगयोः प्रयोगाधीनत्वाच्च वाक्यार्थप्रतिपत्तिव्युत्पत्त्योर्विवक्षादिवत्कार्यान्वयस्यापि शब्दार्थावगत्युपायता ऽवगम्यते ऽतो विरहय्यापि कार्यान्वयं प्रयोगभेदे भवति भूतं वस्तु पदवाच्यम् । कथमपरथा भवतां प्रमाणान्तरगृहीतकार्यान्वितगृहीतसङ्गतिकपदवृन्दस्य वेदे ऽपूर्वान्विताभिधायिता । तदिदमुक्तमुपहितं शतशो दृष्टमपि तदेव क्व चिदनुपहितं यदि दृष्टं भवति तदा तददृष्टं न हि भवति किं तु दृष्टमेव भवतीति ।

१०७ । ११ **अटवीवर्णकादय इति** । तद्यथा अस्ति किल ब्रह्मगिरिनामा
गिरिवर: ।

त्र्यम्बकजटाजूटकलनाय विनिर्मिता ।
पाण्डुरेव पटी भाति यत्र गोदावरी नदी ॥

यस्य च

सकुसुमफलचूततरुद्रुघर्म-
द्युतिकरपातवनालिषूपजाते ।
तमसि हरकिरीटचन्द्रनुन्ने
धवलनिशा इव भान्ति वासराणि ॥ इत्यादय इति ।

क्रियाऽनिष्ठा इति अकारप्रश्लेष: । अभ्युपेत्य कार्यान्वयनियमं
पर्यहार्षीदिदानीमभ्युपगमं त्यजति **उपपादिता चेति** । एवं तावद्व्युत्पत्ति-
विरोधं परिहृत्य निष्प्रयोजनत्वचोद्यमुद्भाव्य परिहरति **यदि नामेत्या-**
१०८ । ३ **दिना** । समुच्चयासम्भवादप्यर्थश्चकार: शङ्कद्योती तामेवाह **यद्यपीति** ।
एवं तावद् द्रव्यगुणादिशब्दानां विधिवाक्यगतानां केवलभूतार्थतामापाद्य
तद्वद् ब्रह्मापि शब्दगोचर इत्युक्तमिदानीं तु निषेधवाक्यवद्वेदान्ता: सिद्ध-
परा इत्याह **अपि चेत्यादिना*** । यत्र कृतिस्तत्रैव कार्यम् । निषेधेषु
कृतिनिवृत्तौ तद्व्याप्यं कार्यं निवर्त्ततइत्युक्त्वा कृतेरपि तद्व्यापकधात्वर्थनिवृत्त्या
निवृत्तिमाह **कृतिर्हीत्यादिना** । न घटवत्प्रतिक्षणं समाप्त: किं तु पच-
तीतिवत् पूर्वापरीभूत: । सच भवत्यादाविव नात्मलाभ: किं तु कर्त्तुर-
न्यस्योत्पाद्यस्यौदनादेरुत्पादनायामनुकूल: प्रयत्नविषय: । तत्र हेतुमाह
साध्येति । न द्रव्यगुणौ कृतिविषयावित्यत्र हेतु: **साक्षादिति** ।
तत्रापि तदुत्पादनानुकूलो व्यापार: कृतिविषय इत्यर्थ: । भावार्था: कर्म-
शब्दास्तेभ्य: क्रिया प्रतीयेतैष ह्यर्थो विधीयते† इति द्वितीयगतमधिकर-
,, । १४ णम् । अत्र गुरुमतेनार्थं सङ्कलयति **द्रव्येति** । अत्रावमर्शेपीत्यन्त: पूर्व:
पक्ष: । अयमर्थ: । पदस्मारितानन्वितार्थेषु निमित्तेषु भावान्वितावस्था
नैमित्तिकी तस्यामस्ति सिद्धयोरपि द्रव्यगुणयो: क्रियान्वयेन साध्यता

* अपि चेति २ पु० पा० ।

† जै० सू० अ २० पा० १ सू० १ ।

ऽतो द्रव्यगुणभावार्थवाचकशब्दानामविशेषेण साध्यार्थवाचकत्वात्साध्यार्थविषयत्वाच्च नियोगस्याविशेषेण नियोगविषयसमर्पकत्वमिति राद्धान्तमाह **भावस्येति** । भावशब्दस्येत्यर्थः । कार्यावमर्श इत्यनुषङ्गः । भावशब्दो हि स्वत एव साध्यरूपां क्रियामवमृशति । द्रव्यादिशब्दास्तु क्रियायोगद्वारा द्रव्यादीन्साध्यतया ऽवमृशन्ति । किमित्यत आह **भावार्थेभ्य इति** । १०८ । १९
नियोगो हि साक्षात्कृतेरविषयः सँस्तद्विषयत्वाय स्वावच्छेदकत्वेन साक्षात्साध्यस्वभावं भावार्थमाकाङ्क्षति । तल्लाभे च न क्रियायोगद्वारा साध्यस्य द्रव्यादेस्तद्विषयता युक्ता* । अतो भावार्थशब्देभ्य एव यजतीत्यादिभ्यो विषयविशिष्टाऽपूर्वाधिगतिरिति† भावनावाचिभ्यो ऽपि भावो भावनेत्यादिभ्यो नापूर्वाधिगतिरिति कर्मशब्दा इत्युक्तम् । क्रत्वर्थवाचिभ्यः कर्मशब्देभ्यो ऽपि याग इत्यादिभ्यो नैवापूर्वाधिगतिरिति भावार्था इत्युक्तम् । अतो धात्वर्थोपरक्तभावना येषु भाति यजेतेत्यादिषु तेभ्यो ऽपूर्वं प्रतीयेतैष हि भावनासाध्यो ऽपूर्वलक्षणो ऽर्थो विधीयतइति सूत्रार्थः । ननु द्रव्यगुणौ विधीयेते दधिसान्तत्ये‡ । तत्र तयोरेव कार्या§ऽवच्छेदकता ऽत आह **न च दध्नेति** । आधारः क्षारणम् । सान्तत्यमविच्छिन्नत्वम् । यदि दध्यादावपि भावार्थो विधेयः तर्हि न्यायविरोध इत्याशङ्क्याह **न चैतावतेति** । १०८ । २०

ज्योतिष्टोमे श्रूयते सोमेन यजेतेति । तथा ऐन्द्रवायवं गृह्णाति मैत्रावरुणं गृह्णाति आश्विनं गृह्णातीति । तत्र संशयः किमैन्द्रवायवादिवाक्ये विहितानां सोमरसानां यागानां च यथाक्रमं सोमेन यजेतेति सोमयागशब्दावनुवदितारावुत द्रव्ययुक्तस्य कर्मणो विधाताराविति । तत्रैन्द्रवायवादिवाक्येषु द्रव्यदेवतात्मकरूपप्रतीतेर्यागानुमानादितरत्र रूपाप्रतीतेः समुदायानुवाद इति प्राप्ते द्वितीये|| राद्धान्तितम् । नानुवादत्वमप्रत्यभिज्ञानात् । लतावचनो हि सोमशब्दो न रसवचनः । ऐन्द्रवायवादिशब्दास्तु रसानभिदधतीति न तदनुवादी सोमशब्दः । न च यजेतेति प्रत्यक्षे यागे तदनुमा अतः प्राप्त्यभावान्न यजिरप्यनुवादी¶ । तस्मात्सोमवाक्ये यागविधिरितरत्र रसाना-

* तल्लाभे च तत्क्रियायोगद्वारा साध्यस्य द्रव्यादेस्तद्विषयता ऽयुक्तेति १ पु॰ पा॰ ।
† इति शब्दो नास्ति १ पु॰ ।
‡ दधिसंतते इति १ पु॰ पा॰ ।
§ एककार्येति १ पु॰ पा॰ ।
|| जै॰ सू॰ अ॰ २ पा॰ २ सू॰ १७–२० ।
¶ अनुवाद इति २–३ पु॰ पा॰ ।

मिन्द्रादिदेवताभ्यो ग्रहणान्युपकल्पनानि विधीयन्तइति । एवं यथा सोमेनेति वाक्ये विशिष्टविधिः एवं दधिसान्तत्यादिवाक्यानि यदि द्रव्यगुणविशिष्टहोमाघारविधायीनि तर्हि अग्निहोत्राघारवाक्ये तद्विहितहोमानामाघाराणां च समुदायावनुवदेतां तथा चाधिकरणान्तरविरोध इति शङ्का ।

तथा हि द्वितीये स्थितम्—आघाराग्निहोत्रमरूपत्वात्* । आघारमाघारयत्यूर्ध्वमाघारयति† संततमाघारयति तथा ऽग्निहोत्रं जुहोति दध्ना जुहोति पयसा जुहोतीति‡ श्रूयते । तत्र संशयः । किं संततदध्यादिवाक्यविहितानामाघारहोमानामाघाराग्निहोत्रवाक्ये समुदायानुवादिनी उतापूर्वयोराघारहोमयोर्विधात्रृणी इति तत्रानुवादिनी अरूपत्वान्न ह्यत्र दधिसान्तत्यादिवाक्यविहितहोमाघारेभ्यो विशिष्टं रूपमस्ति । होमाघारमात्रं तु प्रकृतमुपलभ्यते । अतो ऽनुवादत्वे प्राप्ते राद्धान्तः । विधी इमौ स्याता§माघारयतिजुहोतिशब्दाभ्यामनुष्ठेयार्थप्रतीतेः । तत्संनिधेः श्रुतस्य सांतत्यस्य दध्यादिवाक्यस्य विशिष्टविधित्वे गौरवप्रसङ्गेन तद्विहितभावार्थानुवादेन गुणविधानार्थत्वादिति ।

हन्त ‖नैतेन विरुध्येत सांतत्यदध्यादिवाक्ये भावार्थविषयं कार्यमि-
१८ । २२ त्यभ्युपगमः । तत्र हेतुमाह **यद्यपीति** । यद्यपि सन्ततादिवाक्ये साक्षात्कृतिविषयत्वाद्भावार्थस्य तदवच्छिन्नमेव कार्यं यद्यपि च कार्यं प्रति साक्षादविषयावनवच्छेदकौ द्रव्यगुणौ तथापि भावार्थं प्रत्यनुबन्धतया ऽवच्छेदकतया विधीयेते । तत्र हेतुमाह **भावार्थो हीति** । तत्किं भावार्थो द्रव्यादिश्च विधेयः तर्हि वाक्यभेदः । नेत्याह **तथा चेति** । तर्हि सन्ततादिवाक्यानि विशिष्टविषयः स्युः स्याच्चाग्निहोत्रादिवाक्यमनुवादः । तत्राह **एवं चेति** । यद्यप्यत्र विशिष्टविषयो विधिः प्रतीयते तथापि भावार्थद्वारा द्रव्यादिकमपि विषयीकरोति तत्र संक्रान्तो यदि भावार्थमन्यतो विहितं न लभेत तर्हि गौरवमप्युररीकृत्य¶ विशिष्टं विदधीताथ लभेत तत उपपदाकृष्टशक्तिर्द्रव्यादिपरो भवत्यनुवदति तु भावार्थम् । तदाहुः ।

---

* जै· सू· अ· २ पा· २ सू· १३ । आघाराग्निहोत्रे अरूपत्वादिति २ पु· ।

† एतदग्रे ऋजुमाघारयतीति पाठो ऽधिकः २ पु· ।

‡ पयसा जुहोतीति नास्ति तै· पु· ।

§ अङ्गीकत्र्येति २ पु· पा· ।

‖

¶ हन्तेति नास्ति २-३ पु· ।

सर्वेचाख्यातसंबद्धे* श्रूयमाणे पदान्तरे ।
विधिशक्त्युपसंक्रान्तेः स्याद्धातोरनुवादता ॥ इति ।

तदिहाग्निहोत्रादिवाक्यत एव भावार्थलाभाद् द्रव्यादिपरता मीमांस-
कैकदेशिनः । आग्नेय इत्यादौ द्रव्यदेवतासंबन्धो विधेय इत्याहुः । तच्चापि
सिद्धस्य न विधेयत्वमित्युक्तमतिदिशति **एतेनेति** । एकदेशी संबन्धस्य १०९ । ८
भावनावच्छेदकत्वेन विधेयत्वं शङ्कते **नन्वित्यादिना** । ननु यथाश्रुतभ-
वत्यर्थ एव विधीयतां किं संबन्धविधिनेत्याशङ्क्य भवत्यर्थस्य कर्ता सिद्धो
ऽसिद्धो वा । प्रथमे विधिवैयर्थ्यं चरमे नियोज्याभावाद्विध्यभाव इत्युक्त्वा किं
तर्हि विधेयमिति वीक्षायामाह **तस्मादिति** । प्रयोज्य उत्पाद्यः । तद्व्या-
पारो हि भवनम् । तस्य हि व्यापारं भवतिधातुर्विशिनष्टि भवतीति ।
भवनं च नोत्पादकव्यापारमन्तरेणेति भवनाविनाभूतो भावकव्यापारो विधेय
इत्यर्थः । **नन्वित्यादिना** चोद्यच्छलेन सिद्धान्ती मीमांसकैकदेशिनं दूष-
यति । भवतु लक्षितभावनाया विधानं तस्यास्तु न संबन्धो विषयस्तस्य
दध्यादिवत् साक्षात्कृतिविषयत्वायोगादित्यर्थः । नन्वव्यापारो ऽपि घटादिः
करोत्यर्थरूपभावनाविषयो दृश्यते ऽत आह **न हीति** । यदि दण्डादि- ,, । १८
विषयो हस्तादिव्यापारः कृतिविषयस्तर्हि कथं घटं कुर्वीति घटस्य कृतिक-
र्मता भात्यत आह **घटार्थामिति** । घटविषयव्यापार एव कृतिसाध्यो
घटस्तूद्देश्यतया प्रयोजनमिति कर्मत्वनिर्देश इत्यर्थः । यदि संबन्धो न वि-
धेयस्तर्ह्याग्नेयवाक्ये किं विधेयमत आह सिद्धान्त्येव **अत एवेति** । अत्य-
क्तस्य हविषो देवतासंबन्धासम्भवाद् यागः संबन्धाक्षिप्तः । ननु यजेरप्यपूम-
र्थत्वात्कथं विधेयता ऽत आह **आग्नेयेनेति** । यागेनेत्याग्नेयपदस्य लक्ष्य- ११० । ८
निर्देशो भावयेदिति भवतिपदस्य । यत एवाग्नेयवाक्ये यागविधिरत एवानु-
वादे यजेतेति श्रुतम् । अन्यथा संबन्ध एव श्रूयेतेत्यर्थः ।

उक्तं द्वितीये—प्रकरणं तु पौर्णमास्यां रूपाऽवचनात्† । एवं समाम-
नन्ति । यदाऽऽग्नेयो ऽष्टाकपालो ऽमावास्यायां पौर्णमास्यां चाच्युतो भवति
उपांशुयाजमन्तरा भवति‡ ताभ्यामेतमग्नीषोमीयमेकादशकपालं पौर्णमासे

---

* संबन्धे इति २ पु० । † जै० सू० अ० २ पा० २ सू० ३ ।
‡ मन्तरा यजति इति २-३ पु० पा० अन्तरायतीति तै० पु० ।

प्रायच्छत् । ऐन्द्रं दध्यमावास्यायामैन्द्रं पयो ऽमावास्यायामिति । तथा य एवं विद्वान् पौर्णमासीं यजते स एवं विद्वानमावास्यां यजतइति । तत्र संदेहः किमिमौ यजती कर्मणोरपूर्वयोर्विधातारावुत प्रकृताग्नेयादियागानां समुदायस्यानुवदितारा विति । तत्राभ्यासात्कर्मान्तरविधी । न च द्रव्यदेवते न स्तः । ध्रौवाज्यस्य साधारण्यान्मान्त्रवर्णिकदेवतालाभाच्च । आज्यभागक्रमे हि चतस्रो ऽनुवाक्यास्सन्ति । द्वे आग्नेय्यौ द्वे सौम्ये ते च क्रमाद्बलीयसा वाक्येनाज्यभागाभ्यामपच्छिद्यानयोः कर्मणोर्विधास्येते । एवं हि समामनन्ति । वार्त्रघ्नी पौर्णमास्यामनूच्येते वृधन्वती अमावास्यायामिति । वृत्रघ्नपदवत्यौ वार्त्रघ्नी वृधन्वत्पदवत्यौ वृधन्वती । तस्मात्कर्मान्तरविधिः । इत्येवं प्राप्ते ऽभिधीयते । प्रक्रियतइति प्रकरणं प्रकृतानि कर्माणि पौर्णमास्यमावास्यासंयुक्तवाक्ययोरालम्बनम् । कुतः । रूपाऽवचनात् । ध्रौवाज्यलाभे ऽपि देवता न लभ्यते । न च मन्त्रवर्णेभ्यस्तल्लाभस्तेषां क्रमादाज्यभागशेषत्वात् । यत्तु वाक्यं बलीय इति सत्यं बलवदपि न क्रमस्य बाधकमविरोधात् । क्रमावगताज्यभागाङ्गभावस्यानुवाक्यायुगलद्वयस्य पौर्णमास्यमावास्याकालयोर्विभागेन प्रयोगव्यवस्थापकत्वात् । काले हीमौ शब्दौ रूढौ न कर्मणि कालद्वयोपहितकर्मसमुदायद्वयानुवादस्य च प्रयोजनं दर्शपूर्णमासाभ्यामित्यधिकारवाक्यगतद्वित्वोपपादनम् । तस्मात्समुदायानुवादाविति ।

उत्पत्त्यधिकारयोरविसंवादार्थमप्याग्नेयादिवाक्ये यागविधिरभ्युपेय
११० । २ इत्याह **अत एवेति** । अत्राप्यधिकारविधौ यजेत इति दर्शनात्प्रागपि यागविधिरित्यर्थः । कृतिनिर्वर्त्यस्य धात्वर्थस्यैव नियोगावच्छेदकतेत्युपसंहरति **तस्मादिति** । विधिर्नियोगः । एवं नियोगकृतिभावार्थानां व्याप्यव्यापकतामुक्त्वा व्यापकनिवृत्त्या व्याप्यनिवृत्तिं निषेधेष्वाह **तथा चेत्यादिना** । निषेधेषु भावार्थापादनमिष्टप्रसङ्ग इत्याशङ्क्याभ्युपगमे बाधकमाह **एवं चेति** । नामधात्वर्थयोगे हि नञः पर्युदासकता । न हन्यादित्यादौ त्वाख्यातयोगात् प्रतिषेधो भाति तत्रानीक्षणवन्नन्र्थ्यः पर्युदास इत्येको दोषो ऽपरश्च विधिनिषेधविभागलोप इत्यर्थः ।

-- । १५ प्रजापतिव्रतन्यायं* विभजते निषेधेषु तदभावाय **नेक्षेतेति** । तत्र

* जै. सू. अ. ४ पा. १ सू. ३-६ ।

हि तस्य ब्रह्मचारिणो व्रतमित्यनुष्ठेयवाचिव्रतशब्दोपक्रमादेकस्मिंश्च वाक्ये
प्रक्रमाधीनत्वादुपसंहारस्याख्यातयोगिना नञा प्रतीतो ऽपि प्रतिषेधो ऽननु-
ष्ठेयत्वादुपेक्ष्यते । धात्वर्थयोगेन च पर्युदासो लक्षणीयः । तथा चेक्षणविरो-
धिनी क्रिया सामान्येन प्राप्ता तद्विशेषबुभुत्सायां च सर्वक्रियाप्रत्यासन्नः
संकल्प इत्यवगतम् । ईक्षइति तु संकल्प ईक्षणपर्युदासेन नाद्रियते* ततो
ऽनीक्षणसङ्कल्पलक्षणा युक्ता नैवं निषेधेषु संकोचकमस्तीत्यर्थः । एवं
निषेधेषु भावार्थाभावमभिधाय तद्व्याप्तकृतिनियोगयोरभावमाह **तस्मादिति** ।
तदयं प्रयोगः । विमतं न नियोगावच्छेदकमभावत्वात्संमतवदिति ।
क्रियाशब्द इति । विभागभाष्ये ऽक्रियार्थानामानर्थक्याभिधानादिह क्रिया- ११० । २२
शब्दः कार्यवचनः अकार्यार्थानां ह्यानर्थक्यं नियोगवादिनो मतं न भावार्थावि-
षयाणाम् । नियोगस्याप्यभावार्थत्वादिति निषेधेषु भावार्थाभावान्न कार्यमित्युक्तं
तच्च हेत्वसिद्धिं शङ्कते **स्यादेतदिति** । विधिश्रुतिसिद्धो नियोगो विषयं
भावार्थमाक्षिपतु स एव कः । न तावद्धननादिस्तस्य रागप्राप्तेः । अनुपात्त-
क्रियाविधौ च लक्षणाप्रसङ्गात् । अत आह **न च रागत इति** । लक्षणया
हननविरोधी यत्नो विधेयः प्रयोजनलाभे च लक्षणा न दोषायेत्यर्थः ।
इत्याहेति । अस्यां शङ्कायामाहेत्यर्थः । व्यवहितान्वयेन व्याकुर्वन् भाष्य-
मुदाहरति **न चेति** । भाष्ये नञ इति पदम् अनुरागेणेत्यधस्तनेना-
प्राप्तक्रियार्थत्वमित्युपरितनेन च संबध्यते । स्वभावप्राप्तहन्त्यर्थानुरागेणेति
नेदमनुवादस्थं तथा सति हि सर्वमेव भाष्यं प्रतिज्ञापरं स्यात्स्वभावप्राप्तह-
न्त्यर्थानुरागेण यन्नञो ऽप्राप्तक्रियार्थत्वं तन्नेति । तच्च न युक्तम् । नञश्चेत्यु-
त्तरभाष्यस्य चशब्दयोगेन शङ्कानिरासित्वाद्धेत्वदर्शनात् । तन्मा भूदिति
पृथक्कृत्य हेतुभागमाकाङ्क्षापूर्वकं प्रयोजयति **केनेति** । किमिह विधेयं हन- १११ । ८
नादि वा नञर्थो वा विधारकप्रयत्नो वेति विकल्प्य क्रमेण दूषयति **हनने-
त्यादिना** । अत्र विधारकप्रयत्नविधिराशङ्कितः† स एव च निराकर्तव्यः ।
इतरत्तु पक्षद्वयं परस्य शाखासंक्रमनिरासार्थं दूषितम् । ननु नञर्थश्चेन्न वि-
धीयते तर्हि हननं नास्तीत्यादाविव सिद्धतया प्रतीयेतेत्याशङ्क्याह **अभा-
वश्चेति** । रागप्राप्तकर्तव्यताकहननलक्षणप्रतियोगिगतं साध्यत्वमभावे समा-

---

* पर्युदासेन चाद्रियत इति २ पु॰ । पर्युदासेन नञा आद्रियते इति तै॰ पु॰ ।
† विधिः शङ्कित इति २ पु॰ पा॰ ।

रोप्यतइत्यर्थः । कर्त्तव्यत्वाभावबोधस्य निवर्त्तकत्वमयुक्तं सत्यपि तस्मिन्ह-
१११ । २१ ननगतदृष्टेष्टसाधनत्वप्रयुक्तेतिकर्त्तव्यताया अनुपायादित्युत्तरभाष्यस्य शङ्कामाह
ननु बोधयत्विति । औदासीन्यस्य प्रागभावतया कारणानपेक्षत्वादध्याह-
रति **पालनेति** । निषेधेषु नञ्समभिव्याहृतविधिप्रत्ययेन प्रकृत्यर्थभूतहनना-
दिगतक्षुद्रेष्टोपायतामनपबाध्य तद्गत*गुरुतराऽदृष्टाऽनिष्टोपायता ज्ञाप्यते ऽतो
निवृत्त्युपपत्तिरिति वक्तुं लोके विधिनिषेधयो†रिष्टानिष्टोपायत्वबोधकत्वं व्यु-
त्पत्तिबलेन दर्शयति **अयमभिप्राय इत्यादिना** । **प्रवर्त्तकेषु वाक्येषु**
इत्यतः प्राक्तनेन ग्रन्थेन इन्दूदयगतहितसाधनतायां न प्रवृत्तिहेतुता ।
प्राक्कृतभुजगाङ्गुलि‡दाने च नाधुना निवृत्तिहेतुत्वं ततो विशिनष्टि **कर्त्त-
व्यतेति** । कर्त्तव्यतया सहैकस्मिन् धात्वर्थे समवेताविष्टानिष्टसाधनभावौ
११२ । ८ तौ तथोक्तौ । फलेच्छाद्वेषयोरुक्तविधसाधनभावावगमपूर्वकत्वाभावादनैका-
न्तिकत्वमाशङ्क्याह **प्रवृत्तिनिवृत्तिहेतुभूतेति** । दृष्टान्ते साध्यविकलता-
माशङ्क्याह **न जात्विति** । शब्दादीनामपूर्वपर्यन्तानां ये प्रत्ययास्तत्पूर्वा-
विच्छाद्वेषौ बालस्य मा भूतां प्रत्यक्षव्यवहारे सर्वेषामभावादित्यर्थः । पचती-
त्यादौ प्रतीतापि भावना न प्रवर्तिकेति त्रैकाल्यानवच्छिन्नेत्युक्तम् । **इत्यानु-
पूर्व्या सिद्धः कार्यकारणभाव** इत्यन्वयव्यतिरेकप्रदर्शनपरम् । **इष्टे-
त्यादिसिद्धमित्यन्त**मिष्टानिष्टोपायताऽवगमस्य प्रवृत्तिनिवृत्ती प्रति हेतुत्व-
प्रदर्शनपरम् इति विवेक्तव्यम् । ननु कर्त्तव्यतेष्टसाधनत्वविशिष्टव्यापारः परः
शाब्दो ऽस्तु किं धर्ममात्रपरत्वेनात आह **अनन्यलभ्यत्वादिति** । व्या-
पारो लोकसिद्ध इति न शब्दार्थ इत्यर्थः । ननु हननादिषु प्रत्यक्षदृष्टेष्टसा-
११३ । ६ धनत्वकर्त्तव्यत्वयोर्निषेद्धुमशक्यत्वात्कथमभावबुद्धिरिति भाष्यमत आह
निषेध्यानां चेति । दृश्यमानमपीष्टं बह्वदृष्टानिष्टोदयावहत्वादनिष्टमित्यन-
र्थहेतुत्वज्ञापनपरं वाक्यम् । एवं च पर्युदासपक्षादस्य न विशेष इति न
शङ्क्यं श्रुतेष्टोपायत्वाभावोपपत्तये ऽनिष्टोपायत्वकल्पनात् । त्वन्मते श्रुतं परि-
त्यज्याश्रुतविधारकप्रयत्नविधिकल्पनादिति । आयतिभावफलम् । प्रवृत्त्यभाव-
मित्यस्य व्याख्या **निवृत्तिमिति** । उद्यतस्तत्क्रियायां§ मयोपरन्तव्य-

---

* अनपबाध्यमानेनेति १–५ पु. पा. । † विधिप्रतिषेधयोरिति २ पु. पा. ।
‡ प्राक्तनभुजङ्गाङ्गुलीति तै. पु. २ पु. पा. । § उद्यमक्रियाया इति २ पु. । उद्यमनक्रियाया इति तै. पु. ।

मिति बुद्धा* निवर्तते न तु प्रवृत्तिप्रागभावमात्रमित्यर्थः । यथोक्ताभावबुद्धे-
रौदासीन्यस्थापकत्वे ऽपि क्षणिकत्वात्तद्ध्वंसे हननोद्यमः स्याच्छश्वत्तत्सं-
ततौ च विषयान्तरज्ञानाऽनुदयप्रसङ्ग इति शङ्कते **स्यादेतदिति** । यथा
ऽग्निः पुनर्ज्वालोपजननिदानमिन्धनं दहन्नुपशान्तो ऽपि भवति भाविनीनां
ज्वालानामुदयविरोधी एवमभावबुद्धिः क्षणिकतया स्वयमेव शाम्यत्यपि हन-
नाद्यहितोपायताऽनवबोधं दग्ध्वा तन्निदाना उपरितनीः प्रवृत्ती रुणद्धीति† ।
भाष्यार्थमाह **तावदेवेति** । न ह्यभावबुद्धिरौदासीन्यस्यानादिनः स्थाप- ११३ । १
नकारणं येन तदभावे कारणाभावादिदं न भवेदपि त्वपवादनिरासिकेत्याह
एतदुक्तमिति । अनादित्वादौत्सर्गिकमौदासीन्यं तच्चापवादनिवर्तकासन्नि-
धावप्यौत्सर्गिकस्येत्यत्र दृष्टान्तमाह **यथेति** । कमठः कूर्मः । यदौदासीन्यं
तत्प्रागभावरूपत्वादुक्तमपि न निवृत्तिहेतुस्ततः कर्तव्यत्वेन प्रसक्तक्रियाप्रति-
योगिकनिवृत्तिरूपेण‡ विशिष्टं निवृत्त्युपयोगि यद्भुन्यात्तन्नेति प्रसक्तक्रियानि-
वृत्तिरूपता चौदासीन्यस्य न सर्वदा क्रियाप्रसङ्गाभावात् । अतः काकवदुप-
लक्षणम् । तादृश्या निवृत्त्योपलक्ष्यौदासीन्यं विशिनष्टि भाष्यकार इत्याह
औदासीन्यमिति । ननु केयं प्रसक्तक्रियानिवृत्तिः । न तावद्धननादिप्रा-
गभावो ऽनादित्वादेव तद्बोधनस्यानुपयोगात् । नापि तद्ध्वंसः । प्रसक्तक्रि-
याया अनुदयेन ध्वंसायोगात् । उच्यते ।

हननोद्यतखड्गादेः परावर्तनमुच्यते ।
निवृत्तिरिति तस्मिन् हि हननं न भविष्यति ॥

एषा च निवृत्तिः नञर्थबोधफलं नञर्थस्तु हननगतेष्टसाधनत्वाभाव
एवेति । भाष्ये जैमिनीयमानर्थक्याभिधानं क्रियासंनिधिस्थार्थवादादिविषयमि-
त्युक्तम् । तदाम्नायस्य क्रियार्थत्वादिति हेतोस्तद्बलेनाक्रियार्थानाम्§प्रामा-
ण्यपूर्वपक्षस्य विध्येकवाक्यत्वेन प्रामाण्यमिति सिद्धान्तस्य च तद्विषयत्वो-
पलक्षणार्थमित्याह **पुरुषार्थानुपयोगीति** । स्वयं|| पुमर्थब्रह्मावगमपरत्व- ११४ । ४
मुपनिषदामसिद्धमित्याशङ्क्य भाष्यव्याख्यया परिहरति **यदपीत्यादिना** ।
अवगतब्रह्मात्मभावस्येति भाष्ये ऽवगतिशब्दाभिप्राय¶माह **सत्यमिति** ।

* बुद्ध्येति १ पु॰ पा॰ ।
† निरुणद्धी त २ पु॰ तै॰ पु॰ पा॰ ।
‡ निवृत्तिरूपत्वेनेति १ पु॰ पा॰ ।
§ अतदर्थानामिति २ पु॰ ।
|| स्वयमिति नास्ति २ पु॰ ।
¶ अवगतिशब्दार्थमिति ३ पु॰ ।

साक्षात्कारस्य स्वरूपत्वान्न निवर्तकतेति तत्राह **ब्रह्मसाक्षात्कारश्चेति** ।
आत्मानमपि स्वसाक्षात्कारम् इति श्रवणादिसंस्कृतमनोजन्यश्चेत्साक्षा-
त्कारः कथं तर्हि वेदप्रमाणजनितेति भाष्यमत आह **अत्र चेति** ।
अशरीरत्वं देहपातोत्तरकालमिति शङ्कायां सशरीरत्वस्य निमित्तवर्णनम-
युक्तमित्याशङ्क्याह **यदीति** । यदि सशरीरत्वं मिथ्यात्वाज्जीवत एव
ज्ञानेन निवर्त्यं तर्ह्यशरीरत्वमप्यभावत्वात्तथेत्याशङ्क्य न तत्त्वतः शरीर-
संबन्धो ऽभावोपलक्षितस्यातथात्वादित्याह **यत्पुनरिति** । भाष्ये तच्छ-
ब्देन न ह्यात्मन इति प्रस्तुतात्मपरामर्श इत्याह **तदितीति** । शरीर-
११५ । ९ संबन्धस्येत्याद्यसिद्धेरित्यन्तं भाष्यं व्याचष्टे **न तावदिति** । शरीरसंब-
न्धस्य धर्माधर्मयोरित्यादिप्रसङ्गादित्यन्तं भाष्यं विवृणोति **ताभ्यां त्विति** ।
आत्मनि स्वतो ऽसिद्धाभ्यां धर्माधर्माभ्यां जन्यशरीरसंबन्धं प्रति प्रोच्यमाणो*
वादी सिद्धे शरीरसंबन्धे धर्मादिसंबन्धः तत्सिद्धौ शरीरादिसंबन्ध इति
परस्पराश्रयं स्वपक्षे प्रापयतीत्यर्थः । धर्माधर्मव्यक्त्योः† शरीरसंबन्धव्य-
क्तेश्च‡ इतरेतरहेतुकत्वे यद्यपीतरेतराश्रयं§ तथापि न दोषो ऽनादित्वा-
दिति सत्कार्यवादी शङ्कते **यद्युच्येतेति** । तत्र नित्यसत्योर्व्यक्त्योर्न
हेतुहेतुमत्ता ऽभिव्यक्त्योस्तु कादाचित्क्योरितरेतराधीनत्वे एकस्य अप्र-
सिद्धेरन्धपरंपरातुल्या ऽनादिकल्पना|| स्यादित्याह **अन्धपरम्परेति** ।
सत्कार्यवादी व्यक्तिभेदेनेतरेतराश्रयं परिहरतीत्याह **यस्त्विति** । **किं
त्वेष इति** । इदानीन्तनशरीरसंबन्धहेतुरित्यर्थः । पूर्वं एवात्मशरीर-
संबन्धो विशेष्यते **पूर्वधर्माधर्मभेदजन्मन इति** । पूर्वाभ्यां धर्माधर्म-
,, । १८ विशेषाभ्यां जन्म यस्य स तथोक्तः । **एष त्विति** । वर्तमान इत्यर्थः ।
आत्मन्यध्यासप्रस्तावोक्तयुक्तिभिर्नैकोपि क्रियासंबन्धः कथमनन्तव्यक्तिसंभव
इति परिहरति इत्याह **तं प्रत्याहेति** । देहात्मसंबन्धहेतुर्मिथ्याभिमानः
प्रत्यक्ष इत्युक्तम् । तदाक्षिप्य समाधत्ते **ये त्विति** । अप्रसिद्धवस्तुभेद-
स्यान्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्ताविति प्रतिज्ञाय¶ संशयनिमित्तशब्द-

---

* अभिधीयमाण इत्यसङ्गतः पाठः २ पु॰ ।
† व्यक्त्योरिति १ पु॰ पा॰ ।
‡ व्यक्त्योश्चेति ३ पु॰ पा॰ ।
§ इतरेतराश्रय इति १ पु॰ पा॰ ।
|| अनादित्वकल्पनेति ३ पु॰ पा॰ ।
¶ प्रतिज्ञायामिति २-३ पु॰ पा॰ ।

प्रत्ययोदाहरणं भाष्ये ऽनुपपन्नमित्याशङ्क्य भ्रान्तिशब्देन समारोप उक्तः ।
अस्ति च संशयस्यापि समारोपत्वमित्याह **तत्र तु*** **पुरुषत्वमिति** । ११६ । ५
भ्रान्तेरप्युचितनिमित्तापेक्षणादकस्मादित्ययुक्तमित्याशङ्क्याह **शुक्लभास्वर-**
स्येति । साधारणधर्मिणि दृष्टे किं तन्मात्रं विपर्ययकारणमुत सादृश्या-
दिदोषमिलितम् । नाद्यः । धवलभास्वररूपस्य शुक्तिरजतसाधारण्ये सति
व्यवहितरजतनिश्चयात् प्रागेव संनिहितशुक्तिनिश्चयप्रसङ्गादित्यभिधाय
द्वितीयं दूषयति **संशयो वेति** । समानो धर्मो यस्य स तथोक्तः । दृष्टे
ऽपि साधारणे धर्मिणि निश्चयः स्याद्यद्यन्यतरकोटिनिर्णायकं प्रमाणं स्यात्
स्थाणुत्वइव शाखादिदर्शनं बाधकं वा प्रमाणं कोट्यन्तरमुपलभ्येत यथा
तत्रैव पुरुषत्वविपरीते† निश्चेष्टत्वादि नैवमिहेत्याह **उपलब्धीति** । उप-
लब्धिः साधकं प्रमाणम् अनुपलब्धिर्बाधकं तयोरभावो ऽत्राव्यवस्था । ततः
संशयो वा युक्त इत्यधस्तनेनान्वयः । ननु विशेषद्वयस्मृतौ संशय इह तु
रजतमेव स्मृतमिति विपर्यय एवेति तत्राह **विशेषद्वयेति** । अथ हेतु-
माह **संस्कारेति** । इतिशब्दो हेतौ । उद्बुद्धः संस्कारो हि स्मृतिहेतुस्तदु- ,, । १२
द्बोधहेतुश्च सादृश्यम् । तस्य द्विष्ठत्वेन शुक्तिरजतोभयनिष्ठत्वेन हेतुनो-
भयत्रैतत्सादृश्यं तुल्यमिति यतो ऽतः संशय एव युक्तः । न च रागाद्वि-
पर्ययो विरक्तस्यापि शुक्तौ रजतभ्रमादिति । एषा ऽत्र संशयसामग्र्यक्षपादेन
वर्णिता समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशे-
षापेक्षो विमर्शः संशय इति । समानधर्मः साधारणधर्मः । अनेकस्माद्व्या-
वृत्तौ साधारणो ऽनेकधर्मः । एवमिह विपर्ययनियामकं दृष्टं नास्तीत्युपपा-
द्याकस्माच्छब्द एवमभिप्राय इत्याह **अत इति** । कथं तर्हि दृश्यमानवि-
पर्ययनियमस्तत्राह **अनेनेति** । दृष्टं हेतुं प्रतिषिध्य कार्यनियमं प्रतिजानता
भाष्यकारेणादृष्टं कर्म हेतुत्वेनार्थादुक्तमिति । ननु तदपि समं किं न
स्यात्तत्राह **तत्रेति** । **श्रुतिस्मृतीरिति** । श्रुतिं स्मृतिं चेत्यर्थः‡ । साक्षा-
त्कारो हि दृष्टं फलं तादर्थ्ये मननादेर्वदन् भाष्यकारो विधिं न मृष्यत
इत्याह **तदिदमिति** । ११७ । ४

---

* तत्र ह्येति १–४ पु॰ पा॰ ।
† पुरुषविपरीतेति २ पु॰ पा॰ ।
‡ श्रुतीः स्मृतीश्चेत्यर्थ इति ३ पु॰ पा॰ ।

अत्रैके वदन्ति । अदृष्टश्रवणादेरवगत्युपायता कृतश्रवणादीनामपि केषांचिदिह साक्षात्कारासमुन्मेषात् तात्कालिकश्रवणादि*विधुरवामदेवादेरप्यपरोक्षज्ञानसमुदयाच्च जन्मान्तरकृतस्य च विधिमन्तरेण साधनभावानवकल्पनात् । श्रवणादिविध्यनभ्युपगमे च तद्विध्युररीकारप्रवृत्तप्रथमसूत्रभाष्यकदर्थनादयुक्तस्तदनभ्युपगम इति । तत्र न तावदनुष्ठितसाधनस्येह फलादर्शनं तद्विधिव्याप्तम् अनवरतं वैशेषिकाद्यसच्छास्त्रश्रवणेऽप्य†पटुमतीनां केषांचित्तच्छास्त्रार्थानवबोधदर्शनेऽपि तच्छ्रवणविध्यभावात् । नापि भवान्तरकृतकर्मण इह फलजनकता तद्विधिव्याप्ता । जातिस्मरस्य प्राचि भवे धनमुपार्ज्य भुवि निखन्य प्रमीतस्येह जन्मनि तदादाय भोगान् भुञ्जानस्यापि प्राग्भवीयधनोपार्जनायाः संप्रतितनफलार्थमविहिताया अपि हेतुभावोपलम्भात् । प्रथमसूत्रं तु शास्त्रीयविषयफलनिरूपकं न विधिविचारपरमिति । किं च ।

प्राधान्यं श्रवणादेर्न भवतामपि संमतम् ।
गुणकर्मत्वमत्रैव भाष्यकृद्भिर्निजुह्नुवे ॥

यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येतेत्यादिनेति ।

११७ । ८ **इत्युक्तमधस्तादिति** । गान्धर्वशास्त्राभ्यासवदपूर्वानपेक्षया साक्षात्कारहेतुतोक्तेत्यर्थः । गुणकर्म ह्युपयोक्ष्यमाणशेषो यथाऽवघातादि उपयुक्तशेषो वा यथा कृतप्रयोजनप्रयाजशेषाज्यस्य हविष्षु क्षारणं प्रयाजशेषेण हवींष्यभिघारयेदिति विहितम् । तदिहात्मन उपयुक्तोपयोक्ष्यमाणत्वाभावान्न तद्विषयं मननादि गुणकर्मेत्याह **तदपीति** । न च श्रवणादिसंस्कृतस्यात्मनः साक्षात्कारजन्मन्यस्त्युपयोग इति श्रवणादिगुणकर्मत्वसिद्धिः अपूर्वोपयोगिन एव गुणकर्मत्वाद् दृष्टे तु साक्षात्कारेऽपूर्वाभावेन तदयोगादिति । ननु बाह्यक्रियाविधिः प्रथमकाण्डे गतो मानसज्ञानविधिविचाराय पृथगारम्भ इति शङ्कापोहार्थमारभ्यमाणं चेति भाष्यम् । अहं ब्रह्मास्मीति वाक्यस्य तदर्थस्य चेतरप्रमाणावसानत्वमयुक्तं नित्यनिवृत्तिप्रसङ्गादित्याशङ्क्य ज्ञानपर इतिशब्द
,, । १९ इत्याह **इतिकरणेनेति** । विधीनामद्वैतज्ञानविरोधं दर्शयति **विधयो**

* ऐहिकश्रवणादीति २ पु॰ पा॰ । † श्रवणेऽपीति २ पु॰ पा॰ ।

हीति । त्र्यंशा भावना हि धर्मः । तद्विषया विधयः साध्यादिभेदाधिष्ठा-
नास्तद्विषयाः । अपि चैते ऽनुष्ठेयं धर्ममुपदिशन्तस्तदुत्पादिनः पुरुषेण तम-
नुष्ठापयन्तीति साध्यधर्माधिष्ठानास्तत्प्रमाणानीति यावदतो नित्यसिद्धाद्वैत-
ब्रह्मावगमे तेषां विरोध इत्याह **धर्मोत्पादिन इति** । न हीति हेतु-
भाष्यस्य प्रतीकोपादानम् । न हीत्यादिनिर्विषयाणीत्यन्तं भाष्यं व्याख्याति
अद्वैते हीति । विधेयनिषेध्यो वाक्यार्थभेदः साध्यसाधनादिपदार्थभेद स्त-
स्मादर्थभेदश्चाद्वैतावगतौ न भवतीति भाष्यार्थः । अप्रमातृकाणीत्येतद्व्या-
चष्टे **न च कर्तृत्वमिति** । ज्ञानकर्तृत्वमित्यर्थः । निर्विषयाण्यप्रमातृका-
णीति बहुव्रीहौ विशेषणपरौ । तथा सति हि विषयप्रमातृनिषेधयोर्हेतुत्व-
सिद्धिः । भाष्ये चकारः करणनिषेधार्थ इत्याह **तदिदमिति** । भाष्यस्थ- ११८ । १२
प्रमाणशब्दो भावसाधनत्वेन ज्ञानवाची ततश्चकारेण करणनिषेधः । पुत्रा-
दावहमित्यभिमानो गौणात्मा चेत्तर्हि मुख्यात्मना किं गुणसाम्यमत आह
यथेति । वाहीको नाम देशविशेषस्तन्निवासी तच्छब्दोक्तः । पुत्रादेरुपकार-
कत्वारोपाद्य आत्माभिमानस्तस्मिन्निवृत्ते ममत्वबाधनेत्याह **गौणात्मन
इति** । श्रवणादिप्रमाणबाधमुक्त्वा प्रमित्यभावमाह **न केवलमिति** । बो-
धीतीनन्तपाठो व्याख्यातः । सप्तम्यन्तस्तु निगदव्याख्यातः । नियतप्राक्सत्त्वं
हि कारणत्वं प्रमात्रादिश्च ज्ञानकरणं तस्मिन् सकृदुदिततत्त्वसाक्षात्कारान्नि-
वृत्ते नोर्ध्वं ज्ञानानुवृत्तिरित्यर्थपरत्वेन प्रथमार्धं व्याख्याय प्रमातृलये फलिनो
ऽभावाद् मोक्षस्यापुमर्थतेति शङ्कां द्वितीयार्धव्याख्यया निरस्यति **न च प्र- ११९ । १
मातुरिति** । अन्वेष्टव्यः परमात्मा ऽन्वेष्टुः प्रमातृत्वोपलक्षिताच्चिदेकरसान्न
भिन्नस्ततो ऽध्यस्तप्रमातृत्वबाधे ऽप्युपलक्षित आत्मैव पापदोषादिरहितो
ऽन्विष्टो विदितः स्यादतो नोक्तदोष इत्यर्थः । ननु यद्यन्वेष्टुरात्मभूतं ब्रह्म
किमिति तर्हि संसारे न चकास्ति तत्राह **उक्तमिति** । प्रमात्रादेस्तत्त्व-
ज्ञानहेतुतां सिद्धवत्कृत्य ज्ञानात्तन्निवृत्तौ हेत्वभावात्फलाभाव उक्तः । स न
बाध्यस्य प्रमात्रादेः प्रमानुत्पादकत्वापातादु इति शङ्कान्तरत्वेन तृतीयश्लोकं
व्याख्याति **स्यादेतदिति** । यदलीकं तन्न प्रमाहेतुरिति व्याप्तिं प्रशिथिल-
यति **एतदुक्तमिति** । य उत्पद्यते ऽनुभवो न स पारमार्थिको यः पार-
मार्थिको न स उत्पद्यते ऽतश्चाप्रमाणात् कथं पारमार्थिकानुभवोत्पत्तिरित्य-

यमिष्टप्रसङ्ग इत्याह **न चायमिति** । वृत्तावपि प्रतिबिम्बितचिदंशः सत्यो ऽस्ति तत उक्तम् **एकान्तत इति** । ननु वृत्तिरूपसाक्षात्कारो ऽलीकत्वादविद्यात्मकः कथमविद्यामुच्छिन्द्यादविद्या वा कथं स्वविरोधिनं तं जनयेदत आह
११९ । १७ **अविद्या त्विति** । अलीकस्यापि सत्यविषयत्वादविद्यानिवर्तकत्वोपपत्तिः । दृष्टं च स्वप्नोपलब्धव्याघ्रादीनां स्वोपादानाऽविद्यानिवर्तकत्वमिति भावः । अविद्यामयी वृत्तिर्यद्यविद्यामुच्छिन्द्यात्तामेव स्वनिवर्तिकामविद्यां जनयेद्द्वाभयथा ऽप्युक्तमार्गेण न का चिदनुपपत्तिरित्यर्थः । विद्यां वृत्तिमविद्यां च* कार्यकारणभावेन सहिते यो वेद सो ऽविद्योपादानत्वेन तन्मय्या वृत्त्या तदुपादानं मृत्युमविद्यां तीर्त्वा स्वरूपभूतविद्योपलक्षितममृतमश्नुतइति श्रुतेरर्थः ॥

भाष्योदाहृतश्रुतयो व्याख्यायन्ते उत्तरत्रापि तत्तदधिकरणसमाप्तौ श्रुतयो व्याख्यास्यन्ते । **सदेवेति** । सदित्यस्तितामात्रमुक्तम् । एवशब्दो ऽवधारणार्थः । किं तदवध्रियतइत्यत आह **इदमिति** । यदिदं व्याकृतं जगदुपलभ्यते तदग्रे प्रागुत्पत्तेर्विकृतरूपपरित्यागेन सदेवासीत् हे सोम्य प्रियदर्शनेति श्वेतकेतुः पित्रा संबोध्यते । मा भूत्स्थूलं†पृथिवीगोलकादीदम्बुद्धिग्राह्यं प्रागुत्पत्तेः अन्यत्तु महदादिकं किमासीन्नेत्याह **एकमेवेति** । स्वकार्यपतित‡मन्यन्नासीदित्यर्थः । मृदो घटाकारेण परिणमयितृ कुम्भकारवत् किं सतो ऽन्यन्निमित्तकारणमासीद् नेत्याह **अद्वितीयमिति** । आत्मेतीत्यात्मा परमकारणं वै इति जगतः प्रागवस्थां स्मारयति । इदमित्यादिपदव्याख्या पूर्ववत् । तदिति प्रकृत आत्मा परामृश्यते य इन्द्रो मायाभिः पुरुरूप ईयतइत्युक्तः । नपुंसकप्रयोगस्तु विधेयब्रह्मापेक्षः । तदेतदेव यद् ब्रह्म तद्वा किंलक्षणमित्यत आह **अपूर्वमिति** । नास्य पूर्वं कारणं विद्यतइत्यपूर्वम् । अकार्यमित्यर्थः । तथा नास्यापरं कार्यं वास्तवं विद्यतइत्यनपरम् अकारणमिति यावत् । नास्यान्तरं जात्यन्तरम् अन्तराले विद्यतइत्यनन्तरम् । दाडिमादिवत्स्वगतरसान्तरविधुरमित्यर्थः । एवंविधमन्यदपि कूटस्थमेतदनात्मकतया बाह्यमस्य न विद्यतइत्यबाह्यमिति । यत्पु-

---

* विद्यां चरमवृत्तिमविद्यां चेति २ पु. पा. । विद्यावृत्तिमविद्यां चेति तै. पु. पा. ।
† मा भूत्तत्स्थूलमिति २ पु. पा. । ‡ स्वकार्यमध्यपतितमिति २ पु. पा. ।

रस्माद् दृश्यमविद्यादृष्टीनामब्रह्मेव प्रतिभासते तत्सर्वमिदममृतं ब्रह्मैव वस्तुत इत्यर्थः । तथा पश्चाद्दक्षिणतः इत्यादिमन्त्रशेषेण सर्वात्मत्वमवगन्तव्यम् । संपतत्यस्मादमुं लोकं फलभोगायेति सम्पातः कर्म तद्यावत्तावदुषित्वा आवर्तन्तइति । इष्टं श्रौतम् । पूर्तं स्मार्त्तम् । दत्तं दानम् । परमार्थतः शरीरसंबन्धरहितं वाव एव सन्तं भवन्तम् । तमात्मानं वैषयिके प्रियाप्रिये न स्पृशतः । एवं परमार्थतो ऽशरीरं शरीरेष्वनवस्थेष्वनित्येष्ववस्थितं नित्यं महान्तम् । महत्त्वमापेक्षिकमित्याशङ्क्याह विभुम् । मन्तृमन्तव्यभेदनिषेधार्थमाह आत्मानमिति । ईदृशमात्मानं मत्वा धीरो धीमान्न शोचति । प्राणः क्रियाशक्तिः परमार्थतो न विद्यते यस्य सो ऽप्राणः । तथा ज्ञानशक्तिमन्मनो यस्य नास्ति सो ऽमनाः । क्रियाशक्तिमत्प्राणनिषेधेन तत्प्रधानानि कर्मेन्द्रियाणि ज्ञानशक्तिमन्मनोनिषेधेन तत्प्रधानानि ज्ञानेन्द्रियाणि च सविषयाणि निषिद्धानि । यस्मादेवं तस्माच्छुभ्रः शुद्ध इति । स्वप्नाद्यवस्थाकृतकर्मस्वकर्त्तात्मेत्युक्तं स यत्तत्र किंचित्पश्यत्यनन्वागत*स्तेन भवतीति पूर्ववाक्ये तत्र हेतुरुच्यते असङ्गो हीति । मूर्त्तं हि मूर्त्तान्तरेण संसृज्यमानं सृज्यते । आत्मा स्वयं पुरुषो न मूर्त्तः । अतो न केन चित्सृज्यतइत्यसङ्गः । अतो न कर्त्तेति । धर्मादधर्मात्तत्फलसुखदुःखाच्च कृतात् कार्यप्रपञ्चाद् अकृतात्कारणाद् अन्यत्र पृथग्भूतभूतादेः कालादन्यत्र तेनानवच्छेद्यं चेत्पश्यसि तद्वदेति मृत्युं प्रति नचिकेतसः† प्रश्नः । अस्य विदुषो ऽप्रवृत्तफलानि कर्माणि तस्मिन् परावरे ब्रह्मणि आत्मत्वेन दृष्टे क्षीयन्ते । परं कारणम् । अवरं कार्यम् । तद्रूपे तदधिष्ठाने । ब्रह्मणः स्वभावमानन्दं विद्वान् । यदस्मिन्देहे जलसूर्यवत् प्रविष्टं ब्रह्म जीवाभिधं तदाचार्येण बोध्यमानमात्मानमेव विधूतकल्पनमवेद् विदितवत् । किं साङ्गमतइव द्वैतमध्ये । न । अपि तु अहं ब्रह्माद्वितीयमस्मीति । तस्मादेव विज्ञानादविद्याकृतासर्वत्वनिवृत्त्या‡ तद् ब्रह्म सर्वमभवत् । यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानत इति यः सर्वात्मभावो विद्याभिव्यक्त उक्तः तत्रात्मनि तत्र वाज्ञानकाले आत्मैकत्वं पश्यतः को मोहः । तत्य-

---

* अनन्वागम इति २ पु॰ पा॰ । † नाचिकेतस इति ३ पु॰ पा॰ ।

‡ अविद्याकृताऽसर्वत्वनिवृत्त्येति २ पु॰ पा॰ ।

दलक्ष्यं ब्रह्म एतदात्मभावेनावस्थितमहमस्मीति पश्यन्नेतस्मादेव दर्शनादृषिः वामदेवाख्यः परं ब्रह्म अविद्यानिवृत्तिद्वारा प्रतिपन्नवान् किलेति । हशब्दो व्यवधानेन संबन्धनीयः । स एतस्मिन्दर्शने स्थितः सर्वात्मभावप्रकाशकानहं मनुरित्यादीन्मन्त्रांश्च ददर्श भारद्वाजादयः षड्ऋषयः परं विद्याप्रदं पिप्पलादं गुरुं* विद्यानिष्क्रयार्थमनुरूपमन्यदपश्यन्तः पादयोः प्रणम्य प्रोचुः । त्वं ह्यस्माकं पिता ब्रह्मशरीरस्याजराऽमरस्य† विद्याया जनयितृत्वाद् इतरौ तु शरीरमेव जनयतः । जनयितृत्वमपि सिद्धस्यैवाविद्यानिवृत्तिमुखेनेत्याह यस्त्वं नः अस्मानविद्यामहोदधेः परमपुनरावृत्तिलक्षणं पारं तारयसि विद्यालवेनेति प्रश्नोपनिषत् । श्रुतं ह्येव मे इत्यादिच्छन्दोग‡श्रुतिः सनत्कुमारनारदसंवादरूपा । तथापि तारयत्वित्यन्तमुपक्रमस्थं वाक्यं शेषमाख्यायिकोपसंहारस्थं वाक्यान्तरम् । मम भगवद्दृशेभ्यो भगवत्सदृशेभ्यः इदं श्रुतम् । यत्तरति शोकं मनस्तापमकृतार्थबुद्धिमात्मविदिति । सो ऽहमनात्मवित्त्वाच्छोचामि अतस्त्वं मां शोकसागरस्य परमन्तं भगवांस्तारयतु आत्मज्ञानोडुपेनेति । वल्कलादिवच्चित्तरञ्जको रागादिकषायो मृदितः क्षालितो विनाशितो यस्य ज्ञानवैराग्याभ्यासक्षारजलेन तस्मै नारदाय तमसो ऽविद्यालक्षणस्य§ पारं परमार्थतत्त्वं दर्शितवान् ।

संवर्गविद्यायां श्रूयते । वायुर्वाव संवर्गो यदा वा अग्निरुद्वायति उपशाम्यति वायुमेवाप्येति प्रलीयते|| । यदा सूर्यो ऽस्तमेति वायुमेवाप्येति । यदा चन्द्रो ऽस्तमेति वायुमेवाप्येति । यदा ऽऽप उच्छुष्यन्ति वायुमेवापियन्ति वायुर्ह्येवैतान्सर्वान्संवृङ्क्ते इत्यधिदैवम्¶ । अथाध्यात्मम् । प्राणो वाव संवर्गो यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मन इति । तद् ब्रह्मविदि तत्कार्यादन्यदेव । अथो अपि अविदितात्कारणात् अधि उपरि अन्यदित्यर्थः । येन प्रमात्रा इदं सर्वं वस्तु विजानाति लोकः तं केन करणेन विजानीयात् करणस्य ज्ञेयविषयत्वात्प्रमातरि वृत्त्य-

---

* गुरुमिति नास्ति १ पु॰ । † अजरामरणस्येति ३ पु॰ पा॰ । ‡ छान्दोग्येतिपा॰ २ पु॰ पा॰ ।
§ अविद्याख्यस्येति ३ पु॰ पा॰ । || प्रलीयते इति २ नास्ति ।
¶ अधिदैवतमिति २ पु॰ पा॰ ।

नुपपत्तेः । तस्मात्प्रमाता ऽपि न ज्ञेयः किमु तत्साक्षीत्यर्थः । यद्वाचा शब्देनानभ्युदितम् अप्रकाशितम् । येन ब्रह्मणा सा वागभ्युद्यते प्रकाश्यते इत्यविषयत्वम् उपन्यस्याह तदेवात्मभूतम् प्रमातृत्वादिकल्पना अपोह्येत्येवकारार्थः । ब्रह्म महत्तम*मिति त्वं विद्धि हे शिष्य यदुपाधिविशिष्टं देवतादीदमित्युपासते जनाः इदं त्वं ब्रह्म† न विद्धीति यस्य ब्रह्मा ऽमतमविषय इति निश्चयः तस्य तद् ब्रह्म मतं सम्यग् ज्ञातं यस्य पुनर्मतं विषयतया मतं ब्रह्मेति‡ मतिर्न स वेद ब्रह्मभेदबुद्धित्वात् । एतौ विद्वदविद्वत्पक्षावनुवदत्येवमेवेति नियमार्थम् । अविज्ञातमिति§ । विषयत्वेनाविज्ञातमेव ब्रह्म सम्यग्विजानतां विज्ञातमेव विषयतया भवति । यथावदविजानतां दृष्टेश्चक्षुर्जन्यायाः कर्मभूताया द्रष्टारं स्वभावभूतया नित्यदृष्ट्या व्याप्तारं दृश्यया ऽनया न पश्येः|| । विज्ञातेर्बुद्धिधर्मस्य निश्चयस्य विज्ञातारमिति पूर्ववत् । तयोर्जीवपरयोर्मध्ये एको जीवः पिप्पलं कर्मफलम् अन्यः परमात्मा ऽभिचाकशीति पश्यत्येव नाश्नाति । आत्मीयं शरीरम् आत्मा शरीरादिसंयुक्तमात्मानमित्यर्थः ।

एको देवो गूढः छन्नः सर्वव्यापित्वं न गगनवत् किं तु सर्वभूतान्तरात्मा कर्माध्यक्षः कर्मफलप्रदाता सर्वभूतानामधिवासो ऽधिष्ठानम् । साक्षित्वे हेतुश्चेतेति । चैतन्यस्वभाव इत्यर्थः । केवलो दृश्यवर्जितः निर्गुणो ज्ञानादिगुणवान् न भवति । स आत्मा परितः समन्तात् अगात्सर्वगतः । शुक्रमित्यादयः शब्दाः पुंल्लिङ्गत्वेन परिणेयाः स इत्युपक्रमात् । अकायो लिङ्गशरीरवर्जितः । अव्रणो ऽक्षतः । अस्नाविरः शिरारहितः । अव्रणा ऽस्नाविरत्वाभ्यां स्थूलदेहराहित्यमुक्तम् । शुक्र इति बाह्याशुद्धिविरह उक्तः । शुद्ध इत्यान्तररागाद्यभावः । अपापविद्धो धर्माऽधर्मरहितः । भाष्ये ऽनाधेयातिशयत्वनित्यशुद्धत्वयोः पूर्वसिद्धवदुक्तहेत्वोः सिद्धिमेतौ मन्त्रौ दर्शयत इति बोद्धव्यम् । आत्मानं साक्षिणमयं परमात्मा ऽस्मीत्यपरोक्षतया जानीयाच्चेत् कश्चित्पुरुषश्चेच्छब्दः आत्मसाक्षात्कारस्य दुर्लभ-

---

* महत्त्वमिति २ पु॰ पा॰ । † इदं त्वं मनसा ब्रह्मेति २ पु॰ पा॰ ।
‡ मतमिदं ब्रह्मेति २ पु॰ पा॰ । § अयं प्रतीकः १-२ पु॰ नास्ति ।
|| न दृश्यया ऽनया पश्येरिति १ पु॰ पा॰ ।

त्वप्रदर्शनार्थः । स स्वव्यतिरिक्त*मात्मनः किं फलमिच्छुः कस्य वा पुत्रादेः कामाय प्रयोजनाय तदलाभनिमित्ततया शरीरं संतप्यमानमनु तदुपाधिः सन् संज्वरेत् संतप्येत । निरुपाध्यात्मदर्शिनो नान्यदस्ति प्रयोजनं नाप्यन्यः पुत्रादिरित्याक्षेपः । य आत्मा चतुर्थे ऽथात आदेशो नेति नेतीति वाक्येन विश्वदृश्यनिषेधेन व्याख्यातः स एष पञ्चमे ऽध्याये निरूप्यतइत्यर्थः । यथेन्द्रियादिभ्यः परं परमासीन्नैवं पुरुषादस्ति किं चित्परं सा पुरुषलक्षणा काष्ठा ऽवधिः सूक्ष्मत्वमहत्त्वादेः सैव गतिः परः पुरुषार्थः । यस्योदाहृतसविशेषब्रह्मणो पृथिव्येव यस्यायतनमित्युपक्रम्योपन्यस्तानामधिष्ठानं तमौपनिषदमुपनिषद्भिरेव विज्ञेयम् । विशेषणस्य व्यावर्तकत्वादयमर्थो लभ्यते । पुरुषं त्वा त्वां पृच्छामि हे शाकल्येति याज्ञवल्क्यस्य प्रश्नः । अत्र ब्रह्म समश्नुतइति पूर्ववाक्ये जीवन्मुक्तिरुक्ता । तत्र देहे वर्तमानो ऽपि पूर्ववन्न संसारीत्यत्र दृष्टान्तः । तत्तत्र यथा ऽहिनिर्ल्वयिनी अहित्वग् वल्मीकादौ प्रत्यस्ता प्रक्षिप्ता मृता प्राग्वदहिना ऽऽत्मत्वेनानभिमता शयीत वर्तेत एवमेवेदं विद्वच्छरीरं मुक्तेन पूर्ववदात्मत्वेनानभिमतं शेते । अथायं सूर्यस्थानीयो जीवन्मुक्तः शरीरे वर्तमानो ऽप्यशरीरः । अहिरपि हि त्यक्तत्वचा संयुक्तो ऽपि तामहमिति नाभिमन्यते । अशरीरत्वादेवामृतः प्राणिति जीवतीति प्राणः निरुपाधिः सन्नित्यर्थः । एवं च ब्रह्मैव तच्च ब्रह्मतेज एव विज्ञानज्योतिः परमार्थविवेकतो ऽचक्षुरपि बाधितानुवृत्त्या सचक्षुरिवेत्यादिश्रुत्यन्तरयोजना† ॥

इति चतुःसूत्री समाप्ता ॥

---

* स्वस्वरूपव्यतिरिक्तमिति २ पु. पा. ।

† अत्र समन्वयाधिकरणं चतुर्थं संपूर्णम् । अत्र–तत्तु समन्वयात् ४ इत्येकं सूत्रम् ॥

परमा परमानन्दबोधसल्लक्षणाश्रितम् ।
यमाश्लिष्यति सर्वज्ञं तं वन्दे पुरुषोत्तमम्* ॥

ईक्षतेर्नाशब्दम् ॥ ५ ॥

कार्यान्वयमिति श्लोकपूरणार्थं एवकारः । स्वयं पुरुषार्थं १२० । ३
इति संबन्धः । यदि सर्वज्ञे वेदान्तप्रामाण्यं सिद्धं किमधिकरणान्तरेणात
आह **तच्चेति** । सर्वज्ञे जगत्कारणे समन्वयप्रदर्शनेन चेतनं तदित्युपक्षिप्तम् । तदाक्षिप्य समर्थ्यतइति सङ्गतिः । प्रयोजनं तु तत्त्वमसीति तच्छब्दवाच्यप्रधानैक्यसम्पत्तिः पूर्वपक्षे सिद्धान्ते तु चेतनस्य ब्रह्मैक्यमिति । **जीवाणुव्यतिरिक्तेति** कारणस्य जीवव्यतिरेकेण जीवा एव स्वकर्मद्वारा कर्तार इति मतं निरस्तम् । अणुव्यतिरेकेणाणुसङ्घातवादः । चेतनग्रहणेन प्रधानवादः । **परमाणव इति** सिद्धान्ताद्भेद इति । **आदिग्रहणेनेति** । सांख्यादय इति भाष्ये इति । **अनुमानवाक्येति** ।
सिद्धान्ते अनुमानानि वाक्यानि च बीजमन्यत्र तु तदाभासा इति । **ज्ञानेति** । ,, । १९
सर्वजननशक्तिः सर्वविषयज्ञाने ब्रह्मणो न स्तः कुतस्तस्य ज्ञानक्रियाशक्त्यभावात् ज्ञानक्रिययोः शक्ती ज्ञानक्रियाशक्ती तयोरभावादित्यर्थः । यस्य हि किंचिन्मात्रजननशक्तिः किंचिन्मात्रज्ञानशक्तिर्वा न संभवति कुतस्तस्य सर्वविषयजननशक्तिः सर्वविषयज्ञानं च भवेताम् । शक्तिद्वयाभावे हेतुमाह **अपरिणामिन इति** । कार्यान्नेये हि शक्ती कार्ये च ज्ञानक्रिये नास्य स्तोऽपरिणामित्वादित्यर्थः । प्रधाने तु परिणामित्वादस्ति संभव इत्यर्थः । नन्वपरिणामिन्यपि ज्ञानगुणः प्रयत्नगुणश्च किं न स्यातामत आह **एकत्वाच्चेति** । एकरूपत्वान्निर्गुणत्वादित्यर्थः । अथ वा ऽपरिणामित्वं साधयति निरवयवत्वादिति यावत् । ननु चेतनत्वादपरिणाम्यपि सर्वज्ञमत आह **स्वरूपेति** । अवृत्तिकं सर्वविषयपरिणामरहितम् । नन्वावृतज्ञाना जीवा ब्रह्म तु अनावृतं किं न सर्वज्ञमत आह **न च स्वरूपेति** । ज्ञानकर्तृत्वं हि ज्ञातृत्वमित्यर्थः । अङ्गीकृत्यापि स्वरूपस्य कार्यतामाह **कार्यत्वे चेति** ।
स्यादेतत् । कथमचेतनं चेतनानधिष्ठितं प्रवर्ततात आह **भोगेति** । पुरुषा- १२१ । ७
र्थेन प्रयुक्त आक्षिप्तश्चासावनादिः प्रधानपुरुषसंयोगः प्रधानस्य पुरुषं प्रति पा-

---

* अयं श्लोकः केषु चित्पुस्तकेषु नास्ति

राध्यलक्षणः संबन्धस्तन्निमित्तः सर्ग इति गौणश्चे*दित्यादिसूत्रनिरस्याः
१२१ । ११ शङ्काः सौकर्यार्थमेकत्र लिखति **तदैक्षतेत्यादिना** । वृद्धाः शबरस्वा-
मिनः । यज्ञपुरुषस्य शिरो ह वा आग्नेयो हृदयमुपांशुयाज इति प्रधाना-
१ ग्नेयप्रायवचनात् प्रधानकर्मोपांशुयाज इत्युक्त्वा लोके ऽप्युदाहरति **यथा-
ग्न्येत्यादि** । अग्न्यः श्रेष्ठः । कथं नित्यस्य जीवस्य प्रधाने लयो ऽत आह
प्रधानांशेति । प्रधानस्यांशस्तमोगुणस्तस्योद्रेके जीवो निद्रां कुर्वंस्तत्र मग्न
इव भवत्यतश्च विवेकाभावाल्लयोपचारः प्रमाणविपर्ययविकल्पनिद्रास्मृतय†
इति सूत्रोक्ता निद्रा ऽतो ऽन्या वृत्तयो ऽभावं प्रत्ययन्ते प्रतिगच्छन्त्यस्मि-
न्नित्यभावप्रत्ययस्तमस्तदालम्बना जीवस्य या वृत्तिः सा निद्रेति पातञ्जल-
सूत्रार्थः । **सर्वज्ञं प्रस्तुत्येति** । स कालकालो गुणी सर्वविद्य इतीति
प्रधानकारणपक्षे ऽपि योजयितुं शक्यतइति सर्वशक्तित्वं तावत्प्रधानस्या-
प्युपपद्यते इति च भाष्ये ऽपिकारदर्शनादनवधारणेनाच पूर्वपक्ष इति के
१२२ । ,, चिद्व्याचक्षते तद्व्यावर्तयति **अपिकाराविति** । इह हि गौणश्चेदितीक्षणे
गौणत्वशङ्का मुख्येक्षणवतो ब्रह्मणः कारणत्वासंभवनिश्चयवत एव । तथा च
नानवधारणम् । तत्परतयैव वेदान्तवाक्यानि योजयतीति च भाष्यं विपर्ययेण
पूर्वपक्षं द्योतयति । यदा योगैश्वर्यात्‡ सत्त्वं निरतिशयोत्कर्षं भवति तदा
तत्सर्वज्ञत्वे बीजं भवतीति सूत्रार्थः । निरतिशयतां सत्त्वस्य तत्कार्यज्ञानस्य
निरतिशयसाधनेनोपपादयति **यत्खल्विति** । **कुवलं** बदरम् । ज्ञानत्वं
निरतिशयकिंचिदाश्रितं सातिशयवृत्तिजातित्वात् परिमाणत्ववदिति समुदाया-
र्थः । निरतिशयत्वे कथं सर्वविषयता । न हि नभःपरिमाणं सर्वविषयमत
आह **इदमेवेति** । ज्ञेयभूम्ना हि ज्ञानभूमा ततो निरतिशयत्वं सर्वविषयत्व-
मानयतीत्यर्थः । **अपिभ्याम्** एवकारार्थत्वेन व्याख्याताभ्याम् । **सिंहाव-
लोकितेनेति** पुनरुक्तिपरिहारः । चकारो विशेषवाची तुशब्दसमानार्थः ।

नन्वनुमानसिद्धानुवादिषु वेदान्तेषु कथमीक्षतिश्रवणाद् ब्रह्मनिर्ण-
१२३ । १४ यस्तत्राह **नामरूपेति** । **प्रवेदयिष्यते** तर्कपादे§ । **पौर्वापर्येति** ।
पौर्वापर्यमुपक्रमोपसंहारौ । परामर्शो मध्ये निर्देशः । एभिर्यदाम्नायो

---

* व्याससूत्र० अ० १ पा० १ सू० ६ । † पातञ्जलयोगसूत्र० अ० १ पा० १ सू० ६ ।
‡ योगैश्वर्यवशादिति २ पु० पा० । § व्या० सू० अ० २ पा० २ ।

मुख्यवृत्त्या वदेत्तदेव जगद्बीजं स चाम्नायश्चेतने मुख्यो न प्रधान इति । भवतु ब्रह्मणि प्रकृतिर्मुख्या प्रत्ययः कथं मुख्य इति शङ्कते **नन्विति । अत एव** नित्यज्ञानत्वादेव । यदबाध्यपरिणामित्वान्न ज्ञानं १२४ । ६
ब्रह्मण इति तत्राह **यद्यपि चेति** । उपाध्यपेक्षं ज्ञातृत्वं गौणमित्याशङ्क्य पारमार्थिकेक्षितृत्वासंभवादिदमेव मुख्यमित्याह **परैरपीति । चैतन्यसामानाधिकरण्येनेति** । यत्रात्मनि स्वरूपभूतं चैतन्यं तत्रैव ज्ञातृत्वोपलब्धेस्तस्य च परिणामानभ्युपगमात्परैरित्यर्थः । ननु किं चितिशक्तेर्ज्ञातृत्वेन प्रधानविकारा एव ज्ञास्यन्ति नेत्याह **न हीति** । भवतु कापिलमतेऽलीकं ज्ञातृत्वं भाट्टे* तु तात्त्विकं तदनभ्युपगच्छतस्तत्र गौणं स्यादत आह **नित्यस्येति** । अस्तु तर्हि न्यायमते वास्तवमत आह **कूटस्थेति** । अव्यापारवत इति च्छेदः । धर्मो गुणः । **उपरिष्टात्** ज्ञोऽत एव† इत्यादौ । औपाधिकमीक्षणकर्तृत्वमित्यत्र श्रुती दर्शयति **तथा चेति** । जातज्ञानेनोपलक्षितं तद्विषयनानारूप‡व्याचिकीर्षावद्भवति । अयं धर्मद्वययोग उपचयः । ततोऽन्नमभिजायत इत्येतद्व्याचष्टे **व्याचिकीर्षायां चेति** । उत्पन्नव्याचिकीर्षया§ नामरूपप्रपञ्चस्य व्यक्तिरभिजायत इत्युक्त्वाऽन्नशब्देन नामरूपमुच्यते तत्र निमित्तं प्रसिद्धान्नगुणयोगमाह **साधारणमिति** । अन्ना- १२६ ।
दिति क्रमार्था पञ्चमी व्याचिकीर्षितत्वानन्तरमित्यर्थः । हिरण्यगर्भसृष्टिः सूक्ष्मभूतसृष्ट्यनन्तरमिति द्रष्टव्यम् । मणीनामिव सूत्रं जगतो विधारकः सूत्रात्मा । समुदाये सिसृक्षिते प्रथममेकदेशोत्पत्तौ निदर्शनमाह **यथेति** । मन इत्यादावपि पूर्वपूर्वसर्गोऽनन्तरमिति द्रष्टव्यमित्याह **तस्माच्चेति** । **मनआख्यमिति** । व्यष्टि मन इत्यर्थः । सङ्कल्पादिवृत्तिव्यक्तीकरणात्मकं तत्कारणमिति यावत् । सत्यमित्यस्यार्थमाह **आकाशादीनीति** । स्थूलानीत्यर्थः । तेषु हि पृथिव्यादिभूतत्रयम् अपरोक्षत्वात्सद्वाय्वाकाशौ परोक्षत्वात्त्यमिति सत्त्वशब्दप्रयोगः । कर्मसृष्टिं सिद्धवत्कृत्य श्रुत्या कर्मसु चेत्युक्तं तामाह **तेष्विति** । सप्तमी निमित्तार्था । **ज्ञानमयम्** इत्यौपाधिकमीक्षणमुक्तम् । अन्नात्प्राण इत्यत्र पञ्चम्याः क्रमार्थत्वस्वीकारादिहापि तत्प्रसङ्गमाशङ्क्याह **पूर्वस्मादिति** । नियतपूर्वकालवर्तित्वं कारणत्वं तच्छब्दार्थ ,, । १९

---

* भाट्टमते इति ५ पु· पा· ।

† व्या· सू· अ· २ पा· ३ सू· १८ ।

‡ नामरूपेति १ पु· पा· ।

§ व्याचिकीर्षायामिति ३ पु· ।

इत्यर्थः* । नियतपूर्वसतः सर्वज्ञाज्जायमानस्य हिरण्यगर्भब्रह्मणः पर-
१२६ । १५ कालवर्तित्वेन कार्यत्वमेतच्छब्दार्थ इत्याह एतदिति । नाम देवदत्त इत्यादि । रूपं शुक्लादि । मुमुक्षोश्चेति । तन्निष्ठस्ये†ति सूत्रार्थानुकर्षः । अयथाभूतप्रधानात्मत्वोपदेशश्च मुक्तिविरोधी । यदवादि यत्प्राये ऽयत इति तत्राह संशये चेति ।

द्वितीये स्थितम्—विशये प्रायदर्शनात्‡ । वत्समालभेत वत्सनिकान्ता हि पशव इत्यत्र§ किमालभतिर्यजिमत्कर्माभिधान उत स्पर्शमात्रवचन इति संशये वायव्यं श्वेतमालभेतेत्यादावालभतिः प्राणिद्रव्यसंयुक्तो यजिमत्कर्माभिधानो दृष्ट इतीहापि तथात्वे प्राप्ते राद्धान्तः । वायव्यादौ द्रव्यदेवतासम्बन्धाद्यागप्रतीतेर्यजिमत्संज्ञपनाभिधाय्यालभतिः । इह तु न द्रव्यदेवतासम्बन्धाभावात् किं तु गोदोहनादिसंस्कारकर्मसंनिधौ श्रवणात् स्पर्शमात्रसंस्कारकर्मवचन इति ।

" । २१ प्रकृते वैषम्यमाह इह त्विति । ब्राह्मणः अयनमाश्रयो यस्य स्वयं त्वाभास इति आरोपे सादृश्यनियमभङ्गाय मरीच्युदाहरणम् । चेतनभेदारोपे चन्द्रभेदः । पातञ्जलादिमते ऽप्याह न चेति । तन्मते कार्याणामधिष्ठातुरुपादानाच्च भेदात् श्रुतौ च तदभावादित्यर्थः । चेतनं कारण॥मिति प्रतिपाद्ये तत्सत्त्वोक्तिरनर्थिकेत्याशङ्क्याह¶ सदिति । अधिकरणानुक्रमणे उक्तो ऽर्थो भाष्यारूढः क्रियते तथापीत्तितेति । सिद्धान्ते ऽप्यनिर्वाच्या त्रिगुणा** ऽस्ति माया तत उक्तं पारमार्थिकेति । तेनापीति । चेतनकारणेनात्मन एव बहुभवनकथनेनेत्यर्थः । आकाशोपक्रमसृष्टिश्रुत्या तेजःप्राथम्यश्रुतेर्वियदधिकरण††सिद्धान्तो नास्तीति कृत्वा चिन्तयैव विरो-
१२७ । २० धमाह यद्यपीति । छान्दोग्ये हि तासां त्रिवृतं त्रिवृतमेकैकामकरोदिति तिसृणां देवतानां तेजोऽबन्नानामेव त्रिवृत्करणमनन्तरं वक्ष्यति न गगनपवनयोस्तत्र च तेजः प्रथममिति स्वरूपोत्पत्तावपि तदुपचार इति ।

---

* ऽन्यर्थ इति नास्ति २ पु॰ ।
† व्यास सू॰ अ॰ १ पा॰ १ सू॰ ७ ।
‡ जै॰ सू॰ अ॰ १ पा॰ ३ सू॰ १६ ।
§ इत्युपक्रम्येति २ पु॰ पा॰ ।
|| चेतनकारणेति २ पु॰ पा॰ ।
¶ आशङ्क्येति नास्ति २ पु॰ ।
** अनिर्वाच्यत्रिगुणेति २ पु॰ पा॰ ।
†† व्यास सू॰ अ॰ २ पा॰ ३ सू॰ १ ।

संप्रदायाध्वना पञ्चीकरणं यद्यपि स्थितम् ।
तथापि युक्तियुक्तत्वा*द्वाचस्पतिमतं शुभम् ॥
पृथिव्यबनलात्मत्वं गगने पवने च चेत्† ।
रूपवत्त्वमहत्त्वाभ्यां चाक्षुषत्वं प्रसज्यते ॥
अर्द्धभूयस्त्वतः क्षित्याद्यविभावनकल्पने‡ ।
व्यवहारपथा प्राप्ता मुधा पञ्चीकृतिर्भवेत् ॥
अनपेक्ष्य फलं वेदसिद्धत्त्येषेष्यते यदि ।
त्रिवृत्कृतिः श्रुता पञ्चीकृतिर्न क्व चन श्रुता ॥

तस्मात्सूच्यते **तेजोऽबन्नानामेव त्रिवृत्करणस्य विवक्षितत्वादिति ।**

पञ्चीकरणमेवम् । पञ्चभूतानि प्रथमं प्रत्येकं द्विधा विभज्यन्ते । तत एकैकमर्द्धं चतुर्द्धा क्रियते । ते च चत्वारो भागा इतरभूतेषु§ चतुर्षु निक्षिप्यन्ते । तथाकाशस्य स्वार्द्धेन भूतान्तरागतपादचतुष्केण च पञ्चीकरणम् । एवं भूतान्तरेषु योजना ।

त्रिवृत्करणे तु त्रीणि भूतानि द्विधा विदार्य प्रतिभूतमेकैकमर्द्धं द्विधा प्रस्फोट्येतरभूतद्वये योजनमिति ।

अभ्युच्चयाय श्रुत्यन्तरोदाहरणमित्याह **एकामिति॥ । ब्रह्म चतु-** १२८
ष्पादिति । क्व चिच्च षोडशकलं पुरुषं प्रस्तुत्येत्यस्य भाष्यस्य व्याख्यानम् । पशोः पादेषु हि पुरतः खुरौ पृष्ठतश्च द्वौ पार्ष्णिस्थानीयावयवौ दृश्येते । तद्वत्परमात्मन्यपि चतुष्पात्त्वेन षोडशकलत्वेन च पशुरूपकल्पनयोपासनम् ।

इदमुदाहरणमत्र न संगच्छते । प्रश्नोपनिषदि हीहैवान्तः शरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडश कलाः प्रभवन्तीति प्रस्तुत्य स ईक्षाञ्चक्रे

---

* युक्तिदृष्टत्वादिति २ पु· पा· । † पवने ऽपि चेदिति २ पु· पा· ।

‡ अभिभावत्वकल्पने इति ५ पु· पा· । § इतरेषु भूतेष्विति २ पु· पा· ।

॥ इहैवान्तःशरीरे सोम्य स पुरुषः तस्मिन्नेताः षोडश कलाः प्रभवन्तीति प्रस्तुत्य स ईक्षाञ्चक्रे कस्मिन्न्वहमुत्क्रान्ते उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति प्रश्नोपनिषदि प्रस्तुत्येति भाष्यार्थः । ताश्च कलाः स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीमिन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु नाम चेति वाक्यशेषगता विवक्षिताः निबन्धकर्ता तु कलाशब्दस्यावयववचनत्वात् कथमब्रह्मावयवाः प्राणादयो ब्रह्मणः कला इत्याशङ्क्य श्रुत्यन्तरे प्राच्यादिदिगुपलक्षितस्य जगतः कलात्वसंपादनात्कलात्वमित्याह–**ब्रह्मचतुष्पादित्यादिना**– इति एतदग्रे **प्रसिद्धेतीति** (१०६पृ·२० पं·) प्रतीकपर्यन्तग्रन्थस्थाने पाठः २ पुस्तके ।

कस्मिन्न्वहमुत्क्रान्ते उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत् प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीमिन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु नाम चेति पठ्यते । छान्दोग्ये तु दिगाद्यवयवः षोडशकल उपास्यो न च तत्र स ईक्षाञ्चक्रे इति श्रवणमस्ति ।

तस्माद् न्यायनिष्ठं शास्त्रमिति द्योतयितुमनुदाहरणमप्युदाहृतम् । अथ वैवं कथं चित्समर्थनीयम् ।

परब्रह्मप्रमित्यर्थां सृष्टिमाश्रित्य शासति ।
उपासनानि वेदान्तास्तत्र एतदुदाहृतम् ॥

या हि कलाः प्रश्ने परमात्मप्रमितिप्रयोजनास्तत्र उत्पन्ना इत्युक्तास्ताभिर्विशिष्टः छान्दोग्ये स एवोपास्य उक्तः । तत्र यद्यपि श्रद्धादयश्छान्दोग्ये न पठिता नापि दिगादयः प्रश्ने न च गुणोपसंहारः सगुणनिर्गुणत्वेन विद्याभेदादुपसंहारे चाधिकसङ्ख्यापत्तौ षोडशकलत्वभङ्गात् । तथापि पृथिवीन्द्रियमनःप्राणादयः कियन्तः समा उभयत्रापि दिगादयस्तु लोकेष्वन्तर्भवन्ति न च यावत्सृष्टावुक्तं तावत्सर्वमुपास्तावुपसंह्रियते येन संख्या ऽतिरिच्यते* । उपयोगि तु तस्मात्प्रश्नच्छान्दोग्ययोरेकत्वात् षोडशकलस्य शक्यते वक्तुं दिगाद्यवयवं षोडशकलं प्रस्तुत्य स ईक्षाञ्चक्रे इति श्रूयतइति । एवं च† निर्गुणप्रकरणे कलाशब्दप्रयोगो ऽन्यत्रोपास्यत्वाभिप्रायः सन् सोपयोग इति ।

कलाः षोडश भूतानि प्राणो ऽन्नं नाम कर्म च ।
श्रद्धा लोकास्तपो मन्त्रा मनो वीर्यं शरीरकम्‡ ॥

१२८ । १२ प्रसिद्धेति । लक्षणाया एव निरूढत्वार्थं प्रयोगानुगमो न वाचकत्वायेत्यर्थः ।

सप्तमे स्थितम्—इतिकर्त्तव्यताविधेर्यजतेः पूर्ववत्त्वम्§ । सौर्यादिष्वनाम्नानादनितिकर्त्तव्यताकत्वे प्राप्ते उच्यते । यथा लोके शाकादिषु सिद्धेषु वदत्योदनं पचेति तथेह सिद्धवत्कृत्य सामान्येनेतिकर्त्तव्यतां करणं विहितम् । तस्याश्च विकृतिष्वविधेः सौर्यादीनां विकृतियागानां दर्शादिप्रकृतिविहितपूर्वेतिकर्त्तव्यतावत्त्वमिति ।

---

* अतिरिच्येतेति ३ पु॰ पा॰ । † चेति नास्ति ३ पु॰ ।

‡ एतदग्रे ३ पुस्तके-निबन्धकर्त्ता-इत्यादिग्रन्थो ऽधिक उपरि लिखतः ।

§ जै॰ सू॰ अ॰ ७ पा॰ ४ सू॰ १ ।

समुदाचरणं व्यक्तिः । **तेषामपि** हैरण्यगर्भाणां मते क्लेशैरवि- १२९ । ६
द्याऽस्मितारागद्वेषाऽभिनिवेशैर्धर्माऽधर्मकर्मणां विपाकेन तत्फलेन आशयेन
फलभोगवासनया अस्पृष्टस्य पुरुषस्यैव प्रकृष्टसत्त्वोपादानं सर्वज्ञत्वं नाचेतन-
स्येत्यर्थः । न चैतदपि भेदमतं अद्वेयमित्याह **तदपि चेति** । इदं ताव-
दित्यादिदोषोस्तीत्यन्तं भाष्यं ब्रह्मणि प्रकृत्यर्थस्येक्षणस्याञ्जस्यप्रदर्शनपरम् ।
ज्ञाननित्यत्वइत्यादिना प्रत्ययार्थानुपपत्तिमाशङ्क्य परिह्रियते । तदभिप्रायमाह
एतदपीति । अनुपहितनित्यचैतन्ये कर्तृत्वाभावादित्यर्थः । सवितृप्रका-
श्यस्य रूपादेर्भावादसत्यपीति भाष्यायोगमाशङ्क्य विकल्पमुखेनावतारयति
किमिति । सवितरि कर्मास्तीह तु नेति वस्तुत एव कर्माभाव उदाहर-
णाद्वैषम्यमभिमतम् उत दृष्टान्ते कर्म विद्यते विवक्षितं च दार्ष्टान्तिके तु
यद्यपि विद्यते तथाप्यविवक्षितं तव मते ऽध्यस्तत्वाद्दृश्यस्येति मतम् ।
तत्र द्वितीये विकल्पे किं सविता प्रकाशयतीत्यस्मादैक्षतेत्यस्य दार्ष्टान्तिकस्य
वैषम्यमुत प्रकाशतइत्यस्मात् । आद्यमभ्युपगमेन परिहरति **तदा प्रका-
शयतीत्यनेनेति** । न द्वितीय इत्याह **प्रकाशते इत्यनेनेति** । **न
ह्यत्रेति** । अकर्मकत्वात्प्रकाशतेरित्यर्थः । एवं च सत्यैक्षतेत्येतदपीक्षणं ,, । १७
करोतीत्येवंपरं न त्वालोचयतीत्येवमर्थमिति । प्रकाशतइति कर्तृत्वव्यप-
देशदर्शनादित्ययमेव भाष्यपाठः साधुर्न णिजन्तः । आद्यविकल्पयोर्मध्ये
प्रथमं प्रत्याह **अथेति** । ऐक्षतेत्यत्र कर्माविवक्षामुपेत्य प्रकाशतइतिवत्क-
र्तृत्वनिर्देश उपपादित इदानीमविवक्षा ऽप्यसिद्धेत्याह **विवक्षितत्वाच्चेति** ।
न खल्वस्माकं क्व चिद्वास्तवं दृश्यमस्त्यतो ऽध्यस्ततयैव कर्मत्वस्य विवक्षे-
त्यर्थः । या तु प्रधानस्य सर्वज्ञत्वे साक्षिणी सत्त्वोत्कर्षे योगिसार्वज्ञप्रसिद्धि-
रुक्ता सा समा ब्रह्मण्यपि चेतनेश्वरप्रसादायत्तयोगिसर्वज्ञत्वस्य* पातञ्ज-
लतन्त्रे† प्रसिद्धत्वाद् इत्येवमर्थं यत्प्रसादादित्यादिभाष्यं‡ तद्व्याचष्टे
यस्येति । तत ईश्वरप्रणिधानात्प्रत्यगात्माधिगमो ऽन्तरायस्य रोगादेरप्य§-
भाव इति सूत्रार्थः । **वस्तुतो नित्यस्येति** । औपाधिकत्वेनानित्यत्वस्यो-
क्तत्वादिति । **कारणाऽनपेक्षामिति** । कर्ममात्रमुपाधिमीक्षणमपेक्षते न
शरीरादीति भावः । **स्वरूपेणेति** । अन्वयेनेत्यर्थः । ज्ञानाभिव्यक्तये कर्तव्यं १३० । ६

---

* सार्वज्ञ्यस्येति २ पु॰ पा॰ । † तन्त्रेणेति २ पु॰ पा॰ ।
‡ यत्प्रसादादिभाष्यमिति २ पु॰ पा॰ । § अपिशब्दो नास्ति २ पु॰ ।

नास्तीत्याह **आवरणादीति** । ज्ञानमेव बलं सामर्थ्यमुपाध्यवच्छिन्नफलोत्पत्तौ तेन बलेन फलभूतानुभवस्य कारणं क्रिया सा च* न प्रधानस्येत्याह **प्रधानस्य त्विति** । अभिनिवेशस्यैव मिथ्याबुद्धित्वात्कथं तस्यैव तं प्रति हेतुत्वमत आह **पूर्वेणेति** । ननु लयलक्षणा ऽविद्योपादानमस्ति कथं मात्रशब्दो ऽत आह **मात्रेति** ।

गौणश्चेदिति† सूत्रसंबन्धिभाष्यमनुक्रमणिकायां व्याख्यातमित्युपरि-
३१ । २ तनभाष्यं व्याचष्टे **शङ्कोत्तरत्वेनेत्यादिना** । यः सदाख्यः एषो ऽणिमा ऽणोर्भावः । भावभविवेरभेदादणुः । एतस्यात्मनो भाव ऐतदात्म्यम् । अयमपि प्रयोगो भवितृपरः । एतदात्मकं जगत् । सत्येन तप्तपरशुं गृह्णतो मोक्षवत्सत्यब्रह्मज्ञस्य मोक्ष उक्तः तप्तं परशुं गृह्णातीत्यत्र । उक्थं प्राणः अर्थवादप्रकल्पितेनेति । एतानि वाव तानि ज्योतींषि य एतस्य स्तोमा इति प्रकाशकत्वाज् ज्योतिष्ट्वेन रूपितत्रिवृदादिस्तुतिसमुदायकत्वात्क्रतौ ज्योतिःशब्दः । हे श्वेतकेतो पुत्र तमप्यादेशम्‡ आदिश्यते इति शास्त्राचार्योपदेशगम्यं वस्त्वप्राक्षः पृष्टवानसि त्वमाचार्यं येन श्रुतेन शास्त्रतो ऽश्रुतमप्यन्यच्छ्रुतं भवति अमतमन्यन्मतं तर्कतो येन मतेन अविज्ञातमनिदिध्यासितं विज्ञातं भवति येन विज्ञातेनेति अन्यज्ञानादन्यन्न ज्ञेयमिति । पुत्रप्रश्नः कथं न्विति । नान्यत्वं कार्यस्य कारणादित्याह यथा सोम्येति । यो विकारः स वाचारम्भणं वागालम्बनम् उच्यते परम् । नामधेयं नाममात्रं नार्थ इति । मनःशब्दवाच्यो भवतीति । लक्ष्यो भवति§ । एवमेव खलु सोम्य तन्मन इति स्वप्नोपन्यासवाक्ये अर्थवादस्यापि स्वपितिनामनिर्वचनस्य यथार्थत्वाय हृदयादिनिरुक्त्युदाहरणम् । तस्य हृदयशब्दस्यैतन्निरुक्तं निर्वचनम् । अशनायापिपासे सोम्य विजानीहि इत्युपक्रम्याशितस्यान्नस्य द्रवीकरणेन नयनाज्जरणादापो ऽशनायाः । एकवचनं छान्दसम् । द्रावकोदकापनयनाच्छोषणादुदन्यं तेजः । आकारः छान्दसः । प्राणाः चक्षुरादयः । यथायतनं यथागोलकम् । प्राणेभ्यो ऽनन्तरमा-

---

* चेति नास्ति २ पु॰ । † ब्या॰ सू॰ अ॰ १ पा॰ १ सू॰ ६ ।

‡ तमादेशमिति १ पु॰ पा॰ । आदेशमित्येतदग्रे **मा** माम् इत्यधिकं २ पु॰ ।

§ लक्ष्यो भवतीति २ पु॰ पा॰ ।

दित्याद्या अनुग्राहकदेवा: । लोक्यन्त इति काला विषया: । करणाधिपानां
जीवानामधिप:* ॥

भाष्ये जन्मादिसूत्रमारभ्य वृत्तानुवाद: प्रतिज्ञासूत्रसिद्धवत्कारेणे-
त्याह **ब्रह्म जिज्ञासितव्यमिति हीति** । वेदान्तानां ब्रह्मपरत्वे सिद्धे १३२ । १
ऽपि प्रमाणान्तरैरविरोधार्थमुत्तरसूत्रारम्भमाशङ्क्य तेषां ब्रह्मण्यप्रवेशमाह
तत्रेति । अत्र भाष्यं द्विरूपं हीति तदयुक्तं निरुपाधिन एव जिज्ञा-
स्यत्वादित्याशङ्क्याह **यद्यपीति** । यदि सोपाधिकरूपस्य निरुपाधिको
देशशेषता कथं तर्हि उपास्तिरिति तत्राह **क्वचिदिति** । अवा-
न्तरवाक्यभेदेनोपाधिविवक्षयोपासनविधिरित्यर्थ: । उपास्तीनामपि मोक्ष-
साधनत्वव्यावृत्तये फलान्तराण्याह **तदुपासनानीति** । अभ्युदयार्थानि
प्रतीकोपासनानि । क्रममुक्त्यर्थानि दहरादीनि । कर्मसमृद्ध्यर्थान्युद्गीथा-
दीनि । एतानि विधेयत्वाद्यद्यपि कर्मकाण्डे वक्तव्यानि तथापि मानसत्वेन
विद्यासाम्यादिहाधीतानीत्यर्थ: । गुणभेदे ऽपि गुणिन एकत्वादुपासनातत्फ-
लभेदाभाव इति शङ्कते **स्यादेतदिति** । न विशेषणमात्रमुपाधय: किं १३३ । १
त्वप्पात्रमिव सवितुरवच्छेदका: । तत्रोपहितभेद इति भाष्याभिप्रायमाह
उपाभेदे इति । यद्यपीत्युत्तरभाष्यं पूर्वेण पुनरुक्तमिव भाति तदपौन-
रुक्त्याय तन्निरस्यां शङ्कामाह **नन्विति** । स्थिते ऽप्युपहितभेदे नोपासन-
विधिरर्थवान्निरतिशयेश्वरस्य प्रत्युपाध्यवस्थानेनोपासकस्या†पि स्वत एवै-
श्वर्यादत औपाधिकानां मध्ये एक उपासको ऽपकृष्टो ऽपरमुपास्यमुत्कृष्ट-
मिति तारतम्यं सूचयन्त्य उपासनविधिश्रुतय: कथमित्यर्थ:‡ । वस्तुत:
स्वत:सिद्धैश्वर्यो ऽप्युपासक उपाधिनिकर्षादनभिव्यक्तैश्वर्यस्तत्प्रत्याविर्भू-
तैश्वर्यं विशुद्धोपाधिमद् ब्रह्मोपास्यमिति परिहाराभिप्रायमाह **यद्यपीति** । ,, । १६
स्थावरादिष्वसदिव ज्ञानादि तिर्यगादिषु सत्तत्रैवात्यन्तापकृष्टं मनुष्येष्वपकृष्ट-
मात्रम् । गन्धर्वादिषु प्रकर्षवद्देवादिष्व§त्यन्तप्रकर्षवदिति ।

---

* अत्र पञ्चमम् ईक्षत्यधिकरणं समाप्तम् । अत्र सूत्राणि ७-ईक्षतेर्नाशब्दम् ५ गौण-
श्चेन्नात्मशब्दात् ६ तन्निष्ठस्य मोक्षोपदेशात् ७ हेयत्वावचनाच्च ८ स्वाप्ययात् ९
गतिसामान्यात् १० श्रुतत्वाच्च ११ ॥

† अवस्थाने उपासकस्येति २ पु· पा· । § कथमित्थं घटतइत्यर्थ इति २ पु· पा·

‡ देवेष्विति २-३ पु· पा· ।

अविशेषेण वेदान्तानां निर्विशेषे ब्रह्मणि समन्वयः साधितस्तस्य क्व चिद्धिरण्मयवाक्यादावपवादः क्व चिदानन्दमयवाक्यादावपवादाभासप्राप्तौ तदपवादश्च प्रतिपाद्य इत्यध्यायशेष आरभ्यते ।

१३४ । ५ **आनन्दमयो ऽभ्यासात् ॥ १२ ॥**

ननु ता आप ऐक्षन्तेत्याद्यब्रह्मसंनिधिमपबाध्य मुख्येक्षितृ ब्रह्म निर्णीतमिह कथमन्नमयाद्यब्रह्मसंनिधिपाठादानन्दमयस्याब्रह्मत्वशङ्का ऽत आह **गौणेति** । अनादिगौणेक्षणप्रवाहपाते ऽपि जगत्कारणे मुख्यमीक्षणमिति युज्यते मुख्यसंभवे गौणस्यानवकाशत्वात् । अतस्तत्र विशयानुदये प्रायपाठो ऽकिंचित्करः । अत्र तु मयटो विकारप्राचुर्ययोर्मुख्यत्वे सति विकारार्थग्रहणे प्रायदृष्टिर्विशेषिका प्राचुर्यार्थत्वाद्व्यावर्तिकेत्यर्थः । एवं च पूर्वाधिकरणसिद्धान्ताभावेन पूर्वपक्षोत्थानात् प्रत्युदाहरणलक्षणसंगतिरपि सूचिता । संशयबीजं च मयटो विकारप्राचुर्यसाधारण्यमुक्तम् । प्रयोजनं च तत्तदुपास्तिः प्रमितिर्वेति सर्वत्र द्रष्टव्यम् ।

,, । १२ भास्करोक्तमाशङ्क्याह **न चेति** । विकारो हि द्विप्रकारः कश्चिच्छुक्तिरूप्यादिः स्वरूपेणाध्यस्तः कश्चित्तु प्रतिबिम्बघटाकाशादिरुपाधितो विभक्तस्तत्र प्राणाद्युपाधिविभक्त आत्मा तद्विकारः । अथ वा भृगुवल्ल्युक्ताधिदैविकान्नादीन्प्रत्याध्यात्मिका अन्नमयादयः कोशा विकारा इति । विकारसंनिधेः सर्वान्तरत्वलिङ्गेन बाधमाशङ्क्याह **चतुष्कोशेति** । आनन्दमयस्य सर्वान्तरत्वमन्नमयाद्यान्तरत्वेनोक्तं तस्मादन्यस्यान्तरस्याश्रवणात्प्रथमं निरस्य द्वितीयं निराचष्टे **न चास्मादिति** । यथा बलवान्देवदत्त इत्युक्ते यज्ञदत्ताद्यपेक्षमेव बलवत्त्वं सिंहादीनां ततो ऽपि बलवत्त्वमनुक्तमपि गम्यते तथा ऽऽनन्दमयस्येतरकोशापेक्षमान्तरत्वं ब्रह्म तु ततो ऽप्यान्तरमनुक्तमपि गम्यतइत्यर्थः । ब्रह्मत्वे लिङ्गाभावं निरस्य जीवत्वे

१३५ । ५ लिङ्गमाह **न च निष्कलस्येति** । श्रुतिमप्याह **नापीति** । सशरीरस्य प्रियादि दुर्वारमित्येतावता कथं मयटः प्राचुर्यार्थत्वे ब्रह्मत्वानुपपत्तिरुक्ता तत्राह **अशरीरस्येति** । एवमुक्ते ह्यशरीरे ब्रह्मणि नाप्रियमित्युक्तं भवति । तथा च दुःखगन्धद्योती प्राचुर्यार्थो मयड् न संभवतीत्युक्तं स्यादित्यर्थः । आनन्दप्रातिपदिकाभ्यासलिङ्गात्कथमानन्दमयस्य ब्रह्मत्वं वैयधिकरण्या-

दिति शङ्कानिराकरणार्थं* भाष्यमानन्दमयं प्रस्तुत्येति तदिद†मनुपपन्नं
पुच्छब्रह्मणः प्राकरणिकत्वादत आह **आनन्दमयावयवस्येति** । ननु १३५ । १३
ज्योतिषेति कर्मान्तरविधिर्नाभ्यासो ऽत आह **कालेति** । वसन्तकालगुण-
संक्रान्तत्वान्न कर्मान्तरविधिरित्यर्थः । देवदत्तादेरपि‡ बलवत्त्वं सिंहादेर्मा-
नान्तरसिद्धम् । आनन्दमयादान्तरे वस्तुनि न मानान्तरं नापि श्रुतिरित्य-
भिप्रेत्याह **न हीति** । दृष्टान्तवैषम्यं शङ्कते **तादर्थ्यादिति** । मुख्यारु-
न्धतीदर्शनाविरोधेनानुगुण्यं चेदत्रापि तुल्यमित्यर्थः । यो ऽपि पूर्वपक्षे प्राचु-
र्यार्थत्वमुपेत्य दुःखलवयोग आपादितः सो ऽप्युपाधिवशादित्यर्थात्परिहृत
इत्याह **प्रियादीति** । एवं च विकारशब्दा§दिति सूत्रं व्याख्यातम् । तत्प्र-
कृतवचने मयट् । तदिति प्रथमासमर्थात्प्राचुर्यविशिष्टप्रस्तुतवचनाभिधाने
गम्यमाने मयडिति सूत्रार्थः । वचनग्रहणात्प्राचुर्यवैशिष्ट्यसिद्धिः । तादृश-
स्यैव|| लोके मयटा ऽभिधानादिति ।

मान्त्रवर्णिक¶मिति सूत्रं भाष्यकृद्भिः सत्यं ज्ञानमनन्तमिति मन्त्रप्र-
स्तुतं ब्रह्मानन्दमयवाक्ये निर्दिश्यते प्रकृतत्वादसंबद्धपदव्यवायाभावाच्चेति
विवृतं तच्चेतरेतरत्रार्थप्रत्यभिज्ञानाभावाद् मन्त्रब्राह्मणयोर्व्याख्यानव्याख्येयभा-
वस्याविशदत्वात्प्रकारान्तरेण सूत्रं व्याचष्टे **अपि च मन्त्रेति** । यथा मन्त्रः १३६ । ७
प्रयोगोपाय एवं कोशचतुष्कवाक्यमानन्दमयब्रह्मप्रतिपत्त्युपायस्य देहादिव्यति-
रेकस्य समर्पकत्वाद्गौण्या वृत्त्या मन्त्रउच्यते आनन्दमयवाक्यमुपेयप्रयोगविधा-
यिब्राह्मणवदुपेयब्रह्मप्रत्यायकत्वाद्ब्राह्मणं विवक्षितम् । तयोश्चेतरेतरत्रार्थप्र-
त्यभिज्ञामाह **मन्त्रे हीति** । **परब्रह्मणीति** । विज्ञानमयादिशब्दैरपि ब्रह्मैव
तत्तदुपाधिभ्यः प्रविविच्य निर्दिष्टमित्यर्थः । न चैवं प्राणमयाद्यन्तरात्मनो
विज्ञानमयस्यात्मत्वापत्तिस्तस्मादान्तरोपदेशादिति भावः । **सूत्रकार**ग्रहणं
व्याख्येयभाष्यानपेक्षत्वसूचनार्थम् । भाष्ये ऽपि महाप्रकरणोपन्यासः सूत्रार्थो न
मन्त्रब्राह्मणतया व्याख्यानव्याख्येयभावो ऽत एवाह अन्यथा हि प्रकृतहाना-
प्रकृतप्रक्रिये स्यातामिति । मन्त्रब्राह्मणयोश्चेत्यपि भाष्यं प्रकरणप्रदर्शनपरमेवे-]
**त्यविरुद्धम् । सोऽयं तु मान्त्रवर्णिकपदं विवक्षितं कृतं टीकाकृता ।

---

* निरासार्थमिति २ पु॰ पा॰ ।　† इदमिति नास्ति २-३ पु॰ ।
‡ देवदत्तादपीति २-३ पु॰ । § व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ १३ । || एवेति नास्ति २ पु॰ ।
¶ व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ १६ ।　** प्रकरणोपन्यासदर्शनपरमेवेति २ पु॰ पा॰ ।

ननु सर्वस्रष्टृत्वाद्यनेकहेतूपदेशे वाक्यभेदः स्यादत आह
१३६ । १७ **सूत्रमिति ।** सूत्रस्य विश्वतोमुखत्वमलङ्कार इत्यर्थः ।

ननु जीवादन्यत्वान्नानन्दमयस्य ब्रह्मत्वं घटादिष्वदर्शनादत
आह तस्मादिति । आनन्दमयो ह्यात्मशब्दा*च्चेतनस्तस्य च जीवत्वरा-
हित्ये ब्रह्मत्वं सिद्धमित्यर्थः । एकत्वे ऽपि परजीवयोरौपाधिकभेदाल्ल-
ब्धलब्धव्यभावे जीवस्यापि स्वं प्रति स्यात्तस्यापि स्थूलसूक्ष्माद्युपाधिभेदादत
आह न त्विति । स्वतन्त्रोपाधिभेदे चेतनभेदः परब्रह्मणस्तु जीवो
ऽविद्यायां विभक्तः स त्वविद्यावच्छिन्न एव स्थूलसूक्ष्मोपाधिभ्यामवच्छि-
द्यतइति न स्वस्मादौपाधिको ऽपि भेद इत्यर्थः । सूत्रारूढो हि स्वरूपेणापि
मिथ्या जीवे तु भेदमात्रं कल्पितं न स्वरूपमतः कल्पितत्वमात्रे दृष्टान्त
१३७ । २० इत्याह **अत्रैवेति ।** ब्रह्मानन्दमयं प्रत्यवयव उत प्रधानमिति पुच्छब्रह्म-
शब्दाभ्यां संशये मुख्येक्षणाद् ब्रह्मनिर्णयेन गौणप्रायपाठो ऽपबाधित इह तु
पुच्छशब्दस्यावयवमात्रत्वे आधारमात्रत्वे च लाक्षणिकत्वसाम्ये सत्यवयव-
प्रायदर्शनादवयव इति सङ्गतिः ।

यदुक्तमानन्दमयस्याङ्गं ब्रह्मेति तन्न । श्रुतिबाधप्रसङ्गादिति वदन्
सिद्धान्तस्य बीजमावपति **ब्रह्मपुच्छमिति ।** बलाबलविवेकाय पूर्वोत्तर-
पक्षयुक्तीर्विभजते **तत्र किमिति ।** उपेत्यापि प्रायपाठं कथं चित्प्रचुरा-
नन्दवाचि चानन्दमयपदं कल्पितमपि ब्रह्मण्यप्रसिद्धं स्तोकदुःखानुवृत्त्या-
पत्तेरित्यर्थः । **कया चिद्वृत्त्येति ।** अल्पत्वनिवृत्तिलक्षणयेत्यर्थः । ननु प्रचुर-
प्रकाशः सवितेतिवदल्पत्वनिवृत्तिपरः किं न स्याद् उच्यते । यत्र प्राचु-
र्यविशिष्टपदार्थप्रतीतिस्तत्रैवं भवति । यत्र पुनः प्राचुर्यमेव पदार्थेन विशेष्यते
तत्र विरोधिन ईषदनुवृत्तिः प्रतीयते ब्राह्मणप्रचुरो ऽयं ग्राम इत्यादौ । तथा
च आनन्दमयपदे ऽपि प्रधानप्रत्ययार्थं प्राचुर्यं प्रति आनन्दस्य विशेषण-
त्वाद् दुर्निवारा दुःखानुवृत्तिरिति । तत्रापिशब्दबलाद्विरोध्यनुवृत्तिः
प्रतीयते मानान्तरेण तु तदभावावगमे प्राचुर्यमल्पत्वनिवृत्तिपरं कल्प्यते ।
१३८ । १४ तस्मान्मयडर्थस्य मुख्यस्य त्यागः । **कृतबुद्धयः** शिक्षितबुद्धयः । **विदा-**

* आनन्दमयो ब्रह्मात्मशब्दादिति २ पु· पा· ।

ङ्कुर्वन्तु विवेचयन्तु* । विभागमात्रेणैव सिद्धान्तप्राबल्यमुन्मीलयन्त्वित्यर्थः । उक्तविवेकं स्फोरयति **प्रायेति** । मयड्विकारे ऽमुख्यो ब्रह्मशब्दः परब्रह्मणि मुख्यः । अभ्यस्यमानानन्दशब्दश्च प्रकृत्यर्थएव मुख्यो न मयडर्थे । पूर्वपक्षे एतत्त्रितयलङ्घनम् आनन्दमयपदस्यान्नमयादिविकारप्रायपाठपरित्यागश्च स्यात् । उत्तरे तु पक्षे पुच्छशब्दस्यावयवप्रायपाठस्यैव बाधनम् अनुगुणं तु मुख्यत्रितयमित्यर्थः । ननु यथा पूर्वपक्षे मयट्श्रुतिबाध एवं सिद्धान्ते पुच्छश्रुतिबाधस्तत्राह **पुच्छपदं हीति** । लाङ्गूले मुख्यं पुच्छपदं न करचरणाद्यवयवमात्रे आनन्दमयस्य चात्मनो न मुख्यलाङ्गूलसंभव इति । अपि च पुच्छशब्देनाधारलक्षणा प्रतिष्ठेत्युपपदसामर्थ्याच्छ्रुत्यनुमता नावयवलक्षणेत्याह **आधारपरत्वे चेति** । आनन्दमयस्य कोशस्यैवेतरकोशापेक्षया ऽऽन्तरत्वं चेत्तर्हि ततो ऽभ्यन्तरं ब्रह्म किमिति नोक्तमत आह **ब्रह्मणस्त्विति** । अर्थात्प्रतिष्ठात्वसामर्थ्यादित्यर्थः । यदुक्तमुपाधिवशात्प्रियादियोगः प्राचुर्यप्रयुक्तदुःखलेशान्वयश्चेति तत्राह **वाङ्मनसेति** ।

गुणे त्विति । यथा ह्यग्नीषोमीये पशावेकपाशके ऽदितिः पाशान् प्रमुमोक्त्वेतानित्यदितिः पाशं प्रमुमोक्त्वेतमिति च मन्त्रौ श्रुतौ तत्र बहुवचनवान्मन्त्रः किं प्रकरणादुत्क्रष्टव्यो न वेति विशये† बहुवचनस्यासमवेतार्थत्वादुत्कर्षे प्राप्ते विशेष्यप्रधानभूतपाशवाचिप्रातिपदिकस्याग्नीषोमीये समवेतार्थत्वात् तदनुरोधेन बहुवचनं पाशगुणत्वेन तद्विशेषणभूतबहुत्ववाचकमन्याय्यया लक्षणया पाशावयवाँल्लक्षयतीति नवमे निर्द्धारितम्—विप्रतिपत्तौ विकल्पः स्यात्समत्वाद् गुणे त्वन्याय्यकल्पनैकदेशत्वात्‡दिति । उत्कर्षो ऽनुत्कर्षो वेत्यस्यां विप्रतिपत्तौ पाशं पाशानिति च मन्त्रयोर्विकल्पः स्यात्पाश§प्रातिपदिकस्योभयत्र समत्वात् । गुणे प्रत्ययार्थे त्वन्याय्यकल्पना न तद्बलान्मन्त्रोत्कर्षः प्रत्ययस्य पदैकदेशत्वात्प्रातिपदिकपारतन्त्र्येणोत्कर्षकत्वायोगादिति सूत्रार्थः । १३९ । १

एवमिहापि प्रधानश्रुतिविरोधे गुणभूतसूत्राण्यध्याहारादिभिर्नेयानीति । तथा चाचार्यशबरस्वामी वर्णयां बभूव लोके येष्वर्थेषु प्रसिद्धानि

---

* विदन्त्विति २ पु॰ पा॰ ।
† संशये इति २ पु॰ पा॰ ।
‡ जै॰ सू॰ अ॰ ६ पा॰ ३ सू॰ १५ ।
§ पाशशब्दो नास्ति ३ पु॰ ।

पदानि तानि सति वेदाविरोधसम्भवे तदर्थान्येव सूत्रेष्वित्यवगन्तव्यमिति ।

पराण्यपीति भाष्ये येषु सूत्रेषु व्याख्या ऽतिदिष्टा तान्यल्पवक्तव्यत्वात्प्रथमं योजयति यत्सत्यमिति । तद्धेतुव्यपदेशाच्चेति* सूत्रव्याख्यानपरमधिकरणसमाप्तिभाष्यं व्याख्याति **विकारजातस्येति**† । अवयवश्चेत् कथं कारणमुच्येत‡ । तत्र हेतुमाह **न हीति** । आनन्दमयस्तावद्विकारस्तदवयवो ब्रह्मापि विकारः स्यात्परिच्छिन्नत्वात् तथाभूतं सन्न विश्वहेतुरित्यर्थः । चिन्ताप्रयोजनमाह **तस्मादिति** । आनन्दमयविकारस्यावयवो ब्रह्मेति कृत्वेत्यर्थः । तेन ब्रह्मणा ऽवयवेन योगो यस्य स तथोक्तः§ ॥

४७ । १७ **अन्तस्तद्धर्मोपदेशात् ॥ २० ॥**

निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ।
ये मन्दास्ते ऽनुकम्प्यन्ते सविशेषनिरूपणैः ॥
वशीकृते मनस्येषां सगुणब्रह्मशीलनात् ।
तदेवाविर्भवेत् साक्षादपेतोपाधिकल्पनम् ॥

समन्वयस्य सविशेषपरत्वमपोद्यानन्दमयाधिकरणउत्सर्गः स्थापितः । इदानीमपवादचिन्तार्थत्वेनाधिकरणमवतारयन् प्रघट्टकसङ्गतिमाह **पूर्वस्मिन्निति** । यद्यप्यपवादापवादत्वात् पुच्छब्रह्मचिन्ता प्रातर्द्दनविचारसंनिधौ कर्तुं युक्ता तथाप्यवान्तरसङ्गतिमालोच्य कामाच्च नानुमानापेक्षेति॥ प्रधाननिरासस्येक्षत्यधिकरणा¶नन्तरं बुद्धिस्थतां चापेक्ष्य प्रथमं कृता । आदित्यपदवेदनीयो जीव उपास्यत्वेन न तूपक्षिप्यतइत्यनुषङ्गः । इह रूपवत्त्वसर्वपापविरहाभ्यां संशये पूर्वत्र मुख्यक्षितयाख्यबहुप्रमाणानुसारान्निर्विशेषनिर्णयवद् रूपवत्त्वादिबहुप्रमाणवशात्संसारी हिरण्मयः पुरुष इत्यवान्तरसङ्ग-

---

* व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ १४ । † एतदग्रे–अवयवो यदीति शेष–इति २ पु॰ अधिकम् । ‡ उच्यते इति २ पु॰ पा॰ ।

§ अत्र षष्ठमानन्दमयाधिकरणं संपूर्णम् । तत्र सूत्राणि ८–आनन्दमयो ऽभ्यासात् १२ विकारशब्दान्नेति चेन्न प्राचुर्यात् १३ तद्धेतुव्यपदेशाच्च १४ नेतरो ऽनुपपत्तेः १५ मान्त्रवर्णिकमेव च गीयते १६ भेदव्यपदेशाच्च १७ कामाच्च नानुमानापेक्षा १८ तस्मिन्नस्य च तद्योगं शास्ति १९ ॥

|| व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ १८ । ¶ व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ ५ ।

तिमभिप्रेत्य पूर्वपक्षं सङ्कलयति **मर्यादेति** । सर्वपाप्मविरहस्यान्यथासिद्धि- १४१ । ३
माह **कर्मेति** ।

इन्द्रस्य वृत्रवधेन ब्रह्महत्याश्रवणादस्ति देवानां कर्माधिकार इति
भारतीविलासः । तन्न । गवां सत्रासनश्रवणात् तेषामप्यधिकारप्रसङ्गात् ।
असम्भवस्तूभयत्र तुल्यः । न ह्यैन्द्रे दधनि इन्द्रस्याधिकारसम्भवः । न च
निषेधाधिकारो न ह वै देवा न्यायं गच्छन्तीति श्रुतेः । अथ प्राक्कृतस्यैव
पापस्य फलानारम्भकत्वमेतच्छ्रुत्यर्थः तर्हि तदेव पाप्मोदयस्यालम्बनमस्तु
कर्मानधिकृतत्वोक्तेः त*त्प्रदर्शनार्थत्वादिति । अमुष्मादादित्यात्पराञ्चः ।
न ह्यनाधारस्येति भाष्यं व्याचष्टे **अनाधारत्वे चेति** । **नित्यत्वमिति**
स्वमहिमप्रतिष्ठितत्वस्य व्याख्या । कथं नित्यत्वेनाऽनाधारत्वसिद्धिस्तत्राह
अनित्यं हीति । तर्हि तत एवानाधारत्वसिद्धौ किं सर्वगतत्वेनात आह
नित्यमपीति । नित्यमपि असर्वगतं चेत्तन्न भवत्याधाररहितं यतो यद्व- ,, । १९
स्तु तस्मान्नित्यादधरभावेनावस्थितं तदेव तस्य नित्यस्यो†परिस्थितस्या-
धारो भवति तस्मात्सर्वगतत्वमपि नित्यत्वविशेषणत्वेनानाधारत्वे हेतुर्व-
क्तव्य इत्यर्थः । सर्वात्मत्वसर्वदुरितविरहयोः रूपवत्त्वादिभ्यः किं बलमत-
आह **अव्यभिचारिभ्यामिति** । न ब्रह्मणोऽन्यत्र तयोः सम्भव इत्यर्थः ।
ब्रह्मणि सर्वात्मत्वसम्भवमाह **सर्वेति** । रूपवत्त्वादेर्ब्रह्मण्यपि संभवाद्व्यभिचा-
रमाह **विकारवादिति** । कार्योपहितमित्यर्थः । सर्वदुरितविरहमुदाहृत-
वाक्येनापि‡ प्रमिमीते **नामेति** । पाप्मभ्य इति अपादाने पञ्चमी । ततः
सर्वे पाप्मानोऽपादानं यस्योदयस्य तस्य भावस्तत्ता तद्रूपेणोदय उद्गम
उच्यतइति । रूपवत्त्वं तादृशेन रूपविशेषेणोपदिश्यतइत्यन्वयः । ननु हिर-
ण्मयत्वं कथं तद्धि शरीरस्यात आह **विकारस्य चेति** । नन्वविकारि- १४२ । १७
ब्रह्मणो मायामयं रूपं वक्तव्यं ततश्च मिथ्यार्थप्रकाशकतया शास्त्राऽप्रामाण्य-
मत आह **न चेति** । यथा लोके मायाविदर्शित§मायानुवादिवाक्यं प्रमा-
णमेवं शास्त्रमपि । अप्रामाण्यं तर्हि कदा स्यादत आह **अपि त्विति** ।

---

* तदिति नास्ति २ पु० ।　　† नित्यस्येति नास्ति ३ पु० ।
‡ अपिशब्दो नास्ति २ पु० ।　　§ प्रदर्शितेति ३ पु० पा० ।

मायां *मिथ्याबुद्धिं कुर्वदशास्त्रं स्याद् न तु तां करोति तस्याः प्रागेव
सिद्धत्वादित्यर्थः । विभूतिमत्स्वेवेश्वरावस्थाने सार्वात्म्यविरोधमाशङ्क्याभि-
१४३ । ६ व्यक्तिमात्रं तत्र सत्ता तु सर्वत्रेत्याह **सर्वेति** । लोक†कामेशितृत्वश्रवणा-
देव मनुष्यैरीश्वराज्ञां विना ऽशितुमपि न शक्यमित्यन्तः पाराार्थ्यन्यायः ।
सैवर्क् तत् सामेति । तच्छब्दैश्चाक्षुषपुरुष‡परामर्शः । ऋगादिविधेयापेक्षया
स्त्रीलिङ्गनिर्देशः§ । उक्थं शस्त्रविशेषः । तत्साहचर्यात्सामस्तोत्रं ऋगुक्था-
दन्यच्छस्त्रं ब्रह्म त्रयो वेदाः पृथिव्यग्न्याद्यात्मके चेत्यादिभाष्यम् । तत्र
ऋगधिदैवं पृथिव्यन्तरिक्षद्युनक्षत्रादित्यगतशुक्लभारूपा साम चाग्निवाय्वादि-
त्यचन्द्रमआदित्यगतपरः कृष्णाख्यमतिकृष्ण||रूपात्मकमाम्नातमियमेव-
र्गग्निः सामेत्यादिना । अध्यात्मं च ऋग्वाक्चक्षुःश्रोत्रादिगतशुक्लभालक्षणा
तावदुक्ता¶ । साम च प्राणच्छायात्ममनोक्षिस्थकृष्णाभारूप**माम्नातम्
वागेवर्क् प्राणः सामेत्यादिना । एवमात्मके ऋक्सामे तस्य गेष्णौ पर्वणी†† ॥

„ । ११ **आकाशस्तल्लिङ्गात् ॥ २२ ॥**

लिङ्गाद् ब्रह्मनिर्णयस्य तुल्यत्वात्पुनरुक्तिमाशङ्क्याह **पूर्वस्मिन्निति** ।
श्रुतिप्राप्तनभसो लिङ्गेन बाधार्थो न्यायो ऽधिक इत्यर्थः । इदमुक्तं **न भूता-
काश उपास्यत्वेनेति** । यद्यप्यस्मिन्ग्रन्थे पूर्वत्र सोपाधिकब्रह्मण उपास्ति-
चिन्ता ऽत्र तु तस्योद्गीथे संपत्तिचिन्तेति विशेषप्रदर्शनं भाति तथापि न तथा
ऽर्थो ग्राह्यः । हिरण्मयवाक्ये ऽपि तस्मादुद्गीथ इत्युद्गीथसंपत्तेस्तुल्यत्वात् ।
तस्मादेतदपि असाधारणधर्मवतः तुल्य‡‡मेवानूदितम् । आकाशशब्दो नभः-
पर उत ब्रह्मपर इति रूढिनिरूढप्रयोगाभ्यां विशये पूर्वत्राव्यभिचारिलिङ्गा-
दन्यथासिद्धिरूपवत्त्वादि नीतमियं तु श्रुतिर्लिङ्गान्नान्यथयितव्येति प्रत्युदा-
हरणलक्षणसंगतिः । प्रधानत्वहेतुं व्याचष्टे **अस्येति** । तदानुगुण्येनेत्येताद्वि-
१४४ । ३ वृणोति **सर्वाणीति** । प्रथमत्वे हेतुं व्याख्याति§§ **अपि चेति** । ननु

* तां मायामिति २ पु॰ पा॰ । † सर्वलोकेति २ पु॰ पा॰ ।
‡ पुरुषेति नास्ति ३ पु॰ । § स्त्रीलिङ्गादिनिर्देश इति १ पु॰ पा॰ ।
|| कृष्णाख्याऽतिकृष्णेति १ पु॰ पा॰ । ¶ तावदुक्तेति नास्ति २ पु॰ ।
** कृष्णरूपमिति १ पु॰ पा॰ ।
†† अत्र सप्तमम् अन्तरधिकरणं समाप्तम् । अत्र सूत्रे २-**अन्तस्तद्धर्मोपदेशात् २० भेद-
व्यपदेशाच्चान्यः २१ ॥**
‡‡ धर्मवत्तुल्यमिति २-३ पु॰ पा॰ । §§ व्याचष्ट इति २ पु॰ पा॰ ।

परबलीयस्त्वन्यायेन प्रथममाकाशं बाध्यताम् अत आह **एकवाक्य-** १४४ । १
गतमिति* । निरपेक्षं परं पूर्वं बाधते एकवाक्यनिविष्टशब्दानां तु पूर्वानु-
रोधेनोत्तरार्थप्रतिपत्तिस्तद्विरुद्धार्थसमर्पणे वाक्यभेदापत्तेरित्यर्थः । यदेष†
आकाश आनन्द‡ इत्यादौ ब्रह्मण्याकाशशब्दो गौणो दृष्ट§स्तद्वदिहापि
स्यादित्याशङ्क्याह **न च क चिदिति** । **यादांसि** जलचराः । यादांसीति
प्रयोगे गङ्गापदाभिधेयस्य वाक्यार्थान्वयसम्भवान्मुख्यत्वं न त्विह नभसो
वाक्यार्थान्वय आनन्त्याद्ययोगादत आह **संभवश्चेति** । मुख्यानुगुण्येन
गुणानां नयनस्योक्तत्वादित्यर्थः । अस्तु तर्हि ब्रह्मणि मुख्यस्तत्र वक्तव्यं
किं ब्रह्मनभसोर्मुख्यम् उत ब्रह्मण्येवेति । नाद्य इत्याह **अनेकार्थत्वस्येति** ।
न हि द्वितीय|| इत्याह **भक्त्या चेति** । ननु नभसि गौणः ब्रह्मणि रूढः
किं न स्यात्तत्राह **तत्पूर्वकत्वाच्चेति** । प्रश्नोत्तरयोरेकार्थपर्यवसानसामर्थ्य¶-
लक्षणं लिङ्गसूत्रगतलिङ्गशब्दार्थमभिप्रेत्य सिद्धान्तयति **सामानाधिक-
रण्येनेति** । नन्वैकार्थ्ये ऽपि प्रश्नोत्तरयोः प्रतिवचनस्याकाशशब्दानुरोधा-
त्प्रश्नोपि मुख्याकाशपरोस्तु तत्राह **पौर्वापर्येति** । प्रश्नोत्तरयोरर्थत:
शब्दतश्च पूर्वापरत्वेनानुसंधानादसंजातविरोधप्रश्नानुसारेण चरममुत्तरं
नेयमित्यर्थः । अनेन प्रथमत्वे हेतोरसिद्धिरुक्ता प्राधान्यं तूपक्रमविरोधे
सत्यकिञ्चित्करमित्युक्तं **प्रधानत्वे ऽपीति** । आकाशपदस्य प्रधानार्थत्वे ऽपि
गौणता अपिशब्दान्न नभसः प्रधानत्वमपि तु पृष्टस्य सर्वकारणस्यैवेत्यर्थः ।
प्रधानत्वे ऽपीत्येतद्व्याचष्टे **यद्यपीति** । सामानाधिकरण्येनेत्येतद्विभजते
यत्पृष्टमिति । अस्तु प्रश्नोत्तरयोरेकविषयत्वं प्रश्नविषयस्तु नभ इति
नेत्याह **तदिहेति** । १४५ । २

यत्तु कश्चिदाह । दाल्भ्येन स्वर्गलोकः सामप्रतिष्ठेत्युक्ते शालावत्यो
ऽप्रतिष्ठत्वेन तद्दूषयित्वा पृथिवीलोकः सामाश्रय इत्यूचे । प्रवाहणस्तु तम-
न्तवत्त्वेनादूदुषत् । तर्ह्यस्य लोकस्य का गतिरिति शालावत्यो ऽपृच्छत् । तत्र
पृथिवीकारणमात्रं पृष्टं न सर्वलोकगतिः । तस्मात् ।

---

* एव वाक्यगतमिति भामतीपुस्तके अशुद्धं मुद्रितम् । † अथ यदेष इति २ पु· पा· ।
‡ आनन्द इति नास्ति २ पु· । § दृष्ट इति नास्ति २ पु· ।
|| एतदग्रे–प्रयोगदर्शनादिति स वक्तव्यः । तत्रान्यथा ऽप्युपपन्नम्–इति ग्रन्थो ऽधिकः २ पु· ।
¶ सामर्थ्येति नास्ति ३ पु· ।

पूर्वापरपरामर्शरहितैः प्राज्ञमानिभिः* ।
कल्पितेयं गतिर्नैषा विदुषामनुरञ्जिका ॥ इति ।

तच्छ्रुतिभावानवबोधविजृम्भितम् । तथा हि । पृथिवीमाचकारणस्यापि
प्रसिद्धत्वेन प्रश्नवैयर्थ्यादस्येति च सर्वनामश्रुतेः प्रकरणाद्बलीयस्याः सर्वका-
र्यविषयत्वोपपत्तेः । यस्तु प्रथमप्रश्ने दाल्भ्यकृते ऽस्यशब्दः स पृथिवीपरोऽस्तु
न प्रतिष्ठां लोकमतिनयेदिति पृथिव्या एव तदुत्तरे ऽभिधानात् । द्वितीये तु
शालावत्यकृते न तथा किं चिदस्ति सङ्कोचकम् । किं चाभिधत्ता†मयमप्य-
स्यशब्दः पृथिवीमेव तथाप्यन्तवत्त्वदोषापनिनीषया प्रश्नप्रवृत्तेः पृथिवीमा-
चकारणनिरूपणे तदसिद्धेः । काकेभ्यो रक्ष्यतामन्नमितिवदयमस्यशब्दः सर्व-
कार्यपरः । तथा च पूर्वापरेत्यादिरुपालम्भ उष्ट्रलकुटन्यायमनुहरतीति‡ ।

१४५ । ६ पौर्वापर्यैत्येतच्छङ्कोत्तरत्वेन विवृणोति **न चोत्तरे इति** । यद्यपि
कारणविषयप्रश्नस्तथापि तत्र विशेषणतया कार्यमप्युपात्तमिति कार्यमेव
पृष्टमित्युक्तम् । कथं न युक्तमत आह **प्रश्नस्येति** । यथा ह्युच्चैर्ऋचा क्रिय-
तइत्यत्र विध्युद्देशगता§ ऋग्यादिशब्दास्त्रयो वेदा अजायन्तेत्युपक्रम-
गतमर्थवादस्थमपि वेदशब्दमेकवाक्यत्वसिद्ध्यर्थमनुसन्धाना ऋगादिजाति-
वचनतां मुञ्चन्तो वेदलक्षणा||र्था इति निर्णीतं वेदो वा प्रायदर्शनात्¶दित्यत्र ।
एवमत्राप्येकस्मिन् वाक्ये ऽस्य लोकस्य का गतिरिति सर्वकारणत्वा-
विरुद्धायां बुद्धौ तद्विरुद्धार्थस्य वाक्यैक्यविनाशिनो निवेशायोगादाकाशपदं
परमकारणे गौणमित्यर्थः । ननु निर्णीतार्थे उपक्रम उपसंहारमन्यथयेन्न
प्रश्नोपक्रमः संदिग्धार्थत्वादिति तत्राह **न चेति** । प्रश्नः स्वविषयव्यव-
स्थित एव न चेत् तत्र वक्तव्यं स निर्विषयः पृष्टादन्यविषयो वा । नाद्य
,, । १३ इत्याह **अनालम्बनत्वेति** । न द्वितीय इत्याह **वैयधिकरण्येति** ।
एवं तावत्प्रश्नप्रतिवचनवाक्यसामर्थ्यं तल्लिङ्गादिति सौत्रहेतुवचनार्थ इति
व्याख्याय वाक्यशेषस्थलिङ्गपरतया व्याख्यान्तरमाह **अपि चेत्यादिना** ।

सर्वेषां लोकानामिति प्रश्नोपक्रमादिति उत्तरे सर्वाणीति दर्शनात्
प्रश्नस्थः षष्ठ्यन्तलोकशब्दो ऽस्येति सर्वनामसहपठितो व्याख्याय निर्दिष्ट

---

* प्राज्ञाभिमानिभिरिति २ पु॰ पा॰ ।
† अभिदधात्विति २ पु॰ पा॰ ।
‡ अनुसरतीति २-३ पु॰ पा॰ ।
§ विधेयसमर्पका इति २ पु॰ पा॰ ।
|| वेदस्वलक्षणेति २ पु॰ पा॰ ।
¶ जै॰ सू॰ अ॰ ३ पा॰ ३ सू॰ २ ।

इति । इदं च प्रश्नस्य सर्वकारणविषयत्वे लिङ्गम् । इतरथा ह्युत्तरे पृथिव्याकाशात् समुत्पद्यतइति स्यात्तन्मात्रकारणस्य पृष्टत्वादिति । ननु साम्ये विरोधिनां भूयसां न्याय इह तु प्रधानमाकाशशब्दार्थो नाप्रधानैर्भूयोभिरपि बाध्येत । यदाह कश्चित् ।

त्यजेदेकं कुलस्यार्थे इति राद्धान्तयन्ति ये ।

शेषिबाधे न तैर्दृष्टमात्मार्थे पृथिवीमिति ॥ इति ।

तत्राह **न चाकाशस्य प्राधान्यमिति** । ननु शेष्यर्थत्वादाका- १४६ । ५
शपदं प्रधानार्थमत आह **तथा चेति** । उपक्रान्तं प्रधानं ब्रह्म विशिंषन्नाकाशशब्दः प्रधानार्थो न तु गगनमभिदधदित्यर्थः । अपि चेति भाष्योक्तानन्तवत्त्वप्रतिपादिकां श्रुतिमाह **अन्तवादिति** । आस्तां प्रश्नोपक्रमानुरोधः प्रतिवचने ऽपि वाक्यशेषगताऽनन्यथासिद्धब्रह्मलिङ्गादाकाशपदं गौणमिति भाष्यार्थमाह **तत्रैव चेति** ।

उद्गीथे कुशलास्त्रयः शालावत्यदाल्भ्यजैवलयः कथामारेभिरे । शालावत्यो दाल्भ्यं पप्रच्छ का साम्नो गतिः कारणमिति इतर आह स्वर इति । स्वरस्य प्राणः प्राणस्यान्नम् अन्नस्यापः अपां स्वर्गः वृष्टेस्तत आगतेरिति दाल्भ्ये प्रत्युक्तवति स्वर्गस्यापि मनुष्यकृतयज्ञाद्यधीनस्थितिकत्वादप्रतिष्ठितं वै किल ते दाल्भ्य सामेत्युक्त्वा अयं लोकः स्वर्गस्य गतिरिति शालावत्यः प्रतिजज्ञौ । तं राजा जैवलिराहान्तवद्वै किल ते शालावत्य साम कारणमिति तर्ह्यस्य लोकस्य का गतिरिति पृष्टो राजा आकाश इति होवाच ज्यायान्महत्तरः परमयनमाश्रयः परायणं परोवरेभ्यः* स्वरादिभ्यो ऽतिशयेन वरः परोवरीयान् । स चाकाश उद्गीथे संपाद्योपास्यत्वादुद्गीथः† ॥

अत एव प्राणः ॥ २३ ॥ ,, । १८

अतिदेशत्वात्सैव सङ्गतिः । अथ वा ऽनन्तवस्तुपरत्वादुपक्रमोपसंहारयोरस्त्वाकाशवाक्यं ब्रह्मपरमत्र तु ब्रह्मासाधारणधर्मपरोपक्रमोपसंहारादर्शनान्न ब्रह्मपरतेति सङ्गतिः । अथ वा ऽऽकाशवाक्यानन्तर्यात्प्राणवाक्यस्येति सङ्गतयः । विषयप्रदर्शकभाष्यउद्गीथइत्यत्तं तदुद्गीथप्रकरणे प्रासङ्गिकं

* परंवरेभ्य इति २ पु० । परंपरं वरेभ्य इति ३ पु० ।

† अत्र अष्टमम् आकाशाधिकरणं संपूर्णम् । तत्र सूत्रम् १–आकाशस्तल्लिङ्गात् २२ ॥

प्रस्तावोपासनमिति कथयितुमित्याह **उद्गीथेति** । पुरस्ताद्धि परोवरीयांस-
मुद्गीथमुपास्तइत्युक्तं परस्ताच्चाम्नातः शौक्र* उद्गीथ इति अतः प्रस्ताव-
वाक्यं यद्यपि विषयस्तथापि प्रकरणशुद्ध्यर्थमुद्गीथग्रहणमित्यर्थः । श्लोकस्य
पूर्वार्द्धं व्याचष्टे **ब्रह्मणो वेति** । न ह्याकाशाद्वायूदयः प्रत्यक्षादियोग्यो ऽतो
१४७ । १२ वाक्यशेषाद्युक्तो ब्रह्मनिर्णयः । उत्तरार्द्धं विवृणोति **इह त्वित्यादिना** ।
इह सर्वाणि ह वेति वाक्ये इत्यर्थः । भोगप्रत्यासत्तेरिन्द्रियाणां भूतसारत्वं
ततः प्रधानेन सर्वभूतलक्षणया भूतोत्पत्तिलयौ वायाविति प्रत्यक्षानुगृहीतया
श्रुत्योक्तं तस्याः संवादलब्धबलाया बलात्सर्वाणीति वाक्यं वायुविकारपरं
व्याख्येयमिति । कतमा देवतोद्गीथमन्वायत्तेत्यादित्य इति होवाच कतमा
प्रतिहारमित्यन्नमिति देवते अभिहिते । **कार्यकारणसंघातरूपे इति** ।
शरीरिण्यावित्यर्थः । अन्नमपि तदभिमानिदेवता स्वत एव निश्चायकत्वा-
त्स्वविषयज्ञानोत्पादे मानान्तरं नापेक्षेत निश्चयपूर्वकत्वाद्व्यवहारस्य स्ववि-
षयव्यवहारे नापेक्षते ऽसंवादिनो वाक्यस्य स्वविषयेनादार्ढ्यं रूपइव चक्षुषः
संवादिनो न दार्ढ्यं चक्षुष इव द्रव्ये त्वसंवादिना इति येन प्रमाणानां
संवादविसंवादावप्रयोजकौ तेन यदा वै पुरुष इति वाक्यादिन्द्रियमात्रस्य
सुप्तिसमये वायुविकारे संवेशनोद्गमने भवेताम् । न त्वेतावता सर्वभूतो-
त्पत्तिलयौ तदाश्रयौ योजयितुं शक्यौ तयोस्तत्र वाक्ये प्रतीत्यभावात् ।
१४८ । १० अथ पुनरिन्द्रियसारत्वात्सर्वभूतलक्षणा तत्राह **प्रतीतौ वेति** । ननु कथं
ब्रह्मैव भवेद्यावता सुप्तौ वायुविकारे लयः प्रमाणान्तरसिद्धस्तत्राह **न चेति** ।
इन्द्रियमात्रलयः प्रमाणान्तरदृष्टो न भूतलयस्तेनाकाशवाक्यवद् इति वाक्ये
ऽपि यदि† सर्वभूतलयः प्रतीयेत‡ तर्हि वाक्यशेषाद् ब्रह्मनिर्णय इत्यर्थः ।
एवं तावत्स्वापवाक्यस्य भूतलयत्वमाश्रित्य तदनुसारेण सर्वाणि ह वेति
वाक्यं वायुविकारे सर्वभूतलयं वक्तीति शङ्का निरस्ता । इदानीं तस्य यथाश्रु-
तेन्द्रियलयमात्रपरत्वमाश्रित्य तदनुरोधेनेदमपीन्द्रियलयपरं व्याख्यायते
तथा च न ब्रह्मलिङ्गसिद्धिरित्याशङ्क्याह **न च मानान्तरेति**। सर्वभूत-
संवेशनस्य वाय्वाश्रयत्वयोजनायामुक्तं दूषणमिन्द्रियमात्रलयपरत्वयोजनाया-

* शौवेति ३-१ पु॰ पा॰ । † यदीति नास्ति २ पु॰ ।
‡ प्रतीयतइति ३ पु॰ पा॰ ।

मपि संचारयति **स्वतःसिद्धेति** । ननु वाक्यभेदमभ्युपेत्य संवादिवाक्य- १४८ । १९
बलादितरसङ्कोचं न वदामो ऽपि त्वेकवाक्यतामत आह **न चास्येति** ।
यदा वै पुरुष इत्यस्य संवर्गविद्यागतत्वात्सर्वाणि ह वेत्यस्योद्गीथविद्याग-
तत्वादित्यर्थः । अभ्युपेत्याह **एकवाक्यतायां चेति** । नन्वेकवाक्यत्वे
कुतो विनिगमना यतस्तद् ब्रह्मपरं न पुनरिन्द्रियमात्रलयपरमित्यत आह
इन्द्रियेति । **अवयुत्यवाद** एकदेशस्य विभज्य कथनम् । सर्वोत्पत्तिलयौ
हि सर्वाणि ह वेत्यत्र प्रतीतौ तत्रत्यसर्वशब्दानुरोधेन इन्द्रियमात्रोत्पत्तिल-
यकथनमेकदेशानुवादत्वेन घटिष्यते ।

एकं वृणीतइत्यादावार्षेयवरणे सर्वत्रापूर्वत्वाद्विधिमाशङ्क्य वर्तमाना-
पदेशत्वाद्विधिः कल्प्यः । सर्वत्र च तत्कल्पने सकृच्छ्रुतस्य न चतुरो वृणी-
तइत्याद्यर्थवादस्य प्रतिविध्यावृत्तिः स्यात्सा मा भूदित्येकत्र विधिकल्पना
तत्रापि त्रीन् वृणीतइत्यत्रैव । तथा सति हि शते पञ्चाशदितिवद् द्वौ वृणी-
तइत्याद्यन्तर्भावादनुवादः स्यादिति षष्ठे* राद्धान्तितमेवमत्रापीत्यर्थः ।

चिन्ताप्रयोजनमाह **तस्मादिति** । भाष्ये वाक्यशेषशब्द एकवाक्य- ,, । २१
त्वपरः । इह हि स्ववाक्ये ब्रह्मलिङ्गं दृश्यते ऽन्नादित्यसंनिधानं वाक्यान्त-
रसापेक्षमतः स्ववाक्यस्थलिङ्गं प्रबलमिति भाष्यार्थमाह **वाक्यादिति** ।
वाक्यस्य संनिधानादत्र प्राबल्यं निरूप्यतइति न भ्रमितव्यमत्र ब्रह्मवाचि-
पदाभावेन वाक्यत्वाभावात् । कतमा सा देवतेति चेतनवाचिदेवताशब्दो-
पक्रमात् सैषा देवतेत्युपसंहाराच्च चेतनपरं वाक्यं न वायुविकारपरम् ।
अथ प्राणाभिमानिनी देवता लक्ष्येत तर्हि तत्रापि समः श्रुतित्यागो मम तु
वाक्यशेषः साक्षीत्यभ्युच्चयः ।

चाक्रायणः किल ऋषिर्धनाय राज्ञो यज्ञमभिगम्य ज्ञानवैभवमा-
त्मनः प्रकटयितुकामः प्रस्तोतारमुवाच हे प्रस्तोतः या देवता प्रस्तावम-
न्वायत्ता तां चेदविद्वान् मम विदुषः संनिधौ प्रस्तोष्यसि मूर्द्धा ते विपति-
ष्यतीति । स भीतः पप्रच्छ कतमा सेति† प्रत्युक्तिः प्राण इति । प्राणमभिलक्ष्य
संविशन्ति लयकाले उत्पत्तिकाले उज्जिहते उद्गच्छन्ति‡ ॥

---

* जै० सू० अ० ६ पा० १ सू० ४३ । † कतमा सा देवतेति ३ पु० पा० ।

‡ अत्र नवमं प्राणाधिकरणं संपूर्णम् । तत्र सूत्रम् १—**अत एव प्राणः २३** ॥

१४९ । ४ **ज्योतिश्चरणाभिधानात् ॥ २४ ॥**

यदिदमित्यनुभूयमानत्वमुक्तं तद्व्याचष्टे **त्वग्ग्राह्येणेति** । तस्यैषा दृष्टिर्यत्रैतदस्मिन् शरीरे स्पर्शेनो*ष्णिमानं विजानाति तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिधाय निनदमिव शृणोतीति वाक्यं व्याचष्टे **तत्र शारीरस्येति** । नन्वौष्ण्यघोषोपलब्ध्योः कथं तस्येति ज्योतिःसंबन्धनिर्देशोऽत आह **तल्लिङ्गेनेति** । औष्ण्यघोषलिङ्गेनेत्यर्थः । गमकसंबन्धिनो गम्यसंबन्धोपचार इत्यर्थः । श्लोकं पूरयति **गौणेति** । नन्वौत्सर्गिको ऽपि मुख्यसंप्रत्यय आकाशप्राणशब्दवदपोद्यतामत आह **वाक्यस्थेति** । तत्र हि वाक्यशेषस्थब्रह्मलिङ्गाद्गौणता ऽत्र तु वाक्ये ब्रह्मलिङ्गं नोपलभ्यते प्रत्युत तेजोलिङ्गमेवोपलभ्यते अत उत्सर्गो ऽनपोदित इत्यर्थः । अनेन सङ्गतिरुक्ता । ननु पूर्वत्र गायत्रीवाक्ये तावानस्येति ब्रह्म-
„ । २७ लिङ्गमस्त्यत आह **वाक्यान्तरेणेति** । न हि वाक्यान्तरस्थाल्लिङ्गात्स्ववाक्यस्था श्रुतिर्मुख्यार्थात्प्रच्यावयितुं शक्येत्यर्थः । अभ्युपेत्य वाक्यान्तरेण नियममाह **तदर्थेति** । दिवि दिव इति च सप्तमीपञ्चमीभ्यां प्रत्यभिज्ञानविच्छेदान्न वाक्यान्तरार्थ इह ग्राह्य इत्यर्थः । वाक्यस्थेत्येतद्व्याचष्टे **बलवदिति** । तेजोलिङ्गमेव दर्शयति **दीप्यतइत्यादिना** । किमुपोद्बलनाय निरासार्थं वोपन्यस्तमत आह **इह तन्निरासेति** । निरासकारणं हि प्राप्तिः । न चान्तस्तद्धर्मोपदेशा†दिति निरस्तस्यात्र प्राप्तिरित्यर्थः । भवत्वेकदेशस्य मर्यादा न समस्तस्येत्याशङ्क्याह **तस्य चेति** । न समस्तं तेज उपास्यं किं त्ववयव इत्यर्थः । वाक्यान्तरेणेत्येतद्व्याख्याति‡ **न च पादो ऽस्येति** । तदर्थो प्रतिसन्धित इत्येतद्व्याचष्टे **न च वाक्यान्तरे
१५० । २२ इति** । अस्यैव व्याख्यानान्तरमाह **अपि चेति** । गायत्र्याश्छन्दोवचनत्वेन सन्देहाद्वाक्यान्तरस्य ब्रह्मार्थत्वं साध्यं न सिद्धम् । अप्रतिसन्धित इत्यस्याप्यनिश्चयादित्यर्थः । तेन वाक्यान्तरेण यदतः पर इति वाक्यं ब्रह्मपरतया नियन्तुं कथं शक्यमिति योजना । तमो ज्योतिरिति भाष्ये तमोग्रहणप्रयोजनमाह **तेज इति** । **अर्थावरकत्वेनेति** । अनुद्भूतस्पर्शत्वेन

---

* संस्पर्शेनेति १ पु· पा· ।

† व्या· सू· अ· १ पा· १ सू· २० ।

‡ व्याचष्टे इति ३ पु· पा· ।

तमसो नयनरश्मिनिर्गमनप्रतिबन्धकत्वाऽयोगादर्थप्रकाशनप्रतिबन्धकत्वेन निरोधकत्वं तमस इत्यर्थः । सिद्धान्त्येव पूर्वपक्षाक्षेपक आक्षेप्ता । एकदेशी पूर्वपक्ष्येकदेशी । न प्रयोजनान्तरेति भाष्यस्यायमर्थः । प्राणिकर्मनिमित्ता सृष्टिः सप्रयोजना तत्राऽत्रिवृत्कृतं तेज उपास्त्यर्थं सृष्टमिति न शक्यं वक्तुं प्रयोजनान्तरप्रयुक्तस्यैवादित्यादिवदुपास्यत्वसम्भवे तस्य सृष्टिं प्रत्यप्रयोज-
कत्वाद्वाजिनस्येव दध्यानयनं प्रतीति । तासां त्रिवृतं त्रिवृतमिति भाष्यं
व्याचष्टे **एकैकामिति** । तेजआदि भूतं प्रति सामान्यप्रवृत्ता त्रिवृत्करणश्रुति- १५१ । १०
रुपास्यमानतेजोविषयत्वेन सङ्कोचयितुं न युक्ता ततोन्यत्र नेतुमयुक्तेत्यर्थः । तेजआदीनि परोक्षत्वसाम्याद्देवताः । **त्रिवृतं** त्रिवलितम् । न वयं वाक्यान्तरस्थलिङ्गात्तेजःश्रुतिं बाधामहे अपि तु तदुपबृंहितश्रुत्येत्याह **सर्वनामेति** । **प्रसिद्धं** प्रज्ञातम् । **प्रसाध्यं** नाद्यापि ज्ञातम् । यदा यच्छब्दः प्रज्ञातवचनस्तदा गायत्रीवाक्यनिर्दिष्टं ब्रह्म परामृशतीत्याह **प्रसिद्धेति** । **तद्वत्तादिति** । यच्छब्दश्रुतिबलादित्यर्थः । **तेनेति** । येन पूर्ववाक्यस्थमपकर्षति तेनेत्यर्थः । ननु दिवि दिव इति च रूपभेदान्न पूर्ववाक्यस्थब्रह्मण इह प्रत्यभिज्ञा ऽतः सर्वनाम तं न परामृशेदत आह **प्रधानं हीति** । प्रातिपदिकार्थे इत्यध्याहार्यम् । प्रातिपदिकार्थौ द्यौस्तावदुभयत्र समा सा हि प्रधानं गुणास्तु विभक्त्यर्थः । तस्माद् गुणे त्वन्याय्यकल्पनेति विभक्तिवैरूप्यं नेयमित्यर्थः । यदवादि छन्दोभिधानात्सन्दिग्धं प्राचि वाक्ये ब्रह्मेति तत्राह
ब्रह्मेति । तत्र गायत्रीवाक्ये त्रिपाद् ब्रह्म न तु छन्द इत्यर्थः । यस्या- ,, । २१
हिताग्नेरग्निर्गृहान् दहेदग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदित्यत्र दहेदिति विधिविभक्तिः प्रसिद्धार्थयच्छब्दोपहता गृहदाहलक्षणनिमित्तपरा । आर्च्छेदिति च विधिविभक्तिः स ऐन्द्रं पञ्चशरावमोदनं निर्वपेदिति विधास्यमाननिर्वापनिमित्तं हविरार्त्तिमनुवदति । **उभयं** दधिपयः* ।

वचनानि त्विति । ज्योतिष्टोमगतसोमेषु शेषभक्षो विध्यभावान्न विद्यत इति प्राप्ते सर्वतः परिहारमाश्विनं भक्षयति तस्मात्सर्वा दिशः शृणोतीत्याद्यर्थवादा अप्राप्तत्वाद्वृत्ताऽनुवादायोगाद्विधायकानि वचनानीत्युक्तं

---

* दधिपयसी इति वक्तुं युक्तम् । न दधिपयआदीनीत्येकवद्भावनिषेधात् ।

तृतीये । एवं प्राप्त्यभावे प्रसिद्धार्थत्वं सर्वनाम्नो ऽपनीयतइति यदाग्नेयइति तुल्यन्यायत्वादुदाहृतम् । कार्यज्योतिरुपलक्षित इति भाष्योक्तलक्षणायां
१५२ । १४ संबन्धमाह **ब्रह्मविकार इति ।** ननु वाक्यस्थज्योतिर्लाभे प्रकृतहानं न दोषो ऽत आह **प्रसिद्ध्यपेक्षायामिति ।** यच्छ्रुतेर्विषयगवेषणे प्रकरणाप्राप्तमपि प्रसिद्धं ग्राह्यं न स्ववाक्यगतमपि प्रस्तोष्यमाणमपूर्वमसिद्धेरित्यर्थः । शास्त्रवशादन्यदृष्ट्यालम्बनं प्रतीकम् । कौक्षेयज्योतिषो ब्रह्मप्रतीकत्वे ब्रह्मसंबन्धमाह **कौक्षेयं हीति ।**

न च भूतपृथिवीति । एवं हि श्रूयते । गायत्री वा इदं सर्वं भूतं यदिदं किं च वाग्वै गायत्री वाग्वा इदं सर्वं भूतं गायति च त्रायते च या वै सा गायत्रीयं वाव सा येयं पृथिवी या वै सा पृथिवीयं* वाव सा यदिदं शरीरमस्मिन् हीमे प्राणाः प्रतिष्ठिता यद्वै शरीरम् इदं तद्यद्धृदयं†मस्मिन् हि प्राणाः प्रतिष्ठिता इति । पृथिव्या भूताधारत्वात्सर्वभूतमयगायत्रीत्वं शरीरहृदययोर्भूतात्मकप्राणाश्रयत्वाद्गायत्री । ता एवमन्यार्थोक्तवाक्प्राणसहितैर्भूतादिभिः षड्विधा गायत्रीति ।

१५४ । १५ **गायत्र्याः सर्वच्छन्द इति ।** एवं हि श्रूयते । चतुरक्षराणि छन्दांस्यग्रे समभवन् तेषु जगती सोमाहरणाय गता त्रीण्यक्षराणि हित्वा आगच्छत् । एकं हित्वा त्रिष्टुबागता । गायत्री तु गत्वा तानि गलितानि चत्वार्यक्षराणि सोमं चाहृतवती । ततः सा ऽष्टाक्षरा ऽभवत्तयैव सवनत्रयमतन्वत याज्ञिकाः । माध्यन्दिने सवने त्रिष्टुभा प्रार्थिता गायत्री तामुपाह्वयत् । सा च गायत्र्यक्षरैरष्टभिः स्वीयैरेव शिष्टैस्त्रिभिरक्षरैरेकादशाक्षरा ऽभवत् । ततो जगत्या प्रार्थिता गायत्री तां तृतीयसवने उपाह्वयत् । सा च स्वीयेनैकेन प्राचीनैश्चैकादशभिरक्षरैर्द्वादशाक्षरा ऽभवदित्युक्त्वोपसंहृतं तस्मादाहुर्गायत्राणि वै सर्वाणि सवनानीति । द्विजातीनां द्वितीयजन्मजननीत्वं श्रुतं गायत्र्या ब्राह्मणमसृजदिति । त्रिष्टुभा राजन्यं जगत्या वैश्यम् इति ।

केन चिदत्र प्रसिद्धा त्रिपाद् गायत्री न प्रत्यभिज्ञायते ऽस्याश्चतुष्पात्त्वादित्युक्तम् । तन्न । षडक्षरैश्चतुष्पदो ऽप्यष्टाक्षरैस्त्रिपात्त्वोपपत्तेरिति ।

---

* या वै सा पृथिवीति नास्ति २ पु. । † इदं तद्धृदयमिति २ पु. पा.

स्वात्मनीति यावत् त्रयः पादा इति* । अल्पं प्रपञ्चं पादमपेक्ष्य स्वरूपमपरि†च्छिन्नत्वात् त्रयः पादा इति दिवीति वाक्यशेषवशात् । त्रिपादिति मन्त्रपदस्य व्याख्यान्तरमाह **अथ वेति** । पद्यते ज्ञायते एभिस्तुरीयमिति विश्वतैजसप्राज्ञास्त्रयः पादाः । एते यस्य तत्त्रिपात्तुरीयं स्वपादद्वारा गगने ऽवस्थितमिति मन्त्रार्थः । ननु त्रिपाद् ब्रह्मणः अयं वाव स‡ इति कथं भूताकाशैक्योपदेशो ऽत आह **तद्धीति** । उपलब्धिस्थानस्तुत्यर्थं ब्रह्म- १५५ । ९
त्वोक्तिरित्यर्थः । **बाह्यानिति** । शरीराद्बहिष्ठानिति । ननु चतुष्पात्त्वगुणयोगाद्गायत्रीशब्दो ब्रह्म गमयति कथमभिहितमिति भाष्यनिर्देशो ऽत आह **ब्रह्मपरत्वादिति** । ननु पूर्वत्रापि विकारानुगतं§ ब्रह्म गायत्रीपदेन लक्षणया तात्पर्येण गमितमतः को विशेष उच्यते । गौणे प्रयोगे ऽभिधेयगतो गुणस्तात्पर्याल्लभ्यते लक्षणायां तु संबन्धं निमित्तीकृत्यार्थान्तरे तात्पर्यमिति गायत्र्याख्यस्य ब्रह्मणो हृदि स्थितस्योपासनाङ्गत्वेन द्वारपालादिगुणविद्ध्यर्थं तस्य ह्वेत्यादि वाक्यं तदर्थेतो ऽनुक्रामति **हृदयस्येत्यादिना** । प्रागादिदिग्गता हृदयकमलसुषयो द्वाराणि तत्स्थाः प्राणादिवायवो द्वारपालास्ते च चक्षुरादिकरणयुक्ता आदित्यादिदेवैरधिष्ठिता इति समुदायार्थः । प्राणशब्दं निर्वक्ति **प्रायणकाले इति** । स आदित्य इत्यनन्तरनिर्दिष्टचक्षुष आदित्यत्वं नोच्यते किं तु प्राणस्येत्याह **स एवेति** । कारणमाह **आदित्य इति** । अधिष्ठात्रधिष्ठेययोरैक्योपचारः । श्रोत्रद्वारा चन्द्रमा व्यानस्याधिष्ठाता । एवमुत्तरत्रापि करणद्वारा वाय्वधिष्ठातृत्वं देवतानां द्रष्टव्यम् । अपश्वासस्या‖ऽपानस्य मुखे वाक्संबन्धाद्वाक्त्वमित्यर्थः । सो ऽग्निरिति श्रुतौ वाचोऽग्नित्वमुक्तं तत्र हेतुमाह **वाग्वा इति** । **तत्पर्जन्य इति** । १५६ । ८
पर्जन्यो वृष्ट्यात्मको देवस्तन्निमित्ता आपः तया मनोनिमित्ताश्च मनसा सृष्टा आपश्च वरुणश्चेति श्रुतेरतो मनसः पर्जन्यो ऽधिष्ठाता । उदानवायुः¶ सामान्यात्मकः सहायकत्वे* वर्तते तस्य च वाय्वाधार आकाशः परमेश्वरो देवतेत्यर्थः । हार्दस्य ब्रह्मणः पुरुषाः प्राणादयः । यदादावुक्तं प्रधानप्रकृ-

* स्वात्मनि त्रयः पादा इति १–५ पु॰ पा॰ । † स्वरूपस्यापरीति २ पु॰ पा॰ ।
‡ इदं वाव स इति ३ पु॰ पा॰ । § विकारान्तरानुगतमिति २ पु॰ पा॰ ।
‖ अधःश्वासस्येति २ पु॰ पा॰ । ¶ उदानस्य वायुरिति २–३ पु॰ पा॰ ।
* सहायकत्वेनेति २ पु॰ साहाय्यके वर्ततइति ३ पु॰ पा॰ ।

त्यर्थप्रत्यभिज्ञानुरोधेन प्रत्ययार्थवैषम्यं नेयमिति तदुपदर्शकं भाष्यं व्याचष्टे
१५६ १३ **यदाधारत्वमिति । अर्वाग्भागेति ।** यदा मुख्यमाधारत्वं वृक्षाग्रस्य विवक्षितं तदा वृक्षाग्रात्परतः श्येन इति प्रयोगे श्येनशब्दो वृक्षाग्रलग्नश्येनावयवादुपरितनावयवावच्छिन्नावयविलक्षक इत्यर्थः । अस्मिन्पक्षे दार्ष्टान्तिके ब्रह्मणः श्येनवदवयवाभावाद्दिव इति श्रुतिं लक्षणया व्याचष्टे **एवमिति ।** शक्यते च दृष्टान्ते ऽपि वृक्षाग्रादित्यवधिश्रुतिर्लक्षणया नेतुमग्रभागादीषदर्वाग्भागपरत्वे तदा दार्ष्टान्तिकेन साम्यमिति । यदा त्वनौपाधिकं ब्रह्माकाशास्पृष्टं विवक्षित्वा पञ्चम्येव मुख्या तदा सप्तमी सामीप्यसंबन्धं लक्षयतीत्याह **यदा त्विति । अत एवेति ।** यतः सर्वमर्यादा मुख्या ऽत एवेत्यर्थः । या तु दिवि द्योतनवतीति व्याख्या तस्यां नामी व्याख्या विकल्प्याः । अत एव तदपरितोषादथ वेत्युक्तमिति । तावानस्य महिमेति । गायत्री वा इदं सर्वं भूतमित्यादिना भूतपृथिवीशरीरहृदयवाक्प्राणमयी षड्विधा चतुष्पदा गायत्रीत्युक्तम् । अस्य गायत्र्यनुगतस्य ब्रह्मणस्तावान्महिमा विभूतिः परमार्थतस्त्वयं पुरुषस्ततो ज्यायान्महत्तरः तदेवाह सर्वाणि भूतान्यस्य पादः । अस्य त्रिपादमृतं दिवि द्योतनवति स्वा*त्मन्येव स्थितम् । यथा कार्षापणश्चतुर्द्धा त्रिभक्त एकस्मात् पादात्पादत्रयीकृतो† महानेवं पुरुषः पुरुषार्थरूपः‡ प्रपञ्चान्महानित्यर्थः ।

११ । १० **ते वा एते इति ।** संवर्गविद्यायामधिदैवमग्निसूर्यचन्द्रादयो वायौ लीयन्ते । अध्यात्मं च वाक्चक्षुःश्रोत्रमनांसि प्राणे संव्रियन्तइत्युक्तम् । ते वायुना सह पञ्च आध्यात्मिकेभ्यो ऽन्ये । प्राणेन च सहाधिदैविकेभ्यो ऽन्ये पञ्च । एवं दशसन्तस्तत्कृतम् । अत्रापि चतुरायक्रद्यूतगतचतुरङ्कवत्सन्ति चत्वारः पदार्थाः त्र्यङ्कायवत्त्रयः द्व्यङ्कायवद्द्वौ एकायवदेकः । द्यूते च चतुरङ्कः कृतसञ्ज्ञः स च दशात्मकः । चतुर्ष्वङ्केषु त्रयो ऽन्तर्भवन्ति एवं सप्त त्रिषु द्वौ तथा सति नव द्वयोरेकः इति दश । वाय्वादयो ऽपि§ दशसंख्यत्वादेवं कृतम् । सैषेति विधेयाभिप्रायः स्त्रीलिङ्गनिर्देशः । दशसंख्यत्वाद्विराट् अन्नम् । दशाक्षरा विराडन्नमिति हि श्रुतिः । कृतत्वादन्नादिनीकृते ह्यन्न-

---

* स्वशब्दो नास्ति २ पु॰ ।
† पादात् त्रयीकृत इति ३ पु॰ पा॰ ।
‡ परमार्थरूप इति २ पु॰ पा॰ ।
§ वागादयो ऽपीति २ पु॰ पा॰ ।

भूता दशसंख्यान्तर्भूता । अतस्त्वामतीव अतो ऽन्नादत्वेनापि गुणेन वाय्वादय उपास्या इत्यर्थः* ॥

प्राणस्तथानुगमात् ॥ २८ ॥ १५७ । १

अनेकेति । अनेकेषां लिङ्गान्यनेकानि च तानि लिङ्गानि वा प्रतिपदार्थमनेकानीत्यर्थः । तेषामेकत्वेन प्रतिभासमानवाक्ये समावेशे किं बलवत् । किममूनि सर्वाणि समबलानि उतैकमेव बलवद्यदा चैकमेव बलवत्तदा कस्य लिङ्गिनो लिङ्गं बलवत् किं ब्रह्मण उत प्राणादेरित्येतदत्र चिन्त्यते । एतच्च प्रागत एव प्राण† इत्यत्र न चिन्तितम् । तत्र हि ब्रह्मलिङ्गात् प्राणश्रुतिर्नीता न तु ब्रह्माब्रह्मलिङ्गानां बलाबलमित्यर्थः । ज्योतिर्वाक्ये ऽपि यच्छब्देन समाकृष्टे ब्रह्मणि तल्लिङ्गन्तेजोलिङ्गाद्बलवदित्युक्तम् । न तथेह किं चिन्निर्णयकारणमिति तेनाप्यगता चिन्ता ऽत एव सङ्गतिः । अथ वा दिवि दिव इत्यत्र प्रधानप्रकृत्यर्थमनुरुध्य प्रत्ययार्थो नीतः एवमिहापि स्वतन्त्रप्राणादिपदार्थभेदप्रतीतौ तत्सापेक्षत्वेन गुणभूतवाक्यार्थप्रतीतेर्युक्तमन्यथानयनमिति भिन्नोपासनविध्युपगमेन पूर्वपक्षोत्थानस्य वक्ष्यमाणत्वात्सङ्गतिः । **बहूनीति**‡ । बहुग्रहणमनेकानि च लिङ्गानीति संग्रहे समासप्रदर्शनार्थम् । एवं च प्राणादिषु प्रत्येकमपि बहुलिङ्गदर्शनाद् भूयसां न्यायेनाप्यनिर्णयादाकाशस्तल्लिङ्गा§दित्यनेनाप्यगतार्थत्वमुक्तम् । अनन्यथासिद्धब्रह्मलिङ्गानुसारेणेतरेषामन्यथासिद्धिं वदन्तस्तद्धर्मोपदेशा‖दित्यनेन पुनरुक्तिं शङ्कते **स्यादेतदित्यादिना** । देवतालिङ्गस्यान्यथासिद्धिमाह **तथापीति** । शास्त्रदृष्ट्या तूपदेश¶ इति सूत्रार्थं मनसि निधायाह **इन्द्रदेवताया** ,, । १८
इति । ध्यानजसाक्षात्काराभ्युपगमो वाचस्पतेरेतत्सूत्रार्थाबोधादिति केश्चिदयुक्तमुक्तम् । यतः ।

अपि संराधने सूत्राच्छास्त्रार्थध्यानजा प्रमा ।
शास्त्रदृष्टिर्मता तां तु वेत्ति वाचस्पतिः परम् ॥

---

* अत्र दशमं ज्योतिश्चरणाधिकरणं संपूर्णम् । तत्र सूत्राणि ४–ज्योतिश्चरणाभिधानात् २४ छन्दोऽभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथा हि दर्शनम् २५ भूतादिपादव्यपदेशोपपत्तेश्चैवम् २६ उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् २७ ।

† व्यास सू॰ अ॰ १ पा॰ १ सू॰ २३ ।

‡ अयं प्रतीको नास्ति ३ पु॰ ।

§ व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ २२ ।

‖ व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ २० ।

¶ व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ ३० ।

वसत इति द्विवचनश्रुत्या सहोत्क्रमणादिलिङ्गानुगृहीतयोपास्य-
भेदप्रतीतेर्न वाक्यस्य ब्रह्ममात्रपरत्वनिर्णय इति वदन् पूर्वपक्षसंभवमाह
१५८ । १५ **अत्रोच्यतइति** । तस्य प्राणस्य प्रज्ञात्मना जीवेन सहोपास्यत्वमुक्तमि-
त्यर्थः । **ब्रह्मणि प्राण इति** । स एष प्राण आनन्दो ऽजर इत्यत्र प्राण-
शब्दो ब्रह्मवाचीत्यर्थः । भवतु पदार्थावगमपूर्वको वाक्यार्थावगमस्तथापि
गामानयेत्यादाविवैकवाक्यता किं न स्यादत आह **पदार्थानां चेति** ।
गुणप्रधानयोग्यपदार्थावगमे भवत्वेकवाक्यता इह तु सहोत्क्रामत इत्या-
दिभिः स्वातन्त्र्यावगतेर्वाक्यभेद इत्यर्थः । हेतुः पदार्थावबोधो हि वाक्या-
र्थबोधे ऽत एव स गुणः । उद्देश्यस्तु वाक्यार्थप्रत्ययः प्रधानम् अतो न
प्रतीतैकवाक्यत्वभङ्ग इति सिद्धान्तयति **सत्यमित्यादिना** । ज्ञानश-
क्तिमती बुद्धिः क्रियाशक्तिमाँश्च प्राणः । यदि प्रत्यगात्मोपाधी भे-
देन निर्दिष्टौ न तु जीवप्राणौ स्वातन्त्र्येण कथं तर्हि प्राण एव प्रज्ञा-
त्मेत्युपक्रम्योपास्येति तयोरुपास्यत्वनिर्देशः भेदेनोक्तयोर्वा कथमभेदनिर्देशो
१५९ । १९ ऽत आह **अत एवेति** । ननु जीवप्राणब्रह्मणामुपास्यत्वेन यदि पूर्व-
पक्षः कथं तर्हि जीवमुख्यप्राणलिङ्ग*सूत्रावतारकपूर्वपक्षभाष्ये ब्रह्मपरत्व-
निषेधो ऽत आह **ब्रह्मवाक्यमेवेति**† । ब्रह्मपरत्वनियमो निषिध्यतइ-
त्यर्थः । एतत्सूत्रपूर्वपक्षभाष्यएव प्राणस्य प्रज्ञात्मत्वमुपपादयितुं प्रज्ञेत्यादि
भाष्यम् । तत्र प्राणान्तरशब्दार्थमाह **प्राणान्तराणीति** । न मुख्यप्राण-
स्थितौ स्थितेस्तदुत्क्रान्तावुत्क्रान्तेस्तत्प्रतिष्ठानीन्द्रियाणि । एतत्सूत्रपूर्वप-
क्षोपसंहारभाष्यं तस्मादिह जीवमुख्यप्राणयोरन्यतर उभौ वा प्रतीयेयातां न
ब्रह्मेति तदप्युपासनात्रयपरतया नियमयति **जीवेति** । अन्यतरत्वपक्ष उप-
क्रममात्रमस्थिर इत्यर्थः । ननु त्रयाणामुपासने कथमुभाविति निर्देशो ऽत
आह **ब्रह्म त्विति** । उभयोः प्राप्त्यर्थो ऽयं निर्देशो न ब्रह्मव्यावृत्त्यर्थः ।
तर्हि न ब्रह्मेति कथमत आह **ब्रह्मैवेति** । एवमेता भूतमात्रा इति वाक्य-
स्यार्थेत उपादानेन ब्रह्मलिङ्गस्यान्यथासिद्धिप्रदर्शकं जीवमुख्यप्राणलिङ्ग-

---

* व्या॰ सू॰ अ॰ १ पा॰ ४ सू॰ १७ ।

† ब्रह्मेति । ब्रह्मवाक्यमेवेति । इति प्रतीकद्वयं दृश्यते २ पु॰ ।

सूत्र*सिद्धान्तभाष्यं दशानामित्यादि तद्व्याचष्टे पञ्चेति । श्रुतौ भूतमात्रा- १६० । ९
शब्दे† द्वन्द्वसमासः भूतानि च मात्राश्चेति । भूतानि पृथिव्यादीनि पञ्च
मात्राः शब्दादयः सूक्ष्मभूतानि च पञ्चेति दशेत्यर्थः । प्रज्ञामात्राणां चेति
भाष्ये दशानामित्यनुषञ्जनीयं चशब्दादित्यभिप्रेत्य व्याचष्टे **पञ्च बुद्धी-
न्द्रियाणीति** । **पञ्चबुद्धय इति** । पञ्चेन्द्रियजनिता बुद्धय इत्यर्थः ।
अत्रापि द्वन्द्व एव । प्रज्ञाबुद्धयः मीयन्ते शब्दादय आभिरिति मात्रा इन्द्रि-
याणि । पूर्वोत्तरव्याख्ययोः सूत्रार्थं विभजते **पूर्वमिति** । उपासनात्रैविध्यप्रस-
ङ्गादिति पूर्वत्र व्याख्या ऽत्र त्वेकस्या उपासनायास्त्रिविधत्वाद् न वाक्य-
भेद इति व्याख्येत्यर्थः । किमुपासनात्रयविशिष्टं ब्रह्म विधीयते उत ब्रह्मवि-
शिष्टमुपासनात्रयं किं वा तदनुवादेन तदाश्रित्योपासनात्रयमिति । नाद्य इत्याह
युक्तमिति । न द्वितीय इत्याह **वाक्यान्तरेभ्यश्चेति**‡ । विशेषण-
ब्रह्मणः संनिधौ प्राप्तत्वाद् न तद्विशिष्टोपास्तिविधिरित्यर्थः । ततस्तृतीय-
पक्षः परिशिष्यतइत्याह **तदनूद्येति** । तं दूषयति **तस्य चेति** । ब्रह्मा- ,, । २१
नुवादेनोपासनविधावेकविशेष्यावशीकारादुपासनानां च परस्परमसङ्गा§त्प्रत्यु-
पास्ति विध्यावृत्त्यापात इत्यर्थः ।

अत्र के चित्प्रकरणित्वे ऽपि‖ ब्रह्मणो ऽवान्तरवाक्यभेदेन श्रवणा-
दिवद्यज्ञादिवच्चोपासनात्रयं विधेयमत एकवाक्यत्वे ऽपि नानावाक्यत्वमविरु-
द्धम् । अपि च नैव वाक्यभेदः प्राणादित्रितयधर्मविशिष्टैकोपासनविधेरि-
त्याहुः । तन्न । यतः ।

अगत्या कल्प्यो ऽपूर्वत्वा¶द्वाक्यभेदो हि धारणे ।
इह ब्रह्मातिरेकेण नाऽपूर्वार्थावधारणा ॥

उपक्रमोपसंहारैक्यादवगते एकवाक्यत्वे सर्वात्मत्वविवक्षया प्राण-
जीवधर्मा ब्रह्मणि स्तुत्यर्थं निर्दिष्टा इति शक्यते योजयितुम् । सर्वात्मत्वं
च सृष्टिवाक्यसिद्धं शक्यमनुवदितुं न त्वेवमुपरिधारणमन्यतः प्राप्तमित्य-

* व्याससू॰ अ॰ १ पा॰ ४ सू॰ १७ ।   † मात्रशब्दः इति २ पु॰ पा॰ ।
‡ वाक्यान्तरेभ्य एवेतीति प्रतीको दृश्यते १ पु॰ ।
§ असङ्गतत्वादिति २ पु॰ पा॰ ।   ‖ प्राकरणिकत्वे ऽपीति २ पु॰ पा॰ ।
¶ कल्प्यपूर्वत्वादिति ३-१ पु॰ पा॰ ।

शक्यानुवादत्वाद्वाक्यभेदस्तत्र कल्पितः । श्रवणादिविधिस्त्वनिष्ठो यज्ञादिविधिरपूर्वत्वाद्विषमः ।

यच्च त्रितयधर्मविशिष्टमेकमुपासनमिति तदपि न । इह हि किं जीवप्राणौ स्वधर्मैर्विशिष्य पुनस्ताभ्यां विशिष्टं ब्रह्मोपास्यमिष्यते । उताऽरुणैकहायनीवत्सर्वविशेषणविशिष्टब्रह्मोपासनां विधाय पार्ष्णिको जीवप्राणयोस्तद्धर्माणां च विशेषणविशेष्यभावो विशिष्टविधिसामर्थ्यात्प्रमीयते* इति । नाद्यः । जीवप्राणयोः स्वधर्मान् प्रति विशेष्यत्वं ब्रह्म प्रति विशेषणत्वम् इति वैरूप्यात् । न चरमः । प्राणादीनां विप्रकीर्णत्वादेकविशिष्टप्रतीत्ययोगादिति ।

दिवोदासस्यापत्यं दैवोदासिः । धाम गृहम् । अरुन्मुखानिति । रौति यथार्थं शब्दयति इति रुद् वेदान्तवाक्यं तत्र मुखं येषां† ते रुन्मुखाः तेभ्यो ऽन्ये अरुन्मुखाः । शालावृकेभ्यो ऽरण्य‡श्वभ्यः । अस्तित्वे चेति । प्राणशब्दवाच्यस्य परमात्मनो ऽस्तित्वे प्राणानामिन्द्रियाणां निःश्रेयसं जीवनादिपुरुषार्थसिद्धिः । एवमेवैता इति । पृथिव्यादीनि शब्दादयश्चेन्द्रियेषु तज्जन्यज्ञानेषु च विषयत्वेनार्पिताः प्रज्ञा बुद्धयो मात्रा इन्द्रियाणि प्राणे परमात्मन्यर्पितानि नेमिवद्विषयाः । अरवदिन्द्रियबुद्धयः । नाभिवदात्मा । तान्वरिष्ठ इति । प्राणाः किलास्मासु कः श्रेष्ठ इति निर्दिधारयिषवः प्रजापतिं जग्मुः । स आह यस्मिन् उत्क्रान्ते इदं शरीरं पापिष्ठमिव भवति स श्रेष्ठ इति । तथेति वागादयः§ उच्चक्रमुः । तथापि शरीरमव्यग्रमवर्तत प्राणोच्चिक्रमिषायां शरीरकरणेष्वनवस्थामाप्नुवत्सु यान् श्रेष्ठंमन्यान्|| चक्षुरादीन् श्रेष्ठः प्राण उवाच प्राणापानादिभिः पञ्चधा ऽऽत्मानं स्वं विभज्यैतदिति क्रियाविशेषणमित्थमित्यर्थः । वाति गच्छतीति वानं वानमेव वाणम् । वा गतिगन्धनयोः । अस्थिरं शरीरमित्यर्थः । तस्मादेतदेवेति । उत्थापयति शरीरादिकमित्युक्थम् । अथ यथेति । अस्या जीवलक्षणायाः प्रज्ञायाः संबन्धीनि भूत्वा सर्वा सर्वाणि भूतानि तद्दृश्यत्वेन कल्पितानि वस्तुत एकं भवन्ति अस्या एकमङ्गं फलरूपं चैतन्यं स्वविषयोपाधिना ऽदूदुहद्दोचितवती । तस्या दुग्धायाः

* प्रतीयतइति २ पु· पा· ।
† तन्मुखे येषामिति २ पु· पा· ।
‡ आरण्येति २ पु· पा· ।
§ वागादयः क्रमेणेति २ पु· पा· ।
|| श्रेष्ठंमन्यमानानिति २ पु· पा· ।

प्रज्ञाया उपरि विषयत्वेन नामलक्षणा भूतमात्रा भूतसूक्ष्मं प्रतिविहितम् । उपहितचैतन्य*द्वारा स्वरूपे द्रष्टृत्वाध्यासमाह प्रज्ञया द्वारा वाचं समारुह्य वाचं करणं प्रति कर्तृत्वाध्यासमनुभूय तया करणेन सर्वाणि नामान्याप्नोतीति वक्तृत्वेन कर्मेन्द्रियप्रवृत्तिरपि चैतन्याधीनेति प्रज्ञादोह उक्तः । ता वा इति । भूतानि शब्दादयश्चाधिप्रज्ञम् । प्रज्ञाशब्द इन्द्रियाण्यप्युपलक्षयति इन्द्रियेषु तज्ज्ञानेषु च दश प्रज्ञामात्राः इन्द्रियतज्ज्ञप्रज्ञाः अधिभूतेषु ग्राह्यग्राहकयोरन्योन्यापेक्षत्वात् कल्पितत्वमतोऽद्वैतं तत्त्वमित्यर्थः† ॥

इति श्रीमदनुभवानन्दपूज्यपादशिष्यपरमहंसपरिव्राजकाचार्य‡भगवदमलानन्दविरचिते वेदान्तकल्पतरौ प्रथमाध्यायस्य प्रथमः पादः§ ॥

	अस्मिन् पादे	आदितः
अधिकरणानि	११	११
सूत्राणि	३१	३१

---

* उपहितमुपहितचैतन्यमिति २ पु॰ पा॰ ।

† अत्र एकादशम् इन्द्रप्राणाधिकरणं प्रातर्दनाधिकरणं वा पूर्णम । तत्र सूत्राणि ४–प्राणस्तथानुगमात् २८ न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन् २९ शास्त्रदृष्ट्या तूपदेशो वामदेववत् ३०जीवमुख्यप्राणलिङ्गाचेति चेन्नोपासनात्रैविध्यादाश्रितत्वादिह तद्योगात् ३१ ॥

‡ आचार्येति नास्ति १ पु॰ ।

§ चरण इति ३ पु॰

अथ प्रथमाध्यायस्य द्वितीयः पादः ।

१६१ । १८ **सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥**

प्रथमपादे स्पष्टब्रह्मलिङ्गवाक्यान्युदाहरणम् । द्वितीयतृतीययोस्त्व-
स्पष्टब्रह्मलिङ्गानि । तयोस्तु प्रायशः सविशेषनिर्विशेषब्रह्मलिङ्गकवाक्यविषय-
तया वा योगरूढिविषयतया वाऽवान्तरभेदः । **अधिकरणसिद्धान्तेति ।**
यस्मिन्सिद्धावर्थादन्यसिद्धिः सोऽधिकरणसिद्धान्तः । यद्यर्थान्तररूढा अपि शब्दा
ब्रह्मलिङ्गाद् ब्रह्मपरतया व्याख्यातास्तर्हि कैव कथा मनोमयत्वादिलिङ्गेषु ।
अपि चेह ब्रह्मशब्द एवास्ति सर्वं खल्विदं ब्रह्मेति अस्ति च वाक्यशेषे
सर्वकर्मत्वादि ब्रह्मलिङ्गं तत्कथं जीवपरत्वशङ्का वाक्यस्या*त आह **पूर्व-
पक्षाभिप्रायं त्विति ।** क्रतुमित्यादिवाक्येनेत्यारभ्येत्यर्थः । **तज्जमिति ।**
तल्लयमित्यर्थः । तस्मिन्ननितीति **तदन् ।** क्रतुर्ध्यानं तत्प्रधानस्तन्मयः ।
मनोमयत्वादीनां प्रकृतब्रह्मनैरपेक्ष्यसापेक्षत्वाभ्यां संशयमाह **तत्रेति ।** पा-
दान्तरत्वादेव नावान्तरसङ्गतिः । स्ववाक्योपात्तधर्म†विशिष्टजीवोपासनानुवा-
देन शमविधिपरत्वान्न सर्वं खल्विति वाक्यमुपास्यसमर्पकमित्याह **क्रतुमिति ।**
१६२ । ८१ प्रागप्रतीतायाः क्रतुप्रवृत्तेः कथमुपासीतेत्यनुवादस्तत्राह **तथा चेति ।** ननु
सङ्कल्पविधेरुपास्यसापेक्षत्वाद् ब्रह्मण उपास्यत्वम् अत आह **एवं चेति ।**
सापेक्षस्य गुणविध्यर्थमाश्रयदानायोगान्मनोमयत्वादिभिरेवापेक्षापूरणमित्य-
र्थः । स्यादेतन्मनोमयत्वादिमद् ब्रह्मैवास्त्वित्यत आह **मनोमयत्वादि
चेति ।** उत्पत्तिशिष्टत्वं कर्मस्वरूपप्रतीतिसमयावगतत्वम् । यदि न ब्रह्मो-
पास्यं किमर्थं तर्हि ब्रह्माभिधानमित्यत आह **न चेति ।** हेतुवन्निगदात-
र्हीति तयोक्तः ।

शूर्पेण जुहोतीत्याम्नाय तेन हीति श्रुतम् । तत्र हिशब्द‡श्रुतेः स्तुतौ
च लक्षणाप्रसङ्गादन्नकरणत्वं शूर्पहोमे हेतुरुपदिष्टः । तथा च यद्यदन्नकरणं
दर्व्यादि तेन तेन होतव्यमिति प्रापय्य राद्धान्तितं प्रमाणलक्षणे । शूर्पे हि

* वाक्यस्येति नास्ति ३ । † तद्धर्मेति १ पु० पा० । ‡ हेना हिशब्देति ८ पु० पा० ।

होमकरणं तृतीयाश्रुत्या गम्यते विध्यर्थस्य च न हेत्वपेक्षा । **तस्मात्**
शूर्पस्तुतिः । यत्तु हेतौ हिशब्दश्रुतिरिति । तन्न । न हि साक्षाद्दर्व्यादिना शक्य-
मन्नं कर्तुम् । अथ शक्यं प्रणाड्या कथं तर्हि श्रुतिवृत्तिता हेतुवचनस्य ।
ननु शूर्पस्तुतावपि लक्षणा स्यान्न हि तेनापि साक्षादन्नं क्रियते । **अद्धा** ।
स्तुतिर्ह्यनुवादत्वाद्यथाप्राप्ति लक्षणां सहेत न विधिरपूर्वार्थत्वादिति* ।

समास इति । प्राणः शरीरमस्येति बहुव्रीहिविग्रहवशादन्तर्गर्भि- १६३
तसर्वनामार्थवान्सर्वनाम च संनिहितावलम्बीति समासः संनिकृष्टमपेक्षते
तेन सर्वनामश्रुतिर्ब्रह्मोपास्यत्वे मानमुक्ता† । ननु न ज्योतिर्वाक्यवदिह वा
वाक्यान्तरोक्तब्रह्मणोऽस्ति संनिधापिका प्रत्यभिज्ञा यतः सर्वनाम परा-
मृश्येत । अतः स्ववाक्यस्थेन मनोमय इति मयडर्थेनाकाङ्क्षाशान्तिरत आह
तद्धितार्थोऽपीति । सोऽपि विकारप्राचुर्यसाधारणत्वेन सामान्यमतो
नाकाङ्क्षाशमकः संदिग्धत्वात् । फलितमाह **तस्मादिति** । **अन्यपरादपि** ।
शमविधिस्तुतिपरादपि इति । ब्रह्मोपादाने वाक्यशेषस्थलिङ्गसामञ्जस्यमाह
तथा चेति । **तदभिधानं** समासाभिधानम् । तद्धितार्थ इत्येतद्व्याचष्टे
तत्र मनोमयपदमिति । एष मनोमयशब्दो जीवे एव निविष्टावयवार्थो
न तु ब्रह्मणि तस्य मनआदिविरहप्रतिपादनादित्येतच्च न युक्तम् । कुतो
न युक्तमत आह **तस्यापीति** । **विकाराणां चेति** । विकारविशेषाणां
जीवानामित्यर्थः । विकारत्वं जीवानामवच्छेदापेक्षं यदि जीवद्वारा ब्रह्मणो
मनोमयत्वं तर्हि जीवे एव मनोमयपदं मुख्यमिति तदेव समासाकाङ्क्षायाः
परिपूरकमिति शङ्कते **स्यादेतदिति** । बलाऽबलविवेकाय पक्षविभागं करोति १६४
तदेतदिति । अधिष्ठानलिङ्गैः सर्वकर्मत्वादिभिस्तदभिन्नजीवानां तद्वत्त्वपक्षे
फलितमाह **तथा च जीवस्येति** । वस्तुतो ब्रह्माऽभिन्नस्यापि जीवस्याव-
च्छिन्नतया न ब्रह्मधर्मवत्ता । ब्रह्म तु सर्वात्मत्वाज्जीवलिङ्गैस्तद्वद् जीव-
लिङ्गवदिति । पक्षे लाभमाह **तथा च ब्रह्मलिङ्गानामिति** । ज्ञायमानेन
समारोप्यरूपेणाधिष्ठानविषयो रूपवान् भवेत्तस्याज्ञायमानत्वेन समारोपकाले
ऽपि सत्त्वात् । विषयस्य तु रूपेणासाधारणेन ज्ञायमानेन समारोप्यं न रूप-

---

* जै· सू· अ· १ पा· २ सू· २६–३० अत्रायं विषयो द्रष्टव्यः ।
† उक्ताऽस्त्विति २ पु· पा· ।

वदधिष्ठानाऽसाधारणरूपज्ञाने सति समारोप्याभावादित्यर्थः। प्रस्तुते ऽधिष्ठा-
१६४ । १७ नासाधारणरूपज्ञानमस्तीत्याह **तस्मादिति**। ननु यद्युक्तरीत्या मनोमय-
वाक्ये ऽपि ब्रह्मलिङ्गात्तत्प्रतीतिस्तर्हि कथं भाष्यकारः सूत्रविवरणावसरे इह
च सर्वं खल्विदं ब्रह्मेति वाक्योपक्रमे श्रुतमित्येवाह न पुनर्वाक्यशेषे ऽपि
सर्वकाम इत्यादिधर्मवत्तया श्रुतमित्यत आह **एतदुपलक्षणायेति**।
भाष्ये त्वपौरुषेयशब्देन न कर्तृभाव उक्तः किं तु पुंस्वातन्त्र्याभावः। विव-
क्षाभावाभिधानमपि स्वातन्त्र्यनिषेधार्थमित्याह **तथा चेति**। उपादानेन
फलेनेति भाष्ये उपादानं नाम परिग्रहो न तूपादेयत्वमुद्देश्यप्रतियोगि।
विपक्षे दण्डमाह **अन्यथेति**। किं चिद्विधातुं सिद्धवन्निर्दिश्यमुद्देश्यत्वम्।
अनुष्ठेयत्वेन निर्दिश्यत्वमुपादेयत्वम्। उद्देश्याऽविवक्षायां ग्रहं संमार्ष्टीत्यत्रोद्दे-
श्यग्रहस्याविवक्षा स्यात्तथा च चमसादेरपि संमार्गप्रसङ्गः स चायुक्तः।

चमसाधिकरणे* हि प्रकृतयागसंबन्धिसोमपात्रस्याविशेषेण† ग्रहप-
दस्य चोपलक्षणार्थत्वेन चमसानामपि संमार्गमाशङ्क्य सिद्धान्तितं केवलं संमा-
र्गविध्ययोगादुद्देश्येन भाव्यं तच्च ग्रहशब्देन समर्पितम्। न च चमसलक्षणार्थो
ग्रहशब्दः। यागावान्तराऽपूर्वसाधनत्वस्या‡न्तरङ्गस्य तेन लक्ष्यमाणत्वात्।
व्रीहियवयोस्त्ववान्तराऽपूर्वभेदाभावाद्व्रीहीन् प्रोक्षतीत्यत्र व्रीहिशब्दो यवोपल-
क्षणार्थ इति युक्तम्। ततश्च ग्रहेष्वेव संमार्ग इति।

ननु परिग्रह उद्देश्यत्वेन विधिपरिगृहीतस्तर्हि तदेकत्वमपि पश्वेकत्व-
१६५ । ४ वद्विवक्षितं स्यादत आह **तद्गतं त्विति**। ग्रहगतं त्वेकत्वं ग्रहाग्रत्यवच्छे-
दकत्वेन रूपेण न विवक्षितम्। युक्ता हि पशुना यजेतेत्यत्रोपादेयविशेषणत्वा-
देकत्वविवक्षा। एकप्रसरतया एकपशुविशिष्टयागविधिसम्भवात्। अत्र तु ग्रह-
त्वैकत्वोद्देशेन संमार्गविधावुद्दिश्यमानयोः परस्परमसंबन्धाद्ग्रहे एवोद्देश्येन
पर्यवसानाच्च प्रत्युद्देश्यं वाक्यपरिसमाप्तिः स्याद् ग्रहं संमार्ष्टि तं चैकमिति ततश्च
वाक्यभेद इत्यर्थः। वेदे ऽप्युपादेयत्वेनाभिमतं विवक्षितमित्यादि ग्रन्थे विव-
क्षिताऽविवक्षितशब्दनिर्दिष्टेच्छानिच्छे गौण्या वृत्त्या इत्याह **इच्छाऽनिच्छे
चेति**। **को गुण इति**। स भाष्योक्त इत्याह **तदिदमिति**। जीवस्य

* जै॰ सू॰ अ॰ ३ पा॰ १ सू॰ १६–१७।

† सोमाधारत्वाऽविशेषेणेति २ पु॰ पा॰। ‡ साधनस्येति ३ पु॰ पा॰।

ब्रह्मणो भेदाऽभेदाभ्यामुभयश्रुत्युपपत्तेराक्षेपाऽयोगमाशङ्क्याह **न तावदिति** । भेदाऽभेदयोरन्यतरबाधे स्थिते विनिगममाह **तत्रेति** । वेदान्ततात्पर्याद्द्वैतं तत्त्वमिति कुतः प्रत्यक्षादिविरोधाद् अत आह **द्वैतग्राहिणश्चेति** । विधिमात्रव्यापारत्वात्प्रत्यक्षस्य तत्पूर्वकत्वाच्चान्येषामित्यर्थः । **तद्बाधनात्** तैर्वेदान्तैर्बाधनात् । तस्माज्जीवभेदाऽप्रमितेः सूत्रानुपपत्तिरित्याह **तथा चेति** । औपाधिकभेदानुवादित्वेन भेदश्रुतीनां सूत्रस्य चोपपत्तिमाह **अनाद्यविद्येति** । **तादृशां** * **चेति** । अविद्यावच्छिन्नानामित्यर्थः ।

अनादित्वेनेति । जीवाऽविद्ययोर्बीजाङ्कुरवद्धेतुमत्त्वे† जीवाऽनि- १६६ । ६
त्यत्वं स्यात्तस्मादुत्तरोत्तरजीवाभिव्यक्तीनां पूर्वपूर्वभ्रमनिमित्तकत्वमत्रोक्तम् । अनादिस्त्वविद्या जीवोपाधिर्द्वैतताधिकरणे वक्ष्यते । अनादिजीवाऽविद्ययोश्चेतरेतरतन्त्रत्वमविद्यातत्संबन्धयोरेवाविरुद्धम् । स्वाश्रिताविद्याश्रितत्वे जीवस्यात्माश्रयमिति चेत् किमतः । उत्पत्तिज्ञप्तिप्रतिबन्धेन ह्यात्माश्रयस्य दोषता । न चानयोरुत्पत्तिरनादित्वात् प्रतीतिस्तु जीवस्य स्वतस्तद्बलादविद्यायाः तथापि स्वस्कन्धारूढारोहवत्स्वाश्रिताश्रितत्वं विरुद्धमिति चेन्न । स्वाश्रिताश्रितत्वस्य क्वचित्प्रमितावविरोधादप्रमितावव्याप्यादस्माद्व्यापकस्य विरोधस्य दुष्प्रसञ्जनत्वात् । अपि च नैव कुण्डबदरवदधरोत्तरीभावो जीवाविद्ययोरमूर्तत्वादवच्छेद्यावच्छेदकत्वं तु तत्रेतरेतरापेक्षं प्रमाणप्रमेयादिषु सुलभोदाहरणम् ।

अधिष्ठानं विवर्तानामाश्रयो ब्रह्म शुक्तिवत् ।
जीवाऽविद्यादिकानां स्यादिति सर्वमनाकुलम्‡ ॥

न वैशेष्या§दिति सूत्रे प्रकृतिप्रयोगादेवेष्टसिद्धौ प्रत्ययप्रयोगोऽतिशयद्योतनाय । तमेवाह **तथा हीति** । अतिशयस्य भावः प्रत्ययार्थो न तु विशेषस्वरूपभाव इत्यर्थः॥ ॥

---

* तादृशानां चेति २-पु· पा· । † हेतुमत्त्वेनेति १ पु· पा· ।

‡ एतदग्रे इति श्लोक इत्यधिकं २ पु· । § व्या· सू· अ· १ पा· २ सू· ८ ।

|| अत्र प्रथमं सर्वत्रप्रसिद्ध्यधिकरणं संपूर्णम् । तत्र सूत्राणि ८–सर्वत्र प्रसिद्धोपदेशात् १ विवक्षितगुणोपपत्तेश्च २ अनुपपत्तेस्तु न शारीरः ३ कर्मकर्तृव्यपदेशाच्च ४ शब्दविशेषात् ५ स्मृतेश्च ६ अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ७ संभोगप्राप्तिरिति चेन्न वैशेष्यात् ८ इति ॥

१६६ । १९ **अत्ता चराऽचरग्रहणात् ॥ ९ ॥**

यस्य मृत्युरुपसेचनमोदनमिवाघृतवत् । तं नाविरतो दुश्चरितादिति
पूर्वमन्त्रप्रकाशितोपायवानन्यथा वेद इत्थमन्यस्तद्रहितः को वेद । यत्र सो ऽत्ता
कारणरूपो वर्तते तं निर्विशेषमात्मानं को वेदेत्यर्थः । पूर्वाधिकरणान्ते
परमेश्वरस्याऽभोक्तृतोक्तेरिह न सो ऽत्तेति सङ्गतिः । विषयवाक्ये अत्तुरश्रवणाद-
त्तेति सूत्रायोगमाशङ्क्याह **अत्र चेति** । भोक्तृत्वलक्षणमत्तृत्वं नाग्निपरमा-
त्मसाधारणम् । कथं संशय इत्याशङ्क्याह **अत्तृत्वं चेति** । यदा भोक्तृत्वम-
त्तृत्वं तदा न परमात्मशङ्केत्याह **न च प्रस्तुतस्यापीति** । **तयोरन्य
इति** । जीवात्मनो भोक्तृत्वप्रतिपादनाच्च न परमात्मशङ्केत्यर्थः । फलित-
माह **तद्यदीति** । ब्रह्मक्षत्रादिनिर्देशाद्भोक्तृत्वमत्तुरिह न निश्चितमपि तु
जीवपूर्वपक्षवादिना प्रसाध्यमित्यर्थो यदिकारः । ननु जीवस्य कथं ब्रह्मक्ष-
त्रादिभोक्तृत्वं पूर्वपक्षिणा साध्यमत आह **ब्रह्मक्षत्रादि चेति** । स्वशरीरं
भोगायतनम् । छागादि कस्य चिद्भोग्यम् । यदि न भोक्तृत्वात्संशयः कुत-
१६७ । ८ स्तर्ह्यत आह **अथ त्विति** । अत एव पूर्वमुक्तं संशयमित्युक्तम् । अत्र च
भवति संशय इति उक्तम् । **भोक्तृतेति** । अत्तृतेत्यर्थः । वनितादिषु
भोक्तृत्वे ऽपि संहर्तृत्वाभावात् । अत्तृत्वस्य भोक्तृत्वात्मत्वप्रसाधनेन पूर्वपक्ष-
मुपपादयति **अत्रौदनस्येत्यादिना** । ओदनस्य भोग्यत्वात्प्रथमं भोक्तृ-
त्व*प्रतीतिरित्यत्र संबभ्राम भारतीविलासः । न हि मुख्य ओदनो ब्रह्मक्षत्रे
न चोपचरितौदनाद्भोक्तृत्वप्रतीतिः । यदाह ।

उपमैव तिरोभूतभेदा रूपकमिष्यते ।
अलङ्कारो रूपकाख्यः कठवल्लीकवेरयम् ॥ इति ।

अत्रोच्यते । ओदनभोक्त्र्येनोदनयोर्ब्रह्मक्षत्त्रयोरोदनत्वेन रूपकमव-
कल्पते । यथा यस्य मृगयाविनोदमृगाः पर‡नरपतय इत्युक्ते क्षत्रिय एव
प्रतीयते न श्रोत्रियः कश्चिद् ब्राह्मण एवमिहेति । ननु प्रलये जीवनाशात्कथ-
,, । १४ मजत्वमत आह **संहारेति** । संस्कार उपलक्षणमविद्यायाः । अविक्रियस्य
परमात्मनः संहर्तृत्वायोगात् अग्निरेव संहर्तेत्याह **यदि त्विति** । तवापि

---

* भोक्तेति १ पु. पा. । एवमग्रे ऽपि । † तत्रेति २-३ पु. पा. ।
‡ मृगपरेति ५ पु. पा. ।

भाक्त ओदनशब्दः स ममापीत्याह **न तर्हीति** । कस्तर्ह्योदनस्तत्राह **अपि त्विति** । ओदन इत्यनुषङ्गः । अपि चौदनशब्दस्य लाक्षणिकस्य संनिहितमृत्यूपसेचनपदानुसारेणौदनगतविनाशित्वधर्मलक्षणार्थत्वाद् ब्रह्मक्षत्रोपलक्षितजगद्विनाशकर्त्तेश्वरः प्रतीयते न जीव इत्याह **न चेत्यादिना** । यद्वाद्योदनपदात् प्रथमं भोक्ता भातीति अत्राह **न चौदनपदादित्यादिना** । ओदनपदस्य भक्तवाचिनो भोग्यमात्रपरत्वेन तत्रापि जघन्यवृत्त्याश्रयणात्तद्बलाद् ब्रह्मक्षत्रमृत्युश्रुतीनां न सङ्कोच इत्यर्थः । यदि मृत्युपदाद्विनाशिवस्तुविवक्षा कथं तर्हि ब्रह्मक्षत्रग्रहणमत आह **प्राणिष्विति** । ननु ब्रह्मक्षत्राभ्यामितरव्यावृत्त्यर्थत्वं वाक्यस्य किं न स्यादत आह **अन्यानिवृत्तेरिति** । पञ्चपञ्चनखादौ हि मनुष्यादिनिवृत्तिः परिसंख्याफलम् । तत्र चानर्थनिवृत्तिः । इहान्यनिवृत्तिरनर्थिका पुरुषार्थविशेषाऽनवगमादित्यर्थः । मायोपाधेः परस्यास्ति संहर्तृत्वमित्याह **तथा चेति*** ॥

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥ १६८ । १८

ननु लक्षणया पिबदपिबतोः पिबन्ताविति निर्देशोपपत्तेः पूर्वपक्षसिद्धान्तपक्षाऽऽक्षेपे च वाक्यस्य निर्विषयत्वप्रसङ्गाद् आक्षेपायोगमाशङ्क्याह **औत्सर्गिकस्येति** । अयं हि आक्षेप्ता पिबन्तावित्यस्य मुख्यमर्थम् औत्सर्गिकमबाध्यं मन्यते प्राकृतसुपर्णविषयत्वं च वाक्यस्य पक्षान्तरं कल्पयिष्यतइति मन्यते ऽत आक्षेप इत्यर्थः । लक्षणां वक्तुं मुख्यार्थाऽयोगमाह **अध्यात्मेत्यादिना** । अन्यौ पातारौ पक्षिणौ न शक्यौ कल्पयितुं चेत्तर्हि बुद्धिजीवौ जीवपरौ स्तो नेत्याह **बुद्धेरित्यादिना** । स्तृष्टीरुपदधातीति १६९ । ७
समाम्नायैकया ऽस्तुवत प्रजा अधीयन्त प्रजापतिरधिपतिरासी†त्तिसृभिरस्तुवत ब्रह्मासृजतेत्यादयः स्तृष्ट्यस्तृष्टिमन्त्रा आम्नातास्तत्र स्तृष्टीरुपदधातीति यदि स्तृष्टिमन्त्रकेष्टकानामुपधाने विधानं तर्हीष्टकासु स्तृष्ट्यस्तृष्टिमन्त्रकत्वविशेषस्याद्याप्यनवगमात्सर्वा एव स्तृष्टिमन्त्रकास्तत्र स्तृष्टिपदरहितमन्त्राणामानर्थक्यं स्यात्तन्मा भूदिति स्तृष्टिशब्दः स्तृष्ट्यस्तृष्टिसमुदायं लक्षयित्वा तत्समुदायिनः सर्वान्मन्त्रान् लक्षयति एवमत्रापि पिबच्छब्दः स्वार्थस्याऽपिब-

---

* अत्र द्वितीयम् अत्त्रधिकरणं संपूर्णम् । तत्र सूत्रे २–अत्ताचराचरग्रहणात् ९ प्रकरणाच्च १० ॥

† प्रजापतिरधिपतिरासीदिति नास्ति ३ पु॰ ।

त्संसृष्टतां पिबदपिबत्समुदायमिति यावन्तं लक्षयन्स्वार्थं पिबन्तमजहदितरेतरयोगलक्षणं समुदायं प्रति समुदायीभूतपिबदपिबत्परो भवति न पिबत्येव वर्तते नापि लक्षयन् गङ्गाशब्दवत्स्वार्थं त्यजेदित्यर्थः ।

१६९ । १० **अस्तु वेति** । प्रत्ययस्य मुख्यत्वम् प्रकृतिस्तु पिबतिः स्थाष्टिन्यायेन पायनं लक्षयतीत्यर्थः । बुद्धिक्षेत्रज्ञपक्षे तु बुद्धौ प्रकृतिर्मुख्या प्रत्ययस्तु बुद्धिजीवगतं कर्तृकरणसाधारणकारकत्वमात्रं लक्षयतीत्याह **एवमिति** । अत्र पूर्वोत्तरपक्षयोर्लक्षणासाम्यात् संशयः पूर्वत्र ब्रह्मक्षत्रशब्दस्य संनिहितमृत्युपदानुसारेणाऽनित्यवस्तुपरत्ववदिहापि पिबच्छब्दस्य संनिहितगुहाप्रविष्टादिपदानुसाराद्* बुद्धिक्षेत्रज्ञपरत्वमित्याह **नियतेति** । अस्य जीवस्य या द्वितीयता द्वित्वाधारता सा ब्रह्मणैव तद्धि चेतनत्वात्सरूपं न तु बुद्ध्या तस्या अचेतनत्वेन विसदृशत्वादित्याह **ऋतपानेनेति** । ननु संनिहितगुहाप्रविष्टपदाद्बुद्धिर्द्वितीया किं न स्यादत आह **प्रथमामिति** । **वचनविरोधे इति** । अत्तीत्यस्य मुख्यकर्तृत्वसम्भवे करणे कर्तृत्वोपचारो न युक्त इति न्यायस्य बुद्धिजीवपरत्वेन मन्त्रव्याख्यायकब्राह्मणविरोधे आभासत्वमित्यर्थः । **आध्वंसते** आगच्छति । चेतनस्य क्षेत्रज्ञस्याऽभोक्तृत्वं ब्रह्मस्वभावतां वक्ष्यामीति
१७२ । ३ श्रुतिः प्रवृत्तेति भाष्यमुपपादयन्मन्त्रार्थमाह **अनश्नन्निति** । बुद्धेरन्यो यो जीवः सोऽनश्नन्नभोक्तृ ब्रह्म सन्नभिपश्यतीत्यर्थः । अस्मिन्स्वोक्तेऽर्थे स्वयमेव श्रुतिरनुपपत्तिं शङ्कते तामाह **यदीति** । चितेः छाया चित्प्रतिबिम्बं तदापत्त्येति । सुकृतस्य कर्मणः ऋतं सत्यमवश्यम्भावित्वात् फलं पिबन्ताविति संबन्धः । लोके शरीरे । गुहां गुहायां बुद्धौ । परमे बाह्याकाशापेक्षया प्रकृष्टे हार्द्दे नभसि परस्य ब्रह्मणोऽर्द्धे स्थाने चिर्नाचिकेतोऽग्निश्चितो यैस्ते तथोक्ताः । तं दुर्द्दर्शमिति । गूढं छन्नं यथा भवति तथाऽनुप्रविष्टम् । क्वेत्यत आह गुहाहितं बुद्धौ स्थितं गह्वरे अनेकानर्थसङ्कटे† तिष्ठतीति तथोक्तः । पुराणं चिरन्तनं विषयाद्व्यावर्त्यात्मनि मनसो योजनमध्यात्मयोगः तस्याधिगमेन प्राप्त्या मत्वा साक्षात्कृत्य । मुण्डके द्वा सुपर्णेति । द्वौ सुपर्णसाम्या‡त्सुपर्णौ सयुजौ सर्वदा सहयुक्तौ सखायौ समा-

---

* अनुसारेणेति २ पु. पा. । † संकरे इति २ पु. पा. ।
‡ मासाम्यादिति २ पु. पा. ।

नाख्यानौ स्वप्रकाशरूपत्वा*त्समानमेकम् उच्छेद्यत्वाद् वृक्षं शरीरं परिष्व-
क्तवन्तौ । अन्य एकः पिप्पलं कर्मफलं संसारस्याश्वत्थत्वेन रूपितत्वात्† ।
समाने वृक्षइति न कस्य चित्समर्थो ऽहं दीन इति सम्भावना ऽनीशा जुष्टम-
नेकैर्योगमार्गैः सेवितम् । अन्यं प्रपञ्चविलक्षणम् । ईशं यदा पश्यति प्रपञ्चं
च महिमानं विभूतिं मायामयीमस्यैवेति यदा पश्यति तदा वीतशोको
भवति‡ ॥

अन्तर उपपत्तेः ॥ १३ ॥ १७२ । १२

(अत्र च दर्शनस्य लौकिकत्वशास्त्रीयत्वाभ्यां संशयः)§ । इयं च
सुखविशिष्टब्रह्मप्रकरणं नास्तीति कृत्वा चिन्ता । अतश्च वक्ष्यमाणः|| सर्वना-
मार्थः । स च मनोमयतद्धितार्थवद् न संदिग्धो दृश्यतइत्यस्य निश्चा-
यकत्वादित्याह **एष इति** । उपक्रमवशादित्यनेन सङ्गतिश्चोक्ता । एतं
श्लोकं विभजते **ऋतमिति** । कनीनिका ऽक्षितारकम् । भिन्नवक्तृत्वेन वा-
क्ययोर्न नियम्यनियामकत्वं चेत्कथं तर्ह्यग्निभिर्गतिं वक्ष्यतीति शेषोद्धारः
कृतो ऽत आह **आचार्यस्त्विति** । **बाधकान्तरेति** । अनवस्थितेरसम्भ-
वाच्चेति सूचितबाधकान्तरदर्शनाय चेत्यर्थः । नन्वक्षणीत्याधारनिर्देशाद् जीव-
देवते किं न स्तामत आह **अन्तस्तद्धर्मेति** । य एष इत्यादेः प्रथमश्रु-
तस्यापि सापेक्षत्वान्न चाक्षुषत्वसमर्पकत्वमित्याह **अनिष्पन्नेति** । य एष
इति श्लोकः पूरितः । य इत्येष इति च सर्वनामनी विशेष्यापेक्षत्वात्स्वतो
निष्पन्नाभिधाने । अनिष्पन्नमपर्यवसितमभिधानं ययोस्ते तथा । ततश्च संनि-
हित¶पुरुषादिपदस्यार्थं विशेष्यं प्राप्याभिधातृणी वाचके भवेताम् । किमतो
ऽत आह **संनिहिताश्चेति** । कुतस्तदर्थस्य अपरोक्षता चाक्षुषतेत्यर्थः । १७३ । १८
स्वरसत इति । अनेन छायात्मनि योजनाक्लेशो वारितः । **व्याख्यातं
चेति** । अधिकरणावसानभाष्येणेत्यर्थः । तदुपादत्ते **सिद्धवदिति** । तद्व्या-
ख्याति **विदुष इति** । विदुषो विषयस्तेन निष्पाद्या शास्त्राद् योपलब्धिः
सा परोक्षा ऽपि प्रत्यक्षेति स्तूयतइत्यर्थः । उपचारे निमित्तमाह **दृढतयेति** ।

---

* स्वप्रकाशत्वादिति ३ पु· पा· । † निरूपितत्वादिति २ पु· पा· ।

‡ अत्र तृतीयं गुहाप्रवेशाधिकरणं संपूर्णम् । तत्र सूत्रे २–गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ११ विशेषणाच्च १२ ॥

§ ( ) एतन्मध्यगो ग्रन्थो नास्ति ५ पु· ।

|| वक्ष्यमाणमिति ३ पु· पा· ।

¶ ते हि संनिहितेति २ पु· पा· ।

एतं संयद्वाम इत्याचक्षते एतं हि सर्वाणि वामान्यभिसंयन्तीति श्रुतिमीश्व-
१४ । १८ रस्य फलभोक्तृत्वभ्रमव्यावर्तनेन व्याचष्टे **वननीयानीति ।** जीवान्प्रति सङ्गच्छमानानि यानि वामानि तानि येन हेतुना सङ्गच्छन्ते स संयद्वामः । एतं हीत्यस्यैतं निमित्तीकृत्येत्यर्थः । एष उ एव वामनीरित्यस्यार्थमाह **स एवेति ।** संयद्वामत्वं फलोत्पादकत्वमात्रं वामनीत्वं तुल्यप्रापकत्व-मिति भेदः । एकस्याननियमः स्थानान्तराऽव्यापकत्वम् । कमलस्य गोत्रं* कामलस्तस्यापत्यं† कामलायनः । दूनमानसं परितप्यमानसम् । **पृथिव्य-ग्निरिति ।** उपकोशलं गार्हपत्यो ऽनुशशास पृथिव्यग्निरन्नमादित्य इति इमाभिश्चतस्रस्तनवो य एष आदित्ये पुरुषो दृश्यते सो ऽहमस्मीति । तथा ऽन्वाहार्यपचनो ऽनुशशास आपो दिशो नक्षत्राणि चन्द्रमा इति मम तनवो य एष चन्द्रमसि पुरुषो दृश्यते सो ऽहमस्मि तथा ऽऽहवनीयो ऽनुशशास प्राण‡ आकाशो द्यौर्विद्युदिति मम तनवो य एष विद्युति पुरुषो दृश्यते सो ऽहमस्मीति । **न चैतत्प्रतीकत्वमिष्टमिति ।** एषा सोम्य§ आत्म-विद्येत्यग्निभिः कं खं ब्रह्मेति विद्याया विद्यात्वेन परामर्शादित्यर्थः । भा-ष्यगतसमयशब्दार्थमाह **लौकिकस्येति ।** विशेषणविशेष्यभावो ऽर्थयोः शब्दयोस्तु सामानाधिकरण्यम् । तथा च भाष्यायोगमाशङ्क्याह **तदर्थयो-रिति ।** सुखस्य वाचकः शब्दः सुखशब्दः । **किं चिदधिकमिति ।** अक्षिस्थानसंयद्वामादिगुणं च पूरयित्वेत्यर्थः । ह्रीणो लज्जावान् । अपच्छा-
७९ । ७ याऽपहृत्य । **आवर्त्तमिति**‖ । जन्माद्यावृत्तिं पुंसां करोति इत्यावर्तो मनुष्य-लोक उच्यतइत्यर्थः । **अथोत्तरेणेति ।** आत्मानं जगतः सूर्ये तपआ-दिना सह अन्विष्याहमस्मीति विदित्वा तमभिजायन्ते प्राप्नुवन्ति । एतत्सू-र्याख्यं ब्रह्म प्राणानां व्यष्टिभूतानां हिरण्यगर्भभूतं सद् आयतनम् । अग्निर-र्चिर्देवता ज्योतिः सूर्यः । अहरादयो ऽपि देवताः¶ ॥

---

* गोत्रापत्यमिति २ पु॰ पा॰ । † कमलस्य गोत्रं कामलस्यापत्यमिति ३ पु॰ पा॰ ।

‡ प्राणा इति २ पु॰ पा॰ । § सौम्येति ३ पु॰ पा॰

‖ एतत्प्रतीकस्थाने तत्कर्तेति प्रतीकग्रहणं पु॰ २ ।

¶ अत्र चतुर्थम् अन्तराधिकरणं पूर्णम् । तत्र सूत्राणि ५--अन्तर उपपत्तेः १३ स्थाना-दिव्यपदेशाच्च १४ सुखविशिष्टाभिधानादेव च १५ श्रुतोपनिषत्कगत्यभिधानाच्च १६ अनवस्थितेरसम्भवाच्च नेतरः ॥ १७ ॥

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १८ ॥ १८० । ३

अशरीरस्य नियन्तृत्वासम्भवासम्भवाभ्यां संशयः । पूर्वत्र स्थाननिर्दे-
शोपपादनाय पृथिव्यादिस्थाननिर्देशो दृष्टान्ततस्तस्याक्षेपात्सङ्गतिः । अश-
रीरः परमात्मा नान्तर्यामी घटवत् । ननु स्वशरीरनियन्तरि शरीरान्तरर-
हिते तत्रापि अनैकान्तिकता ऽत आह **स्वकर्मेति** । न नियम्यातिरिक्त-
शरीरराहित्यं हेतुः किं तु शरीरेण भोक्तृत्वेनाऽनन्वयः । तत्रा तु स्वकर्म-
जदेहेन तादृक्संबन्धवानेव तं देहं तेन द्वारेणान्यच्च वास्यादि नियच्छतीति
न व्यभिचार इत्यर्थः । अचेतनत्वमुपाधिमाशङ्क्य मुक्ते चेतने साध्यवत्यप्यु-
पाध्यभावात्साध्याऽव्याप्तिमभिप्रेत्याह **प्रवृत्तीति** । नियमनं शरीरिणो न
चेतनमात्रस्य मुक्ते तदभावादित्यर्थः । विपक्षे दण्डमाह **न हीति** । ननु
जन्मादिसूत्रे उभयकारणत्वप्रतिपादनान्नियन्तृत्वं सिद्धमत आह **तदनेनेति** ।
पारिशेष्याज्जीव एवेति । अन्तर्यामीति वक्ष्यमाणेन संबन्धः । पूर्वपक्ष-
मुपसंहरति **तस्मादिति** । किमशरीरत्वं यतो नियन्तृत्वाभावः । नियम्या- १८१ । १८
तिरिक्तदेहरहितत्वं वा देहसंबन्धाभावो वा देहे भोक्तृत्वाभावो वा । नाद्य
इत्याह **देहेति** । देहादौ निर्दिष्टे तत्स्वामी तत्रादिर्बुद्धिस्थो ऽस्येत्युक्तः ।
अथ वा तस्माज्जीवात्मैवेत्युपसंहारस्थो जीवात्मा परामृष्टः । अस्य स्वदे-
हादिनियमेन देहाद्यन्तरमतो ऽनैकान्तिकतेत्यर्थः । द्वितीयं शङ्कते **तदिति** ।
परस्यापि देहादिसंबन्धाभावो ऽसिद्ध इत्याह **तदविद्येति** । तद्विषयत्वा-
दविद्यायास्तदविद्यात्वम् । तृतीये तु सोपाधिकतैव मुक्तस्य पराभेदेन पक्ष-
त्वान्न साध्याव्याप्तिः । अतीतकालतां चाह **श्रुतीति** । यदवादि जीवस्य
नियन्त्रन्तराभ्युपगमे ऽनवस्थेति तत्राह **न चेति** । औपाधिकस्य ह्यनौपाधि-
केश्वरनियम्यत्वमभ्युपेतं* नानुपहितेश्वरस्य नियन्त्रन्तरापादकमित्यर्थः ।
जीवपरभेदाभावे कथं लौकिकवैदिकव्यवहारो ऽत आह **अविद्याकल्पि-
तेति** । **एवं चेति** । बहुत्वाज्जीवानां नियम्याधिदेवादिषु प्रत्यभिज्ञा न
स्यादित्यर्थः । एकत्वे ऽन्तर्यामिण एकवचनश्रुतिमाह **एकवचनमिति** । १८२ । १४
अभेदेपीति । औपाधिकभेदाभावे ऽपीत्यर्थः । अधिकरणोपक्रमे विषयवि-
वेचकमधिलोकमित्यादि भाष्यं तद्विभजते **पृथिव्यादीति** । यः पृथिव्यां

* अभ्युपगतमिति २ पु० ।

तिष्ठन्नित्युपक्रम्य माध्यन्दिनपाठे यः स्तनयित्नौ तिष्ठन्नित्यन्तं शारीरश्चोभयेऽपीति* सूत्रपातनिका । भाष्ये कर्त्तरीत्यात्मनीत्यर्थः । लौकिके कर्त्तरि डित्ये कार्यकरणसंघाते दर्शनादिवृत्त्यविरोधादित्याह **आत्मनीति** । पृथिव्यां तिष्ठन्नन्तर्यामीत्युक्ते पृथिव्यवयवस्थाऽवयविनो ऽन्तर्यामित्वं स्यात्तन्निवृत्तये ऽन्तर इति । पृथिवीत्वेचत्त्ववारणाय न वेदेति । स ह्यहमस्मि पृथिवीति वेदानियम्यदेह एवान्तर्यामिणो देहो नान्य इत्याह **यस्येति** । अप्रतर्क्यः तर्काऽविषयः । अविज्ञेयं प्रमाणाऽविषयः । सर्वासु दिक्षु प्रसुप्तमिव† ॥

१८३ । १ **अदृश्यत्वादिगुणको धर्मोक्तेः ॥ २१ ॥**

अदृश्यत्वादिसाधारणधर्मदर्शनात्संशयः । पूर्वत्र द्रष्टृत्वादिश्रवणान्न प्रधानमन्तर्यामीत्युक्तमिह तदश्रवणादक्षरं प्रधानमिति भाष्योक्तैव सङ्गतिः । पूर्वपक्षमाह **परिणाम इति** । योनिशब्दो निमित्तं चेदिति ब्रूयादित्यध्याहारः । न विलक्षणत्वा‡दित्यत्र परिणाममतं कृत्वाचिन्तया परिणामसारूप्ययोर्व्याप्तिर्निराकरिष्यते अत्र तु विवर्त्तदृश्ययोः । परिणामस्तु तत्रत्य इहानूदितः । भूतयोनिर्जडः परिणममानत्वाद्विवर्त्तमानत्वाद्वा संमतवदित्यर्थः । ननु परिणामिनः कथमक्षरशब्दवाच्यत्वमत आह **स्वविकारानिति** । अनुमानयोर्बाधमाशङ्क्याह **य इति** । अक्षरात्परादिति सामानाधिकरण्यम् । **नामरूपेति** । शब्दार्थयोर्बीजमधिष्ठानमात्मा तद्विषयतया तस्याधिष्ठानत्वे सहकारित्वेन शक्तिभूतं भूतानां सूक्ष्मं कारणं तस्मिन् । संदेहभाष्यस्थप्रधानशब्दं वर्त्तयति **प्रधीयतइति** । क्रियतइत्यर्थः । अचेतनानामिति भाष्यं
१८४ । १० न प्रायदर्शनमात्रपरमित्याह **सारूप्येति** । ननु न च स्मार्त्तमिति प्राच्याधिकरणे प्रधानं दूषितं द्रष्टृत्वाद्यसंभवन्यायसाम्यादचेतनमव्याकृतं दूषितप्रायमिति तच्छङ्का न युक्ता प्रधाने त्वप्रामाणिकत्वमधिकमिति शङ्कते **स्यादेतदिति** । बाधकं दृष्टृत्वादि । ईक्षत्यादिचिन्तया ऽप्यपुनरुक्तिमाह **तेनेति** । उपचर्यतां ब्रह्मणो जगद्योनित्वमित्युक्तम् । उपचारे निमित्तमाह **अविद्येति** ।

---

* व्याससू अ॰ १ पा॰ २ सू॰ २० ।

† अत्र पञ्चमम् अन्तर्याम्यधिकरणं सम्पूर्णम् । तत्र सूत्राणि ३–अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् १८ न च स्मार्तमतद्धर्माभिलापात् १९ शारीरश्चोभयेऽपि हि भेदेनैनमधीयते २० ॥

‡ व्या॰ सू॰ अ॰ २ पा॰ १ सू॰ ४ ।

अविद्याशक्त्या विषयीकृतत्वेन तदाश्रय इति तथोक्तम् । द्वितीयश्लोकस्य द्वितीयार्द्धं व्याचष्टे **अथेति** । सति चेतनपरत्वे वाक्यस्य ब्रह्मपरत्वं दुर्निवारमिति पूर्वपक्षाभावमाशङ्क्याह **ब्रह्मैवेति** । यदुक्तम् अक्षरात्परस्य सर्वज्ञत्वमक्षरं तु प्रधानमिति तन्नेत्याह **अक्षरस्येति** । यद्भूतयोनिमि- १८४ । २०
त्यक्षरस्य जगद्योनिभावमुक्त्वा यः सर्वज्ञ इत्युपक्रम्य तस्मान्नामरूपादि जायतइति जगद्योनिभाव उच्यते । उपादानप्रायपाठाच्च पञ्चम्या न निमित्तार्थत्वं तच्च उपादानत्वप्रत्यभिज्ञालिङ्गेनैकवाक्यत्वे सति वाक्यप्रमाणात् सर्वज्ञ एव भूतयोनिरित्यर्थः । विश्वयोनिर्यदक्षरं तत्सर्वविद्भवेदिति विधीयते । यद्यक्षरशब्दवाच्यभूतयोनेः सर्वज्ञत्वं कथं तर्हि सर्वज्ञस्याक्षरात्परत्वमुक्तं तत्राह **अक्षरादिति** । यद् यस्मादर्थे । न चाक्षरशब्दप्रत्यभिज्ञानाद् भूतयोनिरेवाक्षरादिति निर्दिष्टेति वाच्यम् । प्रथमश्रुते यः सर्वज्ञ इति वाक्ये सर्वज्ञस्य जगदुपादानत्वप्रत्यभिज्ञया ऽस्य बाध्यत्वाद्येनाक्षरं पुरुषं वेद सत्यमिति पुरुषस्याक्षरशब्देन निर्दिश्यमानत्वाच्च । विवर्तस्त्विति श्लोकस्य द्वितीयार्द्धं व्याचष्टे **अपि चेति** । प्रयोजनमाह **ज्ञेयत्वेनेति** । भोगव्यतिरिक्त इति भाष्यस्य* व्याख्या **भोगा इति** । ननु ऋतुषु यजन्तीति कर्त्तरि क्विपि संप्रसारणे ऋत्विक्शब्दः । यज्ञसंयोगे† गम्यमाने पतिशब्दप्रातिपदिकस्य नकारादेशः स इकारस्यान्त्यस्य ततो ङीपि कृते पत्नी । **उक्ताभिप्रायमिति** । विवर्तत्वेन सारूप्याऽनपेत्युक्तो ऽभिप्रायः । **प्रधानादित्य-** १८६ । १६
पीति । यद्यपि भाष्ये शारीरप्रधाननिराकरणतया हेतुद्वयं क्रमेण व्याख्यातं तथापि पुरुषशब्दस्य प्रधानव्यावर्त्तकत्वादाद्यहेतुरपि प्रधानवारणार्थं इति । अक्षरमव्याकृतमित्यादिभाष्यस्यायमर्थः । शब्दार्थयोर्बीजमधिष्ठानं तस्य शक्तिः सहकारित्वात् । सा चेश्वरमाश्रयते विषयीकरोतीति ईश्वराश्रया तस्याधिष्ठानत्वे उपाधिभूता ऽवच्छेदिका‡ शुक्तेरिव तद्विषयमज्ञानम् । अविकार इति च्छेदः । तस्माद्वाचस्पतिमतं भाष्यविरुद्धमिति कैश्चिदयुक्तमुक्तम् । किञ्च ।

अज्ञत्वभ्रान्तितादोषादरक्षत् परमेश्वरम् ।
एतद्भाष्यार्थतत्त्वज्ञो वाचस्पतिरगाधधीः ॥

---

* भाष्यपाठस्येति २-३ पु॰ पा॰ । † संप्रयोगेति २ पु॰ पा॰ ।

‡ उपाधिभूतमवच्छेदकमिति २ पु॰ पा॰ ।

प्रधानस्यागमिकत्वे प्रकृतिविकारसारूप्यादि बहु समञ्जसं स्यादि-
१८६ । २० त्यर्थः । असमञ्जसमिति पाठे चेतनस्य जगदुपादानत्वादि* । **रूपोपन्या-
साच्च**† । नेतरावित्यनुषङ्गः । भाष्ये अदृश्यत्वादिधर्मकस्य न विग्रह इत्या-
क्षेपः । सर्वात्मत्वविवक्षयेति समाधानम् । जायमानसंनिधिलक्षणस्थानस्य
प्रकरणेन बाधमाशङ्क्य विग्रहवत्त्व‡लिङ्गेन प्रकरणबाधमाह **नेति** । ईश्वर-
स्यापि हिरण्यश्मश्रुत्वादिवद् मूर्द्धादिसंभव इति कश्चित् । तन्न । अपाणि-
पादमिति निर्विशेषस्य ज्ञेयत्वेन प्रक्रमाद्धिरण्मयस्योपास्यत्वेन विग्रहाद्य-
विरोधात् । प्राकृतपाण्यादिनिषेध एष इति चेन्न । प्रथमस्य चरमेणासंको-
चादिति । लिङ्गं सार्वात्म्यपरं न शरीरादिमत्त्वपरमित्याशङ्क्य तथा सति मूर्द्धा-
दिबहुश्रुतीनां बाधः स्यात्तास्तु प्रकरणाद्बलीयस्य इत्याह **न चैतावतेति** ।
प्रकरणमात्रेणेत्यर्थः । एवं च हृदयं विश्वमस्य एष सर्वभूतान्तरात्मेति
चाक्षत्ये सर्वनामनी संनिहिततरं विग्रहवन्तं गृह्णीतो न भूतयोनिमिति ।
लिङ्गनिरुद्धे प्रकरणे संनिधिर्विजयते इत्याह **सिद्धे चेति** । पुरुष एवे-
दमित्यादिसर्वरूपत्वो§पन्यासो ऽपि द्युमूर्द्धादिकस्यैवास्तु तस्य संनिहित-
१८७ । १५ तरत्वादत आह **प्रकरणादिति** । संनिधेः प्रकरणस्य बलीयस्त्वात्पूर्वव-
द्बाधकलिङ्गाभावाच्चेत्यर्थः ।

ऊर्णनाभिर्लूताकीटस्तन्तून् सृजते संहरति च । सतो जीवतः । येन ज्ञानेन अक्षरं पुरुषं वेद तां ब्रह्मविद्यामुपसन्नाय प्रोवाच|| प्रब्रूयात् । सर्वविद्यावेद्यवस्त्वधिष्ठानविषयत्वात्सर्वविद्याप्रतिष्ठा । कर्मनिर्मितान् परीक्ष्य ब्राह्मणो निर्वेदमायात्कुर्यादित्यर्थः । गच्छेदिति वाक्यशेषाद् वैराग्यहेतुमाह इह संसारे ऽकृतो लोको नास्ति । किं कृतेन कर्मणेत्यध्याहारः । अतो ऽकृतज्ञानार्थं दिवि स्वात्मनि प्रकाशरूपे भवो दिव्यः बाह्याभ्यन्तरसहितः सर्वात्मेति यावत् । क्रियाविज्ञानशक्तिमन्मनःप्राणरहितः । बाह्येन्द्रियनिषेधो ऽप्युपलक्षितः । अत एव शुभ्रः शुद्धः । अग्निर्द्यौः । असौ वाव लोको गोतमाग्निरिति श्रुतेः । स मूर्द्धा अस्येति सर्वत्र

* उपादानत्वादिरसमञ्जसं स्यादित्यर्थ इति २ पु॰ अधिकः पाठः ।
† व्या॰ सू॰ अ॰ १ पा॰ २ सू॰ २३ । इदमदृश्यत्वाद्यधिकरणान्तर्गतं सूत्रम् ।
‡ विग्रहत्वेति ३ पु॰ पा॰ ।   § सर्वरूपवत्त्वेति ३ पु॰ पा॰ ।
|| प्रशब्दो नास्ति ३ पु॰ ।

संबन्धः । यस्येत्यर्थे अस्यशब्दः । विवृता उद्घाटिताः प्रसिद्धाः वेदाः यस्य वाक् वायुर्यस्य प्राणः विश्वं यस्य हृदयं मनस्तन्मनसा स्रष्टृत्वाद् विश्वस्य पादरूपेण पृथिवी यस्य जाता एष सर्वभूतगतप्राणानां समष्टितया सर्वभूतान्तरात्मा । एतस्माज्जायते इत्यनुषङ्गः । तस्मात्परमात्मनो ऽग्निर्द्युलोको जायते यस्य* सूर्यः समिधः । असौ वाव लोको ऽग्निस्तस्यादित्य एव समिदिति श्रुतेः । स† दाधार दधार । कस्मै ब्रह्मणे‡ ॥

वैश्वानरः साधारणशब्दविशेषात् ॥ २४ ॥ १८७ । १६

अथ वैश्वानरः किमनात्मा किं वा आत्मा अनात्मत्वे जाठरो ऽन्यो वा आत्मत्वे ऽपि जीवः परो वेति संदेहः§ ।

सार्वात्म्यरूपोपन्यासादक्षरं ब्रह्म वर्णितम् ।
जाठरादावनैकान्त्यशङ्का तस्य निरस्यते ॥

को न आत्मेत्युदाहरणभाष्यं छान्दोग्याख्यायिकार्थानुसन्धानेन व्याचष्टे **प्राचीनशालेत्यादिना** । उद्दालको ऽप्युपलक्ष्यते । जन इति ऋषिनामैव । **आत्मेत्युक्ते इति** । ब्रह्मेत्युक्ते तत्पारोक्ष्यनिवृत्त्यर्थमात्मपदमित्यपि द्रष्टव्यम् । इक् स्मरणइत्यस्य रूपमध्येषीति । द्युसूर्येत्यादिभाष्यमादाय व्याचष्टे **वैश्वानरस्येत्यादिना** । सुतेजस्त्वगुणा द्यौर्वैश्वानरस्य मूर्द्धा विश्वरूपत्वगुणः सूर्यः । एष शुक्ल एष नील इत्यादिश्रुतेः । स वैश्वानरस्य चक्षुः । पृथग्गतिमत्त्वगुणो वायुः प्राणः । बहुलत्वगुण आकाशो देहमध्यम् । रयिर्द्धनम् । तद्गुणा आपो बस्तिस्थम् उदकम् । तच्च पृथिव्यां वैश्वानरस्य प्रतिष्ठानात् । **मूर्द्धपातादिदूषणैरुपासनानां निन्दयेति** । मूर्द्धा ते व्यपतिष्यदित्यादिनैकैकोपासननिन्दया तस्य ह वा एतस्येत्यादिना वैश्वानरस्य द्युलोकादयो मूर्द्धादय इति कथनेनावयविनः समस्तभावमुपदिश्येत्यर्थः । उपासक एव
वैश्वानरो ऽहमिति मन्यतइति **वैश्वानरस्य भोक्तुरित्युक्तम्** । हृदयाद्धि १८८ । १९

---

* तस्येति ३ पु० पा० ।   † स इति नास्ति २-३ पु० ।

‡ अत्र षष्ठम् अदृश्यत्वाद्यधिकरणं पूर्णम् । तत्र सूत्राणि ३-अदृश्यत्वादिगुणको धर्मोक्तेः २१ विशेषणभेदव्यपदेशाभ्यां च नेतरौ २२ रूपोपन्यासाच्च २३ ॥

§ संशय इति २ पु० पा० ।

मन: प्रणीतमिव। इत: प्रणयनावधित्वाद् हृदयं गार्हपत्यो ऽत एव तदन-
न्तरत्वान्मनो ऽन्वाहार्यपचन इत्याह **हृदयानन्तरमिति**।

१८९ । ३ पूर्वपक्षमाक्षिपति **नन्वित्यादिना**। निश्चितार्थेच्छान्दोग्यवाक्येन
तदेकार्थं वाजसनेयिवाक्यं निर्णीयते न विपर्यय इत्यत्र न्यायमाह **निश्चि-
तार्थेन हीति**। यथा हि तं चतुर्द्धा कृत्वा बर्हिषदं करोतीति पुरोडा-
शमात्रचतुर्द्धाकरणवाक्यमेकार्थसंबन्धिना शाखान्तरीयेणाग्नेयं चतुर्द्धा करो-
तीति विशेषविषयत्वेन निश्चितार्थेनाग्नेय एव पुरोडाशो व्यवस्थाप्यते एवम-
त्रापीत्यर्थ:। अथ दर्शपूर्णमासकर्मणः शाखाभेदे ऽप्यभेदात्तत्र तथा तर्ह्यत्रापि
सम*मित्याह **कर्मवदिति**। न केवलमुपक्रमाद् ब्रह्मनिर्णय उपसंहारादपी-
त्याह **न च द्युमूर्द्धत्वादिकमित्यादिना**। प्रतीकोपदेशमुपाध्यवच्छि-
न्नस्योपास्त्युपदेशं च प्रपञ्चयति **तथा चेति**। पञ्चपादीकृतस्तु वाज-
सनेयिवाक्यस्याप्यात्मोपक्रमत्वलाभे किं शाखान्तरालोचनयेति पश्यन्त:

१९० । १७ पुरुषमनूद्य वैश्वानरत्वं† विधेयमिति व्याचक्षते तद्दूषयति **अत एवेति**।
यत एवान्त:प्रतिष्ठत्वेन सह समुच्चय: सूत्रगतापिशब्दार्थो ऽत एवान्त:-
प्रतिष्ठितत्ववत्पुरुषत्वमपि वैश्वानरमुद्दिश्य विधेयं न विपर्यय इत्यर्थ:। यदि
पुरुषमनूद्य वैश्वानरो विधीयते तदा पुरुषस्य दृष्ट्याश्रयत्वं स्यादित्याह
तथा सतीति। किमतस्तत्राह **एवमिति**। न केवलं सूत्रविरोधो ऽपि
तु भाष्यविरोधो ऽपीत्यर्थ:। स यो हैतमिति वाक्ये प्रथमनिर्दिष्टाग्न्युद्देशेन
पुरुषत्ववेदनं स एषो ऽग्निरिति वाक्यस्यार्थत्वेनानूद्यते तथा च तस्या-
यमेवार्थ: स्थित इति श्रुतिविरोध इत्यर्थ:। पुरुषस्य विधेयत्वे यच्छब्दा-
योगमाशङ्क्याह **तस्मादिति**। पञ्चपाद्यां तु जाठरे ईश्वरदृष्टिपक्षमुक्त्वा
योगादग्निवैश्वानरशब्दयोरीश्वरे वृत्तिरिति पक्षान्तरं वक्तुमयम् उद्देश्यवि-
धेयभावव्यत्यय आश्रित इति चिन्त्यमिदं दूषणमिति।

मूर्द्धादिचिबुकान्तावयवेषु संपादितस्य कथं पुरुषविधत्वं तेषां पुरु-
षैकदेशत्वादित्याशङ्क्य वैश्वानरपुरुषस्य पादादिमूर्द्धान्तावयवानामेव‡ संपा-
१९१ । १३ दनात्पुरुषसादृश्यमित्याह **अत्रावयवसंपत्त्येति**। मूर्द्धचिबुकान्तराल-
स्थस्य पुरुषावयवस्थत्वात्कथं पुरुषे ऽन्त:प्रतिष्ठितत्वमित्याशङ्क्याह **कार्य-**

* साम्यमिति २ पु॰ पा॰। † वैश्वानरमिति ३ पु॰ पा॰। ‡ एवेति नास्ति २ पु॰।

करणेति । कार्यकरणसमुदाय एव पुरुषस्तस्यावयवा मूर्द्धादिचिबुकान्तास्तेष्वन्तःप्रतिष्ठानात्पुरुषे ऽन्तःप्रतिष्ठितत्वम् । अत्र हेतुः **समुदायेति** । अवयविन्यवयवस्यान्तर्भावादवयवस्थोऽप्यवयव्याश्रितो गृहस्थ इव ग्रामस्थ इत्यर्थः । नन्ववयवाश्रितस्यावयव्याश्रितत्वव्यपदेशे दृष्टान्तो वक्तव्यो भाष्यकारस्त्ववयवस्यावयविनिष्ठताव्यपदेशमुदाहरति ततो न निदर्शनतेत्याशङ्क्याह **अत्रैवेति** । शाखादीनां समुदाये प्रतिष्ठिता शाखा समुदायमध्यपातिनी भवेत् तावदेषां च मूर्द्धादिचिबुकान्तावयवानां कार्यकारणसमुदायान्तर्भावे निदर्शनम् । अवयवस्थस्य तु वैश्वानरस्यावयविपुरुषान्तःस्थत्वमर्थादेव सिद्ध्यतीत्यर्थः । **विश्वेषां वा ऽयं नरो** नेता कारणम् ।

भाष्ये वरणा नासीति निरुच्येति । इमामेव प्रसिद्धां भ्रूसहितां नासिकां वारयति नाशयतीति वरणासहिता नाशीति निरुच्येत्यर्थः । वरणाशब्दार्थमाह **भ्रूरिति** । अत्रिः किल याज्ञवल्क्यं पप्रच्छ य एषो ऽनन्तो ऽव्यक्त १९२ । १९
आत्मा तं कथं विजानीयामिति । प्रत्युवाचेतरः सो ऽविमुक्ते प्रतिष्ठित इति । अविमुक्तस्य स्थान*भूता का वै वरणा का च नाशीति† प्रश्नस्य प्रत्युक्तिः सर्वानिन्द्रियकृतान् दोषान्वारयति तेन वरणेति । सर्वानिन्द्रियकृतान् पाप्मनो नाशयति तेन नाशीति । नियम्य जीवाधिष्ठानत्वद्वारेण नियन्तुरीश्वरस्याधिष्ठानत्वान्नासाभ्रुवोः पाप्मवारकत्वाद्युपपत्तिः । नासाभ्रुवोर्मध्ये ऽपि स्थानविशेषजिज्ञासया प्रश्नः कतमं चेति । भ्रूमध्यमाहेतरो भ्रुवोरिति । प्राणस्य नासिक्यस्य । स च संधिर्द्युलोकस्य स्वर्गस्य परस्य च ब्रह्मलोकस्य संधित्वेनोपास्यः ।

केचित्तु उपासनाबुद्धिर्वारकत्वेन नाशकत्वेन च वरणा नाशी । सा हि प्रकृता न भ्रूर्भ्रुवोरिति द्विवचनेन‡ वक्ष्यमाणाया एकवचनायोगाच्च । अतः श्रुत्यनभिज्ञो वाचस्पतिरिति वदन्ति । तन्न । अत्र ह्युपासना स्वशब्देन न प्रकृता । तं कथं विजानीयामित्युपसर्जनं विज्ञानं प्रकृतमपि न स्त्रीलिङ्गनिर्देशार्हम् । ततः शब्दोपात्तभ्रूप्रातिपदिकार्थं वक्ति वरणाशब्द इति श्रुत्यर्थज्ञो वाचस्पतिरेव । वैश्वानरमङ्गं केतुं सूर्यं वैश्वानरस्य शोभनमतो

---

* स्वस्थानेति २ पु॰ पा॰ । † नाशीति दन्त्यपाठः–३ पु॰ । एवमग्रे ऽपि ।
‡ द्वित्वेनेति २–३ पा॰ ।

विषया भवेम*। स च कं सुखम्। अभिमुखा श्रीश्च। यो भानुरूपेण रोदसी द्यावापृथिव्यौ अन्तरिक्षं चाततान व्याप्तवान्। रोदसी एव दर्शयति इमां पृथिवीं द्यामिति। प्रादेशमात्रमिव देवाः सूर्योदये अभिसंपन्नाः प्राप्ता उपासनया यदा तदा ते सुविदिता भवन्ति। अहं कैकेयराजो† युष्मभ्यम् औपमन्यवादिभ्यः एतान् देवाँस्तथा वक्ष्यामि यथा प्रादेशमात्रमेवाभिसंपादयिष्यामि। अधोलोकानतीत्य स्थिता ऽतिष्ठा द्यौर्मूर्ध्न्यध्यात्ममारोप्या एवं सुतेजस्त्वादिगुणवन्तो वैश्वानरावयवा आदित्यादयश्चक्षुरादिष्वारोप्याः‡॥

इति श्रीमदनुभवानन्दपूज्यपादशिष्यपरमहंसपरिव्राजकभगवदमलानन्दकृते वेदान्तकल्पतरौ प्रथमाध्यायस्य द्वितीयः पादः॥

	अस्मिन् पादे	आदितः
अधिकरणानि	७	१८
सूत्राणि	३२	६३

---

* भवेदिति ५ पु॰ पा॰। † एतदग्रे वः इत्यधिकं २ पु॰।

‡ अत्र सप्तमं वैश्वानराधिकरणं संपूर्णम्। तत्र सूत्राणि ९-वैश्वानरः साधारणशब्दविशेषात् २४ स्मर्यमाणमनुमानं स्यादिति २५ शब्दादिभ्यो ऽन्तः प्रतिष्ठानाच्चेति चेन्न तथा दृष्ट्युपदेशादसंभवात् पुरुषमपि चैनमधीयते २६ अत एव न देवता भूतं च २७ साक्षादप्यविरोधं जैमिनिः २८ अभिव्यक्तेरित्याश्मरथ्यः २९ अनुस्मृतेर्बादरिः ३० संपत्तेरिति जैमिनिस्तथा हि दर्शयति ३१ आमनन्ति चैनमस्मिन् ३२॥

अथ प्रथमाध्यायस्य तृतीयः पादः ।

द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥ १९३ । १

निर्विशेषब्रह्मलिङ्गनिरूपणं पादार्थमाह **इहेति** । आद्याधिकरणमवतारयति **तत्रेति** । आयतनत्वसाधारणधर्मात् संदेहे पूर्वपक्षं संगृह्णाति **पारवत्त्वेनेति** । अमृतं यद् ब्रह्म तद् द्युभ्वाद्यायतनं कर्हि चित्कदा चिदपि न युक्तम् । आयतनस्य ब्रह्मत्वाभावे हेतुमाह **पारवत्त्वेनेति** । सेतुत्वस्य पारवत्त्वेन व्याप्तेर्ब्रह्मणश्चापारत्वादित्यर्थः । अमृतत्वाभावे हेतुमाह **भेदइति** । भेदे हि सति संबन्धार्था षष्ठी प्रयुज्यते ब्रह्म चामृतमिति नामृतस्येति षष्ठी युक्तेत्यर्थः । पारं परकूलम् । अवारमर्वाक्कूलम् । ननु षिञा बन्धनार्थात्सेतुशब्दव्युत्पत्तेर्जगन्मर्यादाया बन्धरि ब्रह्मणि प्रयोगः किं न स्यादत आह **न त्विति** । यत्र दारुणि च्छिद्रिते निग्राह्याणां पादप्रोतनं तद्गुडिः । निगडः शृङ्खला । नन्वमृतमपि ब्रह्मामृतान्तरसंबन्धि नेत्याह **न च ब्रह्मण इति** । अतो ऽन्यदार्त्तमिति श्रुतेरित्यर्थः । पुरुषं प्रति यावत्तादात्म्यं तावदगच्छद्वस्तुतः परिच्छिन्नं भवति पारवत् ।

अथ त्विति । साक्षादायतनत्वेन श्रुत्युक्तमिति योजना । अव्याकृतं १९४ । ३
हि कारणब्रह्मोपाधित्वेन प्रतिपाद्यते न प्राधान्येनेति । **तस्य हि कार्यत्वेनेति** । देहाद्यवच्छिन्नरूपेणेत्यर्थः । **धारणाद्वेति** । अस्य द्युभ्वाद्यायतनस्यास्य वा तज्ज्ञानस्य यथाक्रममृतत्वस्य धारणात्साधनाद्वा सेतुता । यद्यपि ब्रह्मैवामृतं तथापि तदज्ञातं न मोक्ष इति ज्ञायमानत्वदशा*मभिप्रेत्य धारयितृत्वम् । अत एव षष्ठी । नन्वेवं रूढिर्गतेत्याशङ्क्य साम्यमाह **पूर्वपक्षे ऽपीति** । **पारवत्तावर्जं** पारवत्तां वर्जयित्वा । **योगमात्रादिति** । षिञ्धात्वर्थयोगादित्यर्थः ।

विधारकत्वमेव सेतुगुणो ऽपि स्यात्तया च पारवत्तया गौणी वृत्ती रूढ्यत्यागेन प्रवृत्ता योगाद् बलिनीति च न शङ्क्यमिति । अमृतस्य ब्रह्मणो हेत्वभावात्साधनत्वं ज्ञानस्यायुक्तमित्याशङ्क्याविद्यानिवृत्तिरमृतत्व†शब्दार्थे

* ज्ञायमानदशामिति २-३ पु॰ पा॰ । † त्वेति नास्ति २ पु॰

इत्याह **अमृतशब्दश्चेति** । द्वयोरेकस्य च संख्येयानामुपादाने तेषां बहुत्वाद् द्व्येकेष्विति स्यात् । नानार्थसाधारण्येन सकृदुच्चारणमिह तन्त्रम् एवं चावृत्तिलक्षणवाक्यभेदो व्युदस्तः । अस्य ब्रह्मणः स्वीयाः शब्दा एते इत्यर्थः । तच्च त्वायतनवद्भावश्रवणादिति भाष्यं द्युभ्वाद्यायतनस्य* ब्रह्मत्वे सिद्धे तस्य सविशेषत्वनिरासार्थं तत्प्रधानवादनिरासानुपयोगित्वात्प्रकृतासङ्गतमित्याशङ्क्य
१९५ । ८ हिरण्यगर्भपूर्वपक्षनिरासार्थत्वेन प्रकृतेन† सङ्गमयति **स्यादेतदित्यादिना** । अप्रधानं ज्ञानं न सर्वनामपरामर्शार्हमिति कश्चित्तं प्रत्याह **न चेति** ।

यत्तु केन चिदुक्तं तं जानथेति ज्ञेयं प्रत्युपसर्जनं ज्ञानमेष इति पुंलिङ्गनिर्देशानर्हं चेति । तन्न । सत्यपि ज्ञेयप्राधान्यनिर्देशे ज्ञानस्य फलसाधनत्वेन गुणकर्मत्वाभावात्प्राधान्यात् । पुंलिङ्गं तु विधेयसापेक्षमिति न किं चिदेतत् । तप्ते पयसि दध्यानयति सा वैश्वदेव्या‡मिक्षेत्यादौ शब्दतोऽप्रधानस्यापि पयआदेः सर्वनामनिर्देशादनियतं सर्वनाम्नः प्रधानपरामर्शित्वमित्याह **न चेति** ।

अविद्यारागद्वेषादीति भाष्ये आदिग्रहणेन प्राङ्निर्दिष्टभयमोहावृत्तौ । एते ऽविद्यादयः श्रुतौ हृदयग्रन्थिशब्दार्थ इत्याह **हृदयग्रन्थिश्चेति** । अज्ञानस्याविद्याशब्देन निर्दिष्टत्वान्मोहश्च विषादः शोक इति च
१९६ । १२ विषादव्याख्या । परावर इति श्रुतिपदं व्याचष्टे **परमिति** । भाष्ये सूत्रोपात्तमुक्तपदव्याख्यानाय भिद्यते हृदयग्रन्थिरिति मन्त्रमुदाहृत्य ज्ञानादज्ञाननिवृत्तौ ब्रह्मणः प्राप्यत्वमुपसृप्यपदार्थ इति च वक्तुं§ तथा विद्वानिति मन्त्र उदाहृतस्ततश्चोत्तरमन्त्रे विद्वानित्यभिधास्यमानं ज्ञानं पूर्वमन्त्रे भिद्यतइत्यादिकर्मसंयोगे निमित्तार्थया दृष्टे इति सप्तम्या निर्दिष्टम् । निष्ठा च भावे । दर्शनार्थश्चाविद्यादेः परोक्षज्ञानाच्छिथिलीभावो भिद्यतइत्यादिनोक्त इत्यभिप्रेत्येत्याह **तस्मिन्ब्रह्मणीति** । उत्तरमन्त्रस्थनामरूपशब्दार्थमाह **नामेति** ।

यत्तु कश्चिदाह सूत्रेणाऽनिरस्तत्वान्न वाय्वादिपूर्वपक्ष इति तत्राह
,, । १८ **नाव्याकृतमित्यपीति** । साधारणहेतुनिर्देशाद्‖ अव्याकृतवाद्याद्यपि

---

* द्युभ्वायतनस्येति २ पु. पा. ।
† प्रकृतेनेति नास्ति २ पु. ।
‡ वैश्वदेवीति नास्ति ३ पु. ।
§ इति च वक्त्वेति १ पु. पा. ।
‖ हेतुदर्शनादिति ३ पु. पा. ।

पूर्वपक्षत्वेन सूचितमित्यर्थः । न चोपाधिपरिच्छिन्नस्येति भाष्ये चकारप्रयोगात्सौत्रचशब्दव्याख्यात्वभ्रममपाकरोति **चेनेति** । जीवात्मैव द्युभ्वाद्यायतनमिति न वाच्यमित्यन्वयः । (**जीवात्माधिगमायेति** । प्रसिद्धं जीवस्वरूपमनूद्य तस्य पारमार्थिकस्वरूपाधिगमायेत्यर्थः)* । प्रकरणेन पठितमिति कृत्वा चिन्ता न युक्ता **प्रकरणादिति** सूत्रात्† इति केन चिदयुक्तमुक्तं कृत्वा चिन्तोद्घाटनार्थत्वात्सूत्रस्य । इदं विश्वं पुरुष एव यस्मिन्पृथिव्याद्योतं समाश्रितं किं तदिति अत आह कर्माग्निहोत्रादि । तपो ज्ञानम् अर्थात्तत्फलं च । स च पुरुषः परामृतं ब्रह्म‡ ॥

भूमा संप्रसादादध्युपदेशात् ॥ ८ ॥ १९८ । ८

आत्मशब्दाद् द्युभ्वाद्यायतनं ब्रह्मेत्युक्तम् । तत्रात्मशब्दः प्राणेऽनैकान्तः । तरति शोकमात्मविदित्यत्राब्रह्मणि प्राणे प्रयोगादित्याक्षेपिकी सङ्गतिः । आख्यायिकामर्थतोऽनुक्रामन् विषयं विविनक्ति **नारद इत्यादिना** । **आजानसिद्धं** स्वभावसिद्धम् । भगवन्तमुपसद्य यदुवाच तदाह **अनात्मज्ञतेति** । प्राणेषु पर्यवसिते भूयसि बहुतरे प्रश्नोत्तरे इत्यन्वयः । तेजो वा अद्भ्यो भूय इत्यत्र वायुरपि ग्राह्य इत्याह **वायुसहितेति** संकल्पादिपदार्थान् व्याचष्टे **कर्त्तव्येत्यादिना** ।

पूर्वापरेति । पूर्वे चापरे च विषया निमित्तं यस्य प्रयोजनस्य ,, । १८
तन्निरूपणमित्यर्थः । वर्णनिष्पादिनी वाङ् नाम्नो भूयसी । वाक्प्रेरकत्वाद्वाचो मनो भूयः । कुर्यामिति निश्चयस्य मनसः कर्तव्यादिविवेकः सङ्कल्पः कारणम् । तस्य चातीतादिविषयसाध्यप्रयोजनज्ञानं चित्तम् । तस्मादपि लौकिकविषयाच्छास्त्रीयदेवताद्यैकाग्र्यं ध्यानं फलतो भूयः । ध्यानस्य विज्ञानं शास्त्रीयं कारणं तस्य मनोगतं बलं प्रतिभानसामर्थ्यं कारणम्§ । तस्याद्यमानमन्नम् । तस्यापः । एवमाकाशपर्यन्तं ज्ञेयम् । आकाशस्य भोग्यत्वे स्मरः स्मरणम् । तस्याशा तया हीष्टं तात्पर्येण स्मरति । प्राणो

* ( ) एतदन्तर्गतो ग्रन्थो न दृश्यते १-३ पु० । † ब्र० सू० अ० १ पा० २ सू० ६ ।
‡ अत्र प्रथमं द्युभ्वाद्यधिकरणं संपूर्णम् । तत्र सूत्राणि ७-द्युभ्वाद्यायतनं स्वशब्दात् १ मुक्तोपसृप्यव्यपदेशात् २ नानुमानमतच्छब्दात् ३ प्राणभृच्च ४ भेदव्यपदेशात् ५ प्रकरणात् ६ स्थित्यदनाभ्यां च ७ ॥ § कारणमिति नास्ति ३ पु० ।

नामाद्याशान्तसर्वहेतुतया भूयानित्युत्तरोत्तरभूयस्त्वं द्रष्टव्यम् । भवतु प्राणे प्रश्नप्रत्युक्तिपर्यवसानं तथापि न तस्य भूमत्वशङ्का एष त्विति तुशब्देन ग्रन्थं विच्छिद्य भूमोपदेशादित्याशङ्क्य विषयप्रदर्शनावसरएव संशयोपयोगितया पूर्वपक्षसम्भावनामाह **प्राणस्येति ।** सर्वात्मत्व*लिङ्गात् प्राण एव भूमा तुशब्दस्तु सत्यप्राणवेदिन एव नामाद्यतिवादित्वाद्विशेषार्थ इति संभवः पूर्वपक्षस्येत्यर्थः ।

१९८ । २२ प्राणस्य भूमत्वे लिङ्गान्तरमाह **अपृष्ट एवेति ।** यदि प्राणादन्यो भूमा तर्हि प्राग्वत् प्रश्नेन भाव्यमित्यर्थः । भूमशब्दस्य निष्कृष्टबहुत्ववचनत्वात् किं प्राणो भूमेति भाष्ये सामानाधिकरण्याऽयोगमाशङ्क्याह **भावभावित्रोरिति ।** भाष्यकारेण प्राणसंनिधिरात्मप्रकरणं च संशयबीजमुक्तम् । प्रबलदुर्बलाभ्यां संशयाऽयोगादित्याशङ्क्याह **संशयस्येति ।** इदं हि विशुद्धविज्ञानेन भाष्यकृतोक्तमतो यथाश्रुतालोचिभिर्नावज्ञेयम् । उपपत्तिं त्वनन्तरमेव वक्ष्याम इति भावः । पूर्वपक्षमाह **एतस्मिन्निति ।** यो वै भूमेत्युक्तो भूमा न प्राणादन्यस्य अस्ति भगव आशाया भूय इति प्रश्नातिरिक्तप्रश्नाविषयत्वे सत्येतद्भन्यस्यभूमद्रूपत्वाद् आशापेक्षप्राणभूमवदित्यनुमानं सूचितम् । आर्तिमात्रस्योद्देश्यत्वाऽपर्यवसानाद्बहुविधा विशेषणं† सहामहे पर्यवसितस्य ह्युद्देश्यस्य विशेषणं वाक्यभेदावहं ग्रहस्यैकत्वमिति शबरस्वामिन आहुः । संशयबीजोपपत्तिमनन्तरमेव वक्ष्याम इत्यवादिष्म तामिदा-

१९९ । १९ नीमाह **न चात्मन इत्यादिना ।**

निर्णीतार्थप्रतीकविषयोत्तरवशात् प्रश्नो ऽपि प्रतीकपर आत्मशब्दश्च नामादिष्वारोप्यमाणब्रह्मविषयः । प्रश्नस्यारोप्याविषयत्वे दूषणमाह **तदिति ।** प्रश्नो यद्यात्मविषयः स्यात्तदोत्तरस्य प्रतीकविषयस्यातद्विषयत्वमपृष्टविषयत्वं स्यात्तदा च प्रश्नोत्तरयोर्वैयधिकरण्य‡मित्यर्थः । प्रश्नस्येति यदि पाठो लभ्यते तदा सुगममिति । **तदेतदिति ।** प्रकरणानुत्थानम् । प्रकरणमेव प्राणसंनिधिसमकक्षत्वेन संशयबीजं दर्शयता भाष्यकारेण प्रकरणत्वमस्य न निश्चितं संनिधिमात्रमात्मशब्दस्येति सूचितम् ।

---

* त्वशब्दो नास्ति २ पु० ।

† ह्यविर्विशेषणमिति २ पु० पा० ।

‡ वैधर्म्यमिति ७ पु० पा०

अत एव पूर्वपक्षावसरे पुनर्नोक्तमित्यर्थः । पूर्वपक्षस्तु प्राणस्यात्मशब्दाद-प्यतिसंनिधानादुत्थित इत्युक्तमपि च भूमेति भाव इत्यत्र । **अपि तु** इत्यस्य **नामाद्यतिवादित्वाद्यवच्छिनत्तीति** वक्ष्यमाणेनान्वयः । फलितमाह **तदिति** । वाक्येन प्राणव्रतस्य पुनरुक्तौ प्रयोजनमाह **न नामेति***। सत्यादिरपरम्परयेति भाष्योक्तं सत्यादि दर्शयति **अत्र चेति**।

यदवादि प्रतीकविषययोरन्तरवशात् प्रश्नो ऽपि तद्विषय इति तत्राह **एवं चानात्मविद इति** । तत्त्वे बुद्धिनिवेशाय नामाद्युपन्यासः । उपा- २०१ ।
स्तिस्त्वाश्रित्य विहितेत्यर्थः । योपि प्राणात्परं प्रश्नाभाव उक्तस्तत्राह **न च प्रश्नेति** । अनुमानं तु प्राणसमानाधिकृतत्वेन सोपाधिकं सर्वप्रकरणस-माप्तौ कस्यापि वचनाऽयोगाद्व्याचष्टे **प्राणेति** । ननु भूम्न आ प्रकरणसमा-प्तेरनुकर्षो ऽस्तु स एव प्राणः किं न स्यादत आह **संदंशेति** । पुरस्तादु-परिष्टाच्च निर्देश इह संदंशः । प्राणस्यान्यायत्ततोक्त्या सत्यशब्दश्रुत्या च तच्चायुक्तमित्युक्तम् ।

बहोर्भाव इति विग्रहे पृथ्वादिभ्य इमनिज् वेतीमनिच्प्रत्यये बहुश-ब्दोपरि कृते बहोर्लोपो भू च बहोरिति सूत्रेण बहोरुत्तरेषामिमनादीनामिका-रस्य लोपे बहोः स्थाने भूआदेशे च भूमेति रूपम् । गार्हपत्यो ह वा एषो ऽपान इत्यादिना अग्नित्वेन निरूपितत्वात् प्राणाग्नयः पुरे शरीरे । देवो मन उपाधिको जीवः । अथ तदा यत्सुखं तदस्मिन् शरीरे भवति स वा एव एत-स्मिन्संप्रसादे स्वप्नान्ते बुद्धान्ते इति स्वप्नजाग्रद्भ्यां सह सुषुप्ते संप्रसादशब्दः पठितः । उपक्रमोपसंहारयोः शोकतमसोरभिधानाद्विसंवाद इति शङ्कायाम् उत्तरं भाष्यं तम इति शोकादिकारणमिति† ॥

अक्षरमम्बरान्तधृतेः ॥ १० ॥ २०२ ।

अक्षरशब्दस्य वर्णब्रह्मणो रूढिनिरूढिभ्यां संशये प्राणसार्वात्म्यं न गौणं प्रणवसार्वात्म्यवदिति प्रत्यवस्थाननिरासात्सङ्गतिः । पूर्वपक्षमाह **अक्ष-रशब्द इत्यादिना** ।

---

* एतत्प्रतीकस्थाने **मननेति** इति दृश्यते प्रतीकाकारः २ पु० ।

† अत्र द्वितीयं भूमाधिकरणं संपूर्णम् । तत्र सूत्रे २—**भूमा संप्रसादादध्युपदेशात् ८ धर्मोपपत्तेश्च ९** ॥

रूप्यते निरूप्यते इति रूपमभिधेयं स्वार्थे धेयप्रत्ययः । अर्थे‡
शब्दात्मकत्वानुभवो न तद्गम्यत्वकृतः । धूमगम्य§वह्नेस्तादात्म्या‖नवभासा-
दिति । शब्दबोधे ऽभिधाय मानान्तरगम्यार्थबोधे यः शब्दबोधस्तत्रोपाय-
त्वप्रयुक्तशङ्का ऽपि नेत्याह **अपि चेति** । **ग्रथिताः** संबद्धाः । **विद्धास्ता-**
दात्म्येन । **शङ्कुना** पर्णनालेन । **पर्णानि** पर्णावयवाः । **संतृणानि**¶ विद्धानि ।
किं तु परमात्मैवेति । धारयितुमर्हतीत्यनुषङ्गः । स्वरूपप्रमाणार्थक्रिया-
भिर्भेदमाह **तथा हीति** । ननु डित्थो ऽयमिति नामसंभेदो ऽनुभूयते तत
आह **न च डित्थ इति** । यद्यर्थो न शब्दात्मा तर्हि कथमर्थप्रत्यये
२०४।१ शब्दः प्रतिभाति न हि स तदा स्वेन परेण वोच्चार्यते ऽत आह **संज्ञा**
त्विति । संस्कारोद्बोधस्य संपात उत्पादस्तेनायाता प्राप्ता गृहीतसंबन्धैः
पुंभिः । **यत्संज्ञास्मरणमिति** । **अन्यहेतुकम्** अर्थात्मत्वहेतुकम् ।
ननु स्मर्यमाणसंज्ञायाः परोक्षत्वात्तद्विशिष्टो ऽर्थः कथं प्रत्यक्षः स्यादत
आह **संज्ञा हीति** । संज्ञिनः प्रत्यक्षत्वं स्मर्यमाणा ऽपि संज्ञा न बाधते ।
सा हि तटस्था अर्थानिविष्टा ऽतो नार्थस्वरूपाच्छादनक्षमेति ।

भास्करस्त्वस्थूलमित्यादेर्वर्णेष्वप्राप्तनिषेधत्वानुपपत्तेरधिकरणमन्यथ-
यामास तदनूद्य दूषयति **ये त्वित्यादिना** । अम्बरान्तधृतेः प्रधानं न
निराकर्तुं शक्यं साधारणत्वादित्यर्थः ।

यत्तु कश्चिदाह भूतभविष्यदाद्याधारत्वादव्याकृतमाकाशं तथा च
प्रधाननिराक्रियेति । तन्न । तथा सत्युत्तरसूत्रवैयर्थ्यात् ।

अत्र स एवाह आकाशशब्दस्य रूढिभङ्गः फलं नभआश्रयस्याव्याकृ-
तस्य प्रशास्तृत्वायोगादव्याकृताश्रयस्य तदुपपत्तेरिति । तच्च न । आत्मन
आकाश इति भूताकाशाश्रयस्यात्मत्वावगमात् । अपि च प्रधानस्यापि नभ-
आश्रयत्वसाधारण्यात्तद्व्युदासाय रूढिभङ्ग इति वाच्यम् । तच्चायुक्तम् । अभ-
११।२१ ङ्गायामपि रूढौ वाक्यशेषस्थप्रशास्तेर्निर्णयलाभादिति । **न ह्यवश्यमिति** ।

‡ अर्थस्येति २ पु· पा· ।

§ धूमे गम्ये इति २ पु· पा· ।

‖ तत्तादात्म्येति १ पु· पा· ।

¶ संतृण्णानीति पाठः साधुः । आदर्शत्वेन धृतेषु सर्वेषु पुस्तकेषु उपरितनस्यैव दर्शनात्त-थैवोपरि निवेशितम् । मु· भा· पु· द्रष्टव्यम् पृ· २०३ टि· १ ।

प्रौढैष वादः । संभवति तु प्राप्तिरभिधानानुरक्ताभिधेयस्य तत्प्रकृतिकत्वे प्रकृतिविकाराऽनन्यत्वेन प्रलयावस्थवर्णेषु स्थौल्यादिप्राप्तेरिति ।

प्रपञ्चाधिष्ठानत्वमात्राभ्युपगमाद् ब्रह्मणः प्रशासनाश्रयत्वाऽयोगाद्वाचस्पतिमते **सा च प्रशासनादिति*** सूत्रमसंगतमिति के चित् । तन्न । रज्ज्वां भुजगवत् प्रशासनव्यापारस्याप्यारोपात् । हन्त प्रधाने ऽपि तमारोप्य तदपि प्रशासितृ किं न स्यादिति चेत् । नैतत् । चेतने दृष्टस्य नियन्तृत्वस्य जगदैश्वर्यरूपेण चेतनएव समारोपसंभवात् । न हि गजतुरगपत्तिपरिवृते राजामात्ये राजत्वमारोपितमिति कुड्यादावारोप्यते । आरोपितमपि नियन्तृत्वं ब्रह्मणि मुख्यमेव प्रपञ्चस्थित्यर्थक्रियाकारित्वादकारगतह्रस्वादिवत् । प्रधाने तु गौणम् । तदिदमाह **न च मुख्यार्थसंभवे इति**† ॥

ईक्षतिकर्मव्यपदेशात्सः ॥ १३ ॥ २०५ । १८

अम्बरावधिकाधारा‡त्प्रणवः पर्युदासि यः§ ।
तद्ध्येयमपरं किं वा परमित्यत्र चिन्त्यते ॥

एषां बुद्धिसन्निधिसंगतिः । **कार्येति** । कार्यब्रह्म हिरण्यगर्भे एत्र जनो जीवो यस्मिन् स ब्रह्मलोकस्तया तत्प्राप्तिः फलं यस्य ध्यानस्य तत्तथा तस्य भावस्तत्त्वं ततो हेतोरपरं ब्रह्म ध्येयमिति गम्यते । ननु परं पुरुषमभिध्यायीत परात् परं पुरुषमीक्षतइतीक्षणध्यानयोरेकविषयत्वावगमादीक्षणस्य च यथार्थत्वात् परमार्थं ब्रह्मैव ध्येयं न त्वपरमित्यत आह **अर्थभेदत इति** । ध्यानस्य परविषयत्वादीक्षणस्य परात्परो यस्तद्विषयत्वादेकविषयत्वमसिद्धमित्यर्थः । प्रथमहेतुं व्याचष्टे **ब्रह्म वेदेति** । २०६ । १
अर्थभेदत इत्येतच्छङ्कोत्तरत्वेन व्याचष्टे **न चेति** । अङ्गीकृत्य दर्शनस्य तत्त्वविषयत्वमीक्षणध्यानयोर्विषयभेद उक्तस्तदेवासिद्धमित्याह **न चेति** । ननु युक्त्या पर्यालोचनमिहेक्षणं तच्च तत्त्वविषयमित्याशङ्क्याह **न च मननमिति** । किं मननदर्शनयोरैक्यमुतात्र मननविवक्षा । नाद्य इत्याह

---

* व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ ११ । तृतीयाधिकरणान्तर्गतमिदं सूत्रम् ।

† अत्र तृतीयम् अक्षराधिकरणं संपूर्णम् । तत्र सूत्राणि ३-**अक्षरमम्बरान्तधृतेः** १० **सा च प्रशासनात्** ११ **अन्यभावव्यावृत्तेश्च** १२ ॥

‡ आधार इति ३ पु॰ पा॰ । § पर्युदासित इति ५ पु॰ पा॰ ।

२०६ । १० **मननादिति** । न द्वितीय इत्याह **न चेति** । ईक्षणध्यानयोरर्थभेदं निराकरोति **ईक्षणेति** । एको ऽर्थ इत्यन्वयः । यदवादि न सर्वं दर्शनं तत्त्वविषयमिति तत्राह **औत्सर्गिकमिति** । ईक्षतेरीक्षणस्य तत्त्वविषयत्वमौत्सर्गिकं न चेहापवादः कश्चित् तथा ध्यानस्यापि तत्कारणस्य स्या*-दन्यथा ऽन्यद् ध्यायत्यन्यत्पश्यतीति हेतुहेतुमत्त्वासिद्धेरित्यर्थः । प्रकारान्तरेणार्थभेदं निराकरोति **अपि चेति** । **समभिव्याहारादिति** । स ईक्षतइति प्रकृतापेक्षनिर्देशादित्यर्थः । **तदनुरोधेनेति** । प्रमाणद्वयानुरोधेनेत्यर्थः ।

हे सत्यकाम परं निर्विशेषम् अपरं हिरण्यगर्भाख्यं च यद् ब्रह्म तदेतदेव । एतच्छब्दार्थमाह यदोङ्कारः स हि तस्य प्रतीकः प्रतिमेव विष्णोः तस्मात्प्रणवं ब्रह्मात्मना विद्वानेतेनोङ्कारध्यानेनायतनेन प्राप्तिसाधनेन परापरयोरेकतरं यथोपासनमनुगच्छतीति प्रकृत्यैकमात्रद्विमात्रोपास्ती उक्त्वा वक्ति पिप्पलादः यः पुनरोमित्येतदक्षरं त्रिमात्रमिति । तृतीया द्वितीयात्वेन परिणेया ब्रह्मोङ्काराभेदोपक्रमात् । तथाविधमक्षरं सूर्यप्रतिमं† परं पुरुषमभिध्यायीत स सूर्ये प्राप्तः सामभिर्ब्रह्मलोकं प्राप्यते‡ ॥

२०७ । १४ **दहर उत्तरेभ्यः ॥ १४ ॥**

प्रागुदाहृतपरमपुरुष§शब्दस्य दहरवाक्यशेषगतोत्तमपुरुषशब्दवद्ब्रह्मविषयत्वशङ्कायामस्यापि ब्रह्मविषयत्वोपपादनात्संगतिः ।

पूर्वेभ्य इति । श्रवणमनननिदिध्यासनेभ्य‖ इत्यर्थः । **आधेयत्वादिति** । ब्रह्मपुरशब्दोक्तं देहलक्षणं पुरं जीवस्य युज्यते । तस्य परिच्छिन्नत्वेनाधेयत्वात् स्वकर्मोपार्जितशरीरेण संबन्धविशेषाच्च ब्रह्मणः पुर¶मिति षष्ठीसमाससंभवात् । ब्रह्मणस्तु न युक्तं पुरम् उक्तहेतुद्वयाभावादित्यर्थः । विशेषादित्येतद्व्याख्याति **असाधारणेनेत्यादिना** । जीवभेदो

२०८ । १९ जीवविशेषः । आधेयत्वहेतुं व्याचष्टे **अपि चेत्यादिना** । तेनाधिकरणेन

---

* तत्कारणस्य तत्त्वविषयत्वं स्यादिति २ पु॰ पा॰ । † सूर्यान्तरस्थमिति २–५ पु॰ पा॰ ।

‡ प्रतिपद्यते इति ३ पु॰ पा॰ । अत्र चतुर्थम् ईक्षतिकर्माधिकरणं संपूर्णम् । तत्र सूत्रम् १–
ईक्षतिकर्मव्यपदेशात्सः ॥ १३ ॥ § परपुरुषेति २–३ पु॰ पा॰ ।

‖ ध्यानेभ्य इति १–२ पु॰ पा॰ । ¶ ब्रह्म पुरमिति २ पु॰ पा॰ ।

सहानेन* ब्रह्मशब्दार्थेनाधेयेन संबन्धव्यम् । समासाभिहितसंबन्धसामान्यस्याधाराधेयभावएव विश्रमादित्यर्थः । भक्तिर्गुणस्तेन हि शब्दो मुख्यार्थाद्भ्रज्यते । यदि चेतनत्वं समं जीवब्रह्मणोस्तर्हि को विशेषस्तत्राह **उपधानेति** । भक्त्या च तस्य ब्रह्मशब्दवाच्यत्वमिति भाष्ये वाच्यत्वं तात्पर्यगम्यत्वं भाक्तत्वे सत्यभिधेयत्वविरोधादित्यर्थः । **अन्यस्य** ब्रह्मण इत्यर्थः । **अनिर्दिष्टाधेयमिति** । वेश्माधेयतया निर्दिष्टस्याप्याकाशस्य संदिग्धत्वादनिश्चय इत्यर्थः । उपमानोक्तेरन्यथासिद्धिमाशङ्क्याह **तेनेति** । २०९ । १९ ह्रस्तनाद्यतनत्वादिना युद्धे भेदारोपः क्रियते ।

गगनं गगनाकारं सागरः सागरोपमः ।
रामरावणयोर्युद्धं रामरावणयोरिव ॥ इत्यत्र ।

अस्तु वोपाध्यपेक्षया ऽऽकाशे भेदारोपस्तथापि न बाह्याकाशतुल्यत्वं हार्दाकाशस्येत्याह **न चेति** । यद्यूनत्वाद्धार्दनभसो न बाह्येनोपमेयता हन्ताधिकत्वाद् ब्रह्मणो ऽपि न स्यादत आह **न भूताकाशेति** । आधेयत्वादित्येतत्प्रत्याह **उपलब्धेरिति** । विशेषाच्चेत्येतन्निराकरोति **तेनेति** । मुख्याधेयत्वत्यागे हेतुमाह **तथा चेति** । नन्वनिर्णीताधेयं वेश्म संनिहितपुरस्वामिना संबध्यतइत्युक्तत्वात्कथं जीवपुरे ब्रह्मसदनलाभो ऽत आह **उत्तरेभ्य इति** । संनिधिर्लिङ्गैर्बाध्यत†इत्यर्थः । ननु लिङ्गानि ब्रह्माभेदपराणि नेत्याह **ब्रह्मणो हीति** । इह ब्रह्मणि बाधकं जीवे च साधकं प्रमाणं नास्ति ब्रह्मबाधकत्वेन जीवसाधकत्वेन चेष्टस्य संनिधेर्लिङ्गैर्बाधादित्यर्थः । अपि चासिद्धो जीवसंनिधिः पुरस्य ब्रह्मसंबन्धोपपादनाद् ब्रह्मशब्देन जीवाऽनभिधानादित्याह **ब्रह्मपुरव्यपदेशश्चेति** । अथ य इहात्मानमिति भाष्यस्थश्रुतावनुशब्दार्थमाह **अवेति** । विदेरर्थमाह **अनुभूयेति** । साक्षात्कृत्येत्यर्थः । काम्यन्तइति कामा विषयाः । चार उपलब्धिः । आद्यसंशयस्थपूर्वपक्षमनूद्य सिद्धान्तयति **स्यादेतदित्यादिना** ।

भाष्ये द्यावापृथिव्याद्यन्वेष्यत्वापत्तिरिष्टापादन‡मिति शङ्कते **स्यादेतदिति** । २१२ । २ तर्ह्यर्थ§ य इहात्मानमित्यात्मशब्दः कथमत आह **ताभ्या-**

---

* अनेनेति नास्ति । ३ पु० ।
† बाध्य इति ५ पु० पा० ।
‡ अन्वेष्यत्वापादनमिष्टापत्तिरिति २ पु० पा० ।
§ अथशब्दो नास्ति २ पु० ।

मिति । तथा च *भूताकाशस्य दहरत्वसिद्धिरित्यर्थः । अस्मिन्कामा
इत्यस्मिन्शब्देन द्यावापृथिव्याधार आकाश एव परामृश्यते समानाधार-
त्वप्रत्यभिज्ञानाद् न द्यावापृथिव्यौ तथा चैष इत्यात्मेति तदुपरितनशब्दा-
भ्यामप्याकाश एव निर्दिष्ट इत्याह **अनेन हीति** । आकृष्येति भाष्ये
२१२ । ७ व्यवधानं सूचितम् । व्यवहितस्य ह्याकर्षणं तत्कथयति **द्यावापृथि-
व्यादीति** । उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते इति पूर्व-
वाक्ये आकाशनिर्देशानन्तरं द्यावापृथिव्यादिनिर्देशाद् व्यवधानम् । एताश्च
सत्यान्कामान् इत्यात्मशब्दानन्तरं कामनिर्देशात्सर्वेषु लोकेषु कामचारो
भवतीति फलश्रवणं गुणविज्ञानस्यैवेति शङ्कते **नन्विति** । चकाराद्गुणगुणि-
नोर्ज्ञेयत्वे समुच्चयावगममात्समुच्चितोपास्तिफलं कामचार इति परिहारार्थः ।

पूर्ववाक्यव्यवहितद्यावापृथिव्याद्युपेत्या†स्मिन्शब्देन प्रत्यभिज्ञानादा-
काशमेव परामृश्यतइत्युक्तं तत्रैव हेत्वन्तरमाह **अस्मिन्कामा इति
चेति** । लक्षितात्मन ऐक्ये ऽपि पूर्वं शब्दतो ऽनुपात्ते नैकवचनपरामृश्यते-
त्यर्थः । यदि दहराकाशस्य विज्ञेयत्वं कथं तर्हि तदाधेयस्य विज्ञेयत्वोप-
देशो ऽत आह **तदनेनेति** । एतमेव दहराकाशं प्रक्रम्य श्रुतिः प्रववृतइ-
त्यन्वयः । **धनायद्भिः** धनेच्छावद्भिः । यद्यपि सुषुप्तौ‡ ब्रह्मप्राप्तिर्न लोकसिद्धा
तथापि वेदसंस्कृतजनप्रसिद्धा वेदस्य तत्र तात्पर्यं गम्यतइत्याह **तथा-
पीति** । कर्मधारयस्य§ षष्ठीसमासाद्बलीयस्त्वाल्लिङ्गोपन्यासवैयर्थ्यमाशङ्क्या-
२१३ । २० भ्युच्चयार्थत्वेन परिहरति **अत्र तावदित्यादिना** ।

षष्ठे स्थितम्—स्थपतिर्निषादः शब्दसामर्थ्यात्‖ । रौद्रीमिष्टिं विधा-
याम्नायते एतया निषादस्थपतिं याजयेदिति । तत्र निषादस्थपतिस्त्रैव-
र्णिकानामन्यतम उतान्य इति संदेहे ऽग्निविद्यावत्त्वेन समर्थत्वादनिषादे
ऽपि निषादानां स्थपतिः स्वामीति शब्दप्रवृत्तिसंभवादन्यतम इति प्राप्ते
ऽभिधीयते । निषाद एव स्थपतिः स्यात्कर्मधारयश्च समासो निषादश-
ब्दस्य श्रौतार्थलाभेन शब्दसामर्थ्यात् षष्ठीसमासे तु संबन्धो लक्ष्येत षष्ठ्यश्र-
वणात् समासस्थषष्ठीलोपो ऽपि शब्दाभावत्वान्नैत्र षष्ठ्यर्थबोधी द्वितीयायाश्च

* तथा चेति नास्ति ३ पु· ।
† पृथिव्याद्युपेक्ष्येति ३ पु· पा· ।
‡ सुप्ताविति १–२ पु· पा· ।
§ कर्मधारयस्यैवेति २–३ पु· पा· ।
‖ जै· सू· अ· ६ पा· १ सू· ५१ निषादः स्यादिति सौत्रः पाठः ।

प्रत्येकं निषादस्थपतिशब्दाभ्यां संबन्धसंभवे सति नाश्रुतषष्ठी कल्प्या । तस्मान्निषाद एव स्थपतिरिति ।

तदप्याधिक्यमुक्तं सूत्रकारेण चकारं प्रयुञ्जानेनेत्यर्थः । सूत्रार्थमाह **तथा हीत्यादिना** । विपक्षाद्व्यावृत्तौ हेतुमाह **असंभवादिति** । सेतुर्विधृतिरिति श्रुतौ धृतिशब्द आत्मशब्दसामानाधिकरण्याद्यद्यपि कर्तृवाची क्तिजन्तस्तथापि सूत्रगतधृतिशब्दो महिमशब्दसामानाधिकरण्यात् क्तिन्नन्तत्वेन भाववचन इत्याह **सौत्र इति** । प्रसिद्धिशब्दस्य रूढिवाचित्वभ्रम- २१४ । १२
मपनयति **न चेति** । रथाङ्गमिति नाम चक्रवाके लक्षणया संप्रत्येव प्रयुज्यते । रथाङ्गशब्दपर्यायस्य चक्रप्रातिपदिकस्य चक्रवाकशब्दावयवत्वेन निवेशात् । आकाशशब्दस्य तु ब्रह्मण्यनादिकाले बहुकृत्वः प्रयोगान्निरूढलक्षणेत्यर्थः ।

पञ्चपाद्यां तु रूढिरुक्ता तां दूषयति **ये त्विति** । नभसि ब्रह्मणि च रूढ्यभ्युपगमे ऽनेकार्थत्वं नाभसगुणयोगाद् ब्रह्मणि वृत्तिसंभवे च शक्तिकल्पनायां गौरवमित्यर्थः । अत्र के चिदा समन्तात्काशतइति आकाशशब्दस्यावयववृत्तिसंभवे सेतुशब्दस्येव तद्बहिर्भूतगुणवृत्तिरयुक्तेत्याहुः । तन्न । अपहृत्य योगं रूढ्यर्थे प्रत्यायिते रूढिं पुरस्कृत्य क्लृप्तादेव गुणयोगादन्यत्र वृत्तिलाभे ऽनपेक्ष्य रूढिमवयवव्युत्पत्तिक्लेशस्याऽयुक्तत्वात् । सेतुशब्दो ऽपि सेतुगुणाद्विधरणादेर्ब्रह्मणि वर्तते । भाष्यकृद्भिस्तु सेतुशब्दव्युत्पत्तिरभ्युच्चयार्थमाश्रिता* । अस्तु तर्ह्यनेकार्थत्वपरिहाराय ब्रह्मण्येव मुख्यत्वमत आह **न चेति** । तेनैव विभुत्वादिगुणयोगेन **वर्त्स्यति** वृत्तो भविष्यत्याकाशशब्द इति न वाच्यम् । तत्र हेतुर्वैदिकपदार्थप्रत्ययस्य लोकपूर्वकत्वाद्वेदे रूढ्यप्रतीतेरिति । एतत्सिद्ध्यर्थमाह **लोकाधीनेति स्यान्तेन** । रूढिवादी २१५ । २
तु प्रसिद्धगुणवृत्तिवैषम्यं शङ्कते **नन्विति** । **व्यतिरेकेण निर्देशादिति** । अन्तर्हृदयआकाश इति ब्रह्मण्याकाशशब्दप्रयोगादेवाकाशगुणयोगस्य लक्ष्यस्य सिद्धौ लभ्यायामपि तद्व्यतिरेकेण यावान्वा अयमाकाशस्तावानित्याकाशसादृश्यस्य निर्देशाल्लक्षणा न युक्तेत्यर्थः । यत्र लक्षणया शब्दः प्रयुज्यते तत्र लक्ष्यांशस्य पृथग् न निर्देश इत्यत्र दृष्टान्तमाह **न हि**

---

* अङ्गीकृतेति २ पु॰ पा॰ ।

भवतीति । गङ्गापदेन गङ्गायाः कूलमित्यर्थे विवक्षिते गङ्गापदमेव प्रयु-
ज्यते न तु गङ्गाया इति लक्ष्यसंबन्धं पृथगुक्त्वा गङ्गेति प्रयुज्यतइत्यर्थः ।
२१५ । ६ परिहरति **तत्किमिति** । आग्नेयादौ पौर्णमास्यमावास्याशब्दप्रयोगादेव
लक्ष्यस्य कालसंबन्धस्य सिद्धावपि तद्व्यतिरेकेण पौर्णमास्याममावास्यायामिति
च कालसंबन्धनिर्देशादुक्तन्यायो ऽनेकान्त इत्यर्थः । दृष्टान्ताऽसिद्धिमाशङ्क्याह
न चेति । मुख्यत्वे ह्यमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीत्यत्रापि
अमावास्याशब्दस्य कर्मणि रूढिः स्यात्तथा च पितृयज्ञः स्वकालत्वादनङ्गं
स्या*दित्यधिकरणबाध इति । अपरं रूढिकारणमाशङ्कते **यच्चेति** ।
अन्यत्र मुख्यत्वेन निश्चितस्य शब्दस्यान्यत्रार्थे प्रयोगे ऽर्थश्चेदन्यतो ऽधि-
गतः तर्हि मुख्यत्वं न चेदमुख्यत्वं गङ्गायां घोष इत्यत्र हि गङ्गापदादेव
गङ्गासंबन्धितीरमनुपपत्त्या श्रोता जानाति ततस्तत्र लक्षणा । आकाश-
शब्दस्तु यदेष आकाश आनन्दो न स्यादित्यत्र सत्यं ज्ञानमनन्तमिति वाक्य-
निश्चिते ब्रह्मणि प्रयुक्त इति वाचकस्तथा च दहरवाक्ये ऽपि ब्रह्मवाचक
,, । ११ इत्यर्थः । शब्दादनधिगतार्थप्रतीतौ लक्षणेत्येतद्व्यभिचारयति **सोमेनेति** ।
सोमशब्दो हि लताचन्द्रमसोर्मुख्य† एतद्वाक्यार्थान्वयित्वेन सोमपदादन्यतो
ऽनधिगतायां लतायामत्र वाक्ये प्रयुक्त इत्यर्थः । अन्यतो निश्चिते शब्दस्य
मुख्यत्वमित्येतदनेकान्तयति **न चेति** । अत्र हि समुदायानुवादिवाक्य-
द्वये पौर्णमास्यमावास्याशब्दौ लाक्षणिकौ न भवतो यागषट्कश्च प्रकृतादाग्ने-
यादिवाक्याद् ज्ञात इति ज्ञातार्थविषयत्वं मुख्यत्वे ऽनेकान्तमित्यर्थः ।

वरिवसितुं शुश्रूषितुम् । **अपनिनीषुः** अपनेतुमिच्छन्प्रजापतिरुवाचेत्य-
न्वयः । यथा प्राक्प्रतिबिम्बात्मत्वेन दृष्टनखलोम्नां छेदनादूर्ध्वमभावादनात्म-
२१७ । १४ त्वमेवं सर्वस्य प्रतिबिम्बस्य विवक्षितम् । **साधु** अलंकाराद्युपन्यासेन । **एष
आत्मेति** । देहाद्यागमापायसाक्षीत्यर्थः । **देहानुपातित्वाच्छायाया
इति** । यथा खलु नीलाऽनीलपटयोरादर्शे दृश्यमानयोर्यन्नीलं तन्महार्ह-
मित्युक्ते न च्छायाया महार्हत्वमेवं छायाकारदेहस्यैवात्मत्वमिति विरो-
चनो मेने । इन्द्रस्त्वल्पपापत्वा‡च्छ्रद्धधानतया न प्रतिबिम्बमेवात्मेति

* जै० सू० अ० ४ पा० ४ सू० १६ । † मुख्य एवेति ३ पु० पा० ।
‡ अल्पपाप्मत्वादिति ३ पु० पा० ।

प्रतिपेदे । **एवंकारमेवं** कृत्वा । **न निर्ववार** निर्वृतिं सुखं नानुबभूव । **अक्षणि** अक्ष्युपलक्षिते जाग्रति **अभिप्रतीतो** ऽभिप्रतीतिवान् । चतुर्थपर्यायं
प्रतीकत आदत्ते **एष संप्रसाद इति ।** वाग्बुद्धिशरीराणां कार्यभूतो य २२० । ६
आरम्भः क्रिया ततः सम्भवो यस्य पाप्मादेरपूर्वस्य स तथा । जीववादी प्रष्टव्यः किमीश्वरमेव मन्यते उत तस्य जीवप्रत्यगात्मत्वमथ वा ऽभ्युपेत्येश्वरस्य जीवप्रत्यक्त्वमत्र वाक्ये ईश्वरप्रतिपादनं न मन्यतइति । नाद्य इत्याह **पौर्वापर्येति ।** न द्वितीय इत्याह **तदतिरिक्तं चेति ।** रज्ज्वां भुजङ्गवज्जगत्परमात्मनि विकल्पितं जीवो ऽपि द्वितीयचन्द्रवद्भेदेनाध्यस्त इत्याह **तथा चेति** । तृतीयं प्रत्याह **एवं च ब्रह्मैवेति ।** श्रुत्या प्रजापतिवाक्ये उक्तमित्यर्थः । भाष्ये ऽन्यासंसर्गिण आत्मनो ऽभिव्यक्तिसम्भवे ऽन्यसंसर्गिस्फटिकदृष्टान्तवर्णनमयुक्तमित्याशङ्क्याह **यद्यपि स्फटिकादय इति ।** जपाकुसुमादिना संयुक्तं भूतलं तेन निकटएव संयोगो येषां स्फटिकादीनां ते संयुक्तसंयोगास्तद्रूपत्वं तदात्मत्वम्* । तथा च व्यवधानेन संयुक्ता इत्यर्थः ।
प्राग्विवेकविज्ञानोत्पत्तेरिति भाष्ये वेदनाशब्दार्थमाह **वेदना इति ।** अनावृ- २२२ । २
तस्वरूपस्फुरणमुपसम्पत्तिशब्दार्थमाह **तथा चेति ।** ननु स्वरूपाभिनिष्पत्तिर्वृत्तिः तथा ऽपसारिते आवरणे पश्चाज्ज्योतिरुपसंपत्तिः तत्कथं व्युत्क्रमेण निर्देशो ऽत आह **अत्र चेति । यदा च विवेकसाक्षात्कार इति ।** पूर्वं परोक्षज्ञानं शरीरात्समुत्थानमुक्तम् । इदानीं तस्य फलपर्यन्तत्वात्तत्फलं साक्षात्कारो ऽपि शरीरात् समुत्थानत्वेनानूदित इति न विरोधः । नापि प्रतिच्छायात्मायमिति भाष्यप्रतिबिम्बस्याक्षिपुरुषत्वेन निर्देशवारकमप्रासङ्गिकमिव प्रतिभाति तत्पूर्वपक्षितजीवदृष्टान्तनिराकरण†परत्वेन प्रकृते सङ्गमयति **स्यादेतदिति ।** अक्षिपर्याये च्छायात्मा निर्दिष्टः स्वप्नसुषुप्तिपर्याययोर्जीवो ऽतः छायात्मदृष्टान्तेन जीवशङ्का । अहेत्यत्र बिन्दुमध्याहृत्य व्याचष्टे
अहमात्मानमिति । अहमिति शब्दगोचरमित्यर्थः । यथाश्रुतपाठे ऽहे २३ । १३
त्यवधारणार्थो निपातः । नैव जानातीत्यर्थः । सुप्ते चैतन्यस्य स्फुरणात्सर्वथा ऽऽत्मभाननिषेधो न युक्तो ऽत औपाधिकस्फूर्तिनिषेधाय निपातस्याव-

* तदात्मत्वमिति नास्ति २ पु० ।

† निराकरणेति नास्ति १ पु० । ३ पु० बहिः शोधितम् ।

धारणार्थत्वं जानतैव बिन्दुरध्याहृतः । अविनाशित्वादिति हेतोः साध्याविशेषमाशङ्क्याह **अनेनेति** । असिद्धस्यापि हेतोः सिद्धिनिर्देशेन सिद्धिहेतुभूतं प्रमाणं सूचितमित्यर्थः । तदेव प्रमाणं दर्शयति **य एवाहमिति** ।

२२३ । १९ **आचार्यदेशीया** आचार्यकल्पाः । न तु सम्यगाचार्यास्तन्मतमित्यर्थः । एकदेशिप्रत्यवस्थानं जीवो दहर इति पूर्वपक्षे ऽन्तर्भावयति **यदीति** । उक्तं हि पूर्वपक्षिणा छायावद्वा* आरोपेण स्वत एव वा देहादिवियोगमपेक्ष्यामृताभयत्वादि जीवस्यैवेति एतं त्वेव तइत्यक्षिस्थपुरुषानुकर्षणमङ्गीकृत्य इदानीं तु परामर्शस्यान्यविषयत्वेन स एवैकदेशी भूत्वा प्रत्यवतिष्ठतइत्यर्थः । नन्वेवं परमात्मा चेदिह निर्दिष्टः स एवेह दहरः किं न स्यात् । अस्तु । जीवो ऽपि किं न भवेत् । अत एव अविनिगमेन पूर्वपक्ष इत्यतीतानन्तरसूत्रोपक्रमे वर्णितं तदिहापि सूत्रे ऽनुसंधेयम् ।

नन्वेतं† व्याख्यास्यामीति परमात्मानं‡ प्रतिज्ञाय कथं स्वप्नसुषुप्तिपर्याययोर्जीवो व्याख्यायते । उच्यते ।

सूक्ष्मे चतुर्थपर्याये वक्ष्यमाणे परात्मनि ।
धीनिवेशाय जीवस्याप्युपास्तिरिह वर्ण्यते ॥

अत एव व्याख्यास्यामीति भविष्यताऽवगमः ननु परमात्मपरामर्शे जीवः परामृष्ट एव तदभेदादत आह **न खल्विति** । दृष्टे संभवत्यदृष्टकल्पनानुपपत्तेर्जीवानुवादेन ब्रह्मता बोध्यते नोपास्तिविधिः । इन्द्रब्रह्मचर्यावसानानन्तर्यार्थो§ भविष्योक्तिरिति परिहाराशयः । अस्य चौपाधिको जीवो ऽवच्छिन्ने च नापहतपाप्मत्वादिसंभव इति मतम् ।

२२४ । २ पारमार्थिकजीवब्रह्मविभागमतमाह **मतान्तरमिति** । शारीरकार्थमाह **तथा हीति** । सूत्रकोपं|| परिहरति **न च वस्तुत इति** । औपाधिकभेदेन गुणसंकर इत्यर्थः । कर्मविध्युपरोधं वारयति **अविद्याकल्पितमिति** । अविद्याकल्पितं कर्तृत्वाद्याश्रित्य कर्मविधयः प्रवृत्ता इत्यत्र हेतु-

---

* छायात्मवदिति २ पु॰ पा॰ ।
† एवमिति १ पु॰ पा॰ ।
‡ परमात्मव्याख्यानमिति २-३ पु॰ पा॰ ।
§ ब्रह्मचर्यवासानन्तर्येति २ पु॰ पा॰ ।
|| सूत्रकारो ऽपीति २ पु॰ ।

माह **अविद्यावदिति ।** इत्युक्तमध्यासभाष्ये । अविनिगमपरिहारार्थं जीव-
परामर्शस्यान्यथासिद्धिप्रतिपादकं सूत्रमवतार्य व्याचष्टे **नन्वित्यादिना ।** २२४ । १८

स वा अयमिति । स वै ईश्वरस्तत्त्वतो ऽयं जीव एव औपाधिकस्तु भेद इत्याह पुरुष इति । पुरुषशब्दार्थमाह पुरिशय इति । पूः उपाधिः । किमेकस्यामेव पुरि शेते न अपि तु सर्वासु पूर्षु । तमाचार्यं शिष्याश्चेद् ब्रूयुः । तद्यत्रेति । त*त्र अवस्थाद्वयप्रापककर्मोपरमे सति यत्र यस्मिन्काले एतदिति क्रियाविशेषणम् । एतत्स्वपनम् । सुप्तः स्वापस्य द्विप्रकारत्वात् । स्वप्नव्यावृत्त्यर्थमाह समस्त इति । उपसंहृतसर्वकरण इत्यर्थः । अत एव विषयासंपर्कात् संप्रसन्नः । स्वप्ने महीयमानः पूज्यमानः चरति पश्यति भोगान्† ॥

अनुकृतेस्तस्य च ॥ २२ ॥ २२५ । ५

सप्तम्याः सति विषये च साधारण्यात्संशयः । पूर्वमेतं त्वेव तइत्येतच्छब्दस्य प्रकृतार्थत्वाद् दहरस्य जीवता निरासि तदसाधु तत्रेत्यादौ सर्वनाम्नः प्रकृतार्थत्वाऽनियमादिति शङ्कानिरासात्संगतिः । तत्रेति विषयसप्तमीस्वीकारे तद्भासयतीति णिजध्याहारप्रसङ्गात्सतिसप्तमीमादाय पूर्वपक्षमाह **अभानमिति ।** तस्मात्तेजःप्रत्यभिभावकत्वलिङ्गादनुभानलक्षणानुकाराच्च तत्रशब्देन तेजोरूपं पदार्थान्तरं गम्यतइति द्वितीयार्द्धस्यार्थः । प्रथमार्द्धं व्याचष्टे **बलीयसेति ।** विमतं तेजः तदभिभावकत्वात् सूर्यवदित्यनुमानमसूचि । तस्यानैकान्तिकत्वमाशङ्क्याह **ये ऽपीति ।** भासकत्व सति तेजोऽभिभावकत्वं हेतुरित्यर्थः । नन्विन्द्रियातिरिक्तस्य तेजसः कथं तेजःप्रकाशकत्वमत आह **श्रूयते चेति ।** अस्य तेजसो ऽयं विशेषः ,, । ११
श्रुतित आश्रित इत्यर्थः । अभिभवानुकारयोरतेजसि ब्रह्मणि श्रुतिवशादाश्रयणे तु गौरवमिति पूर्ववाद्याशयः । ननु तस्य भासेति सर्वज्ञत्वे ब्रह्म-

---

* तदिति नास्ति २ पु· ।

† अत्र पञ्चमं दहराधिकरणं संपूर्णम् । तत्र सूत्राणि ८—दहर उत्तरेभ्यः १४ गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च १५ धृतेश्च महिम्नो ऽस्यास्मिन्नुपलब्धेः १६ प्रसिद्धेश्च १७ इतरपरामर्शात् स इति चेन्नासम्भवात् १८ उत्तराच्चेदाविर्भूतस्वरूपस्तु १९ अन्यार्थश्च परामर्शः २० अल्पश्रुतेरिति चेत्तदुक्तम् २१ ॥ व्यासाधिकरणमालायां तु १८ सू· पर्यन्तं पञ्चमं दहराधिकरणम् अग्रे च षष्ठम् उत्तराधिकरणमिति अधिकरणविभागो दृश्यते ।

२२५ । १२ लिङ्गे कथं तेजःशङ्काऽत आह **सर्वशब्द इति** । द्वितीयार्धं व्याख्याति
न चेति । ननु मन्त्रस्थतच्छब्दैः प्रकृतं ब्रह्म परामृश्यतेऽत आह **तत्रेति** ।
उपरिष्टात्प्रदर्शनीयं वक्ष्यमाणमेव **अवमक्ष्यन्ति*** तस्य परामर्शं करि-
ष्यन्ति । रागवाचिनः शब्दात्तेनेति तृतीयासमर्थाद्रक्तम् इत्यर्थेऽण्प्रत्ययो
भवति । यथा काषायः पट इति । तस्येति षष्ठीसमर्थादपत्येऽण्प्रत्ययो भवति
यथौपगव इति । अनयोः सूत्रयोस्तच्छब्दौ न प्रकृतार्थौ तददर्शनात् ।
ब्रह्मण्येवेति । यदनुभानं मन्त्रे तद् ब्रह्मण्येव लिङ्गम् । तस्य भारूप इत्या-
दिश्रुतौ चैतन्यप्रकाशत्वसिद्धेस्तदध्यस्तसूर्यादेस्तदनुभानसम्भवात् । न तेज-
स्येवम्भूते तस्यालौकिकत्वादनिश्चितत्वाच्च वेदे । अपि च तेजःपक्षे उपास्ति-
कल्पनाददृष्टार्थं वाक्यं स्याद् ब्रह्मपक्षे तु प्रस्तुतस्य† ज्योतिषः समर्पणा-
द्दृष्टार्थत्वमित्याह **तस्मादिति** । **विरोधमाहेति** । अनपेक्षा‡द्वारकं भा-
स्यभासकत्वविरोधमाहेत्यर्थः । किं भाने ऽनपेक्षा तेजसः उत भासकत्वे
इति विकल्प्य क्रमेण दूषयित्वा समाधत्ते **न हीति** । भासमानतेजसा न
तेजो भातीति नियमाद्विरोध इत्यर्थः । आदित्यादेर्ब्रह्मानुकाराभावः किं
स्वतो विसदृशत्वादुत तदीयक्रियया समानक्रियाऽनाश्रयत्वात् । आद्यमनूद्य§
२२६ । २० प्रत्याह **यदीति** । धूलिपवनयोरयोदहनयोश्च व्यभिचार इत्यर्थः । द्विती-
यमनूद्य दूषयति **अथेति** । ब्रह्मणः सूर्यादेश्च क्रियासाम्याभावो हेतुना
साध्यः तत्र यदि स्वरूपसाम्याभावो हेतुत्वेनोच्येत तदा यत्र‖ स्वरूपसा-
म्याभावस्तत्र¶ क्रियासाम्याभावोऽसिद्ध इत्यर्थः । नन्वयसि न** दहनक्रिया
कथं वह्नितुल्यक्रियत्वमत आह **वह्नीति** । एकैव दहनक्रिया वह्नौ स्वतः
सैव तत्संश्लेषादयसि समारोपिताऽतः क्रियासाम्यमित्यर्थः । ज्योतिषां ज्यो-
तिरिति भाष्योदाहृतश्रुतिं व्याचष्टे **ज्योतिषामिति** । तेजोन्तरेण तु सूर्या-
दितेजो विभातीत्यप्रसिद्धमिति भाष्ये इन्द्रियत्वमनापन्नेनेति विशेषणीयम्
इन्द्रियेण सूर्यादिभानादित्याह†† **अनिन्द्रियभावमिति** । अथ वा
२२७ । ८ न सूर्यादीनामिति भाष्यं व्याचष्टे **सर्वशब्दस्य हीति** । अलौकिके तेजोधातौ

---

* परामृक्ष्यन्तीति २-५ पु॰ पा॰ ।
† ज्योतिषामित्यधिकमेतदग्रे २-३ ।
‡ अन्यापेक्षेति २ पु॰ पा॰ ।
§ अनूद्येति नास्ति १ पु॰ ।
‖ यत्र यत्रेति २ पु॰ पा॰ ।
¶ तत्र तत्रेति २ पु॰ पा॰ ।
** नेति नास्ति २ पु॰ ।
†† इत्यभिप्रेत्याहेति २ पु॰ पा॰ ।

स्वीकृते सति भास्यवाचिसर्वशब्दस्य वृत्तौ रूपरूपिरूपैकार्थसमवायिषु संकुचेदलौकिकतेजसो रूपादिषु मध्ये रूपमात्रप्रकाशकत्वादित्यर्थः । तेन २२७ । १
रक्तमिति । प्रकृतेः परो यः प्रत्ययस्तस्मिन्योऽर्थविशेषस्तस्मिन्नन्वाख्यायमाने प्रत्ययाधस्तनप्रकृत्यर्थस्यास्ति प्रस्तुतत्वमित्यर्थः । एवमनुकारलिङ्गब्रह्मणि समर्थ्यमानप्रतिषेधं समर्थयते **न तत्रेति** । णिजध्याहारप्रसङ्गं परिहरति **तेनेति** । **तत्रेति** । विषये निर्दिष्टे सूर्यादेर्भानं प्रकाशकतयैव प्राप्नोति ततः प्रकाशकतयेति नाध्याहाराभिप्रायमपि तु व्याख्या । **अगृह्य** इति प्रतिज्ञाय नहि गृह्यतइति हिशब्देनाग्राह्यत्वहेतुसाधकं दृग्रूपत्वं श्रुत्या सूचितम् ।

न तत्रेति । न तस्मिन् ब्रह्मणि भास्ये सूर्यादयो भासकत्वेन न भान्ति । कुतोऽयमस्मद्गोचरोऽग्निर्भाति किं बहुना सर्वं जगत्तमेव परमेश्वरं स्वतो भान्तमनुभाति । किं ब्रह्मभानादन्यज्जडभानं* यथा दीपप्रकाशादन्यद् घटज्ञानं नेत्याह **तस्य भासेति** । यथाऽग्निसंश्लेषादयो दहतीत्युच्यते एवमधिष्ठानब्रह्मभासैव जगद्विभाति नान्यज्जगद्भानमित्यर्थः† ।

शब्दादेव प्रमितः ॥ २४ ॥ २२८ । १

अत्र जीवपरयोः समानधर्मादर्शने ऽपि श्रुत्योर्विप्रतिपत्तिः संशयबीजमित्याह **नाङ्गुष्ठेति** । परिमाणविशेषवन्मात्रवाच्यङ्गुष्ठमात्रशब्दः तद्विशेषे श्रुतिरेव । यद्यत्र परमात्मा प्रतिपाद्यस्तर्हि परिमाणविशेषो न मुख्यः स्याज्जीवपक्षे ईशानश्रुतिर्न मुख्या ऽत एकत्र गौणता सा च क्वेत्यज्ञानात्संशय इत्यर्थः । प्राक् सति विषये च साधारणप्रमौ न तद्भासयतइति विषयत्वनिषेधकस्मृत्या विषये व्यवस्थापिता तद्वत्परिमाणमपि जैवमैश्वरं वेति संशये ऽङ्गुष्ठमात्रं निश्चकर्षेति निर्णीतार्थस्मृत्या जैवमिति प्रत्यवस्थानात्संगतिः । पूर्वपक्षमाह **प्रथमेति** । दहरविचारेणापुनरुक्तिमाह **अपि** " । १८
चेति । शङ्कानिरासः समुच्चयार्थः । परमात्मनो ऽल्पत्वे हृत्पुण्डरीकस्थानत्वं‡ कारणं युक्तं स्थानविशेषस्य दहरं पुण्डरीकं वेश्मेति निर्देशादिति योजना । उपाधिं संकीर्त्याल्पत्वोक्तेरौपाधिकं तत्स्वतस्त्वनन्तः

---

* जगद्भानमिति २ पु॰ पा॰ ।

† अत्र षष्ठम् (सप्तमं वा) अनुकृत्यधिकरणं पूर्णम् । तत्र सूत्रे २—अनुकृतेस्तस्य च २२ अपि च स्मर्यते २३ ॥

‡ पुण्डरीकावस्थानमिति २ पु॰ पा॰ ।

पर इति सिध्यत्वि*त्यर्थः । स्वो यो भवति स स्वर्भविता† तदनिर्णया-
त्स्वभावाऽनिर्णयः । जीवपरयोर्निरंशत्वान्मध्याभावः । पूर्वपक्षे तु मध्ये
उदासीने स्वरूपइति मध्यात्मशब्दौ नेयौ । समुग्रिः सकानिष्ठिकः करो
२२९ । १९ ऽरत्निः । **एतद्वै तदिति** । येयं प्रेतइति जीवस्यापि प्रकृतत्वात्तच्छब्दोपपत्ति-
रपि द्रष्टव्या । यदवाद्यङ्गुष्ठवाक्ये जीवोपक्रमादस्य तत्परत्वमिति । तन्न ।
ततो ऽपि प्राक् परस्य प्रस्तुतत्वात्तत्सापेक्षत्वाच्चास्य वाक्यस्येत्याह **प्रश्नेति** ।
अङ्गुष्ठवाक्यस्यान्यत्र धर्मादिति प्रस्तुतपरमात्मप्रश्नोत्तरत्वात्प्राथम्यमसिद्धमि-
त्यर्थः । ब्रह्मणः‡ कथं तर्हि परिमाणनिर्देशो ऽत आह **जीवस्येति** । उप-
हितपरिमितजीवानुवादेन विरुद्धांशमपहाय तस्येश्वरैक्यपरं वाक्यमित्यर्थः ।

ब्रह्मणः परिमाणोपपादनमफलमुपाधिपरिमितजीवस्य ब्रह्मत्वबोधि-
त्वाद्वाक्यस्येत्याशङ्क्याह **जीवाभिप्रायमिति** । जीवभावापन्नब्रह्माभिप्राय-
मित्यर्थः । जीवनिर्देशवारणमिह वाक्ये न क्रियते तथा सत्यनुवादाभाव-
प्रसङ्गादित्याह **न जीवपरमिति** । मनुष्यग्रहणं शूद्रादौ मातिप्रसञ्जीति
२३० । १६ संकोचयति **त्रैवर्णिकानिति** । अन्तःसंज्ञानां स्थावराणां मोक्षमिच्छतां
चानर्थित्वात्कर्मण्यनधिकारः । काम्यग्रहणेन शुद्ध्यर्थे§ नित्येषु कस्य
चिन्मुमुक्षोरस्त्वधिकार इति सूचयति । तिरश्चां वेदार्थज्ञानादिसामग्र्यभा-
वेनाशक्तत्वम् । देवानां स्वदेवत्ये कर्मणि आत्मोद्देशेन स्वकीयस्य त्यागा-
योगादशक्तिः । ऋषीणाम् आर्षेयवरणे ऋष्यन्तराभावादसामर्थ्यम् ।

षष्ठे हि फलार्थे कर्मणि सुखकामस्य|| तिर्यगादेरप्यधिकारः स्वर्ग-
कामश्रुतेरविशेषाच्चातुर्वर्ण्यमधिकरोति शास्त्रमिति प्राप्ते सिद्धान्तितम् । त्रया-
णामेवाधिकारः । वसन्ते ब्राह्मणो ऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि
वैश्य इति तेषामेवाग्निसंबन्धश्रवणादिति¶ । सिद्धान्तिनाप्यङ्गुष्ठमात्रसंसा-
र्यनुवादाभ्युपगमात्संसार्येवायमङ्गुष्ठमात्र इति भाष्ये इष्टप्रसङ्गतामाशङ्क्याह
यद्येतदिति ।

---

* सिध्यतीति २ पु० पा० ।
† स्वो भवितेत्येव १ पु० दृश्यते ।
‡ ब्रह्मण इति नास्ति २ पु० ।
§ बुद्धिशुद्ध्यर्थमिति २ पु० पा० ।
|| स्वःकामस्येति १ पु० पा० ।
¶ जै० सू० अ० ६ पा० १ सू० ४-५ । २५-३८ ।

अङ्गुष्ठमात्र इति । धैर्येणाप्रमादेन । प्रवृहेदुद्यच्छेत् पृथक् कुर्यात् मुञ्जान्तःस्थेषीकामिव । तं च विवेचितं शुक्रं शुद्धममृतं ब्रह्म विद्यात्* ॥

तदुपर्यपि बादरायणः सम्भवात् ॥ २६ ॥ २३१ । ६

अधिकारिचिन्तेयं यद्यपि न देवादिप्रवृत्त्यर्था तथापि क्रममुक्तिफलोपास्तिषु भोगद्वारा मोक्षकाममनुष्यप्रवृत्त्यर्था । **इन्द्रियार्थेति** कामादेरुपलक्षणम् । ननु स्वयं प्रतिभानावसरे गुरुमुखाद्वेदग्रहणाभावादपुरुषार्थत्वं ज्ञानस्यात आह **न खल्विति । स्मर्यमाणः** फलवद्ब्रह्मावबोध†हेतुरित्यनुषङ्गः‡ । चतुर्थ्यन्तशब्दप्रतीतमात्रं शब्दोपहितं§ तादृगर्थनियमितः शब्दो वा देवता । स्वर्गादिसाधनत्वं यागादीनां लोके ऽदृष्टत्वाद्वेदे ऽप्यदृष्टमिति प्रसज्येत तन्मा भूदित्यर्थः । अदर्शनाद्बाधाद्वेति विकल्पयोराद्यं निरस्य द्वितीयं शङ्कते **मनुष्येति** । देवादयो न शरीरिणः मातापितृरहितत्वाद् घटवत् । विपक्षे दण्डमाह **संभवे चेति** । यूकादावनेकान्तत्वमाह **हन्तेति** । ननु यूकादेः स्वेदाद्यस्ति देहहेतुः न तु देवानां तथा चेच्छामात्रं हेतुर्वाच्यः स चायुक्त इत्याह **इच्छामात्रेति** । भूतानामधिष्ठात्रभावादनारम्भकत्वमाशङ्क्याह **भूतवशिनां हीति** । पर्वतादिव्यवहितानां दूरस्थत्वेन विप्रकृष्टानां २३३ । ११
च भूतानामदर्शनाद्देवादीनामनधिष्ठातृत्वमिति न वाच्यम् । काचाख्यधातुना मेघसमूहेन च च्छन्नस्य दूरस्थस्यापि दर्शनादित्यर्थः । ननु स्वच्छत्वात्काचादीनामस्मदादिदृगव्यवधायकत्वं शैलभूम्यादयस्तु देवादीनां व्यवधायका इत्याशङ्क्य प्रभाववशान्नेत्याह **असक्ताश्चेति** । अप्रतिबद्धा इत्यर्थः । **प्रभवताम्** ईश्वराणाम् । कति देवा याज्ञवल्क्येत्येतावान्प्रश्नः शाकल्यस्य स हैतयैव निविदा प्रतिपेदे यावन्तो वैश्वदेवस्य निविद्युच्यन्ते त्रयश्च त्री च शतेत्याद्युत्तरे एवकारदर्शनात् प्रश्ने ऽपि निविदि कतीति विवक्षितमित्याह **वैश्वदेवेति** । श्रुतिगतवैश्वदेवपदस्य व्याख्या **शस्त्रस्येति** । त्री त्रीणि सहस्राणि निवेद्यते ज्ञाप्यते संख्या ऽनयेति निवित् । **एतावन्त इति** । त्र्यधिकत्रिशतानि त्र्यधिकत्रिसहस्राणि चेत्यर्थः । **महिमानो** विस्ताराः । इन्द्रियेषु २३४ । १४

---

* अत्र सप्तमं (अष्टमं वा) प्रमिताधिकरणं संपूर्णम् । तत्र सूत्रे २-शब्दादेव प्रमितः २४ हृद्यपेक्षया तु मनुष्याधिकारत्वात् २५ । † फलवत्कर्म ब्रह्मावबोधेति २ पु॰ पा॰ ।
‡ विरोध इत्येतदग्रे ऽधिकम् २ पु॰ । § मात्रो ऽर्थः शब्दोपहित इति २ पु॰ पा॰ ।

२३४ । २१ प्राणशब्दस्य प्रवृत्तौ निमित्तमाह **तद्वृत्तित्वादिति** । तस्मात्प्राणाद्वृत्तिर्वर्तनं
येषां ते तथा । श्रुतौ त्रयस्त्रिंशतां पूरणाविन्द्रप्रजापती उक्तौ तौ च स्तन-
यित्नुयज्ञत्वेन व्याख्यातौ पुनः कतमः स्तनयित्नुः कतमो यज्ञ इति पृष्ट्वा
यथाक्रममशनिरिति पशव इति च प्रयुक्तं तदुपपादयति **अशनिरिन्द्र इ-
त्यादिना** । सा ह्यशनिरिन्द्रस्य परमेशना परमैश्वर्यम् । अरूपं यज्ञं द्रव्य-
तया रूपयन्तो यज्ञस्य रूपं पशवस्ते प्रजापतिरित्यर्थः । षडाद्यन्तर्भावक्रमे-
णेति भाष्यं व्याचष्टे **एतएवेति** । **पवते** पुनाति जगत् । अध्यर्द्धशब्द एक-
स्मिन्नपि यौगिकः । स ब्रह्म त्यद् इत्याचक्षतइति वाक्यं व्याचष्टे **स एवेति** ।
प्राप्तिरङ्गुल्यग्रेण चन्द्रादिस्पर्शः । प्राकाम्यमिच्छानभिघातः यथा भूमावुदकइवो-
न्मज्जनादि । ईशित्वं भूतभौतिकानामुत्पत्तिलयादावैश्वर्यम् । वशित्वं तेषां
नियन्तृत्वम् । यत्र कामावसायिता नाम सङ्कल्पादेव सकलविषयलाभः ।
अनेकेषां शरीराणां प्राप्तिरिति प्रथमाख्या । द्वितीयां विविनक्ति **अनेकत्रेति** ।
२३६ । १३ **गोत्वादिवदिति** । प्रत्यभिज्ञा हि पूर्वावमर्शः स हि न वस्वादा-
वदृष्टे सम्भवी अत एवोपाध्यभावः । मन्त्रादिसिद्धे वस्वादावसौ वसुरसावपि
वसुरिति परामर्शसम्भवः । त्रिदिवत्वादिजात्यवच्छिन्नैश्वर्येषु पाकत्वावच्छिन्न-
पाकयोगेष्विवौपाधिकत्वे ऽपि शक्यः सङ्गतिग्रह इत्युत्तरार्थः । आक्षेपसमा-
धाने निगदव्याख्याते इत्यर्थः । **प्रमाणान्तरापेक्षवाक्यत्वादिति*** ।
प्रमाणान्तरापेक्षत्वमेव हेतुः शब्दं प्रति सन्देहात्प्रश्ने स्फोट इति पूर्वपक्षो
वर्णत्वेन सिद्धान्त इति न भ्रमितव्यम् । स्फोटवादिना ऽपि नित्यशब्दाद्दे-
वाद्युत्पत्त्यभ्युपगमेन सूत्रव्याख्यानात् । तस्माद्वर्णात्स्फोटाच्च देवाद्युत्पत्त्याक्षेपः
क्रियते वर्णानामनित्यत्वात्स्फोटस्य चाप्रामाणिकत्वादिति । स्फोटपक्षस्त्वेकदे-
शिन इत्यभिप्रेत्याह **आक्षिपतीति** । नन्वनित्यत्वे ऽपि वर्णानां महाभू-
तवद्देवादिहेतुतेत्याशङ्क्याह **अयमिति** । यथा ऽऽग्नेयादीनां फलकरणत्वा-
न्यथानुपपत्त्यवसेयमपूर्वमेवं वर्णानामर्थधीहेतुत्वान्यथानुपपत्तिसिद्धः संस्का-
रः स चार्थापत्तेः† प्रागज्ञातत्वादपूर्वमुत वर्णोपलम्भजो वर्णे स्मृतिकर
इति विकल्प्य क्रमेण दूषयति **न तावदित्यादिना** । अर्थधीप्रसवावसेय-
२३८ । १० संस्कारः किमज्ञातः शब्दसहकार्युत ज्ञातः । नाद्य इत्याह **न हीति** ।

* प्रमाणान्तरापेक्षत्वादितीति प्रतीकाकारः ५ पु० । † अर्थप्रतिपत्तेरित्ति २ पु० पा० ।

स्वरूपेणाविदितस्यार्थधीहेतुत्वनिषेधो दृष्टान्तार्थः । यथा स्वरूपेण विदित-
स्यार्थबुद्धा हेतुत्वमेवमङ्गतो ऽपीत्यर्थः । अविदितसङ्गतिरिति हेत्वर्थः ।
शब्दः सहाङ्गेन ज्ञातो ऽर्थधीहेतुः सम्बन्धग्रहणमपेक्ष्य बोधकत्वाद् धूमवदि-
त्यर्थः । **इन्द्रियवदिति** वैधर्म्योपमा । अबधिरेण गृहीतस्य चेत्यर्थः ।
अपूर्वसंस्कारो यदा ज्ञातव्यः तदा ऽर्थधियः प्रागेव ज्ञेयः कारणस्य तज्-
ज्ञानस्य कार्यात्प्राग्भावनियमादथ जातायामर्थबुद्धौ तदवगमस्तदेतरेतरा-
श्रयमाह **अर्थप्रत्ययादिति** । आग्नेयादीनां त्वनारब्धफलानामेव वेदेन २३८ । १६
फलकरणभावावगमाच्छक्यमर्थापत्त्या ऽपूर्वावधारणं वर्णानां तु नार्थधीहेतुत्वे
मानमस्तीति भावः । भावनाख्यस्तु यः संस्कारः स आत्मनो वर्णस्य
स्वस्यैव विषयस्य स्मृतिप्रसवसामर्थ्यम् । तथा चास्माद्वर्णविषया स्मृतिरेव
स्याद्यदि पुनस्ततो ऽर्थधीः स्यात्तदा वक्तव्यं किं तदेवार्थधीजननशक्तिरुत
ततो ऽर्थधीशक्तिरुदेति । न द्वावपीत्याह **न च तदेवेति** । उभयत्र क्रमेण
निदर्शनमाह **न हीति** । अपूर्वसंस्कारपक्षे उक्तः परस्पराश्रयः* स्फोटे
ऽप्युक्ततुल्यं स्फोटे ज्ञाते ऽर्थधीस्ततश्च† स्फोटधीरित्यर्थः । सत्ताया
हेतुत्वान्नेतरेतराश्रय इत्याशङ्क्याह **सत्तेति** । **नानेति** । नानावर्णातिरिक्तै-
कपदावगतेर्नानापदातिरिक्तैकवाक्यावगतेश्चेत्यर्थः । **साहित्यमेकत्वम्** ।
नन्वज्ञातेषु वर्णेषु पदवाक्याऽप्रतीतेर्न शब्दान्तरकल्पनावकाशः । नैतत् ।
स्फोटस्य वर्णाव्यङ्ग्यतोपपत्तेः । स्यादेतत् । स किमेकैकवर्णात्स्फुटति किं
वा मिलितेभ्यः । नाद्यः । एक‡वर्णादेव स्फोटव्यक्तौ तत एवार्थधीसिद्धे-
रितरवैयर्थ्यात् । न चरमः । वर्णसाहित्यस्य भवतैव व्यासेधाद् अत
आह **तं चेति** । समुदितव्यञ्जकत्वमनभ्युपेतं प्रत्येकपक्षे ऽपि न २४० । २
परवैयर्थ्यम् । यथा रत्नस्य प्रतीन्द्रियसन्निकर्षमभिव्यक्तावपि द्वाभ्यां
तिसृभिः चतसृभिः पञ्चभिः षड्भिर्वा ऽभिव्यक्तिभिर्जनितसंस्कारकृतपरि-
पाकरूपसहकारिसम्पन्नान्तःकरणेन जनिते चरमप्रत्यये विशदं चकास्ति
रत्नतत्त्वं न प्राच्यु प्रत्ययेषु नापि तैर्विरहिते चरमचेतसि एवं स्फोटः
प्रत्येकं ध्वनिभिर्व्यक्तो ऽपि ध्वन्यन्तरजनिताभिरभिव्यक्तिभिर्ये संस्कारा

* उक्तं परस्पराश्रयमिति २–३ पु॰ पा॰ । † अर्थधीतश्चेति २–३ पु॰ पा॰ ।
‡ एकैकेति २ पु॰ पा॰ ।

जायन्ते तत्तत्परिपाकवन्मनःपरिणामे चरमे चकास्ति तदनन्तरं चार्थधीर्न प्रागित्यर्थः । यदि प्राचीनध्वनिजन्याभिव्यक्तिजसंस्कारसहितचरमप्रत्ययः स्फुटस्फोटदर्शको हन्त तर्ह्यर्थो ऽपि प्रत्येकं ध्वनिभिर्व्यज्यतां पूर्वार्थव्यक्ति-
२४० । ९ संस्कारसहितमन्त्यज्ञ्चेतस्तत्त्वमर्थस्य व्यनक्तु तत्राह **न च पदप्रत्ययवदिति** । अभिहितश्चेदर्थो नाव्यक्तः सन्दिग्धस्तु नाभिहितः स्यात् प्रत्यक्षे तु प्रतिसन्निकर्षं विशदाविशदनिश्चयसम्भव इत्यर्थः । स्फोटे प्रमाणं विकल्पयति **एवं हीति** । वर्णेषु वाचकत्वाऽनुपपत्तौ वाचकशब्दप्रसिद्ध्यन्यथानुपपत्तिः स्फोटे प्रमाणमुत प्रत्यक्षमित्यर्थः । वर्णेषु वाचकत्वानुपपत्तिमपि विकल्पयति **द्विधेति** । व्यस्तानामेकैकवर्णानां समस्तानां वा वाचकत्वमिति यत्प्रकारद्वयं तस्याभावाद्वेत्यर्थः । प्रत्यभिज्ञानस्य प्रमाणान्तरेण बाधानुपपत्तेरिति भाष्यं तत्र बाधकप्रमाणाभावादेव बाधानुपपत्तेरित्यर्थः । तत्र सामान्यतोदृष्टस्यातिप्रसङ्गादप्रामाण्यमभिधाय वर्णभेदग्राहकं प्रत्यक्षं बाधकमाशङ्क्याह **न चेदमिति** । इदं प्रत्यभिज्ञानं गकारत्वादिजातिविषयं न गकारादिव्यक्तिविषयमित्येतच्च न युक्तमित्यन्वयः । तासां व्यक्तीनां प्रतिनरं भेदोपलम्भादिति शङ्काया एव हेतुस्तस्य च समर्थनम् **अत एवेति** । अयुक्तत्वे हेतुमाह **यत इति** । बहुषु गकारमुच्चारयत्सु यो ऽनुभवो जायते स किं व्यक्तिभेदावमर्शपुरःसरं जातिविषय उतोपाधिकभेदवदेकव्यक्तिविषय इति निपुणं निरूप्यतां तन्निरूपणे च ध्वन्युपाधिकृतभेदमन्तरेण स्वाभाविकव्यक्तिभेदो न भासतइत्यर्थः । व्यक्तिभेदपक्षे च
२४१ । १८ कल्पनागौरवमाह **तत्रेति** । येन वर्णेषु व्यक्तिभेदो न स्फुटस्तेनेत्यर्थः । यत्प्रत्यभिज्ञानं जातेः प्रार्थ्यतइत्यर्थः । व्यक्तिलभ्यं भेदज्ञानमित्यर्थः । व्यक्त्या जातिबुद्ध्युपपादने गोत्वाद्युच्छेदमाशङ्क्याह **न चेति** । दशवारमुच्चारितवानित्येकस्यैव गकारस्योच्चारणेष्वावृत्तिप्रतीतेः । उक्तैश्यस्यान्यार्थसिद्धिमाशङ्क्याह **न चैष इति** । **सोरस्ताडं** साविष्कारम् । एवं तावन्त एवेति प्रत्यभिज्ञानादित्यारभ्य यत्प्रत्यभिज्ञानमित्यन्तं भाष्यं व्याख्यातम् । अनन्तरं कथं हीति भाष्यं तद्धिशब्दसंयुक्तमपि न पूर्वहेत्वर्थम् । प्रत्यभिज्ञाया हि भेदप्रत्ययबाधकत्वं प्रस्तुतं तद्धेतुत्वे च भेद एव निषेधो नैकस्यानेकरूपत्वम् । एकत्वस्य स्फोटवादिना ऽनङ्गीकारात् ।

यत्तु केचिद्व्याख्यातारो वर्णेषु भेदाभेदनिषेधो ऽयमिति वदन्ति ।
तत्प्रकृतासङ्गतेरयुक्तम् । तत इदं भाष्यं प्रकृते सङ्गमयति **चोदक इति** ।
उक्तमपि बाधकं गतिनिरूपणाय पुनरुत्थापयतीत्यर्थः । **गलकम्बलः*** सास्ना ।
उपक्रमे उक्तकण्ठादिस्थानघटिता वायवो ऽश्रावणा इति तद्धर्मा वर्णेष्वारोपिता
न श्रावणाः स्युः । अत उदात्तादयो वर्णधर्मा इति मतं ग्रन्थाद् बहिरेव दूष-
यति **इदं तावदिति** । भवन्त्वश्रावणवायुधर्माः श्रावणाः कथं तेषां २४२ । १५
शब्दधर्मत्वप्रतीतिरत आह **ते चेति** । ननु किमित्यारोपेण स्वत उदात्तादयः
शब्दस्य सन्तु । नेत्याह **न चेति** । अनेन आवृत्त्या कथं हीत्येतदेव भाष्यं
परिहारपरतया योज्यते । **व्यञ्जकध्वनीति** । ध्वनयन्ति व्यञ्जयन्तीति वा-
यव एव ध्वनयः । अशब्दात्मकः श्रावणो ध्वनिः पदार्थान्तरं वर्णविशे-
षाप्रतीतौ प्रतीतेरित्युक्तं भाष्ये । सा जातिविषयत्वेना ऽन्यथासिद्धेत्याशङ्क्य परि-
हरति **न चायमिति** । तस्य ध्वनेर्भिन्नत्वान्न प्रत्यभिज्ञानमस्ति । अतो
ध्वन्युल्लेखिप्रत्ययस्य न जातिविषयत्वमित्यर्थः । **अस्तु स्वरेषु** । **एवं च
सतीति** । दूषणाङ्गीकरणवादो दूषणाप्राप्तेरुक्तत्वादित्यर्थः । पदबुद्धौ वर्णोल्ले-
खस्यान्यथासिद्धिं शङ्कते **पदतत्त्वमिति** । एकमभागमभिव्यञ्जयन्तो **नानेव**
भागवदिव भासयन्तीत्यन्वयः । नानेवेत्यवयविभेदभानाभिप्रायम् । भागव-
दित्यवयवप्रतीत्यभिप्रायम् । विभागारोपे हेतुमाह **सादृश्योपधानेति** ।
सादृश्यमेवोपधानमुपाधिः । सादृश्ये भेद†मुपपादयति **अन्योन्येति** । ये
हि गकारौकारविसर्जनीया गङ्गा औष्ण्यं वृक्षः इति च विसदृशपदव्यञ्जकास्तैः
सदृशा अपरे गकारादयो ध्वनयो गौरित्येकं पदं व्यञ्जयन्ति । ध्वनीनां
सादृश्ये हेतुः **तुल्यस्थानेति** । भिन्नपदव्यञ्जकध्वनिसदृशध्वनिव्यक्ते २४४ । ११
एकस्मिन्नपि पदे सन्ति भिन्नपदसादृश्यानीति भेदभ्रम इत्यर्थः । ननु पदा-
न्तरेषु कियतां ध्वनीनां विसदृशत्वात्कथं व्यञ्जकसादृश्यमत उक्तं **प्रत्येक-
मिति** । गकारादीनामुभयत्र प्रत्येकं पदव्यञ्जकत्वाद् गौरित्यत्र गकारादी-
नामस्ति भिन्नपदव्यञ्जकगकारादिसादृश्यमित्यर्थः । एकविधप्रयत्नजन्यध्व-
नीनां न पदे भेदारोपहेतुतेति प्रयत्नभेदेत्युक्तम्‡ । विभागारोपे ऽपि कथं वर्ण-

---

* गलेति नास्ति २ पु० । † सादृश्योपधानभेदमिति २ पु० पा० ।
‡ एकविधेत्यारभ्यैतदन्तो ग्रन्थः नन्वित्यादिग्रन्थात् पूर्वं लिखितः २ पु० ।

२४४ । १६ दूषितपदप्रतिभानमत आह **कल्पिता एवेति** । व्यञ्जकवर्णात्मत्वं
व्यङ्ग्यभागेष्वारोप्यतइत्यर्थः । एतदपाकरोति **तत्किमिति** । औपाधिकत्व-
स्वाभाविकत्वाभ्यामेकत्वनानात्वे व्यवस्थापयति **अथ वेति** । नन्वत्रोपाध्य-
भाव उक्तस्तत्राह **तस्मादिति** । एकप्रत्ययानारोहे ऽप्येकस्मृतिविषयत्वं
वर्णानामुपाधिरित्यर्थः । उपचारे हि सति निमित्तानुसरणं न तु निमित्ता-
नुसारेणोपचार इति न धवखदिरादिष्वतिप्रसङ्गः । एतेन समुदितानां वर्णा-
नामर्थधीहेतुत्वमुपपादितम् । बालेन स्वस्यैकस्मृत्यारूढवर्णानां मध्यमवृद्धं
प्रत्येकार्थधीहेतुतामनुमायैकपदत्वाध्यवसायान्नेतरेतराश्रयमित्याह **न हीति** ।
राजेति क्रमप्रयोगो जारेति* विपरीतक्रमः । बहुभ्यो युगपदक्रमः प्रयोगः ।
यावन्तो यत्सङ्ख्याकाः । **यादृशाः** यत्क्रमादिमन्तः । **ये च** यत्स्वरूपाः ।
भाष्ये पङ्क्तिबुद्धौ पिपीलिकाक्रमवत् स्मृतौ वर्णक्रमसिद्धिरित्युक्तं तदाक्षिप्य
२४५ । १८ समाधत्ते **नन्वित्यादिना** । नित्यानां न कालतो विभूनां वा न देशतः
क्रमः । **पदावधारेति** । राजा जारेत्यत्र क्रम उपायः । गौर्गौमानित्यत्र
न्यूनातिरिक्तत्वे । स्वरो भाषिकादिः पञ्चजनाः इत्यादौ । वाक्यं पदान्तरसम-
भिव्याहारः । यथा ऽश्वो गच्छतीति न लुङन्तमाख्यातम् । क्रियान्तरोपा-
दानात् । श्रुतिरुद्भिदो यागनामपरत्वं† समानाधिकरणश्रुतिगम्यम् । स्मृति-
र्युगपत्सर्ववर्णविषया । वृद्धव्यवहारे चेत्यादिकल्पना स्यादित्यन्तं भाष्यम-
तिरोहितार्थमित्यर्थः ।

शास्त्रयोनित्वाविरोधायाह **स्वतन्त्रस्येति** । **नित्यो वेद इति** । अवान्तरप्रलयस्थत्वं नित्यत्वमतो दृष्टेन व्यभिचारो भारतीविलासोक्तो ऽनवकाशः । अत एव न ह्यनित्यादिति वर्णितानुकूलतर्के ऽप्यनित्यात्प्रलयावस्थायामविद्यमानान्न‡ जगदुत्पत्तुमर्हति । तदानीमसतो नियतप्राक्सत्वरूपकारणत्वायोगादन्यत उत्पत्तौ तस्यापि तदैवोत्पाद्यत्वेनापर्यवसानादित्यर्थः । कर्तुरस्मरणात्सिद्धमेव नित्यत्वमनेनानुमानेन दृढीकृतमित्यर्थः ।

समाननामेति सूत्रं§ महाप्रलये जातेरभावाच्छब्दार्थसंबन्धानित्यत्व-
२४६ । १३ माशङ्क्य परिहारार्थम् । **वेदस्य** वाक्यरूपस्येत्यर्थः । ननु जीवानवस्थाने

* जरेति २ पु॰ । एवमग्रे ऽपि । † नामत्वमिति ३ पु॰ पा॰ नामपदत्वमिति १ पु॰ पा॰ ।
‡ अविद्यमानं नेति ३ पु॰ । § व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ ३० ।

ऽपि ब्रह्म अभिधानादिवासितमस्त्यत आह । **न च ब्रह्मण इति।** निरविद्यस्याविद्यासिद्धप्रमाणानाश्रयत्वान्न तज्जवासनाश्रयत्वमित्यर्थः । अथानपेक्ष्य वासनाः ब्रह्म जगत्सृजेत्तत्राह **ब्रह्मणश्चेति** । अध्यापकाध्येतृ-रुच्चारयितृत्वाद्ब्राह्म्ये ऽभिधातृग्रहणेनोक्तिरित्यर्थः । सूक्ष्मेणेत्यस्य व्याख्या **शक्तिरूपेणेति** । कर्मविक्षेपिकाविद्याभ्रान्तयस्तासां वासनाभिरित्यर्थः ।

भ्रमात्संस्कारतश्चान्या मण्डूकमृदुदाहृतेः ।
भावरूपा मता ऽविद्या स्फुटं वाचस्पतेरिह ॥

अप्रज्ञातं प्रत्यक्षतः । **अलक्षणमननुमेयम्** । **अप्रतर्क्यं** तर्का- २४७ । १७
ऽगोचरो **ऽविज्ञेयमागमतः** । साक्षिसिद्धस्य ह्यज्ञानस्यागमादिभिरसत्त्वनिवृत्तिः क्रियते ।

ननु किं भावरूपया ऽविद्यया प्रयोजनम् । अज्ञातशुक्तिब्रह्मविवर्तत्वेन रजतजगद्भ्रमसिद्धेः । अज्ञातत्वस्य च ज्ञानाभावादुपपत्तेः । तन्न । स्वयम्प्रभप्रत्यग्ब्रह्मणः स्वविषयप्रमाणानुदये ऽपि यथावत्प्रकाशापत्तौ जगद्भ्रमाभावप्रसङ्गात् । न हि स्वयम्प्रभं संवेदनं स्वविषयप्रमाणानुदयान्न भाति । यद्यपि शुक्तिं स्वत एव जडामविद्या नावृणोति तथापि तत्स्यानिर्वाच्यभावरूपरजतोपादानत्वेनैष्टव्येति भावरूपाविद्या सप्रयोजना । प्रमाणं तु डित्थप्रमा डित्थगतत्वे सति यः प्रमाभाव*स्तत्त्वानधिकरणाऽनादिस्वप्रागभावनिवर्तिका प्रमात्वाद् डपित्थप्रमावत् । ये तु प्रमा स्वप्रागभावनिवृत्तिरेव न तु निवर्तिकेति मन्यन्ते तान् प्रति निवर्तिकेत्यस्य स्थाने निवृत्तिरिति पठितव्यम् । न चैतदसमवेतत्वमेतदन्यसमवेतत्वं चोपाधिः । एतत्सुखादीनामेतन्निष्ठप्रमाभावत्वरहितानादिस्वप्रागभावनिवर्तकत्वेन साध्ये विद्यमाने ऽपि उपाध्यभावेन साध्यव्याप्तेरिति त्वदुक्तमर्थं न जानामीति व्यवहारान्यथानुपपत्तिश्च मानम् । न च प्रमाणतो न जानामि किं तु जाने इति व्यपदेशार्थः । तथा सति को मदुक्तो ऽर्थ इत्युक्ते ऽनुवदेन्न च शक्नोति । न च सामान्येन ज्ञाते विशेषतो ऽज्ञातम् । सामान्यस्य ज्ञातत्वात् । विशेषस्य चाबुद्धस्याज्ञानव्यावर्तकत्वेन प्रतिभासायोगात् । प्रमितत्वे चाज्ञातत्वव्या-

---

* प्रागभाव इति ३ पु· पा· ।

घातात् । स्मृतत्वे चानुवादापातात् । मम तु भावरूपाज्ञानस्य सविषयस्य साक्षिण्यध्यासात्प्रतिभासो न मानत इत्यविरोधः । न च मानाभाव एव तस्मिन्नध्यस्तो भासतइति वाच्यम् । स्वप्रमे भावरूपाविद्यातिरोधानमन्तरेणाध्यासायोगस्योक्तत्वात् । पराक्रान्तं चात्र सूरिभिरिति ।

ते चावधिमुचितकालं प्राप्य पूर्वसमाननामरूपाणि भूत्वो*त्पद्यन्त इत्यन्वयः । परमेश्वरेच्छा ईक्षणम् ।

ईक्षितुः परमेशस्य वाचस्पतिमुखोद्गतेः ।
निजुह्नुवे परेशानमसावित्यतिसाहसम् ॥

ईक्षणं च जीवाज्ञातस्येश्वरस्य विवर्त आकाशादिवदिति न प्रमातृत्वेनाविद्यावत्त्वप्रसङ्गः । कूर्माङ्गानां दर्शनादर्शनमात्रं नोत्पत्तिरित्युदाहरणान्त-
२४९ । २० रमाह **यथा वेति** । घना निबिडाः । घनाघना मेघाः । तत्कृतासारेण सन्ततधारावर्षेण सुहितानि बृंहितानि इत्यर्थः । अविद्यायाः पूर्ववासनामयत्वेन जगत्कारणत्वे ब्रह्मणो जगत्कारणत्वविरोधमाशङ्क्योपकरणस्य स्वातन्त्र्याविघातकत्वेन परिहरति **एतदुक्तमिति** । ततश्चानादित्वं संसारस्येत्याह **न च सर्गेति** । उपपद्यते चोक्तन्यायेनानादित्वमित्यर्थः । एवं पदपदार्थसंबन्धे विरोधं परिहृत्य सम्प्रदायविच्छेदाद्वाक्यनित्यत्वविरोधमुक्तमनुवदति **स्यादेतदिति** । भाष्यस्थसुषुप्तिदृष्टान्तस्य वैषम्यमाशङ्क्याह **यद्यपीति** । लीयते ऽस्यां सर्वकार्यमिति लयलक्षणा ऽविद्या । श्लोके उक्तो यो विरोधः । यजमानो भाविन्या वृत्त्या यदा ऽग्निरिदानीमग्नये निर्वपति तदा भविष्यदद्यतनाग्न्योस्तुल्यनामता । ननु किमिति भाविन्या वृत्त्या यजमानो ऽग्निरुच्यते ऽग्निदेवतैवाग्नये निर्वपतु नेत्याह **न हीति** । सत्त्वे वा स एवास्माभिर्द्रष्टुं शक्यते यागकाले इति प्राचीनो वृथा स्यादित्यर्थः ।

देवादीनां स्वमिश्रविद्यास्वनधिकारे ऽपि ब्रह्मविद्याधिकारसम्भवा-
२५० । २० दाक्षेपायोगमाशङ्क्य विकल्पमुखेन सूत्रमवतारयति **ब्रह्मविद्यास्विति** । मधुविद्यावाक्यं प्रतीकत आदत्ते **असाविति** । तद्व्याचष्टे **देवानामित्यादिना** । भ्रमरैर्निर्वृत्तं भ्रामरम् । द्यौः स्वर्गस्तिर्यग्गतवंशे इवादित्यं मधु हि

* भूतानीति १ पु० पा० ।

तच लग्नमित्यर्थः । अन्तरिक्षमपूप इति श्रुतिं व्याचष्टे **आदित्यस्य हीति** । अपूपव्याख्या **पटलमिति** । प्रसिद्धं मध्वपूपसाम्यमाह **तत्रेति** ।
श्रुतिनिर्दिष्टपञ्चामृतान्याह **यानि चेति** । एवं ह्यामनन्ति तस्यादित्यस्य ये २५१ । ११
प्राञ्चो रश्मयस्ता एवास्य प्राच्यो मधुनाड्यः ऋच एव मधुकृतः ऋग्वेद एव पुष्पं ता अमृता आपस्ता वा एता ऋचः एतमृग्वेदमभ्यतपँस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यं रसो ऽजायत तद्व्यक्षरत्तदादित्यमभितो ऽश्रयतद्वा एतद्यदेतदादित्यस्य रोहितं रूपमित्यादि । मधुनाड्यो मध्वाधारच्छिद्राणीत्यर्थः । व्यक्षरद्विशेषेणागमद्गत्वा चादित्यस्य पूर्वभागमाश्रितवदित्यर्थः । ता अमृता आप इत्येतद्व्याचष्टे **यानि चेति** । यादृङ् मधुकरैर्निर्वर्त्यते मधु तदापः । ताश्चामृतसाधनत्वादमृता इति श्रुत्यक्षरार्थः । ऋच एव मधुकृत इत्येतद्व्याचष्टे **यथा हि भ्रमरा इति** । मन्त्रैः* प्रयुक्तं कर्मफलात्मकं रसं स्रवतीत्यृचां मधुपसाम्यम् । अथ ये ऽस्य दक्षिणा इत्यादिश्रुतिं व्याचष्टे **अथास्येत्यादिना** । परः कृष्णमित्यमृतं श्रुतौ निर्दिष्टं तद्रश्म्युपाधिक†मित्यभिप्रेत्याह **अतिकृष्णाभिरिति** । चतुर्थपर्याये ऽथर्वाङ्गिरसो मधुकृत इतिहासपुराणं पुष्पमित्युक्तम् । तत्राथर्वाङ्गिरसमन्त्राणां मधुकरत्वाभिधानात्तैः प्रयोज्यम् अथर्ववेदिकं कर्म पुष्पं सूचितम् । इतिहासपुराणमन्त्रा यत्र प्रयुज्यन्ते तस्य कर्मणः पुष्पत्वेन निर्देशात्तन्मन्त्रा मधुकृत इत्यर्थादुक्तमिति मनसि निधायाह **अथर्वाङ्गिरसेति** । कर्मकुसुमेभ्य आहृत्याग्नौ हुतममृतमथर्वमन्त्रा आदित्यमण्डलं नयन्तीत्यन्वयः ।
इतिहासपुराणमन्त्रप्रयोगयोग्यं कर्माह **तथा ऽश्वमेधेति** । कर्मकुसुमादा- २५२ । ९
हृत्येत्यनुषङ्गाल्लभ्यते । ननु कथमितिहासादिमन्त्राणां वाचस्तोमसंबन्धो ऽत आह **अश्वमेधेति** । **पारिप्लवे** यदृच्छया बुद्धिस्थमन्त्रशंसनम् । सर्वाण्याख्यानानि पारिप्लवे शंसन्तीति श्रवणादैतिहासिकान्यपि गृह्यन्तइति भावः ।

विकल्पेनात्र विज्ञेयं पुष्पभ्रमरचिन्तनम् ।
इतिहासपुराणस्थमथ वा ऽथर्ववेदगम् ॥

---

* ऋङ्मन्त्रैरिति २ पु॰ पा॰ । † तदग्योपाधिकमिति ३ पु॰ पा॰ ।

न च यथाश्रुतं शक्यं घटयितुमितिहासपुराणाथर्वणमन्त्रयोरसाधारणसंबन्धाभावादतः कुसुममधुकरचिन्तनैकप्रयोजनानां कर्ममन्त्राणामगत्या विकल्प इति । अथ ये ऽस्योर्ध्वा रश्मयस्ता एवास्योर्द्ध्वा मधुनाड्यो गुह्या
२५२ । १३ एवादेशा मधुकृतो ब्रह्मैव पुष्पमिति । पञ्चमपर्यायं व्याचष्टे **ऊर्ध्वा इति ।** आदिश्यन्तइत्यादेशा उपासनानि तेषां भ्रमराणां गोप्यानामाश्रयत्वान्नाडीनां गोप्यत्वमुक्तम् । व्याख्यातां मधुविद्यामुपसंहरति **ता एता इति ।** नाडीनिर्देशो ऽमृताद्युपलक्षणार्थः । यशआद्यमृतस्याचाक्षुषत्वाद्दृष्टिर्ज्ञानमात्रविवक्षेत्याह **उपलभ्येति ।** श्रुताविन्द्रियमिति तत्साकल्यविवक्षा* इन्द्रियमात्रसंबन्धस्य सिद्धत्वेन फलत्वाभावादित्याह **इन्द्रियसाकल्येति ।** अन्नं च तदाद्यमत्तुं योग्यं वस्वाद्युपजीव्यान्यमृतानि । विजानतामित्यादिभाष्यार्थमाह **न केवलमिति ।** एकस्मिन्नादित्ये उपास्योपासकभावो विरुद्धः । वस्वादौ तु स च प्राप्यप्रापकभावश्चेत्यर्थः । देवादीनां सर्वेषां सर्वविद्यासु किमधिकार उत यथासंभवमिति विकल्प्य प्रथमं निरस्य द्वितीयं
२५२ । ११ शङ्कते **यद्युच्येतेति ।** भाष्ये वाक्यशेषप्रसिद्धिः । पुरस्तादुदेता पश्चादस्तमेतेत्यादिः । हे इन्द्र ते दक्षिणं हस्तं जगृभ्म गृहीतवन्तो वयम् । इमे रोदसी इन्द्र यदि गृह्णासि तर्हि ते तव काशिर्मुष्टिः मुष्टौ संमातइत्यर्थः । मुष्टिप्रकारमभिनयति इदिति । इत्थमित्यर्थः । तुविग्रीवः पृथुग्रीवः । वपाच्छिद्रं सावकाशोदर इत्यर्थः । अतएवान्धसो ऽन्नस्योपयुक्तस्य मदे हर्षे सति इन्द्रो वृत्राणि शत्रून् जिघ्नते हतवानिति प्रस्थितस्योपकल्पितस्य पक्वस्य हविषो भागमद्धि सोमस्य सुतस्य भागं पिब चेत्यर्थः । ईशानामैश्वर्यं देवताया दर्शयतीत्यनुषङ्गः । इन्द्रो दिवः स्वर्गस्येशे ईष्टे इति सर्वत्रानुषङ्गः । अपां पातालस्य । वृधां वीरुधां स्थावराणाम् । मेधिराणां मेधावतां जङ्गमानामिति यावत् । प्राप्तस्य रक्षणे क्षेमे योगे चाप्राप्तप्रापणे इन्द्र ईष्टे ऽतो हव्य इन्द्रो यष्टव्य इत्यर्थः । हे इन्द्र जगतो जङ्गमस्य तस्थुषः स्थावरस्य चेशानं स्वर्दृशं दिव्यज्ञानं त्वां स्तुम इत्यर्थः । वरिवसितारं पूजयितारम् । आहुतिभिः हुतादो देवान् प्रीणयति । हुतमदन्तीति हुतादः । तस्मै होत्रे प्रीता देवा इषमन्नमूर्ज्जं बलं च प्रयच्छन्तीति ।

* विवक्षयेति २ पु. पा. ।

विग्रहो हविषां भोग ऐश्वर्यं च प्रसन्नता ।
फलप्रदानमित्येतत्पञ्चकं विग्रहादिकम् ॥

ये सिद्धवादिनो मन्त्रा न ते विधिक्षमा इति तत्स्वरूपमेव श्रुत्यादिभिरैन्द्रेत्यादिभिस्तत्र तत्र कर्मणि विनियुज्यते ऽतो न प्रमाणं चेत्तर्हि किमुच्चारणमात्रोपयोगा अविवक्षितार्था नेत्याह दृष्टे प्रकारे इति । नन्वनधिग- २५५ । १६
तमेयाभावे कथं दृष्टार्थत्वम् अत आह दृष्टश्चेति । प्रयोगसमवेतो द्रव्यदेवतादिः स च विधिभिर्ज्ञात इति स्मार्यः । मन्त्राश्च विधय* इव निरपेक्षा देवताद्यभिदधतीति नाप्रमाणम्† । ननु स्मृतेरविहितायाः कथं द्वारत्वमत आह स्मृत्वा चेति । सामर्थ्याद् द्वारतेत्यर्थः । ननु यथा देवतास्मरणे मन्त्राणां तात्पर्यम् एवं देवताविग्रहादावप्यस्तु विग्रहादेरपि मन्त्रपदैरवगमादत आह औत्सर्गिकी चेति । उद्दिश्य त्यागस्य‡ हि देवतास्वरूपमेवापेक्षितं न विग्रहादि तद्बोधकपदानां तु उत्सर्गप्राप्तमप्यर्थपरत्वं विध्यनपेक्षितत्वादपोद्यतइत्यर्थः ।

श्वित्री त्वगामयवान् । निर्णेजनं शोधनम् । श्वेतो वस्त्रं धावति शोधयतीति विवक्षायामितः श्वा धावति गच्छतीति नार्थधीरिति§ । वेदे ऽपि न तात्पर्याद्|| विनार्थधीरित्याह न चेति । यदि तात्पर्याच्छाब्दधीस्तर्हि प्रत्यक्षादिष्वपि तथा स्यादत आह न पुनरिति । भाष्यकृद्भिः निषेधेषु पदाऽन्वयैक्यादवान्तरवाक्यस्याग्रहणमित्युक्तमयुक्तं साध्याऽविशिष्टत्वादित्याशङ्क्यान्वयभेदे दण्डं नञ्पदवैयर्थ्यापत्तिमाह अयमभिसन्धिरिति । अन्वयमुक्त्वा व्यतिरेकमाह न हीति । उपसंहरति वाक्यार्थे त्विति । मा भूत् स्वार्थमात्राभिधाने पर्यवसानं किमतस्तत्राह न च नञ्वतीति । एवं पदैकवाक्यतां सोदाहरणां दर्शयित्वा विध्यर्थवादेषु वाक्यैकवाक्यतामाह यत्र त्विति । ननु विधिद्वयस्यैषा वाक्यैकवाक्यता ऽत आह लोकानुसारत इति । क्रय्या गौर्देवदत्तीया यतो २५७ । १०
बहुक्षीरेत्यादौ बहुक्षीरत्वादेराप्तवाक्यावगतेर्विध्यर्थवादयोरप्यस्ति वाक्यैकवाक्यतेत्यर्थः । ननु कार्यान्वित एव पदार्थस्तत्कुतो ऽर्थवादपदानां पृथग-

---

* न विधय इवेति २ पु॰ पा॰ । † न प्रमाणम् इति २ पु॰ ।
‡ उद्देशत्यागस्येति २ पु॰ पा॰ । § इत्यर्थ इति ३ पु॰ पा॰ । || तात्पर्यमिति ५ पु॰ पा॰ ।

न्वयोऽत आह भूतार्थेति । कुतश्चिद्धेतोरिति यो वाक्यस्य वाक्यान्तरैकवाक्यत्वे हेतुः सूचितस्तं विवृणोति इह हीति । अनेन भिन्नवाक्यार्थपर्यवसायिनां पदानां का नु खल्वपेक्षेति शङ्का वार्यते । स्वाध्यायविधिः स्वाध्यायशब्दवाच्यं वेदराशिं पुरुषार्थप्रकाशकतां यदि नानेष्यद् न प्रापयेत्ततो भूतार्थमात्रपर्यवसिताः सन्तो ऽर्थवादा विध्युद्देशेनैकवाक्यतां नागमिष्यन् न गच्छेयुः । प्रापयति त्वध्ययनविधिर्वेदस्य पुरुषार्थतां तस्मादेकवाक्यतां प्रापुरित्यर्थः । ननु यदि लक्षणायामभिधेयविवक्षा कथं तर्हि विरुद्धार्थार्थवा-

२५७ । २१ देषु सा स्यात्तत्राभिधेयस्य विरुद्धत्वादेव विवक्षानुपपत्तेस्तत्राह अत एवेति । अथ वा ऽर्थवादेषु स्वार्थविवक्षाया इदं गमकमुक्तम् इतरथा हि गोबालम्बनचिन्ता मुधा स्यादिति । यथा प्रमाणान्तराऽविरोधस्तथा ऽसूत्रयद् गुणवादस्त्विति सूत्रेण* यथा च स्तुत्यर्थता येन गुणयोगेन स्तुत्यर्थतेत्यर्थः तथा ऽसूत्रयत्तत्सिद्धि†रित्यनेनेत्यर्थः ।

यजमानः प्रस्तर इति किं विधिरुतार्थवाद इति विशये विधिरपूर्वार्थलाभादिति प्राप्ते सिद्धान्तः । यदि प्रस्तरकार्ये यजमानो विधीयेत तदा प्रस्तरं प्रहरतीति शास्त्राद् यजमानो ऽग्नौ हूयेत ततः प्रयोगो न समाप्येत । अथ यजमानकार्ये प्रस्तरो विधीयेत तदानीमशक्यविधिः । न हि प्रथमलूनदर्भमुष्टिः प्रस्तरः शक्नोति चेतनयजमानकार्यं कर्तुम् । तस्मात्प्रस्तरं बर्हिष उत्तरं सादयतीत्यस्य विधेरर्थवादः । द्वितीयादिमुष्टिर्बर्हिः । कथं तर्हि सामानाधिकरण्यम् । अत्र सूत्रं‡ गुणवादस्त्विति§ । को गुण इत्यपेक्षायां च तत्सिद्धिरिति सूत्रम्‖ । तस्य यजमानस्य कार्यं क्रतुनिर्वृत्तिस्तत्प्रस्तरादपि सिध्यति । स हि जुह्वाधारतया क्रतुं निर्वर्तयति इति । आदित्यो यूप इत्यत्र तेजस्वित्वं गुणः तेजसा घृतेन यूपस्याक्तत्वादिति ।

ननु विरुद्धार्थार्थवादेषु कथमभिधेयाऽविनाभावनिमित्ता प्राशस्त्यलक्षणा

२५८ । ५ विरोधादेवाभिधेयाऽभावादत आह तस्माद्यत्रेति । यजमानादिशब्दैस्तत्सिद्ध्यादि लक्ष्यते ततश्च प्राशस्त्यमित्यर्थः । लक्षितेन यल्लक्ष्यं तदप्य-

---

* जै. सू. अ. १ पा. २ सू. १० ।
† जै. सू. अ. १ पा. ४ सू. २२ ।
‡ सामानाधिकरण्यमित्यपेक्षायां सूत्रमिति २ पु. पा. ।
§ जै. सू. अ. १ पा. २ सू. १० ।
‖ जै. सू. अ. १ पा. ४ सू. २२ ।

भिधेयेनाविनाभूतमेव । तदविनाभूतं प्रत्यविनाभूतत्वात् । नन्वनुवादकार्थ-
वादानामप्रमाणकत्वात्कथं विधिभिर्वाक्यैकवाक्यता ऽत आह **यत्र त्विति** । २५९ । १
न स्मृतिवत्सापेक्षत्वं किं तु प्रत्यक्षादिभिस्तुल्यविषयत्वम् । न चैतावता भव-
त्यप्रमाणता । प्रत्यक्षानुमानयोरपि तुल्यविषयत्वादित्यर्थः । तर्हि कथम-
नुवादकत्वप्रसिद्धिरत आह **प्रमात्रपेक्षयेति** । प्रमातरि चरमप्रत्ययाधायक-
त्वादाश्रयस्यानुवादकत्वसिद्धि*रित्यर्थः । यदि मानान्तरसिद्धार्थत्वे ऽप्यर्थ-
वादानामनपेक्षत्वं तर्हि विरुद्धार्थानामपि तदस्तु गौणार्थत्वेन किम् इति
शङ्कते **नन्वेवमिति** । तत्परतया निरवकाशा वेदान्ता बाधन्ते विरोधि
प्रत्यक्षादि नार्थवादाः अतत्परत्वेन सावकाशत्वादिति विशेषेण प्रतिबन्दीं
परिहरति **अत्रोच्यतइत्यादिना** । इष्टप्रसङ्गतामाह **अङ्गेति** । विध्यन्वितो
ऽर्थवादो महावाक्यीभूय प्राशस्त्यं बोधयति स्वरूपेण त्ववान्तरवाक्यीभूय
विग्रहादि वक्तीत्यर्थः । वाक्यद्वित्वमिष्टमशक्यं प्रत्यर्थं तात्पर्यभेदेन वाक्यावृत्ति-
प्रसङ्गादावृत्तिं च पौरुषेयीं वेदो नानुमन्यतेति† शङ्कते **तथा सतीति** । „ । ११
न वज्रहस्तेन्द्रदेवतात्वात् प्रशस्तमैन्द्रं दधि वज्रहस्तश्च सो ऽस्तीत्यावृत्तिं
ब्रूमः किं तु स्तोतुमेव योऽर्थो ऽर्थवादेनाश्रितस्तं नोपेक्षामहइति परिहरति
नेति । ननु तात्पर्याभावे शब्दात्कथं द्वारभूतविग्रहादिप्रमितिरित्याशङ्क्य
व्याप्तिं प्रशिथिलयति **न चेति** । यद्वाक्यं यदर्थे न तत्परं तच्च तदप्रमाणं
चेत्तर्हि विशिष्टविधेर्विशिष्टपरत्वं न स्यात् । तस्य हि विशेषणेष्वपि नागृही-
तविशेषणान्यायेन प्रामाण्यं वाच्यम् । न च तेषु तात्पर्यम् । प्रतिविशेषण-
मावृत्त्यापातात् । तथा च विशेषणाप्रमितौ विशिष्टे ऽप्रामाण्यापातादिति ।
ननु विशिष्टविधिरपर्यवस्यन् विशेषणविधीनाक्षिपतीत्यार्थिका विशेषणविधयः
कल्प्यन्ते ऽतो न वाक्यभेदः । यथा ऽऽहुः ।

श्रूयमाणस्य वाक्यस्य न्यूनाधिकविकल्पने ।
लक्षणावाक्यभेदादिदोषो नानुमिते ह्यसौ ॥ इति ।

एवं शङ्कित्वा परिहरति **विशिष्टविषयत्वेनेति** । प्रतीतौ हि „ । १७
विशिष्टविधिर्विशेषणविधीनाक्षिपेत् तत्प्रतीतिरेव न विशेषणप्रतीतिमन्त-

* प्रसिद्धिरिति २-३ पु॰ पा॰ । † प्रवृत्तिश्च पौरुषेयी वेदेन नानुमन्यतेति ३ पु॰ पा॰ ।

रेणेति इतरेतराश्रय इति भावः । ननु पदैः पदार्था योग्यतादिवशेन विशेषणविशेष्यभूता लोकतो ऽवगम्यन्ते तदवगतौ च प्रतीतौ विशिष्टविधिरापेक्षा विशेषणविधीनाम् । सत्यम् । न सर्वत्र विशेषणं लोकसिद्धमिति शक्यं वक्तुम् । क्व चिद्धि वाक्यैक*गम्यमपि विशेषणं भवति । यथैतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेति । अत्र हि विशिष्टविधौ रेवतीनामृचां वारवन्तीयसाम्नश्च सम्बन्धो विशेषणं वाक्यैकगम्यम् इति भावेनोपसंहरति **तस्मादिति** । नन्वर्थवादा मानान्तरापेक्षाः सिद्धार्थत्वात्पुंवाक्यवत् । न च देवताविग्रहादौ मानान्तरमस्तीत्यप्रामाण्यम् । यद्धि सापेक्षं तन्मूलमानरहितमप्रमाणमित्यत आह **न च भूतार्थमपीति** । वाक्यस्य सतः सापेक्षत्वे पौरुषेयत्वमुपाधिरिति समन्वयसूत्रे† उक्तमित्यर्थः । यदि विधेः‡ प्राशस्त्यपरा अप्यर्थवादा भिन्नं
२६० । ३ वाक्यं तर्हि न्यायविरोध इत्याह **स्यादेतदिति** ।

द्वितीये स्थितम्—अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्§ । देवस्य त्वा सवितुः प्रसवे इति मन्त्र एकं वाक्यं भिन्नं वेति संशये पदानामर्थभेदात्समुदायस्य वाचकत्वाद्भिन्नमिति प्राप्ते ऽभिधीयते । एकप्रयोजनोपयोगिविशिष्टार्थस्यैक्यात्तद्बोधकपदान्येकं वाक्यम् । तच्च तर्ह्येव स्याद्यदि पदविभागे सति पदवृन्दं साकाङ्क्षं भवेत् । भगो वां विभजत्वर्यमा वां विभजत्वित्यत्र सत्यपि विभजत्यर्थैकत्वे ऽनाकाङ्क्षत्वेन वाक्यभेदात् । स्योनं ते सदनं कृणोमि तस्मिन्सीदेत्यत्र सत्यपि साकाङ्क्षत्वे ऽर्थभेदेन वाक्यभेदात् । एकत्र हि सदनकरणं प्रकाश्यमन्यत्र पुरोडाशप्रतिष्ठापनमिति वाक्यभेदो ऽत उभयं सूचितम् । तात्पर्यैक्ये ऽपि वाक्यभेदाभ्युपगम एतदधिकरणविरुद्ध इत्यर्थः ।

परिहरति **नेति** । यथा हि सत्यपि वाक्यैक्ये प्रयाजादिवाक्यानाम् अवान्तरभेद एवमर्थवादानामप्यस्तु । त्वया ऽपि हि स्तुतिं लक्षयितुं तत्तत्पदार्थविशिष्टैकपदार्थप्रतीतिरभ्युपेया अन्यथा ऽभिधेयाऽविनाभावो न स्याद् इत्युक्तत्वात् । तथा च तस्यां पर्यवस्यन्त्वर्थवादास्ततो विध्येकवाक्यतां च यान्त्विति भावः । एवं तर्हि प्रयाजादिवाक्यानामर्थवादवाक्यानां च को भेदो

---

* वेदवाक्यैकेति २ पु० पा० ।
‡ विधेयेति २-३ पु० पा० ।
† व्याससू० अ० १ पा० १ सू० ४ ।
§ जै० सू० अ० २ पा० १ सू० ४६ ।

ऽत आह **स त्विति** । स्तुतिप्रतिपत्तिद्वारं विग्रहादि प्रयाजादि तु नान्यप्रतीतौ २६० । ६
द्वारम् । किं तु तद्* द्वारि । स्वयं तात्पर्यविषय इति यावत् । यदि विध्येकवाक्यत्वे ऽप्यर्थवादेषु पृथक्पदार्थसंसर्गप्रतीतेर्वाक्यभेदस्तर्ह्यतिप्रसङ्ग इति शङ्कित्वा प्रतीति†पर्यवसानतदभावाभ्यां वैषम्यमाह **नन्वेवं सतीत्यादिना** । यद्यर्थवादेषु द्वारभूतार्थभेदाद् वाक्यभेदस्तदा ऽप्यतिप्रसङ्ग इत्याशङ्क्य परिहरति **न च द्वाभ्यामित्यादिना** । पञ्च षड् वा पदान्यस्येति पञ्चषट्पदवत् । अरुणयेत्यादि वाक्यम् । अत्र नावान्तरवाक्यभेदप्रसङ्गो विशेषणानां भेदे ऽपि विशेष्यक्रयादेरेकत्वात्तस्य च गुणानुरोधेनावृत्त्ययोगात् । गुणा एव तस्मिन् समुच्चेया इत्येकवाक्यतेत्यर्थः । विशेष्यैक्ये विशेषणभेदे ऽपि न वाक्यभेद इत्येतद्व्यतिरेकप्रदर्शनेनोपपादयति **प्रधानभेदे त्विति** । आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामित्यादौ हि प्रधानभेदाद्वाक्यभेदस्तदभावादरुणादावेकवाक्यतोपपत्तेर्न प्रतिबन्द्यावकाश इति । नन्वतत्परादपि वेदादर्थः प्रमीयेत स यदि तात्पर्यगम्यार्थोपयोगी विशिष्टविधाविव विशेषणं देवताविग्रहादि तु न तथेति शङ्कापनुत्त्यर्थमपि चेत्यादि भाष्यम् । तदादाय व्याख्याति **देवतामुद्दिश्येत्यादिना** । ननु देवता आरोपितोल्लिख्यतां तत्राह **रूपान्तरेति** । अस्यैव प्रपञ्चो **ननूद्देश** इत्यादिचोद्यपरिहारौ । दृष्टानुसाराच्च चेतना देवतेत्याह **तदेवमिति** । शब्दमात्रत्वे तु नैवमित्याह **अचेतनस्येति** । देवतातः फलोत्पत्तौ श्रुतहानिमाशङ्क्याह **न चैवमिति** । यजेत स्वर्गकाम इत्यस्य हि यागेन स्वर्गं भावयेदित्यर्थः । तत्र यागभावनायाः फलवत्त्वं श्रुतम् अर्थाच्च यागस्य भावनां प्रति तदीयफलांशं वा प्रति करणत्वं श्रुतं यत् तन्न
हातव्यम् । अत्र हेतुमाह **यागेति** । २६१ । ३

नवमे स्थितम्—देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात्‡ । देवता धर्मान्प्रयोजयेदतिथिवद्भोजनस्य यागस्य तदर्थत्वाद् यथा ऽतिथिप्रीत्यर्था धर्मा इति प्राप्ते अपि वेति§ राद्धान्तः । यज्ञकर्म प्रधानमङ्गयाहि न देवता । यजेत स्वर्गकाम इति यागगतफलसाधनतायाः शब्दपूर्वत्वात् ।

---

* तदिति नास्ति २-३ पु· ।
† प्रतीतीति नास्ति ३ पु· पा· ।
‡ जै· सू· अ· ९ पा· १ सू· ६ ।
§ जै· सू· अ· ९ पा· १ सू· ९ ।

देवता सूद्देश्या भूतत्वाद्द्रव्यस्य यागस्य गुण इति तद्गुणत्वे देवताशब्दो वर्त्ततइति । तदस्मन्मते ऽप्यविरुद्धम् । गुणत्वस्वीकारादित्यर्थः ।

एतइतीति । एते असृग्रमिन्दवस्तिरः पवित्रमाशवः । विश्वान्यभि सौभगा इत्यस्या ऋचः पदैर्देवादीन् स्मृत्वा ससर्ज ब्रह्मा । संनिहितवाच्ये तच्छब्दो देवानां करणेष्वनुग्राहकत्वेन संनिहितानां स्मारकः । असृग् रुधिरम् । तत्प्रधानदेहरमणान्मनुष्याणामसृग्रशब्दः । इन्दुमण्डलस्थपितॄणा-मिन्दुशब्दः । पवित्रं सोमं स्वान्तस्तिरस्कुर्वतां ग्रहाणां तिरःपवित्रशब्दः । ऋचो ऽस्तुवतां स्तोत्राणां गीतिरूपाणां शवशब्दः । स्तोत्रानन्तरं प्रयोगं विशतां शस्त्राणां विश्वशब्दः । व्यापिवस्तुवाच्यभिशब्दयुक्तो ऽभिसौ-भगेति शब्दो ऽन्यासां प्रजानां स्मारक इति । स मनसेति । स प्रजा-पतिर्मनसा सह वाचं मिथुनभावं समभवदभावयत् । त्रयीप्रकाशितां सृष्टिं मनसा ऽऽलोचितवानित्यर्थः । नाम रूपं चेति स्मृतौ निष्पन्नकर्मणामनु-ष्ठापनमुक्तम् । सर्वेषां त्वित्यत्र कर्मणामेव सृष्टिरिति विवेकः । यज्ञेनेति । पुण्येन वाचो वेदस्य पदवीयम् । भावप्रधानो निर्द्देशः । पदवीयतां मार्ग-योग्यतां वेद*ग्रहणयोग्यतामित्येतत् । आयन् आप्नवन्तः । ततः ऋषिषु प्रविष्टां तां वाचमन्वविन्दन् अनुलब्धवन्तः । यदा सुप्त इत्यत्र प्राणः परमात्मा सर्वे प्राणाश्चक्षुरादयः तेभ्यो ऽनन्तरं तदनुग्राहका आदित्यादि-देवाः । ततो लोका विषयाः । इह वाक्ये कल्पितस्याज्ञातसत्त्वाभावा-त्प्रतीत्यप्रतीतिभ्यामुत्पत्तिलयाभिधानम् । व्यावहारिकसत्त्वे श्रुतेरनास्था । यो ब्रह्माणमिति । प्रहिणोति ददाति आत्माकारबुद्धौ प्रकाशतइति तथोक्तः । तत्त्वमस्यादिवाक्यजबुद्धिविषयमित्येतत् । दशतय्यो दशम-ण्डलात्मकः ऋग्वेदः । तत्र भवा दाशतय्यः । यो ह वा इति । आर्षेयमृषिसंबन्धः । ब्राह्मणं विनियोगः । आर्षेयादीन्यविदितानि यस्य मन्त्रस्य स तथा ऽध्यापयति अध्ययनं कारयति । स्थाणुं स्थावरम् । गर्तं नरकम् । शर्वर्यन्ते प्रलयान्ते । पर्यये पर्याये । चक्षुराद्यभिमानिनो देवाः साम्प्रतैस्तुल्याः । तदिति । तत्र ब्रह्मवेदनात्सर्वभाव इति स्थिते

---

* वेदशब्दो नास्ति १ पु॰ ।

यो यो देवानां मध्ये प्रतिबुद्ध्वात्मानमहं ब्रह्मास्मीति स प्रतिबोद्धैव तद् ब्रह्माभवत् । ते होचुरिति । ते देवा असुराश्चोचुः किलान्योन्यं हन्त यद्यनुमतिर्भवतां तर्हि तमात्मानं विचारयामः यमात्मानं विचारणापूर्वं ज्ञात्वा सर्वान् लोकान् कामान् फलानि चाप्नोति इत्युक्त्वा विद्याग्रहणार्थम् इन्द्रविरोचनौ देवासुरराजौ प्रजापतिसकाशमाजग्मतुः । पृथ्व्याप्येति । पादतलमारभ्या जानोः जानोरारभ्यानाभि नाभेरारभ्याग्रीवं ग्रीवाया आकेशप्ररोहदेशं ततश्चाब्रह्मरन्ध्रं क्रमेण पृथिव्यादिभूतधारणया पृथिव्यादिपञ्चात्मके भूतगणे समुत्थिते जिते सति योगगुणे च अणिमादौ प्रवृत्ते योगाभिव्यक्ताग्निमयं तेजोमयं ब्रह्मशरीरं प्राप्तस्य योगिनो न जरादीत्यर्थः । तथा चाचोचन्नाचार्याः प्रपञ्चसारे ।

अवनिजलानलमारुतविहायसां शक्तिभिश्च तद्बिम्बैः ।
साख्प्यमात्मनश्च प्रतिनीत्वा ततदाशु जयति सुधीः ॥ इति ।

बिम्बानि भूतमण्डलानि । तच्छक्तयश्च निवृत्त्याद्यास्तत्रैवोक्ताः * ॥

शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॥ ३४ ॥ २६२ । १

ब्रह्मविद्या शूद्राधिकारा न वेत्यध्ययनस्य प्रधानकर्मत्वसंस्कारकर्मत्वाभ्यां संशये पूर्वमत्रैवर्णिकदेवानां तद्यो य इति लिङ्गादधिकार उक्तस्तद्वद्विद्याधिकारिणः शूद्रशब्देन परामर्शलिङ्गाच्छूद्रस्याप्यधिकार इति सङ्गतिं भाष्यारूढामाह **अवान्तरेति** । पूर्वपक्षमाह **निर्मृष्टेति** । **आगन्तुकं** शास्त्रीयम् । अधिकारलक्षणएवावेद्यत्वादभावः कर्मणि स्या†दित्यनधीयानस्यानधिकार इति स्थितत्वाद्गतार्थतामाशङ्कते **अध्ययनेति** । एतद् न हि आहवनीयादिरहितेन विद्या वेदितुं न शक्यतइति भाष्यं व्याचक्षाणः परिहरति **हन्तेति** । तत्रानग्नेरग्निसाध्ये कर्मण्यनधिकारः स्थितो ऽवेद्य-

---

* अत्र अष्टमं [नवमं वा] देवताधिकरणं संपूर्णम् । तत्र सूत्राणि ८- तदुपर्यपि बादरायणः संभवात् २६ विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् २७ शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् २८ अत एव च नित्यत्वम् २९ समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ३० मध्वादिष्वसंभवादनधिकारं जैमिनिः ३१ ज्योतिषि भावाच्च ३२ भावं तु बादरायणो ऽस्ति हि ३३ ॥

† जै· सू· अ· ६ पा· १ सू· ३७ ।

स्वमभ्युच्चयमात्रमभ्युच्चयत्वं चाध्ययनविधेः पुरुषार्थत्वशङ्कायास्तत्रानिरासात् । इह संस्कारपरामर्शा*दित्यादिसूत्रैरध्ययनविधेः संस्कारकर्मविषयत्वसमर्थनाच्च । अतो ऽनग्नीनामपि शूद्राणामग्न्यसाध्यायां विद्यायामधिकार इति शङ्काया न गतार्थत्वमित्यर्थः । ननु कर्मण्यग्निवद्विद्यायामध्ययनं हेतुरित्याशङ्क्याह **न चेति** । अग्निः कर्महेतुः स च न शूद्रस्य अध्ययनं तु विद्यायामनि-
२६३ । १० यतो हेतुः संभवति च शूद्रस्येत्युपपादयति **यत इत्यादिना** । आहव-नीयादिसाध्ये कर्मणि शूद्रस्य नाधिकार इत्येतद्यतः कारणाद् युक्तं यतश्च विद्यायां शूद्रस्यासंभविसाधनमलौकिकं नास्ति ततस्त्वदुक्तमसांप्रतमिति योजना । अग्नेः कर्मसूपयोगमाह **यदाहवनीये इति** । ननु व्रीहिवदाहवनीयो ऽस्तु शूद्रस्य नेत्याह **तद्रूपस्येति** । संस्कृतो ऽग्निराहवनीयः स चा-लौकिक इत्यप्रकरणाधीताद्वाक्यविहिताधानादेव लभ्य इत्यर्थः । आधान-मपि द्विजातिसंबद्धं यदि क्रतुं कं चिदारभ्य विधीयेत तर्हि क्रत्वन्तरे शूद्रो ऽधिक्रियेत । न त्वेतदस्ति । तस्याग्निद्वारा सर्वक्रतुसाधारण्यादित्येवम-नारभ्याधीतग्रहणम् । आधानमप्यस्तु शूद्रस्य नेत्याह **आधानस्य चेति** । वसन्तादिवाक्येनेत्यर्थः । विद्यायामलौकिकं साधनं नास्तीत्यसिद्धमध्ययन-क्रियाया लौकिकत्वे ऽपि तन्नियमस्य वैधत्वादिति शङ्कां परिहरति **न वि-कल्पासहत्वादिति** । नानोपायसाध्ये ऽक्षराधिगमे ऽध्ययनं नियम्यमानं पुरुषार्थे तस्मिन्नियम्येतोत क्रत्वर्थे इति विकल्प्य द्वितीयं निरस्यति **न तावदिति** । अध्ययननियमस्य क्रत्वर्थाश्रितत्वं प्रकरणाद्वाक्याद्वेति विक-
,, । १२ ल्प्याद्यं निरस्य द्वितीयं प्रत्याह **न चाऽनारभ्येति** । व्याप्तया हि जुह्वा क्रतौ व्यापके बुद्धिस्थीकृते वाक्यं पर्णतां क्रतुना संबन्धयति स्वाध्यायस्तु स्वशाखात्मको ऽवयवी न कर्मविशेषेण व्याप्त इत्यनुपस्थापिते कर्मणि कथं वाक्यमध्ययनस्य कर्मसंबन्धं ब्रूयादित्यर्थः । नन्वज्ञातोपाये कथं पुरुषेच्छातः प्रवृत्तिरत आह **तदुपाये ऽपि हीति** । फलमभिलषंस्तदुपायमप्यनुष्ठेयं मन्यते विशेषं तु न वेदेति । तर्हि करणार्थेतिकर्त्तव्यतायामपि सामा-न्यप्रवृत्तिरिच्छाधीनेत्याशङ्क्याह **इतिकर्त्तव्यतास्विति** । अनधिगतः करणविशेषो विधितो येन पुंसा स इतिकर्त्तव्यतासु न घटते न

---

* व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ ३६ ।

चेष्टते । न हि करणसामान्यमितिकर्त्तव्यतोपकार्यं किं तु विहितः कथं-
भावाकाङ्क्षः करणविशेषस्तत्र च यदङ्गं सामान्यतो यच्च विशेषतस्तत्र सर्वत्र
विध्यधीनैव प्रवृत्तिरित्यर्थः । ननु कथं विध्यधीनप्रवृत्तिकता क्रत्वर्थता
क्रतुविध्योर्भेदादत आह **क्रतुरिति हीति** । क्रतुरिति शब्दो विषयेण
क्रतुना तदभिधायकं विषयिणं* विधिशब्दं परामृशति लक्षणयेत्यर्थः ।
अर्थ्यते ज्ञायते । मा भूवन्नध्ययनादयः पुमर्था मा भूच्च तदाश्रितो ऽदृष्ट-
नियमो ऽर्थावबोधे तु दृष्टे एवाध्ययनं नियम्यतामत आह **यदि चेति** ।
यस्मान्न नियमविधिरतो ऽपूर्वविधिरित्याह **तस्मादिति** । यदोपनयनाङ्ग- २६४ । १८
काध्ययनविधिः काम्यस्तदा शूद्रस्य लौकिकाध्ययनादिना वेदग्रहणमित्याह
तथा चेति । द्वौ हीह पूर्वपक्षौ सर्वत्र शूद्रस्याधिकारः संवर्गविद्याया-
मेव वेति । तत्राद्यं प्रदर्श्य स्वाध्यायविधेर्नियामकत्वमुपेत्यैव द्वितीयमाह **मा
भूदेति** । वाक्यप्रकरणयोरभावे ऽपि कल्पनालाघवेन सामर्थ्यलक्षणलिङ्गेन वा-
नुगृहीतस्तव्यप्रत्ययः कर्मप्राधान्यमवगमयन्नध्ययनस्य संस्कारकर्मतामापाद-
यतीत्याह **तथापीत्यादिना** । **विनियोगः** पदान्वयः । **परम्परयेति** ।
अक्षरावाप्तिपदार्थव्युत्पत्तिविचारपरम्परयेत्यर्थः । अन्यतो ऽनुष्ठानतो ऽपेक्षित-
मर्थबोधमित्यर्थः । अर्थबोधे ऽध्ययनस्य सामर्थ्यं दर्शयति **दृष्टश्चेति** । **सं-
स्कारो** ऽवाप्तिः । सैव दृश्यते **तेन हीति** । **विपरिवृत्त्येति** । श्रुतविनि-
योगाद्व्यावृत्त्येत्यर्थः । **विनियोगभङ्गेनेति** । सुवर्णधारणेनेति कृत्वेत्यर्थः ।
यदप्यादि लिखितपठितवेदादर्थबोध इति तत्राह **यदा चेति** । एवं
शूद्रस्य विद्यायामसामर्थ्यमुक्त्वा शास्त्रपर्युदासमाह **यज्ञ इति** । अतत्परः
शब्दो नाज्ञातार्थबोधीति मते मा भूल्लिङ्गादधिकारसिद्धिः । सिद्धान्ते तु
किं न स्यादत आह **अस्माकं त्विति** । असति बाधके ऽवगमादर्थ-
सत्तासिद्धिरुक्ता विधिना चापेक्ष्यत इति सप्रयोजनता ।

शूद्रशब्दस्यावयववृत्तिप्रदर्शनायाख्यायिकां श्रौतीमनुक्रामति **एवं
किलेत्यादिना** । जनश्रुतस्यापत्यं जानश्रुतिः । पुत्रसञ्ज्ञस्यापत्यं २६७ । १
पौत्रः । तस्यापत्यं पौत्रायणः । श्रद्धया ऽर्थिभ्यो देयं यस्य स तथा ।
पाक्यमन्नं बहु यस्य गृहे स तथा । शृङ्गाटकानि चतुष्पथाः ।

* विषयिणमिति नास्ति ३ पु० ।

शौण्डस्य शूरस्य । तदनुग्रहाय उत्तमविद्याजिज्ञासां कर्तुम् । दोषेत्यव्ययं रात्रावित्यर्थः । भल्लाक्ष भल्लाक्ष* विरुद्धलक्षणया ऽन्येत्युपालम्भः । इत आरभ्य द्युलोके मा प्रसाङ्क्षीः प्रसक्तिं मा कार्षीर्यदि करोषि तर्हि तन्मध्यप्रविष्टं त्वां तन्मा धाक्षीन्मा दहतु तद्युत्यति वराको† जानश्रुतिरित्येकदेशद्वारोच्यते । एष तावद्वराकः एनमल्पं‡ सन्तं किमेतद्वचनमात्थेत्येतच्छब्दान्वयः । युजेर्धातोः कर्तरि अन्येभ्यो ऽपि दृश्यन्तइति क्वनिपि कृते युग्वा । स्वारूढं पुरुषं देशान्तरेण युनक्तीत्यर्थः । उद्वेलमपारं चिन्ताविष्टस्य हि रात्रिर्बहुर्भवति । पिशुनः सूचकः । वन्दारवः स्तावकास्तेषां वृन्दं समूहः । एकपदे झटिति । यन्तारं सारथिम् । विपिनमरण्यम् । नगनिकुञ्जं पर्वतगुहा । पुलिनं सैकतम् । ब्राह्मणायनं ब्राह्मणवेषम् । धनाया धनेच्छा । प्रत्युक्तनिष्कव्याख्या हारमिति । अश्वतरीभ्यां युक्तो रथस्तथोक्तः । आटोपः संभ्रमः । अह हारे त्वेति पाठो व्याख्यातः । आह रेत्वेति पाठे त्वा इत्यस्याच वाक्ये न केनापि संबन्ध इत्यानर्थक्यं शकटोक्तेः प्राच्यां व्याख्यायामस्ति संबन्धीति ।

एवं तावन्न्यायबलेन शूद्रशब्दलिङ्गमन्यथा नीतम् । सम्प्रति शूद्रा-
३६ । १२ धिकारवारकबहुलिङ्गविरोधादपि तथेत्याह **क्षत्रियत्वगतेश्चे**§त्यारभ्य आ अधिकरणसमाप्तेः । ननु कापेययाज्यो ऽभिप्रतारी चित्ररथ एव किं न स्यादत आह **एष चेति** । नामभेदादन्यत्वे सति तद्वंश्यत्वात्तद्याजकेन याज्यत्वमित्यर्थः । यद्यपि क्षत्रियसमभिव्याहारो न क्षत्रियत्वव्याप्तः कापेयएव व्यभिचारात्तथापि द्योतकतया सम्भावकः । सर्वं च वैदिकं लिङ्गमेवमेवेत्याह **सम्भाव्यते इति** । एवं तावद्वाक्योपक्रमे सन्देहमभ्युपेत्यैव वाक्यशेषान्निर्णयः कृत इदानीं तु नैव सन्देहः शूद्रशब्दपरामर्शात्प्रागेव स ह क्षत्तारमुवाचेत्यमात्यप्रैषादिना क्षत्रियत्वनिश्चयादित्याह **इतश्चेति** । बहुदायी बहुपाक्य इति ह्यर्थसम्भवो ऽधिगतः । अन्ये वदान्या दानशीलाः पृष्ठे यस्य स तथा । अर्थसम्भवे च निमित्ते यदैश्वर्यं तस्य जानश्रुतेरवगतं तत् क्षत्रियस्य दृष्टमित्यर्थः ।

---

* भल्लाक्ष भद्राक्षेति २ पु॰ पा॰ । † अवरो वराक इति ३ पु॰ पा॰ ।
‡ ह्रस्वमिति पाठान्तरं ५ पु॰ । § व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ ३५ ।

आद्यसूत्रे एवाध्ययननियमस्य सूचितत्वात् पुनरुक्तिमाशङ्क्याह
न केवलमिति । उपनीतस्य यदध्ययनं तद्विधिपरामर्श आलोचनम् । २७० । २०
उपनयनमध्ययनाङ्गमेकम् अपरं च विद्याप्राप्तये उपसदनापरपर्यायमस्ति ।
हीनवर्णे राजन्याचार्ये औपमन्यवादीनां ब्राह्मणानामुपनयनं तान्हेति निषि-
ध्यते । तत एवोत्तमवर्णाचार्यलाभे तेषामुपनयनं प्राप्तोत्यन्यथा ऽस्यैवाप्रा-
प्तनिषेधतापातादित्याह **येषामिति** ।

ते हैते भारद्वाजादयः षड् ऋषयो ऽपरं ब्रह्म परत्वेनावगतवन्त*
इति ब्रह्मपराः तद्ध्यानानुष्ठाननिष्ठाश्च ब्रह्मनिष्ठाः परं च परमार्थं ब्रह्म
अन्वेषमाणा एष पिप्पलादस्तज्जिज्ञासितं सर्वं वक्ष्यतीति प्रतिपेदिरे ते च
तमेव भगवन्तमुपसन्नाः तानौपमन्यवादीननुपनीयैतद्वैश्वानरविज्ञानमुवाच
अश्वपती राजा । वपुजतुभ्यां वङ्ग†लाक्षाभ्यां तप्ताभ्याम् । द्विजातीनां
दानं साधारणं प्रतिग्रहस्तु ब्राह्मणस्यैवेति विवक्षितम् । न तु शूद्रस्यैव
दानं वार्यते‡ ॥

कम्पनात् ॥ ३९ ॥ २७२ । ६

अस्यानुप्रसक्तेनापशूद्रविचारेण न सङ्गतिरिति व्यवहितेनोच्यते ।
शब्दादेव प्रमितः§ इत्यत्र ब्रह्मवाक्ये जीवानुवादो ब्रह्मैक्यबोधायेत्युक्तम् ।
इह तु प्राणस्य स्वरूपेण कल्पितस्य न ब्रह्मैक्यसम्भवो यतो ऽनूद्येत
ततस्तदुपास्तिविधिरिति प्रत्यवस्थीयते । प्राणमेवाभिसंविशन्तीत्यत्र निरपे-
क्षकारणत्वपरैवकारश्रवणाद् ब्रह्मपरत्वम् इह तदभावादत एव प्राणः|| इत्य-
नेनागतार्थत्वमुपक्रमोपसंहारैक्यरूप्यस्यास्पष्टत्वाच्च प्रातर्दनविचारेणापीति ।

स्यादेतत् । तदेव शुक्रं तद् ब्रह्मेति च भयादस्याग्निस्तपतीति च
प्राचीनपराचीनवचनसंदष्टतया ऽस्य तदेकवाक्यत्वादन्यत्र धर्मादिति ब्रह्म-
प्रकरणाच्च ब्रह्मपरत्वावगतेः कथं पूर्वपक्षोत्थानमत आह **प्राणवज्रेति** । ,, । ७

---

* अधिगतवन्त इति ३ पु· पा· । † रङ्केति ३ पु· पा· ।

‡ अत्र नवमं [दशमं वा] अपशूद्राधिकरणं संपूर्णम् । तत्र सूत्राणि ५—शुगस्य तदना-
दरश्रवणात्तदाद्रवणात्सूच्यते हि ३४ क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ३५
संस्कारपरामर्शात् तदभावाभिलापाच्च ३६ तदभावनिर्धारणे च प्रवृत्तेः ३७ श्रव-
णाध्ययनार्थप्रतिषेधात् स्मृतेश्च ३८ ॥

§ व्या· सू· अ· १ पा· ३ सू· २४ । || व्याससू· अ· १ पा· १ सू २३ ।

वायुपरिग्रहे वज्रशब्दः श्रुतिवृत्तः स्यादिति श्रुतिः*। प्राणश्रुतिबलाद्वायुराध्यात्मिकः शारीरो वज्रश्रुतिबलाद्बाह्यश्च वायुश्च प्रतिपाद्यः। न हि प्राणमात्रस्य वज्रोद्यमनहेतुता। उभयोश्च चिन्तनमेकं संवर्गविद्यावदिति न वाक्यभेद
२७२ । १२ इति भावः। सर्वशब्दश्रुतिविरोधमाशङ्क्याह पूर्ववादी **यद्यपि चेति। मण्डूकप्लुत्येति**†। यथा मण्डूको बहून् विहाय स्वपङ्क्तिगतमण्डूकं प्रति प्लवते एवं शब्दादिति प्रतिज्ञा व्यवहिता ऽपि हेतुना ऽनुषज्यते इत्यर्थः। शब्दो ऽत्र सर्वशब्दः। सवायुकस्य जगतः कम्पयितृत्वमुपपादयति **ब्रह्मणो हीति।** ननु प्राणवज्रश्रुत्योः स्वार्थत्यागभयात्सर्वशब्दसंकोच उक्तः कथं सवायुकजगत्प्रतीतिरत आह **एतदुक्तमिति।** प्रधानस्याङ्गाकाङ्क्षस्य वचनं प्रकरणमिति प्रकरणलक्षणं प्रस्तुते वर्तयति **यत्खल्विति।** पृष्टं जिज्ञास्यत्वात्प्रधानं तस्य नियन्तृत्वादीनि प्रतिपत्तावङ्गानि प्रतिवचनेन निरूप्यन्त इति प्रकरणसिद्धिरित्यर्थः।

यदिदं किं च जगत् तत्सर्वं प्राणे निमित्ते एजति चेष्टते। तच्च तत एव निःसृतम् उत्पन्नम्। तच्च प्राणसञ्ज्ञं जगत्कारणं महत्। बिभेत्यस्माज्जगदिति भयम्। भयहेतुत्वं रूपयति वज्रमिति। उद्यतं वज्रमित्यर्थः। पूर्वपक्षे तु प्राणे निमित्ते महद्भयहेतुर्वज्रमुद्यतं भवतीति व्याख्यातम्। तथा च मुख्यार्थो वज्रशब्दः। यदि तु सिद्धान्ते ऽपि ब्रह्मणि निमित्ते वज्रमुद्यतमिति व्याख्यायेत तदापि वज्रशब्द उपलक्षणार्थः स्याद् वज्रब्रह्मणोरसाधारणसंबन्धाभावादिति। वायुरेव व्यष्टिर्विशेषः। समष्टिः सामान्यम्। शुक्रं ज्योतिष्मत्। अस्येश्वरस्य भयादग्निसूर्यौ तपतः। इन्द्रादयस्तु धावन्ति स्वस्वकार्येषु। निर्विष्टानपेक्ष्य मृत्युः पञ्चमः। भीषा भयेन‡॥

२७३ । १६ **ज्योतिर्दर्शनात् ॥ ४० ॥**

ज्योतिरादित्यो ब्रह्म वेति ज्योतिःश्रुतेः परश्रुतेश्च संशयः। ननु ज्योतिषां ज्योतिरिति ब्रह्मापि ज्योतिःशब्दमतः कथमादित्य इति पूर्वपक्ष-

---

* श्रुतिरिति नास्ति २ पु.। † अयं प्रतीको न दृश्यते १-३ पु.।
‡ अत्र दशमं [एकादशं वा] कम्पनाधिकरणं पूर्णम्। तत्र सूत्रम् १-कम्पनात् ३९ ॥

स्तत्राह **अत्रेति** । प्रकरणात्प्राणशब्दं ब्रह्मेति यथोक्तं तथा ज्योतिरप्यस्तु
तत्राह **पूर्वमिति** । तत्र हि सर्वशब्दश्रुतिसंकोचो ऽस्ति न त्विह । पर-
मिति तु श्रुतिर्विशेषणार्थेति न प्रधानार्थज्योतिःश्रुतेर्बाधिकेत्यर्थः । अत
एव सङ्गतिः । समुत्थानश्रुतेश्च पीडनप्रसङ्गादित्यनुषङ्गः । ननु समुत्थानं
विवेक इति दहराधिकरणे* व्याख्यातमत आह **तथा हीति** । अप्रसिद्धेरि- २७३ । २१
त्यर्थः । परमिति विशेषणमादित्यस्यार्चिष: परत्वादित्यर्थः । आदित्यस्य
समीपे ब्रह्मलोके स्थित्वा तत्रोत्पन्नज्ञानान्मुच्यते इत्यर्थः । एव मादित्ये वाक्या-
ऽऽञ्जस्यमुक्त्वा ब्रह्मपक्षे क्वाश्रुतिपीडामुक्तां प्रपञ्चयति **ब्रह्मज्योतिरिति** ।
शरीरात्समुत्थायेति वाक्ये ज्योतिः प्राप्यावस्थिते ऽस्य स्वरूपनिष्पत्तिरुच्यते
सा ब्रह्मज्योतिर्वादिनो न स्याद् ब्रह्मण एव स्वरूपत्वात् स्वरूपं प्राप्य
स्वरूपं प्राप्नोतीति सङ्गतिप्रसङ्गादित्यर्थः । नन्वभिनिष्पत्तिः साक्षात्कार
इत्यत आह **न चेति** । साक्षात्काररूपाभिनिष्पत्तिर्ज्योतिरुपसम्पत्तेः प्राप्तेः
पूर्वा सती परत्वेन न वक्तव्या । या च मुखं† व्यादाय स्वपितीतिवद्व्युत्य-
ययोजना दहराधिकरणे कृता सा क्लिष्टेत्यर्थः । न चोपसंपत्तिरेव साक्षात्का-
रः । उत्कर्षवाचिपरशब्दयोगादुपसंपत्तेरेव प्राप्तित्वावगमादिति । ज्योतिरिति
समुत्थायेत्युपसंपद्येति तिसृभिः श्रुतिभिर्य आत्मेति प्रकरणबाधः । अनेन
विपक्षे श्रुतिसंकोचान्नाडीखण्डप्रस्तुतादित्यप्रकरणाच्च तेजो ज्योतिरिति पूर्वा-
धिकरणसिद्धान्तेन प्रत्यवस्थानात् संगतिरपि ध्वनिता । प्रक्रममध्योपसंहारै-
करूप्यान्निर्णीते आत्मनि ज्योतिरादिश्रुतयस्तदनुरोधेन नेतव्या इत्याह
यत् खल्विति । अत्र हि य आत्मेत्यात्मा प्रतिज्ञात एतं त्वेव तइति
परामृष्टः स उत्तमः पुरुष इत्युपसंहृतः । प्रकरणमनुरुध्य श्रुतिभङ्गे ऽधिकरण-
विरोधं शङ्कते **तदिति** । २७४ । १५

ज्योतिष्टोमे श्रूयते‡ तिस्र एवेत्यादि । उपसद इष्टिविशेषास्तत्त्रित्वं
ज्योतिष्टोमस्यैव द्वादशत्वं तु साह्नस्योताऽहीनस्येति चिन्ता । साह्न एका-
हत्वाद् ज्योतिष्टोमो ऽहीनो ऽहर्गणसाध्यत्वाद् द्वादशाहादिः । अह्नः खः
क्रतुसमूहइति स्मृतेः । खस्येनादेशात् । अत्रत्यं पूर्वपक्षं प्रस्तुते ऽतिप्र-

---

* व्या· सू· अ· १ पा· ३ सू· १४ । † मुखमिति नास्ति ।
‡ श्रुतमिति २–३ पु· पा· ।

सङ्गप्रदर्शनार्थमाह **प्रकरणेति**। अहीनश्रुतिरहर्गणे रूढा। भगवांस्तु पाणिनिः स्वरार्थे प्रत्ययमनुशशास। सा ज्योतिःश्रुतिरिव ब्रह्मप्रकरणरूद्धा साङ्गमभिदधीत तत्रैव च द्वादशोपसत्तां विदधीत। तत्किं विधताम्। अयुक्तं हि विधातुमुत्कर्षस्य सिद्धान्तितत्वादित्यर्थः। अवयवव्यु-

२७४। २१ त्पत्त्येत्युक्तं तामाह **स हीति**। सर्वप्रकृतित्वेन हीयते कुतश्चिन्न कृत्स्नाङ्गविधानान्न न्यूनो ज्योतिष्टोम इत्यर्थः। अहीनशब्दस्याहर्गणे रूढत्वान्न दुर्बलावयवप्रसिद्ध्या साङ्गवाचिता ऽतश्च द्वादशत्वस्य न साङ्गे निवेश इति द्वादशाहादावुत्कर्ष इति यथाभाष्यं सिद्धान्तः। अथ वार्तिककारपादसंमतं सिद्धान्तमादर्श्य विरोधं परिजिहीर्षुर्यथास्थितसिद्धान्तमध्ये एकदेशमनुजानाति **अवयवेति**। द्वादशोपसत्तायाः प्रकरणे विधानाभावे ऽपि द्वादशाहीनस्येति वाक्यस्य न प्रकरणादुत्कर्ष इत्याह **नापीति**। प्रतिज्ञाद्वयमिदम्। इतः प्रकरणादिदं वाक्यं नापकृष्येतापकृष्टं च सदहर्गणे द्वादशोपसत्तां न विधत्त इति। तत्राद्यां प्रतिज्ञामुपपादयति **परेति**। यदि विधिपरं सदिदं वाक्यमपकृष्येत ततो ऽहीनधर्मं ज्योतिष्टोमप्रकरणे विधत्त इति स्यात्। तच्चान्याय्यम्। कुत इत्यत आह **असंबद्धेति**। मध्ये प्रकृतासंगतविधाने तत्पदैः प्रकरणं विच्छिद्येत। पुनस्तद्द्वारेण सन्धाने सति क्लेशः स्यादिति। यदि नापकर्षो वाक्यस्य किं तर्हि प्रयोजनमत आह **तेनेति**। द्वादशोपसद इति वाक्येन द्वादशाहप्रकरणे विहिता द्वादशोपसत्ता तद्विकृतिषु अतिदेशप्राप्ता ऽनेन वाक्येन ज्योतिष्टोमे ऽनूद्यते चिन्वविधिमोचित्येन स्तोतुम्। अहीनो हि महांस्तस्य द्वादश साङ्गस्तु शिशुस्तस्य तिस्र इत्यर्थः। अनेन द्वितीया ऽपि प्रतिज्ञा समर्थिता प्राप्तत्वान्न विधिरिति।

२७५। ७ **निवीतादिवदिति**। निवीतं मनुष्याणां प्राचीनावीतं पितॄणामुपवीतं देवानामिति दर्शपूर्णमासयोराम्नायते। तत्रोपवीतं विधीयते यत्र। इतरयोस्तु विधिरुतार्थवाद इति संशये सत्यपूर्वार्थलाभाद् मनुष्यशब्दस्य च मनुष्यप्राधान्याभिधायित्वात्तत्प्रधाने आतिथ्ये कर्मणि निव्यातव्यम् पित्र्ये च प्राचीनमाव्यातव्यम् इति पूर्वपक्षे* राद्धान्तः। प्राप्तं हि मनुष्याणां क्रियासु सौकर्याय कण्ठालम्बिवस्त्रधारणं देहार्द्धे बन्धनं वा निवीतम्।

* पूर्वपक्ष इति नास्ति २-३ पु·।

प्राप्तं च प्राचीनावीतं वचनान्तरेण पितृयज्ञे । तदनुवादेन निवीतमित्यादिरर्थवाद उपवीतं स्तोतुमिति ।

ननु यदि द्वादशोपसत्तावाक्यस्य प्रकरणादनुत्कर्षः कथं तर्हि जैमिनिरपकृष्येतेत्युत्कर्षमाहात आह **तस्मादिति** । द्वादशोपसत्तायाः प्रकरणे २७५ ।
ऽङ्गत्वेन निवेशाभावाभिप्रायो ऽपकर्षशब्द इत्यर्थः । ज्योतिष्टोमप्रकरणाम्नातवाक्यस्य नापकर्ष इत्यधस्तादन्वयः । तदेवं द्वादशोपसत्तावाक्यस्य प्रकरणनिवेशसमर्थनेन प्रतिबन्दी निरस्ता । ननु तर्हि पूष्णो ऽहं देवयज्यया प्रजया च पशुभिरभिजनिषीयेत्यादीनामिष्टदेवतानामनुस्मरणाख्यानुमन्त्रणार्थमन्त्राणां दर्शपूर्णमासप्रकरणान्नोत्कर्षः स्यात्तत्राह **पूषादीति** । दार्शपौर्णमासिकाग्न्यादिदेवतानुमन्त्रणमन्त्रनिरन्तरपाठात् पूषादिमन्त्राणां नाग्नेयादिविधिभिरर्थवादत्वेन समभिव्याहारावगतिः । तदिदमुक्त**मगत्येति** । यत्र निनीष्यन्ते तत्रान्यतो न प्राप्तिरित्याह **पौष्णादौ चेति** । अस्तु तर्हि ज्योतिर्वाक्येष्वपि श्रुतिवशादादित्यवादिनो निर्गुणप्रकरणानुपयोगादर्चिरादिमार्गे च सोपयोगत्वादुत्कर्षस्तत्राह **इह त्विति** । तुशब्दो नेत्यर्थे । इह ज्योतिर्वाक्ये नोत्कर्ष इत्यर्थः । हेतुमाह **अपकृष्टस्येति** । फलस्य ब्राह्मलौकिकभोगस्योपायो मार्गस्तत्प्रतिपादको ऽर्चिरादिमार्गोपदेशस्ते ऽर्चिरभिसंभवन्तीत्यादिरतिविशदः । मार्गपर्वत्वेनादित्यस्तत्र स्वशब्दोपात्तः संवत्सरादादित्यमिति । ज्योतिर्वाक्ये तु ज्योतिःशब्दमात्रं श्रुतं न मार्गो ऽतश्चाविशदमिदमेकदेशमादित्यं वदद्वदेत्ततश्चास्य संपूर्णमार्गोपदेशके ऽर्चिराद्युपदेशेनोत्कर्षो निष्प्रयोजनत्वादित्यर्थः । ननु यद्यर्चिरादिमार्गे प्राप्त आदित्यस्तर्हि मेव ज्योतिर्वाक्यं पूषादिमन्त्रवदुत्कर्षि एकदेशाभिधानेन त्वर्चिरादिमार्गे निर्गुणप्रकरणे ऽनुवदद् ब्रह्मध्यानं स्तोतुं* सायासो ऽर्चिरादिपथ इदं तु
निरायासमितीत्यत आह **न च द्वादशेति** । अस्तु तर्हि द्वादशत्ववाक्ये ऽपि ,, । १३
श्रौतार्थसंसर्गपरत्वलोभेन विधित्वमिति चेत्तत्र वक्तव्यम् । किमहीनशब्दे रूढिमभङ्क्त्वा वाक्यं श्रौतार्थमाश्रीयेतोत भङ्क्त्वा । नाद्य इत्याह **द्वादशेति** । अहीनधर्मस्येह विधौ प्रकरणं विच्छिद्येत विच्छेदस्य चायुक्तत्वं द्वादशा-

* स्तुनोत्विति १-२ पु॰ पा॰ ।

ह्रादौ च प्राप्तद्वादशोपसत्तानुवादस्य च निष्प्रयोजनत्वादित्यर्थः । न द्वितीय इत्याह **न चैतदिति** । उपसदो ऽवच्छेत्तुं विंशतेस्तित्वद्वादशत्वयोर्विकल्पापात इत्यर्थः । समुच्चये पञ्चदशोपसत्तापातस्तिस्र एवेत्येवकारविरोधश्चेति । अपि च । तिस्र उपसदो द्वादशेत्येतावता ऽलम् यदुभयोः संख्ययोः प्रकरणे निवेशः वृथा साह्नाहीनशब्दौ प्रकरणादेव संख्ययोर्ज्योतिष्टोमसंबन्धसिद्धे-
२७५ । २१ रित्याह **साह्नेति** । यदा त्वहीनशब्दो ऽहर्गणवाची तदा स तावदवश्यं प्रयोक्तव्यस्ततस्तिस्र इत्येवोच्यमाने त्रित्वमप्यानन्तर्यादहीने स्यात् । तन्निवृत्तये साह्नशब्दो ऽप्यर्थवानिति भावः । ज्योतिर्वाक्ये तु मुख्यार्थेन प्रकरणविच्छेदादित्याह **इह त्विति** । प्रकरणात् श्रुतेर्बलवत्त्वे ऽप्यानर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायात् ज्योतिःश्रुतेश्च मुख्यार्थत्वे आनर्थक्यस्योक्तत्वात् । प्रकरणानुगुण्येन ज्योतिः परं ब्रह्मेत्यर्थः । नन्वादित्यस्येत्यप्यस्ति प्रकरणं स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छतीति प्रस्तावादित्युक्तमनुवदति **यत्त्विति**। परिहरति **नेति** ।दहरविद्याफलं ब्रह्मलोकावाप्तिरादित्यद्वारा उक्ता। इदं तु य आत्मा ऽपहतपाप्मेत्यादिनिर्गुणप्रकरणमित्यर्थः । दहरविद्या च नाडीखण्डात्पूर्वं प्रस्तुतेति न प्रकरणोत्कर्षशङ्का । नन्वात्यन्तिकमोक्षो ऽपि ब्रह्मलोकद्वारा प्राप्यतामिति तत्र वक्तव्यम् । किं मोक्षस्य गतिपूर्वकानाप्यत्वमङ्गीकृत्यैतद्वाक्यं क्रममुक्तिपरमित्यभिमतम् उत नियमेन गतिपूर्वप्राप्यत्वमिति । नाद्य इत्याह **न चेति** । तस्माद्विद्वच्छरीराद् अत्रैव ब्रह्मणि समवनीयन्ते लीयन्ते। न द्वितीय इत्याह **न च तद्द्वारेणेति** । तच्छब्देन ब्रह्मलोकमाह । यत्तूपसंपद्येति क्त्वाश्रुत्यनुपपत्तिरिति तत्राह **तस्मादिति** । आदित्यमुपसंपद्येति व्याचक्षाणानां मध्ये ब्रह्मलोकप्राप्तिव्यवायाङ्गीकारेण क्त्वाश्रुत्यनाञ्जस्यं तु तुल्यमित्यर्थः । तदेवं
२७६ । १५ प्रकरणात् श्रुतिभङ्गमभिधाय श्रुतिवशादप्याह **अपि चेति** । न चोत्तमः पुरुषः प्राप्ता न तु प्राप्यं ज्योतिरिति वाच्यम् । परत्वेन विशेषितस्य ज्योतिष एवोत्तमत्वेन विशेष्टुं योग्यत्वादिति। भाष्ये कारणादिति। द्युसंबन्धप्रत्यभिज्ञातस्य ब्रह्मणो यच्छब्देन परामर्शादित्यर्थः । अथ या एता हृदयस्य नाड्य इति नाडीखण्डे । अथ विशेषविज्ञानोपरमानन्तरं यत्र काले एतदिति

क्रियाविशेषणम् । एतदुत्क्रमणं करोति । अथ तदैतै रश्मिभिरूर्ध्वम् आक्रमते उपरि गच्छतीत्युपक्रम्य आदित्यं गच्छतीति श्रुतम्* ॥

आकाशो ऽर्थान्तरत्वादिव्यपदेशात् ॥ ४१ ॥ २७६ । १८

अत्राकाशब्रह्मश्रुतिभ्यां संशयः । सर्वाणि भूतान्याकाशादेव समुत्पद्यन्ते इत्यत्र हि सर्वजगदुत्पत्तेरेवकारावगतिर्निरपेक्ष†कारणत्वस्य प्रत्युक्तिसामानाधिकरण्यसामर्थ्यस्य च दर्शनाद् ब्रह्मपरत्वं नैवमिहेत्यगतार्थत्वमाह **तथापीति** । हेतूनां प्रसिद्धेर्भूताकाशो न तु ब्रह्मेति वक्ष्यमाणेनान्वयः । अनन्तराधिकरणेनागतार्थत्वसंगती वक्ति **अकस्माच्चेति** । पूर्वत्र हि प्रकरणादानर्थक्यहतश्रुतिर्नीता इह तु न ब्रह्मप्रकरणं नाप्याकाशश्रुतेरानर्थक्यं नामरूपाधिष्ठानब्रह्मप्रतिपत्त्यर्थत्वादाकाशस्येति भावः । तर्हि नामरूपान्यत्वं ब्रह्मणो लिङ्गं ब्रह्मशब्दश्रुतिश्च नेत्याह **नामरूपे इति** । नामरूपे अन्तरा ब्रह्मेति श्रुतिर्नामरूपयोर्निर्वहितुराकाशस्यान्तरालत्वं नाचष्टे किं तु ब्रह्मणः । ततः किमत आह **तेनेति** । निषेधमुखेनैतदेव विशदयति **न त्विति** । निर्वोढा य आकाशः स नैव ब्रह्म । अन्तरालभूतं वा यद् ब्रह्म तदपि नैव निर्वोढ्रित्यर्थः । एवं च ब्रह्मशब्दश्रुतिरपि ब्रह्मण्येव नाकाशइत्युक्तम् । अभिधानाभिधेयनामरूपनिर्वाहकत्वं नियन्तृत्वं तन्न नभसि सत्यप्यवकाशदातृत्वे घटतइत्याह **न चेति** । नामरूपकर्तृत्वेन वाक्यान्तरगतब्रह्मप्रत्यभिज्ञामाह **अनेनेति** । नन्वनेन जीवेनेत्यत्रानुप्रवेशव्याकरणयोः क्त्वाप्रत्ययेनैककर्तृकत्वं प्रतीयते अनुप्रवेशे च जीवः कर्तेति स एव व्याकरणे ऽपि कर्ता स्यात्तथा च न व्याकर्तृत्वादिह ब्रह्मप्रत्यभिज्ञा ऽत आह **ब्रह्मरूपतया चेति** । जीवस्य व्याकर्तृत्वप्रतीतावपि न विरोधस्तस्य ब्रह्माभेदादित्यर्थः‡ ॥

सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४२ ॥ २७८ । १

अत्र विज्ञानमयशब्दादुपसंहारस्थसर्वेशानादिशब्दाच्च विशयः । अङ्गुष्ठमात्र इत्यत्र नोपक्रमोपसंहारौ जीवे ऽत्र तु स्त इत्यगतता । पूर्वत्र

---

* अत्र एकादशं (द्वादशं वा) ज्योतिरधिकरणं संपूर्णम् । तत्र सूत्रम् १–ज्योतिर्दर्शनात् ४० ॥

† अवगताऽनिरपेक्षेत्यादिः पाठः १ पु॰ ।

‡ अत्र द्वादशं (त्रयोदशं वा) अर्थान्तरत्वादिव्यपदेशाधिकरणं पूर्णम् । तत्र सूत्रम् १–आकाशो ऽर्थान्तरत्वादिव्यपदेशात् ४१ ॥

नामरूपाभ्यां भेदव्यपदेशादाकाशं ब्रह्मेत्युक्तं तत्र भेदव्यपदेशोऽनैकान्तो
ऽसत्यपि भेदे प्राज्ञेनात्मना संपरिष्वक्त इति भेदोपचारदर्शनादित्याशङ्क्या-
२७८ । २ त्रापि मुख्यभेदपरत्वसाध्यत्वा*त्सङ्गतिः । पूर्वपक्षमाह **आदीति** । आदा-
वन्ते च विज्ञानमयशब्दाद् मध्ये स्वप्नाद्युक्तेः संसारिपरे ग्रन्थे सति महा-
नज इत्यादि सर्वं संसारिण्येव योज्यतइत्यर्थः । संपिण्डिता विषयसंबन्ध-
कृतविक्षेपाभावाद् घनीभूता प्रज्ञा यस्य स तथा संसार्येवानूद्यतइति ।
अनुवादप्रयोजनं कर्मापेक्षितकर्तृस्तुतिः । नन्वसिद्धे ईश्वरे धर्मिणि भेद-
व्यपदेशोऽसिद्ध इत्याशङ्क्याह **अयमभिसंधिरिति** । द्वितीयं विकल्पं†
निराचष्टे **न चात्रेति** । नन्वात्मशब्दो जीवस्वभाववचन इत्युक्तं तत्कथं
तदतिरिक्तेश्वरव्यपदेशोऽत आह **न च प्राज्ञस्येति** । ननु जीवस्यापि
शास्त्रादि‡विषयप्रज्ञाप्रकर्षोऽस्ति अत आह **असंकुचद्वृत्तिरिति** । ननु
भेदेन जीवपर§व्यपदेशे वाक्यं भिद्येतात आह **लोकसिद्धमनूद्येति** ।
नन्वतिलाघवादनुवाद एव भवतु नेत्याह **न त्विति** । नन्वभ्यासाज्जीव-
परत्वं वाक्यस्य नेत्याह **अत एवेति** । यत एवानुवादमात्रमनर्थकमत एव
प्राणादिविवेकार्थमुपक्रमे जीववर्णनं स्वप्नादेर्व्यभिचारित्वादनात्मधर्मत्वार्थं
मध्ये निर्देशः । अन्ते च शोधितजीवं परामृश्य तस्य ब्रह्मत्वं बोध्यत-
इति विवेकः । उपरितनवाक्यसंदर्भोऽत ऊर्ध्वं विमोक्षायैव ब्रूहीत्यादिः ।
वशिशब्दं व्याख्याति **वश इति** । वशः शक्तिरस्यास्तीति वशी । ततः
फलितमाह **सर्वस्य जगत इति** । अयमीश्वरः सर्वस्य जगतः प्रभवति
२८० । १ प्रभुर्भवति प्रभावं प्रकटयति । **व्यूहेति** । व्यूहेन विभागेन जगतोऽवस्थाने
साध्ये समर्थ इत्यर्थः । शक्तस्य तथैव करणं सर्वेशानपदार्थः । प्रकृतं जग-
त्प्रति नियन्तृत्वं सर्वाधिपतित्वम् ।

विज्ञानमन्तःकरणम् । तन्मयः तत्प्रायः । प्राणेषु हृदीति
व्यतिरेकार्थे सप्तम्यौ प्राणबुद्ध्यतिरिक्त इत्यर्थः । अन्तरिति बुद्धिवृत्ते-
र्विविनक्ति ज्योतिरित्यज्ञानाद्भिनत्ति । पुरुषः पूर्णः । योयमेवंभूतः स
आत्मेति याज्ञवल्कीयं प्रतिवचनं कतम आत्मेति जनकप्रश्नानन्तरम् ।

---

* साधनादिति २ पु. पा. ।
† कल्पमिति ३ पु. पा. ।
‡ शास्त्रार्थादीति २ पु. पा. ।
§ परशब्दो नास्ति १ पु. ।

अन्वारूढः अधिष्ठितः । उत्सर्जद् वेदनातः शब्दं कुर्वन् बुद्धौ ध्यायन्त्यां ध्यायतीव चलन्त्यां चलतीव बुद्धान्तो जाग्रत् । अतः कामादिविवेकानन्तरं विमोक्षाय ब्रूहीति जनकः पृच्छति तेन जाग्रद्रागादिना अनन्वागतो भवत्यसङ्गत्वादिति प्रतिवक्ति याज्ञवल्क्यः । तदा सुषुप्तौ हृदयस्य बुद्धेः संबन्धिनः शोकांस्तीर्णो भवति* ॥

इति श्रीमदनुभवानन्दपूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यभगवदमलानन्दविरचिते वेदान्तकल्पतरौ प्रथमस्याध्यायस्य तृतीयः पादः समाप्तः ॥

	अस्मिन् पादे	आदितः
अधिकरणानि	१४†	३२
सूत्राणि	४३	१०६

---

* अत्र त्रयोदशं (चतुर्दशं वा) सुषुप्त्युत्क्रान्त्यधिकरणं पूर्णम् । तत्र सूत्रे २–सुषुप्त्युत्क्रान्त्योर्भेदेन ४२ पत्यादिशब्देभ्यः ४३ ॥ इति ॥

† कल्पतरुग्रन्थशैल्या १३ अधिकरणानि लभ्यन्ते । व्यासाधिकरणमालानुसाराद्धुपरिनिर्दिष्टानि १४ लिखितानि ।

अथ प्रथमाध्यायस्य चतुर्थः पादः ।

२८० । ११ आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥

अर्वाचीनमहत्तत्त्वापेक्षया पूर्वकालत्वमविप्रकृष्टमव्यक्तस्य परशब्द आह तथा च कारणत्वसिद्धिः । नियतप्राक्सत्त्वं हि तदित्यर्थः । ननु सिद्धे गतिसामान्ये का शङ्का महतः परमित्यादिवाक्यार्थानिर्णये वा कथं गतिसामान्यसिद्धिः । उच्यते ।

असाधि प्रतिवेदान्तं ब्रह्मकारणतागतिः ।
प्रतिवाक्यं न तत्सिद्धिः क्व चिदन्यार्थदर्शनात् ॥

पूर्वत्र हि प्रधानाद्येव सर्ववेदान्तार्थ इति प्रत्यवस्थिते तन्निषेधेन सर्ववेदान्तेषु ब्रह्मावगतिः साधिता इह तु तामुपेत्य प्रधानाद्यपि कारणत्वेन समन्वयविषयः । न चानेककारणवैयर्थ्यम् । कल्पभेदेन व्यवस्थोपपत्तेरिति प्रत्यवस्थीयते । सूत्रकारो ऽप्यपिशब्दमेकशब्दं च प्रयुञ्जानो ब्रह्माङ्गीकारेण पूर्वपक्षः क्वाचित्कश्चायं विचार इति सूचयां बभूव । अव्यक्तपदं प्रधानपरं शरीरपरं वेति स्मार्तक्रमश्रौतपारिशेष्याभ्याम् उभयोः प्रत्यभिज्ञानात्संशयः । सांख्यानां श्रुतिस्मृत्योरनुमानसिद्धानुवादित्वेन तुल्यता । भाष्ये स्मृतिशब्दः सांख्यस्मृत्यभिप्राय इत्याह **सांख्येति** । शब्दादिहीनत्वादिति भाष्ये गुणवैषम्योत्तरकालभाविशब्दादिहीनत्वमुक्तं प्रधानकाले ऽपि सूक्ष्मशब्दादिभावादित्याह **शान्तेति** । शान्तः सात्त्विको घोरो राजसो मूढस्ता-
२८१ । १४ मसः । श्रुतिस्मृतिन्यायेति भाष्यं व्याख्याति **श्रुतिरिति** । भेदानां महदादिविशेषाणां कारणमव्यक्तमस्तीति संबन्धः । कुतः परिमाणात् । महदादि अव्यक्तकारणकमव्यापित्वाद् घटवत् । सत्कार्यवादे प्राक्कार्योत्पत्तेरव्यक्तकार्यत्वात्कारणे ऽव्यक्तशब्दप्रयोगः । तावेव प्रतिज्ञादृष्टान्तौ । समन्वयात्तदनुरागविज्ञानवेदनीयत्वात् । यद्येन समन्वितमिति सामान्येनात्र व्याप्तिः । कारणशक्तितः कार्यस्य प्रवृत्तेः कारणगताव्यक्तकार्यं हि शक्तिरित्यर्थः । इदमस्य कारणमिदमस्य कार्यमिति विभागात् । अव्यक्तकार्यसत्त्वरहितस्य नृशृ-

ङ्गत्वत्कारणत्वाऽयोगादित्यर्थः । प्रलयावस्थायां वैश्वरूप्यस्याऽविभागाल्लीनान-
भिव्यक्तकार्याश्रयो ऽस्त्यव्यक्तमिति ।

अव्यक्तपदेन किं रूढेः प्रधानप्रतीतिर्योगाद्वा स्मार्त्तक्रमानुगृहीतयो-
गाद्वा । नाद्य इत्याह **लौकिकी हीति** । यएव लौकिका इति शाबरं २८२ । २
वचः* । लोकवेदयोः शब्दार्थभेदो लौकिका वैदिका इति व्यपदेशभेदादे-
तद्वै दैव्यं मधु यद् घृतमिति देवमधुनो घृतत्वाभिधानाच्चेति प्रापय्य राद्धा-
न्तितम् । लोकावगतसंबन्धशब्दानां वेदे बोधकत्वोपपत्तेरैक्येन च प्रत्यभि-
ज्ञानाद् घृते मधुत्वस्य स्तुत्यर्थत्वाच्चैक्यं शब्दार्थयोरिति । द्वितीयं प्रत्याह
योगस्त्विति । तृतीयं निराकरोति **प्रकरणेति** । अयं भावः । इह विष्णोः
पदं पुरुषः प्रधानं तत्प्रतिपत्त्यङ्गानि इन्द्रियादीनि इन्द्रियेभ्यः परा इत्या-
दिना निर्दिश्यन्ते । तानि चात्मानं रथिनमिति वाक्ये रथादिरूपितान्येव†
गृह्यन्ते । एवं स्थिते महतः परमव्यक्तमित्यत्र पौरुषेयवाक्यस्थपदार्थतत्क्र-
मापेक्षप्रधानप्रत्यभिज्ञा दुर्बला । प्रकरणाधीतपदार्थाश्रयत्वादभिधेयाकाङ्क्षा-
श्रयत्वाच्च पारिशेष्यनिमित्ता शरीरप्रत्यभिज्ञा प्रबला । तथा हि । रथत्वेन रूपितं
शरीरं पुरुषपरत्वप्रतिपादकवाक्यान्वयमपेक्षते इतरथा निष्प्रयोजनत्वात् । न
च स्वाभिधेयावरुद्धा इन्द्रियादिशब्दास्तदभिदधतीति अस्ति अव्यक्तशब्दा-
पेक्षा शरीरस्य । अव्यक्तशब्दो ऽपि यौगिकत्वादभिधेयविशेषाकाङ्क्षी स्वशब्दोपा-
त्तेन्द्रियाद्यभिधातुमक्षमः शरीराकाङ्क्षीति शरीरमेवाव्यक्तशब्दार्थ इति । विष-
यांस्तेषु गोचरानिति श्रुतिं व्याचष्टे **तेष्विति** । विषयानुद्दिश्य मार्गत्वं वि-
धेयम् । स्वगोचरमालम्ब्य चलन्तीति विपरिणतानुषङ्गः । आत्मेन्द्रियमनोयुक्तं
भोक्तेत्याहुर्मनीषिण इत्येतद्व्याचष्टे **आत्मेति** । युक्तमिति भावे निष्ठा ।
क्रियाविशेषणं चैतत्तदेव दर्शयति **योग इति** । प्रकरणपरिशेषाभ्यामित्युक्तम् । ,, । १२
ननु प्रकरणं कर्त्तव्यस्येतिकर्त्तव्याकाङ्क्षस्य‡ वचनं कथमिह तदित्याशङ्क्याह
प्रधानस्येति । प्रधानस्येत्युक्ते ऽर्थादाकाङ्क्षा ऽङ्गविषयेति सिध्यति । काण्डद्व-
यानुगतं लक्षणमिदमेवेत्यर्थः । किं प्रधानमत आह **गन्तव्यमिति** । इन्द्रि-
यादयश्च तस्य परत्वप्रतिपत्तावङ्गम् । संयताश्चेत्तत्प्राप्तावपि । यस्त्वविज्ञान-

* वचनमिति २–३ पु॰ पा॰ । † निरूपितानीति २ पु॰ पा॰ ।
‡ इतिकर्तव्यविशेषाकाङ्क्षस्येति २–३ पु॰ पा॰ ।

वानित्यादिश्रुतौ भाष्ये चासंयमाभिधानमनुपयोगीत्याशङ्क्याह **असंयमेति ।** संयमाभावे मोक्षाभावेन तद्भाव एव दृढीकृत इत्यर्थः । यदुक्तं पूर्ववादिना
२८२ । १७ महतः परमित्यत्र परशब्दः कारणवचन इति तत्राह **परशब्द इति ।** मनआदावर्थादिकारणत्वासंभावादस्मिन्प्रकरणे परशब्दः श्रेष्ठवचन* इत्यर्थः । इहाध्यात्मप्रकरणे आन्तरत्वाच्छ्रैष्ठ्यं वक्तव्यं तदर्थेषु नास्तीति शङ्कते **नन्विति ।** नामैव शब्दो वागभिव्यङ्ग्यः । स एव श्रोत्रेण ग्राह्य इति द्विरुपात्तः† । कामो मनसो विषयः कर्म हस्तयोः । ननु मनस इन्द्रियत्वेनार्थेभ्यो ऽपरस्य कथं तेभ्य एव परत्वम् अत आह **ग्रहत्वेनेति ।** आत्मानं रथिनमित्यत्र य आत्मशब्दः स एव बुद्धेरात्मेत्यत्र प्रत्यभिज्ञायत इत्यभिप्रायेणात्मशब्दादिति भाष्यम् । अन्यथा ऽऽत्मशब्दमात्रस्य प्रकृतरथिग्रहणहेतुत्वाभावादित्याह **तत्प्रत्यभिज्ञानादिति ।** इन्द्रियद्वारा बुद्धिस्था भोग्यास्ततः पुरस्वाम्यं भोग्याश्रयत्वम् । आयनाद् व्याप्तेः । बुद्धिमात्रादस्मदादिबुद्धेः । ननु रथिनः संसारिणः कथमसंसार्यात्मत्वेन निर्देशो ऽत आह **तथा हीति ।** अञ्जत्यवबच्छति । भाष्योदाहृतायां यच्छेद्वाङ्मनसी इति श्रुतौ वाक्छब्दे द्वितीयालोपश्छान्दस इत्यर्थः । शरीरमेव रूपकेण रथेन विन्यस्तं रूपितम् इति सूत्रपदार्थः । अनुशयो ऽसंतोषः । मत्सरं सोमम् श्रीणीत मिश्रयेत् । **एवं सतीति ।** कार्यकारणाभेदे सतीत्यर्थः । सेश्वराणामीश्वराद् अनीश्वराणां जीवेभ्य इति संबन्धः । प्रमाणैर्न व्यज्यते न निरूप्यतइत्यव्यक्तत्वमित्यर्थः । **तदाश्रयत्वात्** तद्विषयत्वादित्यर्थः । आधारवाची आश्रयशब्दः । अविद्या ऽप्येकेति भ्रमादाशङ्कते **स्यादेतदिति ।** अविद्या ब्रह्मगता निवर्त्तते न वा । प्रथमे सर्वमुक्तिः द्वितीये मुक्तानां पुनर्बन्ध इति अविद्यादाढ्यमुपेत्य सर्वमुक्तेरापादनादपरिहारत्वमाशङ्क्य भाष्य-
२८५ । ७ भावमाह **अयमिति ।** पूर्वभ्रमकल्पेना ऽप्रधानेनात्मनो ऽविवेकसंभवादविवेकप्रतियोगित्वेनापि कृतं प्रधानेनेत्यर्थः । यद्यविद्या नाना कथं तर्हि श्रुतावव्यक्तमित्येकवचनमित्यत आह **अविद्यास्वेति । निमित्ततयेति ।** प्रेरकतया अविद्याविषयत्वेन च तत्प्रेरकत्वं गन्धस्येव घ्राणं प्रति । **उपादानतयेति ।** जगद्भ्रमाधिष्ठानतयेत्यर्थः ।

* श्रेष्ठपर इति २-३ पु· पा· । † द्विरुक्त इति २-३ पु· ।

विद्यास्वभावे इति । निरवद्यमिति श्रुत्यवगतनिर्दोषब्रह्मात्मत्वं विद्यास्वभावत्वम् । एवं च चिद्रूपत्वं जीवे ऽपि समं वाक्यजं प्रमारूपत्वमसिद्धमिति केषां चिदाक्षेपो ऽनवकाशः । स्वरूपमविद्याश्रयो बिम्बं तु ब्रह्म निरवद्यमिति किं न स्यादिति चेद् न । बिम्बस्य स्वरूपातिरेके कल्पितत्वात् । अनतिरेके स्वरूपस्यैव निरवधित्वात् । मुख्यमात्रस्य तूपाधियोगः परिच्छिन्नत्वादविरुद्धः । अपि च दर्पणाद्युपाधेर्विषय एव मुखं नाश्रयः । निर्विशेषब्रह्मस्वरूपस्याविद्यासंबन्धसम्भवः । इत्यनादिन्यौ जीवाविद्ये परस्पराधीनतया अविद्यातत्संबन्धवदुपेये इति । २८६ । ६

ये त्वाहुर्ब्रह्मणो जीवभ्रमगोचरस्याधिष्ठानतयोपादानत्वे सो ऽकामयत स्वयमकुरुतेति च न स्यात्प्रतिजीवं च भ्रमासाधारण्याद् जगत्साधारण्यानुभवविरोधः । भ्रमजस्य चाकाशादेरज्ञातसत्त्वायोगः तस्मादीश्वरस्य प्रतिबिम्बधारिणी साधारणी माया । तद्व्यष्टयश्च जीवोपाधयो ऽविद्या मन्तव्या इति । तान् प्रति ब्रूमः । अकामयताकुरुतेति च कामकृती जीवाविद्याविवर्तैः । न च ब्रह्मविक्रियाविवर्तश्च विवर्ते हेतुः सर्प इव विसर्पणस्य । प्रतिमाणवकवर्त्यविद्याभिर्वर्णेषु स्वरादिवैशिष्ट्येन क्लृप्तस्योपाध्यायवक्त्रोद्गतवेदस्येव प्रपञ्चसाधारण्यप्रसिद्धिः । अधिष्ठानवर्णसाधारण्यात्तत्साधारण्यं प्रस्तुते ऽपि समं सर्वप्रत्यक्त्वाद् ब्रह्मणः । अज्ञातसत्त्वं प्रपञ्चस्य व्यावहारिकसत्त्वात् । न च जीवाविद्याजत्वे तदयोगः । स्वेन्द्रियादिवदुपपत्तेः । यत्तु जीवस्य मनोवच्छिन्नत्वं भूतसूक्ष्मावच्छिन्नत्वं च दूषितं तदस्मदिष्टमेव चेष्टितम् । अस्माभिर्जीवस्यानाद्यविद्यावच्छेदाभ्युपगमादिति । अपि च ।

न मायाप्रतिबिम्बस्य विमुक्तैरुपसृप्यता ।
अवच्छेदान्न तज्ज्ञानात्सर्वविज्ञानसम्भवः ॥
अधिष्ठाने तु जैवीभिरविद्याभिरपावृते ।
जगद्भ्रमप्रसिद्धौ किं साधारण्येह मायया ॥

ग्रहीतृस्थाया अप्यविद्याया ग्राह्ये स्वसमजडावभासहेतुत्वमविरुद्धं पीतस्येव शङ्खे पीतिमप्रतिभासहेतुतेति विशदमशेषम् । यत एव ब्रह्माविद्याविषयो ऽत एव ब्रह्मविषयबोधराहित्यं जीवानामाहेत्यर्थः ।

२८६ । ८ उपाधिभूताविद्यैवाप्रबोधेऽपि हेतुरित्याह **सत्यामिति** । जीवाव्यक्तयोरनादित्वेन नियतं पौर्वापर्यं नास्तीति न पौर्वापर्यं न च तन्नियम इति यद्यपि तथापि जीवत्वनियामकेऽव्यक्ते पूर्वत्वमुपचरितमित्यर्थः । यथा बलीवर्द्दमानयेत्युक्ते* गामानयेति प्रयोगे गोपदमितरगोविषयमेवमव्यक्तपदमित्यर्थः । **प्रकृतेति** । अप्रसङ्गेनेति च्छेदः । अव्यक्तपदस्य स्थूले देहे मुख्यत्वाभावादौपचारिकत्वं स्यान्न च तद्युक्तम् । सकृच्छ्रुतस्य सूक्ष्मस्थूलदेहविषयतया मुख्यगौणत्वे वैरूप्यापातादत आह **न च मुख्ययेति** । अतत्परमिति च्छेदः । अन्नोपघातनिराकरणाकाङ्क्षायां वक्तुस्तत्प्रयुक्तकाकपदं काकगतोपघातकत्वं लक्षयद्यथा काकतदितरसाधारणमेवं पुरुषपरत्वप्रतिपत्त्यर्थं तुल्यवदाकाङ्क्षितप्रस्तुतशरीरद्वयं छत्रिन्यायेन लक्षयत्यव्यक्तपदं न सूक्ष्ममेवाभिधत्तइत्यर्थः । पूर्वं मायाभिधानद्वारा शरीरलक्षणोक्ता इदानीं तु सूक्ष्मशरीराभिधानद्वारेण एवमपि हि प्रधानं निरस्तं भवतीति । त्वङ्मांसरुधिराणि मातृतः । अस्थिस्नायुमज्जानः पितृतः । एतैः षट्कोशैरारब्धं षाट्कौशिकम् । व्यवहितं जीवविषयं प्रतिवचनमिति भाष्यस्थव्यवहितपदार्थमाह
२८८ । १२ **इत्यनेनेति** । हन्तेत्यादि सनातनमित्यन्तं परमात्मप्रतिवचनप्रतिज्ञावाक्यं तेन व्यवहितं यथेत्यादि जीवप्रश्नस्य प्रतिवचनमित्यर्थः । प्रश्नाभेदे दूषणमाह **एकत्वे इति** । अन्यात्मविद्ययोर्द्वित्वात्सूत्रस्थत्रिशब्दविरोध इत्यर्थः । परमात्मप्रश्नस्य जीवप्रश्नाद्भेदे पितुः सौमनस्याग्निज्ञानात्मज्ञानविषयं यद्वरत्रयप्रदानं तत्रानन्तर्भावोऽन्यत्र धर्मादित्यादेः स्याच्चतुर्थत्वादित्यर्थः । अथ प्रश्नान्यथानुपपत्त्या वरान्तरं कल्प्येत तत्राह **तुरीयेति** । सन्तु त्रयो वराः परमात्मप्रश्नस्तेष्वनन्तर्भूतोऽस्तु यथा सृङ्कां† च गृहाणेत्यवृतामपि रत्नमालां प्रीत्या ददौ नेत्याह **वरप्रदानानन्तर्भावे इति** । महतः परमव्यक्तमिति प्रधानाख्यानमस्त्विति योजना । सृङ्कां चेति चशब्द एवाऽवृतैव माला दत्तेति गमयति नैवं महतः परमित्यत्र । अतो वरप्रदानानुसारेणैवार्थप्रतिपादनम् । एक एव सन् देहादिव्यतिरेकधर्माद्यत्ययप्रवृत्त्यभेदाद् द्विः
२८९ । ६ कृतः प्रश्न इत्यर्थः । **अत एवेति** । जीवपरयोरभेदादित्यर्थः । शतायुषः पुत्रपौत्रान् वृणीष्वेत्यादिस्तत्तत्कामः । त्वादृङ् नो भूयान्नचिकेतः प्रष्टेति

* उक्तवेति २-३ पु० पा० । † १ कठवल्लीश्रुतिगतोऽयं सृङ्काशब्दो मालावाची ।

विशेषणपरत्वात्तदीयप्रश्नप्रशंसा । जीवे पृष्टे तं दुर्दर्शमिति तद्व्यतिरिक्तपरमात्मप्रतिवचनमाम्रप्रश्ने कोविदारप्रतिवचनवदसङ्गतम् । अत एव जीवप्रश्नतत्कर्तृप्रशंसा ऽपि जीवस्य परमात्माभेदप्रमित्यर्थत्वेन दृष्टार्था स्यादित्याह **यदि पुनरिति** । एवं प्रतिवक्तृप्रवृत्त्या जीवपराभेदं साधयित्वा शब्दप्रवृत्त्या ऽपि साधयति **अपि चेत्यादिना** । तदुत्तरे तस्य प्रश्नस्योत्तरे तमेव विषयं यद्यवदध्याज्जानीयादित्यर्थः । यत्प्रश्नेति भाष्ये यच्छब्दो विषयपरो न प्रश्नपरः । विषयगौरवाद्धि प्रश्न*प्रशंसेत्याह **यस्मिन्निति** ।

अधिकरणादावव्यक्तशब्दस्य पौरुषेयी रूढिर्वेदानुपयोगिनीत्युक्तम् इदानीं महच्छब्दस्येव वेदविरोधाद्बाध्या चाव्यक्तशब्दस्य प्रकरणादिना वेदे शरीरपरत्वावधारणादित्युच्यतइत्याह **अनेनेति** । साङ्ख्यैः सत्तामात्रे महच्छब्दः प्रयुक्त इति भाष्यमयुक्तं तैर्बुद्धेर्महत्त्वेन स्वीकारादित्याशङ्क्याह **पुरु- २९० ।
षार्थेति** । अर्थक्रियाकारिणि सच्छब्दः प्रयुक्तः पुरुषापेक्षितप्रयोजनकारि महत्तत्त्वं सत्तत्प्रत्ययो ऽपि स्वरूपपरो न सामान्यवाचीत्यर्थः । कार्यानुमेयं महन्न प्रत्यक्षमिति मात्रशब्दः ।

गूढ आत्मा अग्र्या इवाग्र्या सूक्ष्मवस्तुविषयत्वात् सूक्ष्मा । अशब्दमिति शब्दादिगुणरहितम् । अभूतभौतिकमित्येतत् । अव्ययमवक्षयरहितम् । प्राक् प्रध्वंसाभाववर्जितम् । अनाद्यनन्तम् अत एव नित्यम् । महतः क्षेत्रज्ञात्परम् । ध्रुवमपरिणामि । निचाय्य ज्ञात्वा । मृत्युरज्ञानं तन्मुखं संसारः । स्वर्गाय हितं स्वर्ग्यम् । अध्येषि जानासि । लोककारणविराड्दृष्ट्योपास्यत्वाल्लोकादिश्चित्यो ऽग्निः । याः स्वरूपतः यावती सङ्ख्यातः यथा वा ऽग्निश्चीयते तत्सर्वं तस्मै नचिकेतसे उवाच । हन्त इदानीं गुह्यं गोप्यं सनातनं चिरन्तनं ब्रह्म हे गौतम ते प्रवक्ष्यामीति ब्रह्मप्रतिवचनं प्रतिज्ञाय जीवं चाह आत्मा मरणं प्राप्य यथा भवति तथा च प्रवक्ष्यामीति । योनिमन्ये देहिनः प्राप्नुवन्ति मानुषादिशरीरग्रहणाय अन्ये स्थावरं स्थाणुं संयन्ति कर्मज्ञानानुसारेण । स्वप्नजाग्रतोरन्तौ मध्ये उभे येनात्मना ऽनुपश्यति लोकः इह देहे यच्चैतन्यं तदेवामुत्र परत्र । असंसारि ब्रह्म । यच्चामुत्र तदेवेह देहे अनुप्रविष्टं वर्त्तते य इह ब्रह्मा-

* प्रश्नशब्दो नास्ति २-३ पु० ।   † ब्रह्मशब्दो नास्ति २ पु० ।

त्मनि नानेव मिथ्या भेदं पश्यति स मरणान्मरणं प्राप्नोति । पुनः पुनर्म्रियते । त्वां बहवः कामा न लोलुपन्त लुप छेदने श्रेयसो विच्छेदं न कृतवन्तः ततो विद्यार्थिनं त्वां मन्ये वेद जाने ऽहं पुरुषम्* ॥

२९० । ८ **चमसवदविशेषात् ॥ ८ ॥**

अजामन्त्रः प्रधानपर उत तेजोबन्नरूपावान्तरप्रकृतिमायारूपपरमप्रकृत्योरन्यतरपर इति संशयः । अजाशब्दस्य तु छागातो ऽपकृष्टस्य प्रधानमाययोस्तेजोबन्ने च गुणाद् वृत्तिसम्भवात् पूर्वेचार्थतः प्रधानप्रत्यभिज्ञाया अभावान्नाव्यक्तपदवाच्यतेत्युक्तमिह तु त्रिगुणत्वादिना प्रधानप्रत्यभिज्ञानात् तत्परो मन्त्र इति पूर्वपक्षमाह **प्रधानमेवेति । एका चेति ।** अनेन मायायाः प्रतिजीवं भेदादेकामित्येकत्वानुपपत्तिरुक्ता । न च गौणत्वं दोषः समत्वादित्याह **परेणापीति ।** उपचारेण कारणे रोहितत्वाद्यस्तिकल्पने त्वस्तीति विभागः† । दारशब्दो नित्यबहुवचनान्तः । तामेवाविद्ययेति भाष्ये तच्छब्दार्थो विषयज्ञानाधारः प्रधानकार्यमन्तःकरणमित्याह **विषया हीति ।** चितिशक्तिरात्मा स्वयं सुखादिरूपेणापरिणामिनी । परिणामिन्यां बुद्धौ वस्तुतो ऽप्रविष्टत्वादप्रतिसङ्क्रमा । अविद्ययेत्येतद्व्याचष्टे **विपर्यासेनेति ।** सांख्यानामप्यस्ति भ्रमः स तु बुद्धावेवेति विशेषः । आत्मत्वेनोपगम्येत्येतद्विवृणोति **बुद्धिस्थानइति ।** विपर्याससिद्धबुद्ध्यैक्येन बुद्धिधर्मानात्मन्यभिमन्यमानेत्यर्थः । कृतत्वोपपत्तये ऽपवर्गशब्दस्तदुपायपर इत्याह **गुणेति ।** न चानुवादसामर्थ्यात्प्रमाणं कल्प्यं विरोधादित्याह **स चेति ।**

व्यवधानाच्छाखान्तरेणानिर्णयमाशङ्क्याह **सर्वेति ।** गुणवचनरोहितादिशब्दैर्लक्षणयापि निरूढया मुख्यवत्प्रत्यायकैः प्रतीतिमभिप्रेत्य सति मुख्यार्थसम्भवइत्युक्तम् । नन्वजावदचेति गुणकृन्यङ्गीकाराद्रूढिस्त्यक्ता

२९३ । ८ नेत्याह **अत्र त्विति ।** रूढेरपहृते योगे रूढार्थगुणयोगात्सिद्धा वृत्तिरा-

* अत्र प्रथमन् आनुमानिकाधिकरणं (साङ्ख्याधिकरणं १ वा) संपूर्णम् । तत्र सूत्राणि ७-आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च १ सूक्ष्मं तु तदर्हत्वात् २ तदधीनत्वादर्थवत् ३ ज्ञेयत्वावचनाच्च ४ वदतीति चेन्न प्राज्ञो हि प्रकरणात् ५ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ६ महद्वच्च ७ ॥

† भाव वृत्ति २ पु० पा० ।

श्रिता इति रूढिः स्वीकृता । इतरथा गुणयोगस्यैवासिद्धेरिति । न केवलं शाखान्तरान्निर्णयः प्रकरणादपीत्यव्याकृतपक्षं प्रस्तौति **अपि चेति ।** यस्य जगदुत्पत्तौ साध्यायां किं सहकारिकारणमिति पृच्छ्यते । तत्किंकारणमिति बहुव्रीहिः । ध्यानमेव योगो जीवस्य ब्रह्मणैक्य* योजकत्वात् । आत्मप्राप्तिस्त्वनात्मविरहेण स्थितिः । **नानेत्युक्तमिति ।** आनुमानिकाधिकरण इति नानाविद्यास्वप्येकामित्येकत्वं जात्यभिप्रायं प्रकरणादविद्यानिश्चयात् ।

देवात्मशक्तिमिति । देवात्मविषयां मायिनं मायाविषयं महेश्वरम् इत्यर्थः । भाष्ये च पारमेश्वर्याः शक्तेरिति परमेश्वरविषयाया इत्यर्थः । एवं च

जीवस्थाया अविद्याया विषयं ब्रह्म शुक्तिवत् ।
ऊचे वाचस्पतिर्भाष्यश्रुत्योर्हृदयवेदिता† ॥

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥ २९४ । ८

पञ्च पञ्चजना इति सांख्यीयतत्त्वपरमुतार्थान्तरपरमिति योगरूढिविनिगमाद्विशयः । पूर्वंचाध्यात्मप्रकरणे रूढच्छागाया असंबन्धाद् अजा तेज आदिकेत्युक्तमिहापि रूढेर्मनुष्यग्रहे वाक्यस्य निस्तात्पर्यप्रसङ्गादवयववृत्त्या सांख्यस्मृत‡तत्त्वपरतेत्यवान्तरसङ्गतिमधिकरणसङ्गति§माहेत्यर्थः । ननूपसर्जनस्य संख्यायाः संख्यान्तरेण विशेषणायोगात् कथं पञ्चविंशतिलाभोऽत आह **पञ्चजना इति ।** हीति विशेष्यजनैः संख्यान्तरान्वय इत्यर्थः । न च पञ्चसंख्यावच्छेदाद् जनानां नैराकाङ्क्ष्यम् । संख्यान्तरश्रवणे सति रक्तपटन्यायेनाकाङ्क्षोत्थापनादिति । वाक्यस्य निस्तात्पर्यं तात्पर्याभावे हेतुरुक्तः **सर्वस्यैवेति ।** जायन्तइति व्युत्पत्त्या जनशब्दव्याख्या । ननु रूढित्यागेन मनुष्यसम्बन्धिनः प्राणादयो लक्ष्यन्ते तथा च न निस्तात्पर्यमत आह **तत्रापीति ।** रूढ्यर्थग्रहे ऽपीत्यर्थः । वाक्यविरोधं व्यनक्ति एकत्र " । १९

---

* ब्रह्मैक्येति २-३ पु· पा· ।

† अत्र द्वितीयं चमसाधिकरणं (सांख्याधिकरणं २ वा) पूर्णम् । तत्र सूत्राणि ३-चमसवदविशेषात् ८ ज्योतिरुपक्रमात्तु तथा ह्यधीयतएके ९ कल्पनोपदेशाच्च मध्वादिवदविरोधः १० ॥

‡ स्मृतेति नास्ति २-३ पु· ।

§ अधिकरणसङ्गतिमिति न दृश्यते १ पु· ।

ह्रीति । आत्माकाशव्यतिरिक्तानां त्रयोविंशतितत्त्वानामपि प्रधानस्य द्विधाकरणात्पञ्चविंशतित्वं श्रुतौ । स्मृतौ तु तत्त्वेष्वात्माकाशावन्तर्भाव्य
२९५ । ६ प्रधानं चाभित्त्वा पञ्चविंशतितत्त्वगणनेत्यविरोधमाह **न चाधारत्वेनेत्यादिना ।** **द्विरुग्भावेन** पृथग्भावेन । भाष्ये उदाहृतां मायां व्याख्याति **मूलेति ।** महानित्यध्यवसायात्मिका बुद्धिरुच्यते । अहङ्कारो ऽभिमानलक्षणः । तन्मात्राणि सूक्ष्मभूतानि पञ्च भूतानि स्थूलानि । अहङ्कारतत्त्वम् उद्भूततमस्कम् । प्रकृतिस्तन्मात्राणाम् । उत्कटसत्त्वं त्विन्द्रियाणाम् । रजस्त्वहङ्कारगं* गुणद्वयप्रवृत्तिहेतुर्नारम्भकमित्यर्थः । ननु षोडशको विकार एवेति कथं पृथिव्यादीनां घटादिप्रकृतित्वादत आह **यद्यपीति । न ते पृथिव्यादिभ्यस्तत्त्वान्तरमिति ।** उभयेषां स्थूलतेन्द्रियग्राह्यता च समेति न तत्त्वान्तरतेत्यर्थः । आकाशात्मानौ विहाय या पञ्चविंशतिरुदिता तस्यां नावान्तरत्वेन पञ्चसंख्यानिवेश इत्याह **न खल्विति ।** उद्रिक्ताकाशानां पृथिव्यादीनां ज्ञानेन्द्रियेभ्यो घ्राणमादाय पूरणमयुक्तम् । तेषां तस्य च साधारणोपाध्यभावादित्याह **नापीति ।** तथा घ्राणातिरिक्तानां ज्ञानेन्द्रियाणां कर्मेन्द्रियेभ्यो वाचमाहृत्य न पञ्चसंख्या निवेश्येत्याह **नापि रसनेति ।** तथोद्रेचितवाचां कर्मेन्द्रियाणां न मनसा पञ्चत्व†लाभ इत्याह **नापि पाणीति । समासार्थसंख्यान्तरेण विशिष्यतइति ।** साक्षात्पूर्ववादिनि निरस्ते समासं पञ्चजनशब्दे ऽनभ्युपगच्छन्तमुत्थापयतीत्याह **पूर्वपक्षैकदेशिनमिति ।** अस्यायमभिप्रायः । यद्यप्यत्र नानाभावान्न सन्ति पञ्च पञ्च संख्यास्तथापि पञ्च पञ्च पूल्य इत्यादौ पञ्चविंशतिसंख्यायाः पञ्चभिः पञ्चसंख्याभिरविनाभावादिह ता निर्दिश्यमानाः स्वाव्याप्तां महासंख्यां लक्षयन्तीति । ननु तत्रापि कथं महासंख्याया अवान्तरसंख्यसंख्याभिः संबन्धो ऽपेक्षाबुद्धिनाशे तन्नाशादित्याशङ्क्य साहचर्याभावे ऽपि हेतुहेतुमद्भावो ऽस्ति
२९६ । ८ संबन्धो लक्षणाबीजमित्याह **यद्यपीत्यादिना ।** अपिशब्देन विद्यतएवार्थात्मना महासंख्यास्ववान्तरसंख्या परं त्वपरिच्छेदिकेति सूचितम् । एवमसमासमभ्युपेत्य लक्षणैव दोष इत्यभिधायाभ्युपगमं त्यजति **न च पञ्चशब्द इति ।**

---

* गतमिति २-३ पु० पा० ।   † तत्त्वेति १ पु० पा० ।

भाष्ये भाषिकेण स्वरेणेति । तस्यार्थः । अत्र मन्त्रे प्रथमः पञ्च-शब्द आद्युदात्तः । द्वितीयः सर्वानुदात्तः । जनशब्दश्चान्तोदात्तः । तथा न द्वितीयपञ्चशब्दजनशब्दयोः समासादृते आकारस्यान्त्यस्योदात्तत्वमितरेषां चानुदात्तत्वं घटते । समासस्येति सूत्रेण समासस्यान्तोदात्तत्वविधानात् । अनुदात्तं पदमेकवर्जमिति सूत्रेण यस्मिन् पदे उदात्तः स्वरितो वा विधीयते तमेकं विहाय शिष्टस्यानुदात्तत्वस्मरणाच्च । एवं मन्त्रान्तोदात्तस्वरबलात् समासो निरणायि । भाषिकसंज्ञके तु शतपथब्राह्मणस्वरविधायकग्रन्थे स्वरितो ऽनुदात्तो वेति सूत्रेण यो मन्त्रदशायामनुदात्तः स्वरितो वा स ब्राह्मणे उदात्तो भवतीत्यपवाद आश्रितः । तत आकारादितरेषामनुदात्तानां ब्राह्मणे उदात्तत्वम् । उदात्तमनुदात्तमनन्त्यमिति सूत्रेण च मन्त्रदशायामुदात्तस्यानन्त्यस्य परलग्नतयो*च्चार्यस्यानुदात्तत्वं विहितम् । ततश्च नकारोपरितन आकार आकाशश्चेत्यनेन संलग्नत्वेनोच्चार्यमाणो ऽनुदात्तो भवति। सति चैवमन्तानुदात्तस्वरो भाषिकग्रन्थसिद्धो भाषिक इति भाष्ये उक्तम् ।

ये तु

छन्दोगा बह्वृचाश्चैव तथा वाजसनेयिनः ।
उच्चनीचस्वरं प्राहुः स वै भाषिक उच्यते ॥

इति वचनमुदाहृत्यान्तोदात्तो भाषिक इति व्याचक्षते तेषामध्ययनविरोधः । अन्तानुदात्तं हि समाम्नातारः पञ्चजनपदमधीयते इति । हे आज्य त्वा पञ्चजनानां कृते गृह्णामीति मन्त्रैकदेशस्यार्थः । असमासमभ्युपेत्यैव द्विः पञ्चशब्दप्रयोगे दशानामेव लाभान्न सांख्यस्मृतिप्रत्यभिज्ञानमित्याहेति योजना ।

असमासपक्षे एव वीप्सां विहाय विशेषणपक्षमाशङ्क्याह न चैकेति । २९७ । ५
शुक्लादिशब्दवत् पञ्चशब्दस्य संख्यामुपसर्जनं कृत्वा प्राधान्येन द्रव्यपरत्वाद्गुणीभूत†संख्याया न संख्यान्तरेण विशेषणम् । तथा सति विशेष्येण द्रव्येण विशेषणेन च संख्यया युगपदाकृष्यमाणा संख्या नैकेनाप्यन्वियादित्यर्थः । तदेवमिति । नानाभावेन दूषितमपि । परमपूर्वपक्षिणं

* परं संलग्नेति २ पु॰ पा॰ ।   † गुणभूतेति १ पु॰ पा॰ ।

संख्यान्तरानाकाङ्क्षानोपसर्ज्जनन्यायाभ्यां दूषयितुं पुनरुत्थापयतीत्यर्थः ।
रूढौ **सत्यामिति ।** तद्द्वारा प्राणादिषु लक्षणायां च सत्यामित्यर्थः ।
२९७ । १३ अनाकाङ्क्षां दर्शयति **पञ्चपूलीत्यत्रेति ।** पृथक्त्वेन सहैकस्मिन्नर्थे या सम-
वैति सा तथोक्ता ईबन्तद्विगुसमासेन समाहाराभिधानात् पदान्तरोपात्तसं-
ख्यया समाहारो ऽवच्छेद्य उत्पत्तिशिष्टया तु समानपदस्थया समाहारिणः
पूला अवच्छेद्या इति पञ्चपूलीत्यत्रास्त्याकाङ्क्षा पञ्चजना इत्यत्र त्वीबन्तत्वा-
श्रवणात्समाहाराऽप्रतीतेर्जनानां च स्वपदगतसंख्यया ऽवच्छिन्नत्वान्न संख्या-
न्तराकाङ्क्षेत्यर्थः । विजातीयविशेषणान्तरप्रयोगे च रक्तपटन्यायो न सजा-
तीये प्रयोगे न हि भवति रक्तपटो रक्त इति । इहापि पक्षे नोपसर्जनन्या-
यमवतारयिष्यन्नाशङ्कते **स्यादेतदिति । न हि सापीति ।** आत्माश्रय-
प्रसङ्गान्न संख्या तया ऽवच्छिद्यते । अतः संख्यान्तराकाङ्क्षेत्यर्थः । तत्र
चोक्तो दोष इति परिहारभाष्यार्थमाह **उक्त इति ।** पञ्चशब्दस्य संख्योपसर्ज-
नद्रव्यवाचकत्वादुपसर्जनसंख्याया न शब्दान्तरोक्तसंख्यासंबन्ध इत्यसमास-
वत् समासे ऽपि दोषः । समासे तु पञ्चशब्दोपात्तसंख्याया जनशब्दार्थं प्रति
विशेषणत्वाच्च न विशेषणान्वयः । ननूपसर्जनस्यापि विशेषणान्वयः किं न
स्यादत आह **विशेषणापेक्षायां त्विति ।** नैरपेक्ष्यं हि सामर्थ्यं साकाङ्क्षत्वे
सति स्वविशेषणेनाकृष्यमाणस्य न विशेष्यान्तरान्वय इत्यसमासः स्यादित्यर्थः ।
सापेक्षस्यासमासे उदाहरणमाह **न हि भवतीति ।** ऋद्धविशेषणापेक्षस्य राज्ञो
न पुरुषेण समासो ऽपि तु पदवृत्तिरेवंप्रकारा ऋद्धस्य राज्ञ इतीति । उदाहृ-
तभाष्यस्यायमर्थ इत्याह **इत्यर्थ इति ।** प्रधानं त्रिधा भित्त्वा अतिरेकस-
माधानादभ्युच्चयमात्रत्वमिति चेत् का तर्हि गमनिका ऽत आह **यद्वीति ।**
प्रधानं भित्त्वा संख्योपपादने ऽपि तव नोपास्तिपरं वचनमिति यथावस्तु
वक्तव्यम् । तत्राधारत्वेन भोक्तुरात्मनो भोग्यप्रतिष्ठाहेतुत्वेन पृथक्कारे ऽप्या-
काशपृथक्कारो निष्प्रयोजन इत्यर्थः । कथं चेति भाष्यमयुक्तम् पञ्चसंख्या-
२९८ । १० द्वयात् पञ्चविंशतिसिद्धेरित्याशङ्क्याह **दिक्संख्ये इति ।** दिक्संख्यावाचि-
शब्दौ संज्ञायां गम्यमानायाम् उत्तरपदेन समस्येते यथा दक्षिणाग्निः सप्त-
ऋषयः इति सूत्रार्थः । एवं च एकैव पञ्चसंख्या द्वितीयपञ्चशब्दस्य संज्ञा स-
मासगतस्य न संख्यार्थेति ग्रन्थार्थः । यद्यप्यवयवाभिधानसापेक्षयोगान्नि-

रपेक्षरूढिर्बलीयसी तथापीह रूढमनुष्यग्रहं निस्तात्पर्यमुक्तमित्यत आह
तद्यदीति । इह मनुष्या वाक्येन संबन्धार्हा अजामन्त्रे त्वध्यात्माधिका-
राच्छागा पूर्वापरवाक्यविरोधिनीति रूढेर्योगे ऽपहृते रूढ्यर्थसंबन्धात्तद्गुणाद्वा
ऽर्थान्तरवृत्तिसिद्धौ शब्दस्य न योगः कल्प्य इत्यत्रोदाहरणमाह **यथेति** ।
उक्तं ह्यर्थवादेन यथा वै श्येनो निपत्यादत्तएवमयं द्विषन्तं भ्रातृव्यं
निपत्यादत्ते यमभिचरति श्येनेनेति । दार्ष्टान्तिकमाह **तथेति** । अवयवा २९८ । १८
र्थभूतपञ्चसंख्यासंबन्धानपेक्ष एकस्मिन्नपि मनुष्ये वर्तते । स्युः पुमांसः
पञ्चजनाः पुरुषाः पूरुषा नरा इत्यमरो हि जगौ । मनुष्ये रूढश्च पञ्चजन-
शब्दस्तत्संबन्धात्प्राणादिषु लक्षणया वर्त्स्यतीति वक्ष्यतीति । ननु रूढिरपि
तत्त्वेष्वस्तु किं लक्षणया ऽत आह **न चैष इति** । अस्तु तर्हि तत्त्वेषु
लाक्षणिकः पञ्चजनशब्दो नेत्याह **एवं चेति** । यच्चोक्तं वाक्यशेषयोर्विरो-
धान्न प्राणादयः पञ्चजना इति तत्राह **न च काण्वेति** । यच्च वस्तुनि न
विकल्प इति तत्राप्याह **न चेयमिति** । उत्तरे मन्त्रे विध्यश्रवणं तत्रा-
न्वयव्यतिरेकसिद्धतया ऽनूदिता ऽप्युपास्तिः पुंसा विकल्पेन कर्तुं शक्येत्यर्थः ।
जनानां वाचकत्वेन संबन्धी शब्दो जनशब्द इति व्याख्यानाभावे दोषमाह
अन्यथेति । प्रत्यस्तमितो ऽवयवार्थो यस्मिन् समुदायशब्दार्थे सिद्धान्त्यभि-
मते प्राणादौ जनशब्दस्य समुदायैकदेशस्यार्थो नास्तीति जनशब्दस्य प्राणादौ
कथं प्रयोग इति यच्चोद्यं तदचोद्यं स्यादनुक्तोपालम्भत्वादित्यर्थः । भाष्ये समाने
रूढ्यतिक्रमे वाक्यशेषवशात् प्राणादयो ग्रहीतव्या इति प्राणादीनां लक्षणार्ह-
त्वमुक्तम् । वाक्यग्रहणं तेषां प्रमितत्वार्थम् । शेषग्रहणं संनिहितत्वायेति लक्षणां
दर्शयति । जनसंबन्धाच्चेति भाष्यं तस्य भावमाह **रूढ्यपरित्यागेनेति** ।
रूढार्थसंबन्धादर्थान्तरप्रतीतिसिद्धौ न योगवृत्तिः प्रधानादौ कल्प्येति भाष्यार्थः ।
कल्प्या रूढिर्योगाद् दुर्बलेत्याशङ्क्य सूत्रात् क्लृप्तिमाह **ननु सत्यामिति** ।
नोपसर्जनन्यायातिरेकौ करणापिधाय संभवति चेत्युक्तम् । प्रयोगानुसारित्वाद्
व्याकरणस्य तदभावान्न रूढिरित्याशङ्कते **स्यादेतदिति** । मनुष्येषु पञ्चज- २९९ । १९
नशब्दस्य लोके एव प्रयोगात्तत्संबन्धात्प्राणादिषु वृत्त्युपपत्तिं स्फुटां जनसंब-
न्धाच्चेति भाष्यसूचितां पृथङ् न वक्ति भगवान् भाष्यकारः प्रौढ्या तु रूढिं
समर्थयते इत्याह **जनेष्विति** । स्थवीयस्तया स्फुटतयेत्यर्थः ।

शक्योद्भिदादिवदिति भाष्ये उद्भिदधिकरण*मुदाहृतं तदेवम्— उद्भिदा यजेत पशुकाम इत्यत्रोद्भित्पदं कर्मनामोत विधेयगुणसमर्पक†मिति संशये उद्भिच्छब्दस्य खनित्रादौ प्रसिद्धेः नामत्वे च यजिसमानार्थत्वेनानर्थक्याद् ज्योतिष्टोमे गुणविधिरिति प्राप्ते राद्धान्तः। अत्र हि यजेतेति यागेन भावयेदित्यर्थः। तथा चोद्भिदेति तृतीयान्तपदं यजिसामानाधिकरण्याद् यागनाम स्यात्। न चेदं वचनं गुणं शक्नोति विधातुम्। द्रव्ययागयोर्भेदादुद्भिदा यागेनेति सामानाधिकरण्याऽयोगात्। उद्भिद्वतेति कल्पने मत्वर्थलक्षणापातादुद्भिदा यागं भावयेद्यागेन पशुमिति वैयधिकरण्ये च यागस्य फलं प्रति साधनत्वं गुणं प्रति साध्यत्वमिति वैरूप्यापाताद्द्विध्यावृत्त्या वाक्यभेदाच्च। उद्भिनत्ति साधयति पशुमिति यागे ऽपि प्रसिद्धिः स्यात्। न च नामवैयर्थ्यम्। अत्र नामत्वसिद्धावन्यत्र समे दर्शपौर्णमासाभ्यां यजेत दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादौ नामवद्यागानुवादेन गुणफलविधिसंभवात्। न च ज्योतिष्टोमः प्रकृतो यत्र गुणो विधीयते। तस्मान्नामधेयमिति।

एवं यथा सन्निहितयज्यनुरोधेनोद्भित्पदं यागनामधेयमेवं संनिहितवाक्यशेषात् पञ्चजनशब्दः प्राणादिषु रूढ इति भाष्यार्थः। यद्यप्युद्भित्पदं यौगिकं तथापि सामानाधिकरण्यादवगते नामत्वे ऽवयवानुगमः क्रियत इति रूढितुल्यत्वाद्भाष्ये रूढित्वोक्तिः।

यस्मिन्नव्याकृताख्य आकाशश्च प्रतिष्ठितः तमेव निष्प्रपञ्चं ब्रह्मात्मकममृतमात्मानं मन्ये। त्वं किं विद्वान् मर्तव्यादन्यो ऽमर्त्यः न किं तर्ह्यहमप्यविद्यया मर्त्यः। विद्वांस्तु सन्नमृतब्रह्मात्मक इति मन्त्रदृशो वचनं प्राणादीनां जीवनादिहेतूनां जीवनादिप्रदं त्वंपदलक्ष्यं ये विदुस्ते तस्य स्व‡रूपं पुराणं चिरन्तनम्। अग्ये कार्यदशायामप्यलुप्तत्वेन भवमग्र्यं ब्रह्म निश्चिक्युर्निश्चयेन ज्ञातवन्तः। पाञ्चजन्यया प्रजया विशतीति विशा मनुष्यरूपया। इन्द्रे आह्वातव्ये घोषा असृक्षत सृष्टा। यत्पर्वार्द्धे कालानवच्छेद्यमुक्तं तज्ज्योतिषामादित्यादीनां भासकममृतत्वेन आयुष्ट्वेन जीवन-

* जै. सू. अ. १ पा. ४ सू. २।

† समर्थकमिति १ पु. पा.।

‡ स्वशब्दो नास्ति ३ पु.।

गुणवत्तया च देवा उपासते तेन तचायुष्मन्तो जाताः । अस्मिन्मन्त्रे षष्ठ्यन्तज्योतिषा पञ्चसंख्यापूरणं नात्मज्योतिषा एकस्याधारत्वाधेयत्वाऽयोगादिति* ॥

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥ २०० । १

अकाण्डे ऽनवसरे । **भविता** भविष्यति । मानान्तरविरोधपरिहारो द्वितीयाध्यायार्थः । श्रुतीनामितरेतरविरोधपरिहारस्तु नानाशाखागतपूर्वापरवाक्यपर्यालोचनया नानाशाखानामन्योन्यवाक्यानां चेतरेतरविरोधपरिहारेणाद्वितीयब्रह्मप्रतिपत्तिसिद्ध्या समन्वयसिद्ध्यर्थत्वादिह सङ्गत इत्याह **नानेति ।** नाना भिन्ना एका चेति तथोक्ता । यदि मानान्तराऽविरोधो द्वितीयाध्यायार्थस्तर्हि वियत्पादादौ† कथं श्रुतीनामितरेतराऽविरोधचिन्ता ऽत आह **प्रासङ्गिकं त्विति ।** विप्रतिषेधात् परपक्षाणामनपेक्ष्यत्वे उक्ते स्वपक्षस्यापि तत्प्रसङ्गे तन्निवृत्तिः प्रयोजनं तत्रैव प्रतिपादयिष्यतइत्यर्थः ।

परैरुद्भावितो दोष उद्धर्तव्यः स्वदर्शने ।
इति शिक्षार्थमत्रत्यचिन्तां तत्राकरोन्मुनिः ॥

क्वाचित्कस्याऽसच्छब्दस्य कर्मकर्तृप्रयोगस्य चासद्वादपरत्वं स्वभाववाद‡परत्वं च व्युदस्य गतिसामान्यव्यवस्थापनात्पादसङ्गतिः । अथ वा एतदारभ्य त्रीण्यधिकरणानि पादान्तरसङ्गतान्यपि अवान्तरसङ्गतिलोभादिह लिखितानि । प्रकृतिश्चे§त्यस्य त्वध्यायावसाने लेखे निमित्तं वक्ष्यते । एतेनेत्यस्यापि सर्वन्यायातिदेशत्वादध्यायावसानएव निवेशः । जगत्कारणवादिवाक्यानि ब्रह्मणि प्रमाणं न वेति विप्रतिपत्तौ विषये पूर्वत्राऽऽन्नज्योतिषोर्विकल्पेनोपास्तौ निवेशादविरोध उक्तः । इह तु सिद्धे कारणे त्रैकाल्यायोगाद्विरोधे सत्यप्रामाण्यमिति पूर्वपक्षमाह **वाक्यानामिति ।** वाक्यानां कार्ये २०१ । २
विरोधात्कार्यद्वारगम्ये जगद्योनौ न समन्वयो वेदान्तानां कारणे विगानात् तदुपलक्ष्य परमात्मनि|| च न सिध्यतीत्यर्थः । विभिन्नक्रमा अक्रमा च

---

* अत्र तृतीयं संख्योपसर्जनाधिकरणं (सांख्याधिकरणं ३ वा) पूर्णम् । तत्र सूत्राणि ३ **न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ११ प्राणादयो वाक्यशेषात् १२ ज्योतिषैकेषामसत्यन्ने १३ ॥**

† व्यासमू· अ· २ पा· ३ ।

‡ वादेति नास्ति १ पु· ।

§ व्या· सू· अ· १ पा· ४ सू· २३ ।

|| परात्मनीति २-३ पु· पा· ।

युगपद्भाविनी या* उत्पत्तिस्तत्प्रतिपादकानामित्यर्थः । आत्मन आकाशस्त-
त्तेजो ऽसृजतेत्यत्र भिन्नः क्रमः । स इमाँल्लोकानसृजतेत्यक्रम इति ।
तन्नामरूपाभ्यां व्याक्रियतेत्यादीनि कर्मकर्त्रभिधानात्स्वयंकर्तृकत्वशंसी-
३०१ । ८ नीति । ननु कार्यविगाने ब्रह्मणि किमायातमत आह **सृष्ट्या चेति** ।
धूमधूलिसंदेहे तद्गम्याग्निसंदेहवद् गमककार्यसंदेहाद् गम्यब्रह्मसंदेह
इत्यर्थः । कार्यविगानमभ्युपेत्याह **सर्गेति** । स्वयंकर्तृकत्वाऽन्यकर्तृकत्वाभ्यां
सर्गे क्रमाऽक्रमव्युत्क्रमैस्तत्क्रमे च विवादे ऽपि स्रष्टरि स विवादो न विद्यते
सर्गस्य चाविवक्षितत्वात्तद्विवादो ऽकिञ्चित्कर इत्यर्थः । कारणविगानं परि-
हरति **सतस्त्विति** । असद्वा इदमग्रआसीदित्यादौ असद्वचो भक्त्या । अन-
भिव्यक्तिश्च भक्तिः । तद्धैक आहुरित्यत्र निराकरणीयत्वेनानुवादो ऽसद्वच
इत्यर्थः । अपिशब्दात्सर्गे क्रमे च न विवाद इति सूचितम् । तत्प्रकटयति
न तावदित्यादिना । तत्र विभिन्नक्रमत्वं तावत्परिहरति **अनेकशिल्पे-
ति** । **पर्यवदातः** कुशलः । संयवनं मिश्रणं घृतपूर्णपक्वान्नविशेषः । क्रमेण
नानाकार्याणि कुर्वाणे देवदत्ते प्रथमस्येव चरमस्यापि तेन साक्षात्सृष्टत्वा-
त्ततो निष्पत्तिर्वक्तुं शक्या† । तथा पूर्वकार्यस्योत्तरकार्यनिमित्तत्वात्कार्यात्का-
र्यान्तरसर्गश्च शक्यवचनः । दृष्टान्तमुक्त्वा एवं ब्रह्मैक्यादाकाशादेर्वाय्वाद्युपा-
दानत्वमिति दार्ष्टान्तिकमाह **तथेहापीति** । अनलाऽनिलेति तेजसः प्राथ-
म्यनिर्देशस्तत्प्राथम्यघटनस्य प्रस्तुतत्वात् । तर्हि कदा निर्देशविरोधस्तत्राह
यदि त्विति । आकाशवायुतेजसां क्रमेणोत्पत्तिमुक्त्वा व्युत्क्रमाभिधाने हि
विरोधः स्यान्न तु तेजसः साक्षाद् ब्रह्मणः सृष्टिमात्राभिधाने ।
न ह्यनेन क्रमो बाध्यतइत्यर्थः । एवमपिशब्दस्य भावमुक्त्वा न स स्रष्टरीति
श्लोकभागं व्याचष्टे **अभ्युपेत्येति** । यदवादि धूमसन्देहेन दहनसन्देह-
३०२ । १० वत्सृष्टिसन्देह इति तदनूद्यापनुदति **न च सृष्टिविगानमिति** । सत्या-
दिलक्षणं ब्रह्मावगमय्य तदानन्त्योपपिपादयिषया जगतस्तत्रारोपः श्रुत्या
सृष्टिरुच्यते न तु सृष्टौ तात्पर्यमतो मिथ्याभूतायां सृष्टौ विगानं न दोषो
ऽपि त्वलंकार इत्यर्थः । ननु सृष्टेः कुत आत्मप्रमित्यर्थता विपरीतता
कस्मान्न स्यादत आह **तज्ज्ञानं चेति** । **तदनुगुणतयेति** । व्याख्यातं च

* या इति नास्ति २-३ पु. । † शक्यते इति २-३ पु. पा. ।

घृतपूर्णटीकायामित्यर्थः । सतस्त्वसद्वचो भक्त्येति श्लोकभागं व्याचष्टे **यच्च**
कारणइत्यादिना । तदप्येष इत्यादिः परिहारः । अस्ति ब्रह्मेति चेद्वेदेति ३०३ । ६
प्रकृतं ब्रह्म तच्चशब्दसमानार्थतच्छब्देन परामृश्य श्लोकेनासदभिधाने
श्लोकवाक्यमसम्बद्धं स्यादित्यर्थः । श्रुत्यन्तरं सदेव सोम्येत्यादि । मानान्तरं
विमतं सज्जन्यं कार्यत्वात् कुम्भवदित्यादि । निराकार्यतया क्व चिदिति
श्लोकभागं विभजते **तद्धैकइति** । यदा कार्ये विगानमुपेत्य कारणे तदभाव
उच्यते तदा समुच्चयाभावाच्चकारस्तुशब्दसमानार्थतया समन्वयो न सिध्यति
परात्मनीत्येवंरूपपूर्वपक्षनिषेधार्थ इत्यर्थः । कारणत्वइति सप्तमीमादाय
सूत्रैकदेशेन वाक्यानां कारणे परस्परविरोध इति पूर्वपक्षोक्तहेतोरसिद्धि-
रविगानप्रतिज्ञयोच्यतइत्याह **आकाशादिष्वित्यादिना** । प्रतिज्ञातविगा-
नाभावे हेतुपरं सूत्रावयवं व्याचष्टे **कुत इति** । पुनरावृत्त्या कारणत्वेनेति
तृतीयान्तमित्थंभावार्थे विवक्षित्वा यथाव्यपदिष्टपदार्थविवरणपरत्वेन व्या-
ख्याति **केनेति** । एवं कारणविगाननिषेधपरत्वेन सूत्रं व्याख्याय संप्रति कार्य- ,, । १
विगानपरिहारपरतया योजयति **अपर इति** । **कल्पः** प्रकारः । अस्यां
व्याख्यायां चकारः समुच्चये । **तदुक्तं न सृष्टावपीति** । कारणत्वेन
विगानं न च कार्यक्रमे इति सूत्रे द्वे प्रतिज्ञे । आद्या प्रागुपपादिता द्वितीयायां
हेतुं योजयति **यथाव्यपदिष्ट इति** । यथाशब्दोऽनतिक्रमार्थः । ब्रह्म-
णस्तेजःसृष्टिमात्रमुक्तं न क्रमो भग्न इत्यर्थः । परस्तु कार्यान्तरव्यवधानम-
न्तरेण तेजसो ब्रह्मप्रभवत्वाभिधानात् प्रथमोत्पत्तिरभिप्रेताऽतः क्रमभङ्गा-
द्यथाव्यपदिष्टोक्तिरसिद्धेति शङ्कते **नन्वेकत्रेति** । सिद्धान्ती तु साक्षाद् ब्रह्म-
सृज्यत्व*मव्यवधाननिर्देशस्य प्रयोजनं न तु कार्यान्तरस्यासर्ग इति मन्वानः
पूर्ववदावृत्त्या तृतीयान्ततामादाय† साक्षात्पदं चाध्याहृत्य सूत्रावयवव्या-
ख्यया परिहरति **अत आहेति** । पूर्ववत्थंभावे व्याख्यातत्वात्तद्भ्रमापनु-
त्त्यर्थमाह **हेताविति** । अधस्ताद् घृतपूर्णटीकायाम् । नामरूपाभ्यां व्या-
क्रियतेति कर्मकर्त्तरि कर्मणि वा लकारः । आद्ये कर्त्रप्रतिक्षेपस्तत्र हेतुमाह
न हीति । लूयते केदारः स्वयमेवेति भिन्नकर्त्तृकमेव सौकर्यापेक्षया कर्मकर्त्तृ ३२४ ।
इत्युच्यते इत्यर्थः । द्वितीये स्फुटैवान्यकर्त्रपेक्षेत्यर्थः । इदमसदिवा-

* सृष्टत्वमिति २-३ पु॰ पा॰ । † तृतीयान्तमादायेति २-३ पु॰ पा॰ ।

व्यक्तमासीत् तद्यदात्मना आसीत् तत्कारणसदर्थक्रियोन्मुखम् आसीत् । कार्यरूपेण च समभवत् । तत्तच कारणविषये एकआहुस्तेषां मतं दूषयति कुतस्त्विति । तदेवाह कथमिति । व्यतिरेकमुक्त्वा ऽन्वयमाह सदेवेति* । इदं जगत् तर्हि तदानीम् । अव्याकृतं कारणमासीत् । ह किल तत्कारणं शब्दार्थात्मना व्याक्रियत व्यक्तमभवत् । भाष्ये तद्विषयेण कामयितृत्ववचनेनेति सो ऽकामयतेत्यनेनेत्यर्थः । अपरप्रेष्यत्वमिदं सर्वमसृजतेति स्वातन्त्र्यम् । तस्माद्वा एतस्मादात्मन इति तद्विषय आत्मशब्दः । संप्रदायविदां वचने अन्यथा अन्यथेति वीप्सा द्रष्टव्या । लोहं सुवर्णम् । अवताराय ब्रह्मात्मैक्यबुद्धेरिति शेषः । प्रतिपाद्ये ब्रह्मणि नास्ति भेदो न विगानमित्यर्थः । मृत्युमत्येतीत्यन्वयः । असद् ब्रह्मेति वेद चेदसाधुः स्यात् । पश्यन्नात्माचष्टे उपलभतइति चक्षुः शृणोति मनुतइति च श्रोत्राद्याख्यो भवति† ॥

३०४ । ४ **जगद्वाचित्वात् ॥ १६ ॥**

अत्र क्वाचित्कहैरण्यगर्भमतद्योतककर्मशब्दस्य ब्रह्मानुगुणय‡वर्णनात्पादसंगतिः । इहोपक्रमानुरोधाद् ब्रह्म भाति उपसंहारानुरोधेन जीवः । ब्रह्मशब्दश्च स ब्रह्म त्यदित्याचक्षतइति प्राणे ऽपि प्रयुक्त इति संशयः । एकवाक्ये त्यच्छब्दादसच्छब्दो नीयतां वाक्यभेदे तु न ब्रह्मशब्दात्कर्मशब्दो नेय इति सङ्गतिः । यदा खल्वत्राप्येकवाक्यत्वं तदा यथोत्तरसच्छब्दानुसारेण प्राचीनो ऽसच्छब्दो नीत एवमुत्तरस्मात्कर्मशब्दात्प्राचो ब्रह्मशब्दस्य नयनमिति सङ्गतिः । प्रातर्दन§विचारेण गतत्वं शङ्कते **नन्विति ।** तत्र ह्युपक्रमोपसंहारैकरूप्यादेकवाक्यत्वे सति जीवप्राणलिङ्गयोर्ब्रह्मपरतया नयनं कृतं तदिहापि सममित्यर्थः । मध्ये ऽपि ब्रह्मपरामर्शमाह **आदित्येति ।** पुरुषकर्तृत्वमस्य ब्रह्मणो ऽन्यत्रासंभवादित्यन्वयः । अवच्छेदके प्रकरणादावसति सर्वनाम्ना प्रमाणमात्रसिद्धजगतः परामर्शे सति यज्जगत्कर्तृत्वमवगतं तस्य च ब्रह्मणो ऽन्यत्रासंभवादित्यर्थः ।

---

* सत्त्वेवेति १-४ पु· पा· ।

† अत्र चतुर्थं कारणत्वाधिकरणं पूर्णम् । तत्र सूत्रे २-कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः १४ समाकर्षात् १५ ॥

‡ अनुगुणतेति २-३ पु· पा· ।

§ व्या· सू· अ· १ पा· १ सू· २८

जगत्कर्तृत्वमन्यच्च ब्रह्मणो नेति दुष्यति ।
वाचस्पतावुपालम्भमनालोच्योचिरे परे ॥
जीवाज्जज्ञे जगत्सर्वं सकारणमिति ब्रुवन् ।
क्षिपन् समन्वयं जीवे न लेजे वाक्पतिः कथम् ॥ इति ।

अधिष्ठानं हि ब्रह्म न जीवाः । अधिष्ठाने च समन्वय इत्यनवद्यम् । इह वाक्यभेदापादनेन तावद्गतार्थतामाह **उच्यतइत्यादिना ।** अत्र ३०४ । १
बालाकिवाक्याद् ब्रह्म मन्यते सिद्धान्ती राजवाक्याद्वा । नाद्य इत्याह **ब्रह्म ते इति ।** न द्वितीय इत्याह **यस्य चेति ।** ननु बालाकिवाक्यगत-ब्रह्मप्रतिज्ञया राजवाक्यं ब्रह्मपरमस्त्वग्निवाक्यादिवाचार्यवाक्यमित्याशङ्क्याह **न चेति ।** तत्र हि वक्तृभेदे ऽप्येकवाक्यताग्निभिर्दर्शिता ऽऽचार्यस्तु ते गतिं वक्तेति इह तु तदभावाद्वाक्यभेद इत्यर्थः । ननु बालाकिवचने ब्रह्मशब्दस्य का गतिः अत आह **तस्मादिति ।** राजवाक्यार्थ एव ग्राह्यः राद्धान्तत्वात् । भ्रान्त*गार्ग्योक्तिस्तु पूर्वपक्षत्वादसद्वादवदग्राह्येत्यर्थः । ननु राजवाक्ये ऽपि क्रियमाणसर्वजगत् प्रति कर्तव्यत्वं ब्रह्मलिङ्गं गम्यते ऽत आह **अत्र चेति ।** ब्रह्मकार्ये जगति योगसम्भवमङ्गीकृत्य रूढ्या ऽपहारमुक्त्वा योगाऽसम्भवमाह **न च ब्रह्मण इति ।** उदासीनस्येत्यस्पन्दतोक्ता । ब्रह्मणि कृत्यभावाज्जगतस्तत्कृतत्वायोग इत्यर्थः । ब्रह्मणो यदि न व्यापारवत्ता कस्य तर्हि । ननु प्राणस्यास्तु । ननु सो ऽपि कथं वेदितव्यतयोच्यते प्रसिद्धत्वादित्याशङ्क्य तस्य हिरण्यगर्भरूपेण वेद्यत्वोपपत्तेः वाक्यशेषस्य प्राणश्रुतेः कर्मशब्दस्य रूढार्थलाभाच्च प्राण एव कर्मसंबन्धीत्याह **वाक्यशेषे चेति ।** त्रयस्त्रिंशदादिदेवानां कारणभूत एको देवः कतम इति पृष्टे प्राण इत्युत्तराद्धिरण्यगर्भात्मकप्राणकार्यत्वमादित्यादेरित्यर्थः । पाप्मसु भूतेषु चापेक्षिकवृत्तिः सङ्कुचितवृत्तिः सर्वशब्दः । सङ्कोचमेवाह† **बहूनिति ।** सम्प्रति विप्रनृपवचनयोरेकत्वमुपेत्यापि पूर्वपक्षसम्भवमाह **यदि त्विति ।** यद्यपि ३०५ । ८
गार्ग्यो भ्रान्तस्तथापि न भ्रान्तो ब्रह्मोपक्रमः । सहस्रमेतस्यां वाचि दद्म इति ब्रह्मप्रतिज्ञायां राज्ञा गोसहस्रस्य दत्तत्वात् । अत उपक्रान्तं ब्रह्मैव गार्ग्यं प्रति विशेषतो निरूप्यमिति यदि मन्येतानारम्भवादी तथापि

---

* भ्रान्तेति नास्ति २-३ पु० । † संकोचमेवाहेति २ पु० पा० ।

नैतत्पर*ब्रह्माभिधानम् । उपसंहारे जीवनिर्णयादित्यर्थः । उपेतं शिष्यभा-
वेन गतम् । प्राणो हि सुषुप्तौ व्याप्रियते स चेतनश्चेद् बृहत्पाण्डुरवास
इत्यादि स्वनाम जानीयाद् न च जज्ञिवा†नतः सुषुप्तस्य यष्टिघातेनोत्थाप-
नात्‡ प्राणादिव्यतिरिक्तं बोधयतीत्यर्थः । उपसंहारो ऽपि जीवपर इत्याह
३०५ । १५ **परस्तादपीति** । ननु जीवस्यापि सर्वगतस्य निरवयवस्य परिस्पन्दप-
रिणामयोरसम्भवात् कथं यस्य वैतत्कर्मेति निर्देशस्तत्राह **यस्य वैत-
दिति** । जीवप्रेर्यदेहादिसम्बन्धिकर्मषष्ठ्या जीवसम्बन्धित्वेन उपचर्यत
इत्यर्थः । साक्षाज्जीवसम्बन्धिधर्मादौ कर्मशब्दो लाक्षणिक इत्याह **कर्म-
जन्यत्वाद्वेति** । ननु योगवृत्त्या जगदभिधीयतां नेत्याह **रूढ्यनुसारा-
दिति** । रूढ्यर्थं गृहीत्वा तदविनाभूतलक्षणादित्यर्थः । अग्रहे हि न
तत्संबन्धिनि लक्षणा । यद्यपि ब्रह्मशब्दाऽश्रवणात्स्पष्टं ब्रह्माभिधानं नोपल-
भ्यते तथापि प्रश्नप्रतिवचनयोः क्वैष इति प्राण एवैकधा§ भवतीति च
सप्तमीप्रथमाभ्यां जीवप्राणयोर्भेदो गम्यते॥ ऽत आह **जीवव्यतिरेकश्चेति** ।
जीवातिरिक्तहिरण्यगर्भस्य प्राणत्वान्न ब्रह्मसिद्धिरित्यस्माकमिष्टसिद्धिरित्यर्थः ।
३०६ । १३ **मृषेति** । आदित्यादीनब्रह्मणो ब्रह्मेति मृषावादिनं बालाकिं मृषा वै खलु
मा संवदिष्ठा इत्यपोद्य निरस्य सत्यं ब्रह्माभिधित्सन् राजा यदि स्वरूपेण
जीवं प्राणं वा ब्रूयात् ततो ऽसंबद्धवादी स्याद्यदि जीवादि ब्रह्मत्वेन वदेत्
ततो मिथ्या वदेत् तच्चानुपपन्नं तस्माद् ब्रह्मैव वदतीत्यर्थः । काच इन्द्रनीलस-
मानवर्णा मृत् । **मिथ्यावद्यं** मिथ्यावदनम् । एवं च भिन्नवक्तृकवाक्यद्वयस्यापि
भ्रमप्रसक्तिस्तन्निरासपरतयैकवाक्यत्वाद् ब्रह्मोपक्रमः सिद्धः सिद्धं चास्योपसंहा-
रेण सङ्गानमिति ब्रह्मपरत्वं सर्वस्य संदर्भस्येत्याह **तस्माद् ब्रह्म ते इति** ।
हेतूनां ब्रह्मपरत्वं निश्चीयतइत्युपरितनप्रतिज्ञयैवान्वयः सर्वश्रुतेरसङ्कोचे निर-
तिशयफलेनोपसंहारो हेतुः । यद्वादि व्यतिरेकनिर्देशो हिरण्यगर्भे स्यादिति
३०७ । ९ तत्राह **क्वैष इति** । हे बालाके एष पुरुषः क्वैतदशयिष्ट एतदिति क्रियाविशेष-
णम् । इत्थमित्यर्थः । एष जीवाश्रयप्रश्नः । क्व वा एतदभूदिति भवनप्रश्नः ।
भवनं तादात्म्येन वर्त्तनम् । शयनमसंबोधः । कुत एतदागादित्यपादान-

---

* नैतस्य परेत्यादिः पाठः २-३ पु. । † ज्ञातवानिति २-३ पु. पा. ।
‡ नोत्थानादिति २-३ पु. पा. । § एकैकधेति ३ पु. पा. ।
|| अवगम्यतइति २ पु. पा. । गंस्यतइति १ पु. पा. ।

प्रश्नः । प्राण एवैकधा भवतीति भवनप्रश्नोत्तरम् । आदिशब्दात्तदैनं वाक्स-
र्वैर्नामभिः सहाप्येति इत्यादि शयनप्रश्नोत्तरम् । यथा ऽग्नेः क्षुद्रा विस्फु-
लिङ्गा व्युच्चरन्त्येवमेवास्मात्सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते इत्यादेः क्रमया-
नप्रश्नोत्तरं च द्रष्टव्यम् । एतानि च न हिरण्यगर्भे संभवन्ति जीवस्य जीवा-
न्तरात्मत्वाऽयोगादित्यर्थः । प्रश्नस्योत्तरस्येति चैकवचनं बहुष्वेव जात्यपेक्षम् ।
न केवलमनुपपत्त्या प्रश्नोत्तरयोर्ब्रह्मार्थत्वमपि त्वात्मशब्दादपीति वक्तुं पृच्छ-
ति अथ कस्मादिति । निर्णीतार्थवाक्ये रूढिर्बाध्येत्याह तदेवमिति । ३०७ ।
व्यापाराभिधाने सतीत्यर्थः । ननु तवापि सर्वकर्तृत्वे सिद्धे आदित्यादिक-
र्तृत्वं पुनरुक्तमत आह एतदुक्तमिति । न तावद्व्यापकोक्तिरेकदेशोक्त्या
पुनरुक्ता भवेद् नाप्येकदेशोक्तिर्व्यापकोक्त्या ऽऽदित्यादेरन्यत्राविशेषोक्तेरस्तु
सङ्कोच इति बालाकिभ्रमापोहार्थत्वादित्यर्थः । कथं तर्हि ब्रह्मपरे वाक्ये
जीववाची पुरुषशब्दः प्राणशब्दश्चात आह जीवेति । प्राणयतीति योगाद्वि-
श्वसत्तास्पदं* ब्रह्म प्राणशब्दो वक्ति । जीववाची तु पुरुषशब्दो जीवसुप्ति-
स्थानभूतब्रह्मलक्षणार्थ इत्यर्थः । ब्रह्मभावापेक्षया ब्रह्मशब्देन जीवोपलक्षणे
ब्रह्मशब्दोपक्रमो मृषावादिबालाक्यपवादो विश्वकर्तृत्वं चासमञ्जसमित्यर्थः ।
प्रत्यक्षत्वाज्जीवस्य न प्रतिपाद्यता ऽपीत्याह न चानधिगतेति । स्वरसः
स्वभावः । ब्रह्मणा लोकाऽनधिगतेनाऽधिगतजीवोपलक्षणं चानुपपन्नमित्यर्थः ।
ननु किं जीवस्य ब्रह्मोपलक्षकत्वेन प्रसिद्धावपि जीवप्राणावनूद्य नामादिव-
दुपास्तिर्विधीयतामिति शङ्कां निराकुर्वन् जीवमुख्येति सूत्रं† व्याचष्टे न च
संभवत्येकवाक्यत्वइत्यादिना । एवं प्रसङ्गागतं जीवमुख्येति सूत्रं
व्याख्यायाऽधिकरणाद्यसूत्रव्याख्यामेवानुसरति स्यादेतदित्यादिना । पूर्वत्र
यस्य चैतत्कर्मेत्येतच्छब्देन नाऽऽदित्यादिपुरुषाणां परामर्श एतेषां पुरुषाणां
कर्तेत्यनेन पुनरुक्तिरित्युक्तम् । तत्र पूर्ववादिनः पुनरुक्तिपरिहारमाशङ्क्य भाष्य-
व्याख्यया परिहरति निर्दिश्यन्तामित्यादिना । कृतिरनिर्दिष्टेति । ३०८ ।
यद्यपि कर्तेति शब्द कृतिरपि भाति तथापि प्राधान्येनानिर्दिष्टेत्यर्थः ।
कार्योत्पत्तिः कर्तृव्यापारस्य साध्यतया फलम् । भाष्ये उपात्तत्वं नाभिधेयत्वं
किं त्वनुपपत्तिगम्यत्वं तदेव दर्शयति न हीति । शब्दोक्तपुरुषाणाम् एत-

* सत्तापदमिति १ पु० पा० । † व्याससू० अ० १ पा० १ सू० ३१ ।

च्छब्दापरामर्शेन अर्थसंनिधिना जगन्मात्रपरामर्शे स्वेनैव कृतप्रतिवचनमपि
३०८ । २० पौनरुक्त्यचोद्यम् । भाष्ये क्रमप्राप्तं व्याचष्टे **ननु यदीति** । इदानीमन्यार्थं तु
जैमिनि*रिति सूत्रस्थभाष्याणि व्याचष्टे **ननु प्राण एवेत्यादिना** । प्राणश-
ब्दो हिरण्यगर्भं वक्ति कुतो ब्रह्मप्रतीतिरिति शङ्कार्थः । आत्मशब्दाद्गम्यत-
इति परिहारः । एतस्मादिति वाक्योदाहृतेरेव वेदान्तार्थत्वसिद्धेरुत्तरभा-
ष्यवैयर्थ्यमाशङ्क्य सर्ववेदान्तानुगतिस्तेन दर्श्यतइत्याह **अपि चेति** । भ्रम-
संस्कारे सत्यपि प्रोद्भूतभ्रमाभावान् मुक्त्योपमानं सुषुप्ते रूपशब्देन भाष्ये
कृतमित्यर्थः । **विभजते** उपाधिजनितविशेषेत्यादिभाष्येणेति शेषः । तद्व्या-
चष्टे **उपाधिभिरिति** । ननु विज्ञानमित्येवास्तु किं विशेषेति विशेषणेनात
आह **यदिति** । एतद्विशेषणाऽविशिष्टं विज्ञानं यत्तदनवच्छिन्नं सद्रूपं ब्रह्मैव
स्यात्तच्च नित्यमिति कृत्वा नोपाधिजनितम् । नापि तेन ब्रह्मरूपेण रहित-
मात्मनः स्वरूपमतो विशेषपदेन ब्रह्म व्यवच्छेद्यम् । राहित्याभावे हेतु-
माह **ब्रह्मस्वभावस्याऽप्रहाणादिति** । यतस्तद्भ्रंशरूपमागमनमिति भाष्यं
व्याचक्षाणः सुषुप्तौ ब्रह्मभावं दृढीकर्तुं तद्व्यतिरेके संसारमाह **यदा त्विति** ।
ननु हिताऽहितफलप्रदा नाम नाड्यो द्वासप्ततिसहस्राणि ताभिः प्रत्यवसृप्य
पुरीतति शेतइत्यत्र पुरीतद्यथा ऽऽत्माधार उक्तः एवमाकाशः किं न स्या-
दत आह **यदपीति** । **मन्दधियामिति** । जीवनिरासहेतुप्रश्नोत्तराधःस्थि-
तयष्टिघातादेः सूत्रे ऽर्थात्सूचनाऽज्ञानाद्धीमान्द्यम् । भाष्योक्तप्राणादिव्यतिरि-
३१० । ३ क्तोपदेशं दर्शयति **तौ हेति** ।

महत्त्वात् हे बृहत् पाण्डुरा आपो वासस्त्वेनास्य चिन्त्यन्तइति तथो-क्तः । प्राणस्यैव चन्द्रात्मत्वात्सोमराजत्वम् अथैतस्य प्राणस्यापः शरीरं ज्योतीरूपमसौ चन्द्र इति श्रुतेः । आपिषम् । आपिष्यापिष्य । यत्र सुप्तस्तत्स्थानं किमिति प्रश्नः । यदा पुरुषः स्वपिति अथ तदा प्राणे एकीभवति प्राणः सर्वदेवानामात्मत्वेन महत्वाद् ब्रह्म तच्च ब्रह्म त्यदिति परोक्षेणाचक्षते परोक्षप्रियत्वाद्देवानाम् । अस्माद् ब्रह्मशब्दात् पूर्वपक्षे ब्रह्मोपक्रमः प्राणे घटितः । सर्वेषां श्रैष्ठ्यं गुणोत्कर्षम् आधिपत्यमैश्वर्यं

---

* व्या· सू· अ· १ पा· ४ सू· १८ ।

स्वाराज्यम् अनन्याधीनत्वम् । मनो मनउपाधिको जीवः । प्राणबन्धनः प्राणाश्रयः* ॥

वाक्यान्वयात् ॥ १९ ॥ ३१० ।

अत्र जीवब्रह्मलिङ्गाभ्यां विशयः पूर्वत्र ब्रह्मोपक्रमात् तत्परत्ववदिहापि जीवोपक्रमात्तत्परतेति सङ्गतिः । क्वचित्समन्वयस्य जीवमात्रपर्यवसाननिषेधात्पादसङ्गतिः । मैत्रेयीब्राह्मणार्थमनुक्रामन् प्रातर्द्दनन्येन जामितामाशङ्कते **नन्वित्यादिना** । यियासता गन्तुमिच्छता । कात्यायन्या द्वितीयभार्यया । यद्यदि भगोः भगवन् तेनामृता किं स्यामिति प्रश्नः । उपकरणवतामशनवसनादिमतां यद्रूपस्य वित्तस्यामृतत्वसाधनभावाप्राप्तेः प्रतिषेधायोगमाशङ्क्य तत्साध्यकर्मद्वारा प्राप्तिमुपपादयति **एवमिति** । श्रुतौ तच्छब्दार्थमाह **अमृतत्वेति** । अमृतत्वसाधनज्ञानोपन्यासाय वैराग्यमुत्पादयितुं वाक्यसन्दर्भमुवाचेत्यन्वयः । वाक्यसन्दर्भं व्याख्याति **आत्मेति** । आत्मा वा अरे इति कृतसन्धिको वैशब्दो ऽनुकाराद्वाशब्द उक्तः । **विहितानि** विधिवन्निगदैर्बोधितानीत्यर्थः । **कस्मा**दित्यत्र द्रष्टव्य इत्यनुषङ्गः । श्रवणादीनि साधनानि यस्य तत्तथोक्तम् । आत्मानो वेत्यादिवाक्ये विदितमित्यस्यानन्तरं भवतीति शेषो द्रष्टव्य इत्यर्थः । मतिर्मननं विज्ञानं निदिध्यासनम् । श्रवणादिना यद्दर्शनं तेनेत्यर्थः । आत्मदर्शनफलमुक्त्वा ऽनात्मदृष्टौ दोषदर्शकं वाक्य†मवतारयति **कुत इति** । ब्राह्मण्याद्यभिमानो नियोज्यत्वाविर्भावनेनात्मतत्त्वाद् भ्रंशयेदित्यर्थः । स यथा दुन्दुभेर्हन्यमानस्य न बाह्यान् शब्दान् शक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीत इत्यादिश्रुतिसूचितमनुमानं विशदयति **यत्खल्विति** । ३११ ।
स‡ दृष्टान्तो यथा लोके दुन्दुभेर्हन्यमानस्य लक्षणया हन्यमानदुन्दुभ्यभिव्यक्तशब्दत्वसामान्यस्य विशेषभूतात् सामान्याद्बाह्यत्वेन ग्रहीतुं न शक्नुयादिति व्यतिरेकः एवमन्वयो ऽपि दुन्दुभिशब्दस्य§ ग्रहणेन तद्विशेषशब्दो दुन्दुभ्याघातसंज्ञको गृहीत आघातस्य वा ग्रहणेन तदवान्तरविशेषशब्दो

---

* अत्र पञ्चमं जगद्वाचित्वाधिकरणं (बालाक्यधिकरणं वा) पूर्णम् । तत्र सूत्राणि ३-जगद्वाचित्वात् १६ जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् १७ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ १८ ॥ † दर्शनं वाक्यमिति २ पु॰ पा॰ ।

‡ स इति नास्ति २-३ पु॰ । § शब्दत्वस्येति २-३ पु॰ पा॰ ।

३१२ । ९ गृहीत इति श्रुत्यर्थः । आर्द्रैरेधोभिरिद्ध आर्द्रैधाः । अभ्याहित उपचितः ।
पञ्चम्यर्थे षष्ठी । धूमग्रहणं विस्फुलिङ्गाद्युपलक्षणार्थम् । किं तन्निःश्वसितं
तदाह श्रुतिः । यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं
विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीति । अथ-
र्वाङ्गिरसोन्तश्चतुर्विधो मन्त्रः । इतिहास उर्वशी हाप्सराः पुरूरवसमैलं चकमे
इत्यादि । पुराणं सदेव सोम्येदमग्र आसीदित्यादि सर्गादिकथकम् । विद्या
देवयजनविद्याद्याः । उपनिषदः प्रियमित्येतदुपासीतेत्याद्या रहस्योपासनाः ।
श्लोकाः ब्राह्मणप्रभवा मन्त्रास्तदेते श्लोका इत्यादौ निर्दिष्टाः । सूत्राण्यात्मे-
त्येवोपासीतेत्यादिवस्तुसंग्रहवाक्यानि । अनुव्याख्यानानि संग्रहविवरणानि ।
व्याख्यानानि मन्त्रव्याख्याः । इत्यष्टविधं ब्राह्मणमित्यर्थः* । श्रुतौ शब्दसृ-
ष्ट्यर्थादर्थसृष्टिरुक्तेति वदन्नामरूपप्रपञ्चकारणतां† व्याचक्षाण इति भाष्याभि-
प्रायमाह यदा चेति । सिद्धान्त एव प्रकट इति गतार्थत्वं शङ्क्यते‡ ऽतः
शङ्कावसरे ऽपि युक्ता सिद्धान्तभाष्यव्याख्या । स यथा सैन्धवखिल्य इति
३१ । १९ वाक्येन ज्ञाननिमित्त आत्यन्तिकः प्रलयः प्रपञ्चस्योक्तस्तमाह यथा सामुद्र-
मिति । खिल्यो घनः । आत्यन्तिकप्रलये प्राकृतो लयो दृष्टान्तत्वेनोच्यत
इत्याह एतदिति । समुद्रे ऽपां लयः प्राकृतलये दृष्टान्तो न त्वात्यन्ति-
कलये । सर्वेषां स्पर्शानां त्वगेकायनमित्यादिदृष्टान्तप्रबन्धस्तत्र हि महा-
प्रलयसमये त्वगादिशब्दलक्ष्यस्पर्शत्वादिसामान्येषु तद्विशेषाणां तेषां च
सामान्यानां क्रमेण ब्रह्मणि लय उच्यते इति एवं वा अरे इदं महदिति
श्रुतिं व्याचक्षाण उदाहरति दार्ष्टान्तिके इति । अवच्छेदो ऽल्पत्वम् ।
यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीति वाक्यं विभजते स हो-
वाचेति । यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन विजानीयादिति वाक्यं विवृ-
णोति आनन्देति । विषयाभावे ऽप्यात्मभूतं ब्रह्म जानीयादिति शङ्कापनु-
३१४ । १ त्तये विज्ञातारमरे केन विजानीयादिति वाक्यं तद्व्याचष्टे ब्रह्म वेति । येना-
हं नामृता स्यामित्यमृतत्वोपक्रमाद् दुन्दुभ्यादिभिस्तदुपपादनात् । ब्रह्म तं
परादादित्यादि द्वैतनिन्दा । इदं ब्रह्मेदं क्षत्रमित्यारभ्येदं सर्वं यदयमात्मे-

* इत्यर्थ इति नास्ति २-३ पु. । † कारणमिति २-३ पु. पा. ।
‡ शङ्कते इति २-३ पु. पा. ।

त्यन्तमद्वैतगुणकीर्तनम् । अस्तीत्याख्यातप्रतिरूपकमव्ययम् । विद्यमानपूर्व-
पक्षमित्यर्थः । यद्यपीह जीवब्रह्मलिङ्गसन्देहे सर्वात्मब्रह्मण्यन्तर्भवन्तो
जीवधर्मा न ब्रह्मपरतया योज्यन्ते प्रातर्दनाधिकरणे* एव तत्सिद्धेः । नापि
प्रसिद्धजीवानुवादेनाऽप्रसिद्धब्रह्मात्मबोधनपरताऽवधार्यते सुषुप्त्युत्क्रान्त्य-
धिकरणे† तत्सिद्धेः तथापि जीवमनूद्य ब्रह्मत्वबोधनादनुवाद्यविधेययो-
र्भेदाभेदाविति मतनिरासेन ऐकान्तिकमद्वैतं प्रतिपाद्यतइत्याह **अत्रोच्यत** ३१४ । ८
इति । मैत्रेयीब्राह्मणविषये जीवमात्रपरत्वपूर्वपक्षेण प्रस्तावमात्रं कृतं तत्कि-
मर्थमत आह **भोक्तृत्वेति** । भोक्तृत्वादीनां भेदपरत्वेन शङ्क्यमानानां
समाधये इत्यर्थः । भोक्तृत्वं विभजते **पतीति** । आत्मनस्तु कामाय पतिः
प्रियो भवति‡ आत्मनस्तु कामाय जाया प्रियेत्यादिसंबन्ध इत्यर्थः । ज्ञातृ-
तामाह **नापीति** । विज्ञातारमरे केन विजानीयादिति श्रुतमित्यर्थः । जीव-
रूपेण ब्रह्मण उत्थानमुत्पत्तिमाह **साक्षाच्चेति** । भोक्तृत्वादेरर्थापत्त्या जीव-
धीरिह तु ब्रह्मण उत्पत्त्या मुखत एवेति साक्षाद्ग्रहणम् । भाष्ये भोक्रर्थत्वा-
द्भोग्यजातस्य जीवज्ञानात् सर्वज्ञानोपचार इति जीवपक्षस्योपबृंहणाभासो
दुन्दुभ्यादिभिः सर्वज्ञानोपपादनादुपचाराऽयोगादित्यर्थः । सिद्धान्तभाष्यं गता-
र्थत्ववर्णनच्छलेन विवृतमित्यभिप्रेत्याह **सिद्धान्तस्त्विति** । लिङ्गत्रयस-
माधिं श्लोकोक्तं दर्शयति **तदेवमित्यादिना** । पूर्वपक्षमाह **आचार्यदे-
शीयेति** ।

प्रतिज्ञेति§ । तद्रूपेण वह्निरूपेण निरूपणं येषां ते तथा । अत्यन्तमभेदे ३१५ । ९
ब्रह्मवत्परस्परमव्यावृत्तिप्रसङ्गाद् ब्रह्मव्यतिरिक्तजीवाभावे च तस्यैवोपदेशः
स्यात् तस्य चायुक्तत्वादित्यर्थः‖ । परमात्मनि दर्शयितव्ये यो विज्ञानात्मनोप-
क्रमः स तयोरभेदमादाय । स चाभेदः प्रतिज्ञासिद्धये इति योजना ।
आश्मरथ्यमताद्भिनत्ति **जीवो हीति** । उपाधिसंपर्को हेतुः कालुष्ये न
जीवपरभेदे सर्वदेत्यनादिकाले भेदहेतोर्गमकस्य संसारित्वादेरीश्वरविरुद्ध-
धर्मस्येत्यर्थः । वृद्धवैशेषिकदृष्ट्याऽवादाणुश्याममतोदाहृता । यथा नद्यः

* व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ २८ । † व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ ४४ ।

‡ आत्मन इत्यादिरेतदन्तो ग्रन्थस्त्रुटितः २-३ पु॰ ।

§ एतत्स्थाने प्रतिज्ञेति प्रतीकग्रहणं ३ पु॰ ।

स्यन्दमानाः समुद्रे ऽस्तं गच्छन्ति नामरूपे विहायेत्युदाहर्तव्यम् । तद्धि तथा
विद्वानित्यस्य पूर्वार्द्धम् । अर्थसाम्यात्तु यथा सोम्येमा नद्यः स्यन्दमानाः समुद्रं
प्राप्यास्तं गच्छन्तीत्युदाहरत् । अनेन जीवेनात्मनेति सामानाधिकरण्यं
३१६ । १८ कार्यकारणभावेन भेदाभेदपरमिति शङ्कते परिहरति **न च तेज इति ।**
आश्मरथ्यमते कार्यकारणभावस्य वास्तवत्वेनाऽन्यूनत्वात्क्रियानपीति भाष्य-
निर्द्देशायोगमाशङ्क्याह **आत्यन्तिके इति ।** अभेदे आत्यन्तिके सति विद्य-
मानइति च्छेदः । आस्थिते कथं चिदभेदे ऽपीषद्भेद आपततीति स कार्य-
कारणभावनिर्वाहक इति लक्षणया तथोक्त इत्यर्थः । ननूच्छेदाभिधानमेत-
दिति शेषं भाष्यं* न संज्ञामात्रं व्यासेधीत्यादिग्रन्थेन व्याख्यातार्थमित्यर्थः ।
भाष्ये विज्ञातारमिति कर्तृनिर्देशलिङ्गं काशकृत्स्नमतेनैव परिहरणीयमित्ये-
वकारस्याभिप्रायमाह **काशकृत्स्नीयेनैवेति ।** शक्यनिराकरणत्वमेव दर्श-
यति **ऐकान्तिके हीति ।** यत्र त्वस्य सर्वमात्मैवाभूत्तत् केन कं पश्ये-
दित्यात्मनो ऽन्यकर्मकरणे निषिद्धे तत्र आत्मानं जानात्विति शङ्कायां
स्वप्रकाशं† विज्ञातारं केन विजानीयादिति तत्कर्मत्वं प्रतिषिद्धम् । एतानि
भेदपक्षे भेदाऽभेदपक्षे च निषेद्धुं न शक्यानि प्रमाणादेः सत्त्वा‡दित्यर्थः ।
अत्यन्तभिन्नस्य तत्केनेति प्रतिषेधो विज्ञातारमिति व्यावृत्तत्वेन जीवग्रह-
णाऽनिषेध इति§ केन चिदयुक्तमुक्तम् । आत्मैवाभूदिति भेदाभेदप्रतिषेधात् ।
यत्र हि द्वैतमिवेति इवकारेण द्वैतवैतथ्योपक्रमाच्च श्रुत्यनुसारिकाशकृत्स्न-
मतादत्यन्ताद्वैतसिद्धौ जीवस्य ज्ञातृत्वमविद्यावस्थायां भूतं तदालोचनेन
तन्निर्द्देश इत्यर्थात्स्थितम् ।

इदानीं पौरुषेयीं काशकृत्स्नदृष्टिमनपेक्ष्य श्रुतित एव निर्द्धार्यते इत्याह
३१८ । ५ **न केवलमिति ।** यदि श्रुतिवित्काशकृत्स्न इति तन्मतमादृतं हन्त किं न
श्रुतिविद इतरे आचार्या इति शङ्कते **कस्मात्पुनरिति ।** पुंगौरवेण श्रुत्यनुमाना-
द्वरं प्रत्यक्षश्रुतिदृष्टं मतं गृहीतमिति परिहारार्थः । **दर्शितं पुरस्ताद् ।** यत्र
हीत्यादिश्रुतिमत्त्वमित्यर्थः । उक्तश्रुत्युदाहरणभाष्यस्य पौनरुक्त्यमाशङ्क्य बहु-
वाक्यप्रदर्शकत्वेन परिहरति **श्रुतिप्रबन्धेति ।** स्मृतिमत्त्वं च स्मृत्युपन्या-

---

* भाष्यमिति नास्ति २ पु. ।
† स्वप्रकाशमिति नास्ति २-३ पु. ।
‡ सत्यत्वादिति १ पु. पा. ।
§ ग्रहणमितीति २ पु. पा. ।

सेनेति शेषः । भाष्यगत उपसंहार उपक्रमे यस्य तच्छ्रुतिमत्त्वं तथोक्तम् ।
उपसंहारोक्तिस्तद्द्वारा ऽप्यजामित्वाय । अतश्चेत्याद्यभ्युपगन्तव्य इत्यन्तं
भाष्यमुपसंहारार्थं ततः परं श्रुतिप्रबन्धोपन्यासाय । आतश्चेति पाठे
बहुप्रमाणदृष्टिरवश्यतया सूचिता । भाष्यकारेण स वा एष इति श्रुतिमुदा-
हृत्य सर्वविक्रियाप्रतिषेधादिति तात्पर्यमभाणि तद्विशदयति **जननेति** । ३१८ । १:
श्रुतावमर इत्यपक्षयप्रतिषेधः । भाष्यस्थश्रुतीनामनन्यथासिद्धिमाह **परिणा-
मेति** । अन्यथा निरपवादविज्ञानानुपपत्तेरिति भाष्यं व्याकरोति **अपि चेति** ।
भेदाऽभेदावविरुद्धावुत विरुद्धौ नाद्य इत्याह **विरोधादिति** । अविरोध-
श्चेद्भेदे ऽप्यत्यन्ताभेदाविरोधान्न भेदाऽभेदावकाश इति भावः । द्वितीये
विषमबलौ समबलौ वा । आद्यमनूद्य प्रत्याह **नात्मनीति** । भाष्ये निर-
पवादत्वमबाध्यत्वम् । द्वितीयमनुभाष्य दूषयन् सुनिश्चितार्थत्वानुपपत्ते-
श्चेति भाष्यभावमाह **अथ त्विति** । समबलबाधितविपर्यये* विषये संशयः
सत्प्रतिपक्षानुमानवदित्यर्थः ।

> भेदाऽभेदव्यवस्था चेद्धिंसाविधिनिषेधवत् ।
> कार्यकारणयोस्तर्हि नैकत्र स्तो भिदाऽभिदे ॥

यथा ऽग्नीषोमीयहिंसायां विधिर्वृथाहिंसायां निषेधो नैकत्रैव एवं
कारणमेकं कार्याणि नानेति भेदवाद† एव स्यात् ।

> सामानाधिकरण्यं यद्धेमकुण्डलगं न तत्‡ ।
> भेदाऽभेदावगाहीति प्राग्वाचस्पतिनेरितम् ॥

भाष्यस्थश्रुत्या भेदाऽभेदौ निरस्तावित्याह **एकत्वमिति** । स्थित-
प्रज्ञेति भाष्ये स्थितिर्निःसंशयता । लोकप्रसिद्ध्या जीवेश्वरभेदमाह **कथं
तर्हीति** । अनुमानादप्याह **कथं चेति** । यद्विरुद्धधर्मवत्तन्नाना दहनतुहि-
नवत्तथा च जीवेशावित्यर्थः । स्वाभाविकं विरुद्धधर्मवत्त्वमसिद्धमौपाधिकं तु
बिम्बप्रतिबिम्बयोरनेकान्तमिति शङ्कित्वा परिहरति भेदवादी **अविद्ये-** ३१९ । ७
त्यादिना । भाष्यकृद्भिः श्रौताभेदसिद्धौ मृषा भेद इति प्रतिपादितं तदयु-
क्तम् । भेदाभेदसंभवादित्याशङ्क्याह **न तावद्भेदाऽभेदाविति** । अविद्या-

---

* विपर्यये इति नास्ति २-३ पु० । † व्यवस्थावाद इति २-३ पु० पा० ।
‡ हेमकुण्डलयोर्न तदिति पाठः परिमलादवसीयते । (परि० पृ० १३२)

अयं त्वविद्योपधानं चेत्यादिना वक्ष्याम इति तावच्छब्दः । मा भूतामैक्य
भेदाऽभेदौ भेद एवास्तु नेत्याह **द्वैतेति** । लोकप्रसिद्धिमन्यथासिद्धयत्यनु-
३१९ । १५ मानं वा ऽनैकान्तयति **तत्र यथेत्यादिना** । परस्मिन्नुच्यते प्राचीनैराचार्यैर-
विद्या ब्रह्मणीति वदद्भिरित्यर्थः । अनादित्वमात्रे बीजाङ्कुरदृष्टान्तो न तु
जीवाविद्याव्यक्तिभेदे । उत्पत्तौ हीतरेतराश्रयदोषो ऽनाद्योर्जीवाविद्ययोश्च
नोत्पत्तिः । इतरेतराधीनत्वं तु स्यात् । तच्च दृष्टमविद्यातत्संबन्धयोर्वा-
च्यवाचकत्वादीनां चेत्यर्थः ।

यदप्याह केशवः ।

यदुपाधिविशिष्टस्य संसारो नाशितात्मनः ।
तल्लङ्घितस्य चेद् ब्रह्म मुक्तौ तद्रूपमुच्यताम् ॥ इति ।

तन्न । यतो न विशेषणम् अविद्या नाप्युपलक्षणं किं तूपाधिः । कः पुनरेषां भेदः । उच्यते । कार्यान्वयित्वेन विभेदकं हि विशेषणं नैल्यमिवोत्पलस्य । अनन्वयित्वेन तु भेदकानाम् उपाधिता लक्षणता च सिद्धा । तत्र च ।

यावत्कार्यमवस्थाय भेदहेतोरुपाधिता ।
कादाचित्कतया भेदधीहेतुरुपलक्षणम् ॥

नीलोत्पलमानयेत्यत्र हि नैल्यं व्यावृत्तिप्रयुक्तानयनकार्यान्वयि सदुत्पलं रक्ताद्व्यावर्तयति । अलक्तककाकौ तु स्फटिकगृहकार्ययोरनन्वयिनौ । अलक्तकं तु यावद्रक्तस्फटिकानयनमनुवर्तते । काकस्तु न चैत्रगृहगमनं यावदनुवर्तते । तदिहाऽविद्या न विशेषणमिति न तन्नाशे जीवनाशः । न चोपलक्षणमिति न ब्रह्मणि संसारो यावत्संसारं चानुवर्तिष्यते । तन्निवृत्तौ च जीवः स्वं ब्रह्मभावमेष्यति । त्वया ऽपि लिङ्गशरीरावच्छेदाभ्युपगमात् समौ पर्यनुयोगपरिहारौ । न चोपाधिकस्य सत्यत्वमित्यनन्तरमेव वक्ष्यतइति ।

३२० । ९ अत एवेत्येतद्विवृणोति **न खल्विति** । अविद्याधीनजीवविभाग-
स्यानादित्वादुद्देश्याभावो ऽसिद्धः । अनादित्वाच्च मायाया आरचनाभावः ।
संसारस्याऽनादित्वात्संसारिणं कथं कुर्यादित्यचोद्यमित्यर्थः । न मायाकृत-

संसारे प्रयोजनानुयोगो गन्धर्वनगरादिभ्रमवदित्यादिशब्दार्थः । अविद्योपा-
धिवर्णनं नाममात्रभेदादिति भाष्यविरुद्धमित्याशङ्क्याह **अत्र चेति** । नामे-
त्यवस्तुत्वेनाविद्योक्तिरित्यर्थः । यदा दर्पणादयो ऽपि मुखादाववदातत्वा-
देर्भानाभाने तन्वते तदा कैवाऽविद्यायाः कथेत्याह **यथा हीति** । अविद्या
गुहा न गिरिदरी । सा चैकस्मिन् स्वयंप्रभे निरंशे ऽपि भानाभाने वर्त्तयत्य-
संभावनीयावभासचतुरत्वादिति भाष्यटीकयोर्भावः । नन्वैक्यसिद्धावुपाधिना
भानाऽभानसमर्थनं तदेवासिद्धमिति शङ्कते **अस्तु तर्हीति** । ये तु निर्बन्धं
कुर्वन्तीति भाष्यं व्याख्यानपूर्वकं प्रतीकत आदत्ते **ऽपि त्वित्यादिना इती-
त्यन्तेन** । आश्मरथ्यस्य वेदान्तार्थबाधकत्वं भाष्योक्तं स्फुटयति **ब्रह्मण
इति** । भागशः परिणामे कार्यत्वं सावयवत्वात्ततश्चानित्यत्वं सर्वात्मना
परिणामे च सर्वाभावादनित्यत्वं साक्षादित्यर्थः । अनेन कृतकमनित्यमिति
भाष्यं व्याख्यातम् । न्यायेनासङ्गतिर्व्याघातात् । औडुलोमेर्न्यायासङ्गतिमाह
एवमिति । भिन्नयोरैक्यायोगादेकत्वशास्त्रविकत्थनमसङ्गतमित्यर्थः । संस्था-
नभेदो नैरन्तर्येणावस्थानम् । अथ नदीपाथःपरमाणवः समुद्रावयविनैक्यं
यान्ति तत्राह **एवं समुद्रादपीति** । ३२० । १

भास्करस्य मतमनूद्य दूषयति **ये त्वित्यादिना** । सावयवत्वमव-
यवारब्धत्वं सांशत्वं भागवत्त्वमात्रमिति परो मेने । शब्दश्रवणयोग्यमित्य-
ज्ञानदशायां कार्यकरत्वात् सत्यत्वमित्युक्तम् । दिगारभ्यं श्रोत्रमिति मते
दृष्टान्तमाह **वायोरिति** । नेम्याकारकर्णवलयतत्संयोगयोः प्राप्तयोराकाशां-
शनिर्द्देशादन्यथा चानिर्द्देशात् कल्पितनभोऽवच्छेदानभ्युपगमाच्च कर्णस्तत्सं-
योगो वा आकाशांश इत्युक्तं स्यादित्यर्थः । किं व्यापी संयोगो न वा ।
आद्यमनुपलम्भान्निरस्य द्वितीयं निरस्यति **न हीति** । व्याप्तिपक्षमादायाऽनु-
पलम्भस्यान्यथासिद्धिमाशङ्क्याह* **व्याप्त्यैवेति** । कर्णस्य परिच्छेदात्क्वाचि-
त्कप्रथेत्यर्थः । परिहृते ऽपि सर्वत्र प्रथनप्रसङ्गे तत्कार्यस्य सर्वत्रापत्तिमाह **न
नामेति** । अज्ञातस्य तस्य शब्दधीहेतुत्वादित्यर्थः । इदानीमंशमात्रे
साधारणं दूषणमाह **न चेति** । भिन्नयोर्नांशांशित्वमश्वमहिषवन्नाभिन्नस्यै-
कैकवन्नापि भिन्नाऽभिन्नयोस्तद्विरोधस्य समन्वयसूत्रे† उक्तत्वादित्यर्थः ।

---

* अन्यथासिद्धिमाशङ्क्येति २-३ पु॰पा॰ । † ब्र॰ सू॰ अ॰ १ पा॰ १ सू॰ ४ ।

नभोंशस्याविद्याकल्पितत्वमाक्षिप्य समाधत्ते **न च काल्पनिक इति ।** यत्काल्पनिकं न तदज्ञातदशायामस्ति रज्जुभुजङ्गवच्छ्रोत्रलक्षणांशो यदि काल्पनिकत्वेन ज्ञानमात्रप्राग्जीविकः* प्रतीतसत्ताकस्तर्हि कथमज्ञायमाने

३२२ । ५ ऽस्ति । इष्टप्रसङ्गतामाशङ्क्याह **असंश्चेति ।** अज्ञातत्वेन हि श्रोत्रं शब्दधीहेतुस्तदज्ञातदशायां यद्यसत्स्यात्ततः शब्दधीर्न स्यादित्यर्थः । अज्ञातत्वं तदानीमसिद्धमित्यापादकाऽसिद्धिमाह **अज्ञातत्वेति ।** कुतोऽसिद्धिरत आह **कार्येति ।** निगूढोऽभिसन्धिस्तमजानन् शङ्कते **कार्योत्पादादिति ।** शब्दोपलब्धिकार्यलिङ्गकानुमानाद्या श्रोत्रस्याभिव्यक्तिः सा कार्योत्पराचीति प्राक् कार्यादसच्छ्रोत्रं स्यात्तद्बलात्तु तत्सत्त्वे चक्रकं सति श्रोत्रे तत्कार्यं तस्मिन्सति श्रोत्रानुमानं ततश्च श्रोत्रसत्त्वमिति । तथा च नियतप्राक्सत्त्वात्मककारणत्वमस्य न स्यादित्यर्थः । निगूढाभिसन्धिं प्रकटयति **न पूर्वेति ।** पूर्वपूर्व†कार्यलिङ्गकानुमित्युपाधिकसत्त्ववतः श्रोत्रादिदानीन्तनकार्योदय इत्ययुक्तमजानतामपि श्रोत्रं शब्दोपलम्भादिति चेत्तत्राह **असत्यपीति ।** यथा कल्पितप्रतीतिः सत्त्वोपाधिस्तथा तत्संस्कारोऽपीत्यर्थः । एतदुक्तं भवति । अभासमानं कार्यकरं श्रोत्रमिति न वास्तवं सत्त्वं कल्प्यं भ्रमसंस्कारोपाधिकसत्त्वसंभवादिति । अथ संस्कारः कुतः । प्राक्तनानुमितेरिति चेत्तर्हि अनवस्थेति शङ्कां परिहरति **अनादित्वाच्चेति ।**

,, । ११ अथ नैकैकस्यानादित्वं न च प्रवाहो नाम वस्त्वत आह **अस्तु वेति ।** नोपपद्यते ऽर्थः परमार्थत्वं यस्यास्तस्या भावस्तत्त्वम् । कर्णनेमिमण्डलोपाध्यधीनं सत्त्वं श्रोत्रस्येति नाज्ञातसत्त्वविरोधो निरुपाधिकभ्रमेषु प्रातीतिकसत्ता इति वा परिहारः । किञ्च ।

आरभ्यं श्रोत्रमस्माकं नभसा दिग्भिरेव वा ।
वायोः सांशत्वतः प्राणो भागः सत्यश्च संभवेत् ॥

रूपाणि शरीराणि विचित्य निर्माय तेषां नामानि कृत्वा तेषु प्रविश्याभिवदन् य आस्ते एतं महान्तं पुरुषमहं वेदेत्यर्थः‡ ॥

---

* मात्रजीविक इति १ पु. पा. । † पूर्वेति सकृत् ३-२ पु. ।

‡ अत्र षष्ठं वाक्यान्वयाधिकरणं पूर्णम् । तत्र सूत्राणि ४—वाक्यान्वयात् १९ प्रतिज्ञासिद्धेर्लिङ्गमित्याश्मरथ्यः २० उत्क्रमिष्यत एवंभावादित्यौडुलोमिः २१ अवस्थितेरिति काशकृत्स्नः २२ ॥

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २३ ॥ ३२२ । १७

मध्येपादं वृत्तकीर्तनस्य प्रयोजनमाह **स्यादेतदिति** । व्यवहित-
सम्बन्धापौनरुक्त्ये फले इत्यर्थः । जन्मादिसूत्र*सङ्गत्यभिधित्सायां प्रथम-
सूत्रार्थानुवादेन यथाभ्युदयहेतुत्वादित्यादिभाष्योक्तेन किम्प्रयोजनमत आह
अत्र चेति । ब्रह्मलक्षणस्य कारणत्वस्य विचारप्रतिज्ञया सङ्गतिमुक्त्वा तेना-
स्याधिकरणस्य कारणविशेषविचारपरस्य सङ्गतिरुक्ता । आकस्मिके हि
लक्षणे तद्विशेषचिन्ताऽप्याकस्मिकी स्यादित्यर्थः । अत एवाध्यायसङ्गतिश्च ।
ब्रह्मकारणत्वाभ्युपगमेन विशेषविप्रतिपत्तिनिराससाम्यात्पादसङ्गतिः । अवशेष-
माहेत्युक्ते तमवशिष्यमाणमर्थमाह **एतदुक्तमिति** । कारणत्वमात्रं लक्षण-
मुक्त्वा यदि ब्रह्म निमित्तमेवेति पक्ष आश्रीयेत तदा जगदुपादानमभ्युपेयं न
वा । आद्यं निरस्य द्वितीयं निरस्यति† **असंभवाद्वेति** । भावकार्यस्य
गगनादेरवश्याश्रयणीये उपादाने तदधिष्ठातृत्वेन निमित्तत्वं वक्तव्यं तद-
नभ्युपगमे तन्न स्यादित्यर्थः । उभयकारणत्वपक्षे प्रधानाऽनभ्युपगमान्नाति-
व्याप्तिः । अद्वैताऽव्यासेधकत्वाच्चैवंविधकारणत्वस्य न लक्ष्याव्याप्तिर्नासम्भव
इत्यर्थः । एतदधिकरणसिद्धवत्कारेण च जन्मादिसूत्रे उभयकारणत्वव्यव-
हारः । यद्यपि तदनन्तरमिदमारब्धव्यं तथापि निर्णीततात्पर्यैर्वेदान्तैर्नि-
मित्तत्वमात्रसाधकानुमानस्य कालातीतत्वं सुवचमिति समन्वयावसाने
लिलिखे । अप्रदर्शिते तु विषये समन्वयो दुष्प्रतिपाद इति कारणतामात्रं
तत्रोक्तम् । ईक्षितृत्वश्रुतेरेकविज्ञानेन सर्वविज्ञानप्रतिज्ञानाच्च ब्रह्म निमित्त-
मेवोतोपादानमपीति संशये पूर्वत्र प्रतिज्ञां मुख्यामाश्रित्य जीवपरत्वं वाक्यस्य
निरस्तम् इह तु निमित्तोपादानभेदाद्गौणी सेति सङ्गतिमभिसन्धाय पूर्व-
पक्षमाह **ईक्षेति** । ब्रह्म न द्रव्यप्रकृतिरीक्षितृत्वात्कर्तृत्वात्स्वतन्त्रत्वादिति ३२३ । १२
यावत् । प्रभुत्वाच्च राजवत् । सुखाद्युपादाने राज्ञि साध्यवैकल्यव्यावृत्तये
प्रतिज्ञायां द्रव्यपदम् । ब्रह्म न पृथिवीप्रकृतिर्निर्गन्धत्वादभाववदित्यादिप्रयो-
गान्मत्वाऽऽह **असरूपतेति** । एतेषामनुमानानामाशङ्क्यातीतकालतां विष-
यव्यवस्थया परिहरति **आगमस्येति** । आगमे हि यत इति पञ्चमी न
प्रकृतावपि तु हेतुत्वमात्रे हेतुमनुष्येभ्योऽन्यतरस्यां रूप्य इति हेतोर्मनु-

---

* व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ २ ।   † द्वितीयनिरासमाहेति २ पु॰ पा॰ ।

ष्याच्च रूप्यप्रत्ययविधौ तत आगत इति प्रकृतस्य पञ्चम्यर्थस्य हेतोरिति विशेषणेन हेतावपि पञ्चमीज्ञापनात् । अतो न विरोध इत्यर्थः । ननु

३२३ । १९ निमित्तोपादानभेदे कथं प्रतिज्ञादृष्टान्तयोजना तत्राह **एकेति** । इत्यादिना यत्प्रतिज्ञातमित्यन्वयः । ननु प्रतिज्ञादृष्टान्तौ प्राधान्यपरौ नेत्याह **न मुख्य इति** । नन्वनुमानबाधाद्गौणता ऽत आह **न चेति** । अस्त्वागमो निमित्तत्वपरस्तत्राह **सर्वे हीति** । कथमैकान्तिकाऽद्वैतपरत्वं प्रकृतिविकाराभिधायिवेदान्तानामत आह **द्वैतेति** । कार्यस्य विवर्तत्वेनाधिष्ठानव्यतिरेकेणाभावे वेदान्तानां तात्पर्यमित्यर्थः । यदि तज्ज्ञानात्सर्वकार्यज्ञानार्थं ब्रह्मोपादानमस्तु तर्हि ततो ऽन्यन्निमित्तमत आह **न चेति** । न केवलमनुमानस्य प्रतिज्ञादिलिङ्गैर्बाधो ऽपि तु श्रुत्या ऽपीत्याह **यत इतीति** । ननु ज्ञापकाद्धेतौ पञ्चमीति तत्राह **न कारणमात्रइति** । ज्ञापनेन विध्युन्नयनाद्वरमिह प्रत्यक्षविधिप्राप्तप्रकृतित्वोपादानमिति भावः । अपि च गुणवचनेषु हेतुपञ्चमी दृश्यते जाड्याद्बद्ध इत्यादिषु । न च ब्रह्म गुणो ऽनाश्रितत्वाद् येन यत इत्यस्य गुणवचनता स्यादिति जनिकर्तुर्जायमानस्य प्रकृतिरपादानसंज्ञा भवति ततो ऽपादाने पञ्चमीति सूत्रेण प्रकृतौ स्मर्यतइत्यर्थः । भाष्यस्थश्रुतिं व्याचष्टे **दुन्दुभीति** । सोऽभिध्या ऽनागतवस्तुनीच्छा तस्या व्याख्या **संकल्प इति** । एतया ऽभिध्यया स्वातन्त्र्यं दर्शितं तेन च निमित्तत्वं श्रुतौ दर्शितमित्यर्थः । बहु स्यामित्यभिध्याया ईश्वरविषयत्वेन कार्यकारणाऽभेदसूचनादुपादानत्वमुक्तमित्यर्थः । साक्षाच्चेति सूत्रोदाहृतश्रुतावाकाशशब्दो ब्रह्मवचन इत्याह **ब्रह्मण इति** । **व्याचष्ट इति** । उपादानान्तरेत्यादिनेति शेषः । आकाशादेवेति श्रौतावधारणोक्तोपादानान्तराभावं साक्षादिति सूत्रपदेन दर्शयति इत्येवं व्यवहितान्वयेन भाष्यं योजयति **आकाशादेवेति** । भाष्ये प्रकृतिग्रहणमुपलक्षणार्थमित्यर्थः ।

३२५ । ९ निमित्तोपादानत्वे हेतुपरं यत्कारणमित्यादिभाष्यं व्याचष्टे **कर्मत्वेनेति** । **पूर्वसिद्धस्येति** । भेदेनानिर्वचनादभिन्न इवेति योजना । सामान्येन द्रव्यत्वादिना विशेषेण पृथिव्यादिना निर्वाच्यमिति निरुक्तपदव्याख्या **द्वे वाव ब्रह्मणो रूपे इति** । मूर्तामूर्ते ब्रह्माभेदेन श्रुते तत्कथं स्याद्यदि ब्रह्मोपादानं न स्यादिति व्यतिरेकं सिद्धवत्कृत्यान्वयमाह **यदीति** । तर्ह्येवंरूपं

स्यादिति शेषः । **विशेष्येति*** । साध्यं प्रति विशेष्यस्य हेतुं प्रत्याश्रयस्य च ग्राहकतयोपजीव्यागमविरोधादित्यर्थः । भास्करस्त्विह बभ्राम योनिरिति परिणामादिति च सूत्रनिर्द्देशाच्छान्दोग्यवाक्यकारेण ब्रह्मनन्दिना परिणामस्तु स्यादित्यभिधानाच्च परिणामवादो वृद्धसम्मत इति तं प्रतिबोधयति **एवं चेति** । ब्रह्मनन्दिना हि नासतोऽनिष्पाद्यत्वात्प्रवृत्त्यानर्थक्यं तु सत्त्वाविशेषादिति सदसत्पक्षप्रतिक्षेपेण पूर्वपक्षमादर्श्य न संव्यवहारमात्रत्वादिति अनिर्वचनीयता सिद्धान्तिता ऽतः परिणामस्त्विति मिथ्यापरिणामाभिप्रायं सूत्रं त्वेतदभिप्राय-मेवेत्यर्थः । उदाहरिष्यमाणश्रुतिसंमतां युक्तिमाह **न खल्विति** । परिणामः ३२६ । ९
सर्वात्मना एकदेशेन वा । नाद्यः । सर्वात्मना प्राक्तनरूपत्यागादनित्यत्वापत्तौ श्रौतनित्यत्वविरोधात् । न द्वितीयः । निष्कलश्रुत्यवगताऽनंशत्वविरोधादि-त्यर्थः । नित्यत्वादिति हेतुगर्भनिर्द्देशयोर्विवरणम् ।

एवं सौत्रपरिणामशब्दो विवर्तपरतया योजितः । इदानीं तु यथाश्रु-तमाश्रित्य परिणामत्वेन लोकसिद्धस्य मुक्त्यसहत्वेन विवर्ततामाह **न च मृद इति** । मृद एव सत्यत्वावधारणात्कार्यमिथ्यात्वं श्रुतिराह एकमे-वाद्वितीयमित्यादौ साक्षान्नेति नेतीत्यादौ निषेधेन । ननु सृष्टिश्रुतेः सप्रप-ञ्चता ऽस्तु नेत्याह **न हीति** । उपक्रमाद्यवगततात्पर्यमहावाक्यमध्यस्था-ऽवान्तरवाक्यस्य प्रधानानुरोधेन मायामयसृष्टिविषयत्वमित्यर्थः ।

अत्र कश्चिदाह भ्रान्तौ ब्रह्मोपादानत्वे पूर्वपक्ष एव समर्थितः स्याद् निर्विकारत्वश्रुतयः प्राक् सृष्टेरविकारितामाहुरिति । तन्न । वाक्याभासोत्थ-भ्रममात्रसिद्धं ब्रह्मोपादानत्वमिति हि पूर्वपक्षाशयः स्वप्नवदर्थक्रियास-मर्थप्रपञ्चास्पदत्वं सिद्धान्तसंमतमिति भेदोपपत्तेः । प्रलयश्रुतिभिरेव प्राग-विकारित्वसिद्धेर्न निर्विकारश्रुतिस्तत्परा निर्विकारित्वं विकारात्यन्ताभावो ब्रह्मधर्मः स चानिर्वाच्यो विकारमनिर्वाच्यं न सहते सत्य इव तव घटा-भावः सत्यघटं न चाद्वैतं व्याहन्तीति† ॥

---

* विशेष्येतीति नास्ति १ पु॰ ।

† अत्र सप्तमम् प्रकृत्यधिकरणं पूर्णम् । तत्र सूत्राणि ५-प्रकृतिश्च प्रतिज्ञादृष्टान्ता-नुपरोधात् २३ अभिध्योपदेशाच्च २४ साक्षाच्चोभयाम्नानात् २५ आत्मकृतेः परिणा-मात् २६ योनिश्च हि गीयते २७ ॥

३२७ । १ **एतेन सर्वे व्याख्याता व्याख्याताः ॥ २८ ॥**

अस्यातिदेशस्य जन्मादिसूत्रेणाक्षेपसङ्गतिं दर्शयन् अध्यायसङ्गतिमाह **स्यादेतदिति** । ब्रह्मोररीकृत्य कारणान्तरप्रत्यवस्थानात् पादसङ्गतिः । **उपप्लवमानत्वाद्** बुद्धौ प्रतिभासमानत्वात् ।

जगतः प्रकृतिर्ब्रह्म यदि स्यान्मृन्निदर्शनात् ।
अणवादयो ऽपि किं न स्युर्वटधानानिदर्शनात् ॥

इत्यवान्तरसङ्गत्यधिकशङ्कं । न्यग्रोधफलमाहरेति भिन्धीति किमत्र पश्यसीति अण्व्य इमा धाना इति आसामेकां भिन्धीति किमत्र पश्यसीति न किं चन भगव इति एतस्य सोम्यैषो ऽणिम्न एवं महान्न्यग्रोधस्तिष्ठतीति जगतः प्रागवस्थाया दृष्टान्तः श्रूयते। अत्र न किं चनेति शून्यस्वभाववादावणिम्न इत्यदृश्यमानाणुनिर्देशादणुवादश्च भान्ति दार्ष्टान्तिका इति । सिद्धान्तस्तु

मृदादयो हि दृष्टान्ताः प्रतिज्ञामनुरुन्धते ।
धानास्तामुपरुन्धाना भक्तिमार्गं प्रपेदिरे ॥

इह खल्वेकविज्ञानात्सर्वविज्ञानप्रतिज्ञातं प्रधानं नासदादिपक्षेषु कल्पते अतो न किं चनेत्यनभिव्यक्तिरणिम्न इति सूक्ष्मता चोक्तेति । अध्या-
„ । ४ यार्थं सङ्कलयति **प्रतिज्ञेति** । प्रथमसूत्रे विचारप्रतिज्ञा । लक्षणं द्वितीये । लक्ष्यमाणे समन्वयः चतुर्थे । स च तत्रैवेति शिष्टायां त्रिपाद्यां नान्यत्रेति चतुर्थपादे । इत्येतत्सर्वमत्राध्याये साधितमित्यर्थः* ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदनुभवानन्दपूज्यपादशिष्यभगवदमलानन्दविरचिते वेदान्तकल्पतरौ प्रथमाध्यायस्य चतुर्थः पादः समाप्तः ॥ सम्पूर्णश्च समन्वयाख्यः प्रथमो ऽध्यायः ॥

	अस्मिन् पादे	आदितः
अधिकरणानि	८	४०
सूत्राणि	२८	१३४

---

* अत्र अष्टमम् सर्वव्याख्यानाधिकरणं पूर्णम् । तत्र सूत्रम् १–एतेन सर्वे व्याख्याता व्याख्याताः २८ इति ॥